भारद्वाजोद्द्योतकरकृतं

न्यायभाष्यवार्तिकम्

श्रीमता अनन्तलालठक्कुरेण संस्कृतम्



NYĀYABHĀṢYAVĀRTTIKA
OF BHĀRADVĀJA UDDYOTAKARA

Edited by ANANTALAL THAKUR

ALSO FROM ICPR

Cārvāka/Lokāyata:
An Anthology of Source Materials and Some Recent Studies
edited by DEBIPRASAD CHATTOPADHYAYA
Rs 250

The Mahābhāṣya of Patañjali
SURENDRANATH DASGUPTA
Rs 160

Mīmāṃsāmañjarī
R. THANGASWAMI SARMA
Rs 375

Gaṅgeśa's Theory of Indeterminate Perception *(Nirvikalpakavāda)*
SIBAJIBAN BHATTACHARYYA
Part One: Rs 150 Part Two: Rs 80

A CRITICAL EDITION OF ANCIENT NYĀYA TEXTS
Nyāyabhāṣya
of Vātsyāyana
edited by ANANTALAL THAKUR
In preparation

Nyāyavārttikatātparyaṭīkā
of Vācaspatimiśra
edited by ANANTALAL THAKUR
Rs 800

Nyāyavārttikatātparyapariśuddhi
of Udayanācārya
edited by ANANTALAL THAKUR
Rs 680

Nyāyakusumāñjali
of Udayanācārya
With translation and explanation by
N.S. DRAVID
Volume 1: Rs 550

MAX. RETAIL PRICE INCLUSIVE OF ALL TAXES
€35-00
ISBN 81-85636-31-1

NYĀYABHĀṢYAVĀRTTIKA

OF

BHĀRADVĀJA UDDYOTAKARA

NYĀYABHĀṢYAVĀRTTIKA

OF

BHĀRADVĀJA UDDYOTAKARA

Edited by

ANANTALAL THAKUR

INDIAN COUNCIL OF PHILOSOPHICAL RESEARCH

NEW DELHI

भारद्वाजोद्द्योतकरकृतं

न्यायभाष्यवार्त्तिकम्

श्रीमता अनन्तलालठक्कुरेण संस्कृतम्

भारतीयदार्शनिकानुसंधानपरिषत्प्रकाशितम्
१९९७

First Published 1997

© Indian Council of Philosophical Research 1997

All rights reserved. No part of this publication may be reproduced in any form, or by any means, without written permission of the publisher.

Published by Member Secretary for
INDIAN COUNCIL OF PHILOSOPHICAL RESEARCH
Rajendra Bhavan (Fourth Floor), 210 Deen Dayal Upadhyaya Marg
New Delhi 110 002

Distributed by
MUNSHIRAM MANOHARLAL PUBLISHERS PVT. LTD.
54 Rani Jhansi Road, New Delhi 110 055

ISBN: 81-85636-31-1

Laser Typeset by
Quick Prints, New Delhi 110 003

Printed in India
at Gopsons Paper Ltd.
A-28, Sector IX, Noida 201 301

मातुः सौदामिनीदेव्याः
पितुर्गोविन्दशर्मणः ।
अधन्यतनयस्येयं
नतिर्भवतु नन्दिनी ।।

PREFACE

The *Nyāyabhāṣyavārttika* of Bhāradvāja Uddyotakara is being presented as the second volume of the Nyāyacaturgranthikā project. A considerable activity took place in the field of Indian logic after the days of Vātsyāyana. Several sub-commentaries on the *Nyāyabhāṣya* came into existence, some of them preceding Uddyotakara and many more following him. They are mostly lost and are known only through quotations and references in subsequent philosophical literature. Uddyotakara survived as the only representative sub-commentator on the *Nyāyabhāṣya*. His *Nyāyabhāṣyavārttika* (for short, *N.V.*) not only elucidated the Nyāya position, but also added to the eminence of the system, explained the prevalent Nyāya views and sometimes criticised the weaknesses of earlier interpretations suggesting some important changes. As a result, the *N.V.* was acclaimed as the main text of the vigorous youthful phase of the śāstra. It is well known that Indian logic flowed in three parallel streams—the Brāhmaṇic, the Buddhist and the Jaina. The rivalry between the Akṣapāda school and the Buddhists, which began quite early, attained a huge dimension by Uddyotakara's time.

In the reconstruction of the history of Buddhist logic Uddyotakara would always play a very important role. It is through him and Vācaspati that Dignāga's views remained extant among the traditional philosophers, after the demolition of the Buddhist universities. The original texts became inaccessible as they were hidden in far-off lands like Tibet and China. Now that the forgotten texts, whether in original or in Chinese or Tibetan versions, have come back to India, a complete view of the joint development of the Brāhmaṇic and Buddhist logic is within our reach. Serious attempts are on to reconstruct the *Pramāṇasamuccaya* of Dignāga in Sanskrit. We are sure that the *N.V.* will play a very important role in this respect.

Uddyotakara was thoroughly conversant with the works of Nāgārjuna, Vasubandhu and Dignāga, namely, the *Mādhyamikakārikā, Abhidharmakośa, Vijñaptimātratāsiddhi, Vādavidhi, Pramāṇasamuccaya,* etc. But his references to the Buddhist masters and their works are mostly oblique. Vācaspati, of course, fills up the lacunae to our great advantage. We may now visualise a critical and comparative study of the classical texts of both the schools. In this context I am extremely happy to mention that Dr Sanjit Kumar Sadhukhan, my friend and colleague, is currently engaged in the reconstruction of the *Pramāṇasamuccaya* of Dignāga in Sanskrit from Tibetan and Indian sources. I wish him success in completing his mission expeditiously.

Coming back to Uddyotakara, we now realise why Vācaspati had chosen *N.V.* to the exclusion of the entire corpus of sub-commentaries on the

Nyāyabhāṣya including the *Nyāyamañjarī* of Trilocana, preceptor of Vācaspati himself. This tempts us to suggest that the *N.V.* must have been the most comprehensive and philosophically the richest among all the sub-commentaries. Vācaspati, both in the beginning of the *Tātparyaṭīkā,* as well as at the end of its fourth chapter and also at the conclusion of the text itself attaches great importance to the age-old views of Uddyotakara overcast with the cloud of criticism, and takes pains to remove the prevailing misconception about them.

The historians of the Indian logic may kindly note that there was a big controversy among the logicians of Kashmir before the advent of Bhāsarvajña. According to Cakradhara, one group called Vyākhyātṛs, headed by Pravara, upheld the views of Vātsyāyana while the other one known as that of the Ācāryas including Adhyayana, author of the *Ruciṭīkā* on the *N.V.,* supported the position of Uddyotakara. Jayanta Bhaṭṭa seems to have belonged to the earlier group. Bhāsarvajña, in his *Nyāyabhūṣaṇa,* shows deep influence of Tamo'ri who is none other than Uddyotakara himself.

For centuries the *N.V.* existed through manuscripts and is now available at least in three printed editions. It is also available in English and Hindi translations. The present edition attempts to provide a critical text based on some untapped source material in which a good number of variants had crept in through the ages. We chose the readings best suited to the context, but included the variants in the footnotes, allowing the readers the benefit of comparison and contrast. It gives me immense satisfaction that this wealth of material was found useful in filling up many a gap, especially in reconstructing the entire *N.V.* on I.i.9, that so long remained hopelessly fragmented. I shall feel amply rewarded if my association with Uddyotakara's *Nyāyabhāṣyavārttika,* for more than five decades, turns out to be of some help to the students of the Nyāyaśāstra.

Most humbly I remember my gurus, my friends and well-wishers, my beloved students and my *kalyāṇamitras* including Dr V. Raghavan, Professor Chintaharan Chakravarty and Dr J.S. Jetly along with my friends at the Indian Council of Philosophical Research but for whose generous help this edition of the *Nyāyabhāṣyavārttika* would have never been published. Dr Sanjit Kumar Sadhukhan, as usual, has helped me in reading the proofs and preparing the indices.

However, I alone am responsible for defects and errors. I will be grateful to scholars for their valuable suggestions for further improvement of the text.

Gurupurṇimā 1996 ANANTALAL THAKUR

।। सूचीपत्रम् ।।

प्रथमाध्याये प्रथमाह्निकम्

१. अभिधेयप्रयोजनसंबन्धप्रकरणम् १-२५
२. प्रमाणलक्षणप्रकरणम् २५-५७
३. प्रमेयलक्षणप्रकरणम् ५८-८३
४. न्यायपूर्वाङ्गलक्षणप्रकरणम् ८३-९७
५. न्यायाश्रयसिद्धान्तलक्षणप्रकरणम् ९८-१०२
६. न्यायलक्षणप्रकरणम् १०२-१३०
७. न्यायोत्तराङ्गलक्षणप्रकरणम् १३१-१३७

प्रथमाध्याये द्वितीयाह्निकम्

८. कथालक्षणप्रकरणम् १३८-१५५
९. हेत्वाभासलक्षणप्रकरणम् १५५-१६८
१०. छलप्रकरणम् १६८-१७१
११. पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम् १७२-१७३

द्वितीयाध्याये प्रथमाह्निकम्

१२. संशयपरीक्षाप्रकरणम् १७४-१७९
१३. सामान्येन प्रमाणपरीक्षाप्रकरणम् १७९-१९४
१४. प्रत्यक्षलक्षणपरीक्षाप्रकरणम् १९४-२००
१५. प्रत्यक्षस्यानुमानत्वपरीक्षाप्रकरणम् २००-२०८
१६. अवयवपरीक्षाप्रकरणम् २०८-२३७
१७. अनुमानपरीक्षाप्रकरणम् २३७-२३८
१८. वर्तमानकालपरीक्षाप्रकरणम् २३९-२४२
१९. उपमानपरीक्षाप्रकरणम् २४३-२४५
२०. शब्दसामान्यपरीक्षाप्रकरणम् २४५-२५१
२१. शब्दविशेषपरीक्षाप्रकरणम् २५१-२६०

द्वितीयाध्याये द्वितीयाह्निकम्

२२. प्रमाणचतुष्टपरीक्षाप्रकरणम् २६१-२६७
२३. शब्दानित्यत्वप्रकरणम् २६८-२९४
२४. शब्दपरिणामप्रकरणम् २९४-२९८
२५. शब्दशक्तिपरीक्षाप्रकरणम् २९८-३१८

तृतीयाध्याये प्रथमाह्निकम्

२६. इन्द्रियभेदप्रकरणम् ३१९-३३०
२७. शरीरव्यतिरेक्यात्मप्रकरणम् ३३०-३३७
२८. चक्षुरद्वैतप्रकरणम् ३३७-३४२
२९. आत्मनो मनोव्यतिरेकित्वप्रकरणम् ३४२-३४३
३०. आत्मनित्यत्वप्रकरणम् ३४३-३४८
३१. शरीरपरीक्षाप्रकरणम् ३४८-३५१
३२. इन्द्रियभौतिकत्वप्रकरणम् ३५१-३६३
३३. इन्द्रियनानात्वप्रकरणम् ३६४-३७०
३४. अर्थपरीक्षाप्रकरणम् ३७१-३७५

तृतीयाध्याये द्वितीयाह्निकम्

३५. बुद्ध्यनित्यताप्रकरणम् ३७६-३८३
३६. औपोद्घातिकं क्षणभङ्गप्रकरणम् ३८३-३९५
३७. बुद्धेरात्मगुणत्वप्रकरणम् ३९५-४०५
३८. बुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ४०६-४०८
३९. बुद्धेः शरीरगुणव्यतिरेकप्रकरणम् ४०८-४१३
४०. मनःपरीक्षाप्रकरणम् ४१३-४१४
४१. शरीरस्यादृष्टनिष्पाद्यत्वप्रकरणम् ४१४-४२२

चतुर्थाध्याये प्रथमाह्निकम्

४२. प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ४२३-४२४
४३. दोषत्रैराश्यप्रकरणम् ४२४-४२७
४४. प्रेत्यभावपरीक्षाप्रकरणम् ४२८-४२९

४५. शून्यतोपादानप्रकरणम् ४३०-४३१
४६. ईश्वरोपादानताप्रकरणम् ४३२-४४१
४७. आकस्मिकत्वप्रकरणम् ४४१-४४३
४८. सर्वानित्यताप्रकरणम् ४४३-४४५
४९. सर्वनित्यत्वनिराकरणप्रकरणम् ४४५-४४८
५०. सर्वपृथक्त्वनिराकरणप्रकरणम् ४४८-४५१
५१. सर्वशून्यत्वनिराकरणप्रकरणम् ४५१-४५४
५२. संख्यैकान्तवादनिराकरणप्रकरणम् ४५४-४५६
५३. फलपरीक्षाप्रकरणम् ४५६-४६२
५४. दुःखपरीक्षाप्रकरणम् ४६२-४६४
५५. अपवर्गपरीक्षाप्रकरणम् ४६४-४६९

चतुर्थाध्याये द्वितीयाह्निकम्

५६. तत्त्वज्ञानोत्पत्तिप्रकरणम् ४७०-४७२
५७. प्रासङ्गिकमवयवावयविप्रकरणम् ४७२-४७९
५८. निरवयवत्वप्रकरणम् ४७९-४८६
५९. बाह्यार्थभङ्गनिराकरणप्रकरणम् ४८७-४९२
६०. तत्त्वज्ञानविवृद्धिप्रकरणम् ४९३-४९६
६१. तत्त्वज्ञानपरिपालनप्रकरणम् ४९६

पञ्चमाध्याये प्रथमाह्निकम्

६२. सत्प्रतिपक्षदेशनाभासप्रकरणम् ४९७-४९९
६३. साध्यदृष्टान्तधर्मविकल्पप्रभवोत्कर्षसमादिजातिषट्कप्रकरणम् ५००-५०१
६४. प्राप्त्यप्राप्तियुगनद्धवाहिविकल्पोपक्रमजातिद्वयप्रकरणम् ५०२-५०३
६५. प्रसङ्गप्रतिदृष्टान्तसमजातिद्वयप्रकरणम् ५०३-५०५
६६. अनुत्पत्तिसमप्रकरणम् ५०५-५०६
६७. संशयसमप्रकरणम् ५०६-५०७
६८. प्रकरणसमप्रकरणम् ५०७-५०८
६९. अहेतुसमप्रकरणम् ५०८
७०. अर्थापत्तिसमप्रकरणम् ५०९

७१. अविशेषसमप्रकरणम् ५०९-५१०
७२. उपपत्तिसमप्रकरणम् ५१०-५११
७३. उपलब्धिसमप्रकरणम् ५११
७४. अनुपलब्धिसमप्रकरणम् ५१२
७५. अनित्यसमप्रकरणम् ५१२-५१४
७६. नित्यसमप्रकरणम् ५१४-५१५
७७. कार्यसमप्रकरणम् ५१५-५१६
७८. षट्पक्षीरूपकथाभासप्रकरणम् ५१६-५१७

पञ्चमाध्याये द्वितीयाह्निकम्

७९. प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम् ५१८-५२३
८०. प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कप्रकरणम् ५२३-५२४
८१. स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणम् ५२४-५२६
८२. पुनरुक्तनिग्रहस्थानप्रकरणम् ५२६
८३. उत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम् ५२७-५२८
८४. दोषनिरूप्यमतानुज्ञादिनिग्रहस्थानत्रिकप्रकरणम् ५२८-५२९
८५. कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम् ५२९-५३०

विशिष्टनामसूची ५३१-५३२

अवतरणसूची ५३३-५३६

न्यायभाष्यवार्त्तिकम्

प्रथमाध्याये प्रथमाह्निकम्

यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद।
कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः।।

[अभिधेयप्रयोजनसम्बन्धप्रकरणम्]

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णय-वादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निः-श्रेयसाधिगमः ।।१।१।१।।

प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्येतच्छास्त्रस्यादिसूत्रम् तस्याभि-सम्बन्धवाक्यम्, प्रमाणतोऽर्थप्रतिपत्तावित्येवमादि तस्यानुसन्धानवाक्यम्, शास्त्रस्य पुरुषश्रेयोऽभिधायकत्वात्। शास्त्रं पुनः प्रमाणादिवाचकपदसमूहो व्यूहविशिष्टः। पदं पुनर्वर्णसमूहः। पदसमूहः सूत्रम्। सूत्रसमूहः प्रकरणम्। प्रकरणसमूह आह्निकम्। आह्निकसमूहोऽध्यायः। पञ्चाध्यायी शास्त्रम्। तत्पदार्थाः प्रमाणादयः। तस्य शास्त्रस्य पदानामर्थाः प्रमाणादयः षोडशात्मानः। तच्छास्त्रं पुरुषश्रेयोऽभिधत्ते। प्रत्यक्षा-नुमानाधिगतवस्तुतत्त्वान्वाख्यानं शास्त्रधर्मः। तस्य विषयः प्रत्यक्षानुमानानधि-गतवस्तुतत्त्व आध्यात्मिकशक्तिसम्पद्युक्तोऽन्तेवासी। पुरुषः पुनश्चतुर्धा भिद्यते, प्रतिपन्नोऽप्रतिपन्नः सन्दिग्धो विपर्यस्तश्चेति। तत्र प्रतिपन्नः प्रतिपादयिता। इतरे सापेक्षाः सन्तः[१] प्रतिपाद्याः। ते यदेन्द्रियार्थसन्निकर्षमपेक्षन्ते तदा प्रत्यक्षेण, यदा

१. सन्त om J

लिङ्गदर्शनस्मृत्याद्यपेक्षन्ते तदानुमानेन। यदा पुनरुपदेशमपेक्षन्ते तदा शास्त्रं प्रवर्तते। श्रेयः पुनः सुखमहितनिवृत्तिश्च। तच्छ्रेयो भिद्यमानं द्वेधा व्यवतिष्ठते दृष्टादृष्टभेदेन। दृष्टं सुखम्। अदृष्टमहितनिवृत्तिः। अहितनिवृत्तिरप्यात्यन्तिकी चानात्यन्तिकी च। अनात्यन्तिकी कण्टकादेर्दुःखसाधनस्य परिहारेण। आत्यन्तिकी पुनरेकविंशतिप्रभेदभिन्नदुःखहान्या[१]। एकविंशतिप्रभेदभिन्नं पुनर्दुःखम्, शरीरं षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेति। शरीरं दुःखायतनत्वाद् दुःखम्। इन्द्रियाणि विषया बुद्धयश्च तत्साधनभावात्। सुखं दुःखानुषङ्गात्। दुःखं स्वरूपत इति। तस्य हानिर्धर्माधर्मसाधनपरित्यागेन। अनुत्पन्नयोर्धर्माधर्मयोरनुत्पादेन, उत्पन्नयोश्चोपभोगात् प्रक्षयेणेति। पुरुषा रागादिमन्तो वीतरागाश्च। तत्र रागो विषयाभिष्वङ्गलक्षणः[२]। स येषामस्ति ते रागादिमन्तः। वैराग्यं पुनर्भोगानभिष्वङ्गलक्षणम्। तद्येषामस्ति ते वीतरागाः। प्रवृत्तेर्द्वैविध्यं पुरुषभेदानुविधानेन। तेषां पुरुषाणां याः प्रवृत्तयस्ताः पुरुषभेदमनुविधीयमाना उभयरूपा भवन्ति। वीतरागप्रवृत्तिरेकधा। तत्र या वीतरागाणां प्रवृत्तिः सा खल्वेकरूपा अनिष्टप्रतिषेधार्था अनिष्टं हास्याम इत्येवमेव प्रवर्तन्ते, न पुनरेषां क्वचित् अभिष्वङ्गोऽस्तीति। रागादिमत्प्रवृत्तिस्तु द्विरूपा। य एते[३] रागादिमन्तस्तेषां याः प्रवृत्तयस्ता द्विविधा भवन्ति, इष्टानिष्टविषयाधिगमप्रतिषेधार्थाः। इष्टमाप्स्यामीति रागात्[४] प्रवर्तते। अनिष्टं हास्यामीति द्वेषान्निवर्तते[५]। प्रवृत्तेरपि[६] द्वैविध्यं भवति समर्थासमर्थभेदात्। या खलु रागादिमत्प्रवृत्तिः सा समर्था चासमर्था च भवति। इष्टमाप्स्यामीति प्रवर्तमानो यदा प्राप्नोति तदा समर्था, अनिष्टं हास्यामीति प्रवर्तमानो यदा जहाति तदापि समर्था। यदा[७] विपर्ययस्तदासमर्थेति।

तत् पुनः प्रवृत्तेर्द्वैविध्यं प्रमाणस्यार्थवदनर्थकत्वात्। प्रमाणं तावदर्थपरिच्छेदकम्। प्रमाणसामान्यात् प्रमाणप्रतिरूपकमपि प्रमाणमित्युपचर्यते। किं पुनः

---

१. भिन्न om J २. °षङ्ग° C ३. ये तु C ४. सक्तः C ५. प्रवर्ततेJ
६. रागादिमत् added C ७. अपि added J

प्रमाणसामान्यं प्रमाणाभासस्य? सामान्यपरिच्छेदकत्वम्। प्रमाणेनापि सामान्यं परिच्छिद्यते, प्रमाणाभासेनापि। सोऽयं प्रमाता यदा प्रमाणेनार्थमवधार्य प्रवर्तते तदास्य प्रवृत्तिः समर्था भवति। यदा पुनः प्रमाणाभासेनावधार्य प्रवर्तते तदासमर्था। तस्याः पुनरर्थवत्त्वम्, प्रमाणतोऽर्थप्रतिपत्ताविति**भाष्यम्**[१]। परस्परापेक्षित्वादुभयासिद्धिरिति चेत्—न, अनादित्वात्। यदि प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यम्, यदि वा प्रवृत्तिसामर्थ्यात् प्रमाणतोऽर्थप्रतिपत्तिः, किं पूर्वं किं वा पश्चादिति वाच्यम्। यदि तावत् प्रमाणतः पूर्वमर्थप्रतिपत्तिः, प्रवृत्तिसामर्थ्यमन्तरेण किमिति प्रतिपद्यते? अथ पूर्वं प्रवृत्तिसामर्थ्यमनवधार्यार्थे[२] किमिति प्रवर्तते? तस्मात् प्रवृत्तेः प्रमाणतोऽर्थप्रतिपत्तेर्वा पूर्वापरभावो न कल्पत[३] इति। तच्च नैवम्। कस्मात्? अनादित्वात्। अनादिरयं संसार इति पूर्वाभ्यस्तसूत्रे[४] प्रतिपादयिष्यामः। आदिमति च संसारे एष दोषः, किं पूर्वं प्रमाणतोऽर्थप्रतिपत्तिः, उताहो[५] पूर्वं प्रवृत्तिसामर्थ्यमिति। प्रमाणप्रवृत्त्योर्वा बलाबलजिज्ञासायामुभयसामर्थ्यप्रदर्शनार्थं[६] वाक्यम्। लोकः खलु प्रवर्तमानः प्रमाणेनार्थमवधार्य[७] प्रवर्तते। स च तथा प्रवर्तमानः फलमुपलभते। तत्रेदं चिन्त्यते, किं प्रमाणतोऽर्थप्रतिपत्तिः समर्था उताहो[८] प्रवृत्तिरिति। उभयं समर्थम्, तन्नान्तरीयकत्वात् फलस्य। अस्य[९] चार्थस्योपदर्शनार्थं वाक्यमिति लोकवृत्तानुवादो वा। सर्वः प्रमाता प्रमाणेनार्थमवधार्य प्रवर्तमानः फलमुपलभत इति लोकवृत्तं तद्वाक्येनानूद्यत इति।

हेयहानोपायाधिगन्तव्यभेदाच्चत्वार्यर्थपदानि[१०]। हेयं दुःखं तद्धेतुश्च। दुःखमुक्तम्। [११]दुःखहेतुरविद्यातृष्णे धर्माधर्माविति। हानं तत्त्वज्ञानम्। [१२]तत्पुनर्यथावस्थितपदार्थाधिगतिः, तच्च प्रमाणम्। उपायः शास्त्रम्। तदप्युक्तम्। अधिगन्त-

---

१. वाक्यम् J २. अर्थं J ३. कल्प्यते C ४. न्या॰ सू॰ ३।१।१९ ५. आहोस्वित् C ६. प्रतिपादनार्थं C ७. अर्थम् om C ८. आहोस्वित् C ९. ॰त्वात्।। तस्य फलस्य अस्य C १०. इति added C ११. दुःख om C १२. यथार्थाव॰ C

व्योऽपवर्गः। स पुनरात्यन्तिको दुःखाभावः। एतस्मिंश्च चतुर्वर्गे प्रमाणस्य प्राधान्यप्रदर्शनार्थं चेति। कथं पुनरनेन वाक्येन [१]प्रमाणादिचतुर्वर्गः प्रदर्श्यत इति। प्रमाणप्रमेयाधिगतयः श्रुतिगम्याः, प्रमाता तन्नान्तरीयकत्वात्। न हि प्रमातारमन्तरेण प्रमाणं संभवति[२]। तदिदं वाक्यमवयवश उपन्यस्य वर्ण्यते। तत्र प्रमाणत इति तसिर्वचनं[३] वचनविभक्तिव्याप्तिज्ञापनार्थम्। प्रमाणत इतीयं निमित्तपञ्चमी। अस्याभिधानं वचनव्याप्त्यर्थं विभक्तिव्याप्त्यर्थं च। कथं पुनः पञ्चमीव्यतिरेकेण तसिर्लभ्यते? लभ्यत इत्याह[४]—आद्यादावुपसंख्यानादिति। तत्[५] किं सिद्धं भवति? वचनव्याप्त्या संप्लवो व्यवस्था च। प्रमाणेन प्रमाणाभ्यां प्रमाणैः [६]प्रतिपत्तिरिति संप्लवो गम्यते। प्रमाणेनैवेति व्यवस्था। विभक्तिव्याप्त्या हेतुकरणभावः। प्रमाणादर्थाधिगतिर्भवतीति हेतुत्वम्। प्रमाणेनार्थं साधयतीति साधकतमत्वात् करणार्थः। संप्लवानुपपत्तिर्विशिष्टविषयत्वादिति चेत्—न, अनभ्युपगमात्। स्यान्मतिरेषा विशिष्टविषयाणि प्रमाणानि, विशेषविषयं प्रत्यक्षम्, सामान्यविषयमनुमानमिति। एतावच्चाधिगन्तव्यम्[७]। यदुत सामान्यं विशेषश्च, न च सामान्यविषयं प्रत्यक्षं न जात्वनुमानं विशेषविषयमिति? एतच्च न, अनभ्युपगमात्। न तावत् प्रमाणद्वयं प्रतिपद्यामहे। न विषयद्वयम्। नाप्यसंकरम्। किं कारणम्? प्रमाणानि तावच्चत्वारि। विषयश्च सामान्यविशेषतद्भेदात् त्रेधा। संकरोऽप्येकस्य सर्वैः प्रमाणैरधिगतेरिन्द्रियवदिति। इन्द्रियं खलु अर्थप्रकाशकत्वात् प्रमाणम्। तस्य व्यवस्था संकरश्च। व्यवस्था गन्धादिषु। संकरः पृथिव्यादिषु, द्वीन्द्रियग्राह्यत्वात्। सत्तायां गुणत्वे च सार्वेन्द्रियं ज्ञानमिति। अधिगतत्वाद् वैयर्थ्यमिति चेत्—न, अन्यथा तदधिगतेः। [८]स्यान्मतम्, यदि सङ्कीर्येरन् प्रमाणानि, नन्वेकेन प्रमाणेनाधिगतेऽर्थे द्वितीयं प्रमाणं व्यर्थमापद्येत। अधिगतं चार्थमधिगमयता प्रमाणेन

---

१. प्रमात्रादीति J २. इति added J ३. °र्वचनविभक्तिव्याप्तिप्रदर्शनार्थः C ४. इत्याह om C ५. तत् om J ६. प्रतिपत्तिः om C ७. °मानमिति। एतच्च...यत् सामा° C ८. स्यान्मतम् om J

पिष्टपेषणं स्यात्। न, अन्यथा [१]तदधिगतेः। न ब्रूमो यथा प्रत्यक्षेणार्थोऽधिगम्यते तथानुमानादिभिरपीति। अन्यथा प्रत्यक्षेणेन्द्रियसंबद्धः, इन्द्रियासंबद्धोऽनुमानेन, संज्ञासंज्ञिसंबन्धप्रतिपत्तिरुपमानेन, शब्दोल्लेखेनागमेनेति। विषयान्तरे व्यवस्थादर्शनाच्च। न च सर्वस्मिन्नर्थे संप्लवोऽस्तीत्यतो न वैयर्थ्यमिति। तस्माद् व्यवस्थितमेतत् तसिर्वचन वचनविभक्तिव्याप्तिज्ञापनार्थमिति।

प्रमाणस्वरूपावधारणं कर्तव्यम्[२]। किं पुनः प्रमाणस्य प्रमाणत्वम्? किं चोक्तं भवति प्रमाणमिति? उपलब्धिहेतुः प्रमाणम्, उपलब्धिहेतुत्वं प्रमाणत्वम्। यदुपलब्धिनिमित्तं तत्प्रमाणमिति। समानत्वादलक्षणमिति चेत्? यद्युपलब्धिहेतुः प्रमाणम्, ननु प्रमातृप्रमेययोरप्युपलब्धिहेतुत्वात् प्रमाणत्वं प्रसज्येत, विशेषो वा वक्तव्य इति। अयं विशेषः, प्रमाणे प्रमातृप्रमेययोश्चरितार्थत्वात्। प्रमाणे प्रमाता प्रमेयं च चरितार्थम्। अचरितार्थं तु प्रमाणम्। अतस्तदेवोपलब्धिसाधनमिति। अकरणा प्रमाणोत्पत्तिरिति चेत्? [३]नेन्द्रियार्थसन्निकर्षस्य करणभावात्। यदि प्रमातृप्रमेयाभ्यां प्रमाणं जन्यते अकरणा तर्हि प्रमाणोत्पत्तिः प्राप्नोति। न, इन्द्रियार्थसन्निकर्षस्य करणभावात्, नाकरणा प्रमाणोत्पत्तिः[४]। प्रमाणोत्पत्ताविन्द्रियार्थसन्निकर्षमपेक्षमाणाभ्यां प्रमातृप्रमेयाभ्यां प्रमाणं जन्यत इति नाकरणप्रमाणोत्पत्तिप्रसङ्गः। यदि तर्हि प्रमाणोत्पत्ताविन्द्रियार्थसन्निकर्षमपेक्षेते प्रमातृप्रमेये, अथ तर्हि इन्द्रियार्थसन्निकर्षोत्पत्तौ किमपेक्षेते इति? तस्मिन्नपीन्द्रियमित्यनादिः कर्तृकरणभावः। यद्यत् पश्चाद् भवति, तत्तत् पूर्वभाविनमपेक्षत[५] इत्यनादिः कर्तृकरणभावो द्रष्टव्य इति। यदि प्रमातृप्रमेयाभ्यां सद्भ्यां प्रमाणं जन्यते, ततः प्रमाणमन्तरेण प्रमातृप्रमेयभावस्यासिद्धत्वात् प्रमातृत्वं प्रमेयत्वं चानुपपन्नमिति। कथम्? प्रमाणमिति। यथा कारकशब्दोऽयं तथा प्रमेयं प्रमातेति च। न च कारकशब्दाः क्रियासंबन्धमन्तरेणात्मानं लभन्त इति[६]। न च द्रव्यमात्रं कारकम्,

---

१. तत् om C २. कर्तव्यम् om J ३. नेन्द्रियार्थ...भावाद् om C
४. नाकरणा प्रमाणोत्पत्तिः om J ५. °भाविभिरपेक्ष्यते J ६. इति om J

न च क्रियामात्रमिति। कारकशब्दो हि प्रवर्तमानः क्रियासाधने क्रियाविशेषयुक्ते प्रवर्तते। प्रमातृप्रमेयशब्दौ च कारकशब्दौ तावन्तरेण क्रियां न प्रवर्तेयातामिति। न, पाचकादिशब्दवत् त्रिकालविषयत्वात्। न ब्रूमः क्रियासंबन्धेनैव कारकशब्दाः प्रवर्तन्त इति। अपि तु त्रिकालविषया एते। यदि क्रियासंबन्धनिमित्ता एव[१] स्युः, न क्रियामन्तरेण प्रवर्तेरन्। क्रियासंबन्धमन्तरेण तु प्रवर्तन्ते। किं पुनर्निमित्तम्? सामर्थ्यम्। तच्च त्रिष्वपि कालेष्वस्तीति। तस्मादुपपन्नं प्रमातृप्रमेयाभ्यां प्रमाणं जन्यते[२], तदुपलब्धिसाधनमिति। साधकतमत्वाद् वा न प्रसङ्गः। न चायं प्रसङ्गोऽस्ति प्रमाता च प्रमेयं चोपलब्धिनिमित्तत्वात् प्रमाणं प्रसज्यत इति। कस्मात्? साधकतमत्वात्। साधकतमं प्रमाणम्, न तु प्रमातृप्रमेये। कः खलु साधकतमार्थः? साधकतमं प्रमाणमिति केवलं वाक्यमभिधीयते नार्थ इति। भावाभावयोस्तद्वत्ता। न प्रमातरि प्रमेये वाऽसति प्रमा भवति, सति तु भवति। न पुनः सति भवत्येव। प्रमाणे तु सति भवन्ती[३] भवत्येव। [४]स चायमतिशयः साधकतमत्वमुच्यते। यद्वान् वा प्रमिमीते सोऽतिशयः। किंवान् प्रमिमीते? प्रमाणवान्। अयं[५] प्रमाणे सति प्रमिमीते, नासतीति। सतोर्वाऽकर्तृत्वं यदभावात्। यस्य चाभावात् प्रमातृप्रमेये न प्रमां कुरुतः सोऽतिशयः। संयोगवच्चरमभाविता वा। यथा वा संयोगः पश्चाद्भावी द्रव्यशक्तिर्भवति, तथा प्रमाणं चरमभावि प्रमातृप्रमेययोः प्रमाशक्तिर्भवतीति पश्चाद्भावोऽतिशयः। प्रतिपत्तेरानन्तर्यं वा। यद् वा प्रमाणानन्तरं प्रतिपत्तेर्जन्म, स चायमतिशय इति। असाधारणकरणता वा। प्रमाता तावत् साधारणं कारणं [६]प्रत्यक्षादिज्ञानानाम्। सर्वप्रतिपत्तीनां प्रमेयमप्यशेषपुरुषसाधारणत्वात् तथाभूतम्। प्रमाणं त्वसाधारणकारणत्वात् प्रधानम्। प्राधान्याच्च साधकतमत्वेनाभिधीयत इति। प्रमाकारणसंयोगविशेषकत्वं वा। यो वा प्रमाकारणं संयोगः, तस्य प्रमाणमनुग्रहे वर्तमानमतिशयशब्दवाच्यम्।

---

१. एव om C २. इति added C ३. भवति J ४. सोऽयम् C
५. °वान् प्रमीमिते। प्रमाणे C ६. प्रत्यक्षादिज्ञानानाम् om C

अर्थग्रहणं प्रमाणविषयप्रतिपत्तिप्रतिषेधार्थम्। यतो न प्रमाणविषया प्रतिपत्तिः पुरुषमितिकर्तव्यतायां प्रयोजयति, किं त्वर्थस्य तथाभावविषया। यदायमर्थस्य तथाभावं प्रतिपद्यते, अथ प्रवर्तत इति। उपेक्षणीयवस्तुप्रतिषेधार्थं वा। न ह्युपेक्षणीयवस्तुविषया प्रतिपत्तिः पुरुषमितिकर्तव्यतायां प्रयोजयति[१], किं त्वर्थस्य सुखदुःखहेतुभावविषया। यदायमर्थस्य सुखदुःखहेतुभावं प्रतिपद्यते, अथ प्रवर्तत इति। प्रमाणाग्रहणं गम्यमानत्वादिति चेत्—न, प्रमाणविशेषज्ञापनार्थत्वात्। अर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादित्यभिधीयमाने गम्यत [२]एवैतत् प्रमाणत इति। न हि [३]काचिदर्थप्रतिपत्तिः प्रमाणमन्तरेण संभवतीति[४]। तच्च नैवम्, प्रमाणविशेषज्ञापनार्थत्वात्। अस्त्ययं प्रमाणशब्दः प्रमाणे [५]वर्तमानः, अस्ति च प्रमाणसामान्यात् प्रमाणाभासेऽपीति। तद् येह प्रमाणेन प्रतिपत्तिः, सा प्रवृत्तिसामर्थ्यं प्रतिपादयति[६] प्रमाणम्, नेतरदिति। न च प्रमाणग्रहणमन्तरेण [७]निमित्तपञ्चम्यभिधानं लभ्यते। तेन च प्रयोजनम्। अतश्च प्रमाणग्रहणं कृतमिति। अर्थग्रहणं सुखदुःखतद्धेतुत्वेन सर्वसंग्रहोऽर्थ्यमानत्वाच्च[८]। सर्वः प्रमाणादिरर्थः सुखदुःखहेतुः, सर्वश्चार्थ्यते। अर्थ्यमानत्वादर्थ इति। न, व्याघातादविवक्षितत्वाच्च। सर्वः प्रमाणादिरर्थः सुखदुःखहेतुरिति ब्रुवतो हेयादिभेदाच्चत्वार्यर्थपदानीति व्याहन्येत। न च प्रमाणादिहानं शक्यं कर्तुम्। न च प्रमाणादिहानं विवक्षितम्। तस्मादपव्याख्यानमेतत्। किं तु सुखदुःखत्वेन तद्धेतुत्वेन च यावतां संग्रहस्तेऽभिधीयन्तेऽधिकारात्। न[९] संविदो ग्रहणमनधिकारात्, अकर्मत्वाच्च। न संविद्धेया असुखदुःखत्वात्, अतद्धेतुत्वाच्च। नाप्यर्थ्यतेऽफलत्वात्।

---

१. उपेक्षणीय ...कर्तव्यतायां यतो न प्रयोजयति J २. एव om J ३. अर्थ om C ४. भवति C ५. वर्तमान and अपि om J ६. °दयति, नेतरेति J ७. निमित्त om C ८. अर्थग्रहणेन सुखदुःखहेतुत्वेन सर्वसंग्रहोऽर्यमाणत्वात् C. अर्यमाणत्वात् C, J. टीकानुरोधादर्थ्यमानत्वादिति। तथा परत्रापि। ९. न च C

सोऽयं प्रमाणार्थोपरिसंख्येयः। इयानयं प्रमाणविषय इति न परिसंख्यातुं शक्यम्, आनन्त्यात्। न, उभयस्य[१] परिसंख्यातत्वात्। एतावानयं प्रमाणार्थो यदुत[२] सुखदुःखे तद्धेतुश्चेति। तच्चोभयं परिसंख्यातम्। अतो न युक्तमानन्त्यान्न परिसंख्यायत इति[३]। **प्राणभृद्भेदस्य चापरिसंख्येयत्वाद**परिसंख्येयः प्रमाणार्थ इत्यसंबद्धमुक्तमिति। न, अर्थशब्दस्य प्रयोजनवाचित्वात्। प्रमाणार्थोऽपरिसंख्येय इति, प्रमाणप्रयोजनमपरिसंख्येयमित्ययं वाक्यार्थः। कथम्? स एवार्थः केषाञ्चित् सुखहेतुर्भवति, केषाञ्चिद् दुःखहेतुरिति। **अर्थवति** च समर्थे प्रमाणे **अर्थवन्ति** भवन्ति समर्थानीति। **अन्यतम**त्वार्थः साधकतमत्वार्थो द्रष्टव्यः प्रकरणात्। प्रकरणं हि चतुर्वर्गे प्रमाणं प्रधानमिति वर्तते[४]। यदि पुनर्यथाश्रुति [५]वाक्यमर्थवत् स्यात्, किं प्रमाणसामर्थ्यं वर्णितं स्यात्? तस्माद् यथोक्तं न्याय्यमिति।

प्रमाता स्वतन्त्रः। किं पुनः स्वातन्त्र्यम्? कारकफलोपभोक्तृत्वम्, यस्मात् कारकानां फलेनायमभिसंबध्यते। तत्समवायो वा। यद् वाऽशेषकारकनिष्पाद्यायाः क्रियायाः पुरुष आश्रयो भवति, तत्प्रयोक्तृत्वम्। इतराप्रयोज्यता वा। यद् वा परिदृष्टसामर्थ्यानि कारकचक्राणि प्रयुङ्क्ते। तैश्च न प्रयुज्यत इति। **तत्त्वपरिसमाप्ति**र्विनियोगयोग्यता उपेक्ष्यता[६] वा। याऽसावविसंवादिता, साऽवधारितस्यार्थस्य विनियोगयोग्यता। सुखसाधनं वा दुःखसाधनं वाऽयमर्थ इति ज्ञात्वा विनियोगः सा[७] समाप्तिः, तत्प्राप्तिस्तत्प्रतिषेधश्च। यद् वा न सुखसाधनं न दुःखसाधनं वेत्युपेक्षेति।

किं पुनस्तत्? सदसती तत्। तस्य भावस्तत्त्वमिति। अत्र तद् वाच्यं यस्य भाव इति। सदसती तत्, प्रमाणविषयत्वेनाधिकारात्। सदसती प्रमाणस्य विषयावित्यधिकृतम्। तस्मात् सदसती तदिति। तद्भावः सदसत्त्वम्[८]। सदसतोः

---

१. अपि added C २. यत्सुख° C ३. °ख्यातुं शक्यम् C ४. वर्ण्यते C
५. वाक्यार्थः J ६. उपेक्षा J ७. सा om C ८. सदसत्त्वम् om J

प्रमाणविषयता तत्प्रतिषेधश्च। तयोः खलु सदसतोर्भावो द्विरूपः, विधीयमानः प्रतिषिध्यमानश्च। यदेकत्र विधीयते तदन्यत्र प्रतिषिध्यते। तद्यथा, गन्धवती पृथिवी, अगन्धा आप इति। प्रमाणविषयत्वात् [१]सदसतोरविशेषप्रसङ्ग इति चेत्–नानैकान्तात्। तत्र भवेदेषा बुद्धिर्यदि प्रमाणेन सदसती गम्येते। ततः[२] प्रमाणविषयत्वादुभयोरविशेषः प्राप्त इति[३]। तच्च न, अनैकान्तात्। सर्वमिदं गोघटादि [४]द्रव्यजातं प्रमाणगम्यं भेदवच्च। तस्मादनेकान्तोऽयमिति। स्वतन्त्रपरतन्त्रोपलब्ध्यनुपलब्धिकारणभावाच्च विशेषः, सत् खलु प्रमाणस्यालम्बनं[५] स्वतन्त्रं भवति। असत् तु परतन्त्रं प्रतिषेधमुखेन प्रतिपद्यते। **प्रदीपवदिति।** तद् यथा प्रदीपः खलु अपवरकादिस्थितं घटादिकमर्थं प्रतिपादयति, तद्वदसदपि प्रतिपादयति। न ह्यसत्प्रतिपत्तावुपायान्तरमास्थीयते। दृश्यमाने हि घटादिकेऽर्थे नानेन समानजातीयं दृश्यान्तरमस्ति। यद्यभविष्यदिदमिवाद्रक्ष्यत। न च दृश्यते। तस्माद्दर्शनाभावान्नास्तीति गम्यते। एवं प्रमाणेनापि सति प्रमीयमाणे, नानेन समानजातीयं प्रमेयान्तरमस्ति। यद्यभविष्यदिदमिवामास्यत[६], न तु मीयते तस्मान्मानाभावान्नास्तीति। **तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयतीति।** तत्रासद्भेदाः स्वातन्त्र्येण न प्रकाशन्त इति नोच्यन्ते। [७]चतुर्वर्गान्तर्भावाद् वा भावप्रपञ्चवदभावप्रपञ्चोऽप्युद्दिष्टो वेदितव्य इति। भावोपदेशादेवाभाव उपदिष्टो भवतीति[८]। अतश्च नोच्यन्त इति।

तत्र **सच्च खलु षोडशधा व्यूढमुपदेक्ष्यते इति।** व्यूहः संक्षेपः। त एते सद्भेदा इति सूत्रम्। **प्रमा.....धिगमः ॥१॥**

सर्वपदार्थप्रधानः समासो द्वन्द्वः। किमुक्तं भवति? सर्व एते प्रमाणादयो विज्ञेया इति। अन्यथा हि समासान्तरपरिग्रहाद् विशेषणत्वेनोपयुक्तानां प्रमाणा–

---

१. सदसद्भावावि° C २. ननु च J ३. इति om C ४. च द्रव्य° J ५. °स्यासंबन्धं C ६. °मिवाज्ञास्यत J ७. °र्वगानन्तर्भावा° C, J 'चतुर्वर्गान्तर्भावाद् वेति पाठः सुसंगत इति परमं रहस्यमिति J margin ८. अभावप्रपञ्च उद्दिष्टः C. द्रः °टीका।

दीनामविज्ञेयता स्यात्। **यथावचनं विग्रह** इति। यदेव निर्देशे वचनभेदोपादाने प्रयोजनं तदिहापि द्रष्टव्यमिति। **प्रमाणादीनां तत्त्वमिति शैषिकी षष्ठी।** कः पुनः शेषः? कारकाणामविवक्षा शेष इति। यत्र न कारकं कारकार्थो वा विवक्ष्यते, स शेषः। तद्यथा ब्राह्मणस्य कमण्डलुरिति। तत्त्वस्य प्रमाणादिभ्योऽन्यानन्यत्वे दोषः। यदि तावत् प्रमाणादिव्यतिरिक्तं तत्त्वम्, न [१]प्रमाणादिज्ञानान्निःश्रेयसाधिगम इति प्राप्तम्। किं कारणम्? तत्त्वविशेषणत्वेनोपादानात्, राजपुरुषानयनक्रियावदिति। अथाभेदः? तत्त्वग्रहणानर्थक्यम्। यदि प्रमाणादिव्यतिरिक्तं तत्त्वं न प्रतिपद्यसे, एवं तर्हि तत्त्वग्रहणमनर्थकं संपद्यत इति। नोभयथाप्यदोषादि**त्येके**। यदि तावत् प्रमाणादिव्यतिरिक्तं तत्त्वं स्यात्, तस्यास्वतन्त्रत्वात् प्रमाणादयोऽपि गम्यन्त इति, कुण्डे बदरवृत्तिवदिति। यथोक्तं कुण्डे बदराणां वृत्तिरिति भावे देशिते[२] भावस्यास्वतन्त्रत्वात् कुण्डे बदराणि वर्तन्त इत्युक्तं भवति, तथेहापि **तत्त्वज्ञानान्निःश्रेयसाधिगम** इति प्रमाणादीनां ग्रहणं भावस्यास्वतन्त्रत्वादिति। अभेदेऽपीषुस्थितिवत् तद्भावप्रतिषेधो नार्थान्तरमिति न प्रमाणादिमात्रमुच्यते, अपि त्वर्थान्तरं प्रतिषिध्यते। यथेषोः स्थितिरिति नेषुमात्रं स्थितिः, अपि तु गतिमदर्थान्तरं न भवतीति[३]। तन्न, अनर्थान्तरत्वासिद्धेः[४]। तत्त्वज्ञानान्निःश्रेयसाधिगम इति तत्त्वं ज्ञायमानं कर्म संपद्यते, निःश्रेयसं चाधिगम्यमानं कर्म भवतीति। किं पुनस्तत्त्वम्, किं वा निःश्रेयसमिति? तत्त्वं पदार्थानां यथाव्यवस्थितात्मप्रत्ययोत्पत्तिनिमित्तत्वम्। यो यथाव्यवस्थितः पदार्थः, स तथाभूतस्य प्रत्ययस्योत्पत्तिनिमित्तं भवतीत्येतत् तत्त्वम्[५]। निःश्रेयसं पुनर्दृष्टादृष्टभेदाद् द्वेधा भवति। तत्र प्रमाणादिपदार्थतत्त्वज्ञानाद् दृष्टं निःश्रेयसम्। न हि कश्चित् पदार्थो ज्ञायमानो हानोपादानोपेक्षाबुद्धिनिमित्तं न भवतीति। एवं च कृत्वा सर्वेऽपि पदार्था ज्ञेयतयोपक्षिप्यन्त इति। परं तु निःश्रेयसमात्मादेः प्रमेयस्य तत्त्वज्ञानाद् भवतीति। दृष्टं प्रमाणादिपरिज्ञानात्,

---

१. °द्यधिगमान्निः° C　　२. चोदिते J　　३. इति om J　　४. °त्वानभ्युपगमात् J　　५. तथाभूतप्रत्ययोत्पत्तिनिमित्तं भवति यत्, तत्तत्त्वम् C

अदृष्टं पुनरात्मादेः प्रमेयस्य तत्त्वपरिज्ञानादिति न प्रमाणमस्ति। न नास्ति, अर्थस्य तथाभावात्। अर्थ एवायं तथाभूतो यदात्मादेः प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसमधिगम्यते। यदा ह्ययमात्मादि प्रमेयं विपर्ययेणाध्यवसितो भवति, अथ संसारं नातिवर्तत इति। एनं चार्थं द्वितीयसूत्रे प्रतिपादयिष्यामः।

यदि पुनः प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसं स्यात्, न मोक्षमाणा मोक्षाय घटेरन्। न हि कस्यचित् क्वचिच्च तत्त्वज्ञानं नास्तीति। तस्माद् आत्माद्येव प्रमेयं मुमुक्षुणा ज्ञेयमिति। पृथगुपदेशाच्च। यदि च प्रमाणाद्येव प्रमेयं स्यात्, तस्य च परिज्ञानान्निःश्रेयसं भवेत्, नात्मादि प्रमेयं पृथगुपदिष्टं स्यात्।[१] प्रमेयावधारणार्थायां चोत्तरसूत्रप्रक्रियायां प्रमेयस्य विहितत्वादाद्येन सूत्रेणाकुशलः **सूत्रकारः** स्यात्। **तच्चैतदुत्तरसूत्रेणानूद्यत** इति **भाष्यम्**। हेयहानोपायाधिगन्तव्यभेदाच्चत्वार्यर्थपदानि सम्यग्बुद्ध्वा निःश्रेयसमधिगच्छतीति। **हेयमिति**[२]। **हेयं** दुःखम्। **तस्य निर्वर्तकम्** अविद्यातृष्णे धर्माधर्माविति। **हानं** तत्त्वज्ञानम्। **उपायः** शास्त्रम्। **अधिगन्तव्यो** मोक्षः। एतानि चत्वार्यर्थपदानि सर्वास्वध्यात्मविद्यासु सर्वाचार्यैर्वर्ण्यन्त इति।

संशयाद्यग्रहणं पृथक् प्रमेयान्तर्भावादिति चेत्—न, विद्याप्रस्थानप्रभेदज्ञापनार्थत्वादिति। संशयादयः प्रमेयेऽन्तर्भवन्तीति पृथक् ते न वाच्याः[३]। न, विद्याप्रस्थानप्रभेदज्ञापनार्थत्वात्, चतस्र इमा विद्या भवन्तीति[४]। ताश्च पृथक्प्रस्थानाः। अग्निहोत्रहवनादिप्रस्थाना त्रयी। हलशकटादिप्रस्थाना वार्ता। स्वाम्यमात्यादिभेदानुविधायिनी दण्डनीतिः। संशयादिभेदानुविधायिनी आन्वीक्षिकीति। तस्याः संशयादिप्रस्थानमन्तरेणाध्यात्मविद्यामात्रमियं स्यात्। ततः किं स्यात्? अध्यात्मविद्यामात्रत्वादुपनिषद्विद्यावत् त्रय्यामेवान्तर्भाव इति चतुष्टं निवर्तते। तस्मात् पृथगुच्यन्त[५] इति।

---

१. प्रमेयार्थाव° C २. हेयमिति om C ३. वक्तव्याः C ४. इति om C
५. पृथग्गृह्यन्ते C

तत्र संशयस्तावद् वस्तुस्वरूपानवधारणात्मकः प्रत्ययः। अनवधारणात्मकश्च प्रत्ययश्चेति व्याहन्यते। न व्याघातः, स्वरूपावधारणात्। स्वरूपमस्यावधार्यते अस्ति मे संशयज्ञानमिति। वस्तुस्वरूपं तु नानेन परिच्छिद्यते तदुभयमनवधारणात्मकश्च प्रत्ययश्चेति। स कथं न्यायस्याङ्गं भवतीति? यस्मात् **नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते।** उपलब्धोऽनिर्णीतश्चेति व्याघातः। यद्युपलब्धो नानिर्णीतः, अथानिर्णीतो नोपलब्धः। उपलब्धोऽनिर्णीतश्चेति व्याहतम्। नास्ति व्याघातः, सामान्येनोपलब्धो विशेषतोऽनिर्णीत इति। एवमपि यथोपलब्धस्तथानिर्णीत इति व्याघातानिवृत्तिः। नानिवृत्तिः, यथा तथेति व्यपदेशात्। सर्वथा निर्णीते यथा निर्णीतस्तथोपलब्ध इत्यनर्थकं स्यात्। तस्मात् सामान्यत उपलब्धो विशेषतोऽनिर्णीत इति। स चायं संशय एवंभूतः प्रमेयेऽन्तर्भवन्नेवमर्थं पृथगुच्यते।

अथ प्रयोजनम्। किं पुनः प्रयोजनमिति? **येन प्रयुक्तः प्रवर्तते**[१] **तत् प्रयोजनमिति** लौकिकोऽयमर्थः। केन पुनः प्रयुज्यते? धर्मार्थकाममोक्षैरिति **केचित्**। वयं तु पश्यामः सुखदुःखाप्तिहानिभ्यां प्रयुज्यत इति। सुखदुःखसाधनभावात् तु सर्वेऽर्थाश्चेतनं[२] प्रयोजयन्ति। तदिदं प्रयोजनं न्यायस्याश्रयः। क आश्रयार्थः? आधारार्थस्तावन्न भवति। उपकारकत्वमाश्रयार्थः, तन्मूलत्वात् परीक्षाविधेः। प्रयोजने सति परीक्ष्यत इति प्रयोजनं परीक्षां प्रवर्तयतीति। का पुनरियं परीक्षा? न्यायः। **कः पुनरयं न्यायः? प्रमाणैरर्थपरीक्षणं** [३]**न्यायः।** किमुक्तं भवति? समस्तप्रमाणव्यापारादर्थाधिगतिर्न्याय इति। नैकैकं प्रमाणमर्थपरिच्छेदहेतुभावेन व्यवतिष्ठमानं न्याय इत्युच्यते, किं तु समस्तानि। सोऽयं विप्रतिपन्नपुरुषप्रतिपादकत्वात् परमो न्याय इति वक्ष्यामः। **प्रत्यक्षागमाश्रितं चानुमानमिति।** प्रत्यक्षागमाश्रितमिति प्रत्यक्षागमाविरोधि। [४]यदि ह्यनुमानाधिगतोऽर्थः प्रत्यक्षागमाभ्यां प्रतिसन्धीयेत, अथ स्फुटतरः प्रत्ययो भवति। यत्र

---

१. येन प्रयुज्यते J २ चेतनम् om J ३. न्याय om J ४. यदिहा॰ C

पुनरेतानि प्रमाणानि इतरेतराप्रतिसंहितानि व्यावृत्तानि प्रयुज्यन्ते, न्यायविप्लवोऽसौ लाभपूजाख्यातिकामैस्तीर्थप्रतिरूपकः [१]प्रवादो वर्ण्यते।

यत्पुनरनुमानं प्रत्यक्षागमविरुद्धं[२] **न्यायाभासः स** इति। प्रत्यक्षविरुद्धं तावदनुष्णोऽग्निः कृतकत्वाद् घटादिवदिति। कः पुनरस्यानुमानस्य विरोधः? अनुमानाविषये प्रयोगः। नायमनुमानस्य विषये प्रयोगः। नायमनुमानस्य विषयः, यस्मिन् विषये एतत्प्रयुज्यते स प्रत्यक्षेणापहृत इति। **अपरे** पुनरश्रावणः शब्द इति प्रत्यक्षविरोधं वर्णयन्ति। तैस्तु न प्रत्यक्षस्य विषयो ज्ञातो नानुमानस्य विषय इति। किं कारणम्? इन्द्रियवृत्तीनामतीन्द्रियत्वात्। श्रावणत्वं चेन्द्रियवृत्तिः। सा कथं प्रत्यक्षा भवति? आगमविरुद्धम्—शुचि नरशिरःकपालं प्राण्यङ्गत्वात् शङ्खशुक्तिवदिति। कथमिदमागमविरुद्धम्? शुचि नरशिरःकपालमिति ब्रुवता शुच्यर्थो वाच्यः, किमुक्तं भवति शुचीति? यदि स्प्रष्टुः प्रत्यवायाभावः, स कस्येति वाच्यम्। यद्यात्मन इति ब्रूयात्, तदागमानुष्ठानतात्पर्येणावस्थानादेवमेतत्। [३]अथ त्रयीविदामिति ब्रूयात्, त्रय्यभ्युपगमाद् विरोध इति वाच्यम्। शुचि नरशिरःकपालमिति च कोऽर्थः? विशेषविधानमेतत्। विशेषविधानं [४]च शेषं प्रतिषेधति। यदि शुचि नरशिरःकपालं किमशुचीति वाच्यम्। अथ सर्वमेव शुचि, दृष्टान्तो नास्ति सर्वस्य पक्षीकृतत्वात्। अथानुमानविरुद्धं कस्मादनुमानं न भवति? एकस्मिन्ननुमानद्वयसमावेशासंभवान्न विरोधः। न ह्यन्वयव्यतिरेकसंपन्नेऽनुमाने एकस्मिन् वस्तुनि समाविशतः, तस्मान्नानुमानविरुद्धम्। प्रत्यक्षविरोध्यपि तर्हि न प्राप्नोति? न न प्राप्नोति, अन्वयव्यतिरेकोपपन्नस्य प्रत्यक्षेण बाधितत्वात्। अथोपमानविरुद्धं कस्मान्न भवति? नोपमानविरुद्धं पूर्वप्रमाणविरोधानुविधानात्। उपमानविरोधः पूर्वप्रमाणविरोधानुविधायी, आगमाहितसंस्कारस्मृत्यपेक्षं च सारूप्यज्ञानमुपमानमिति वक्ष्यामः[५]। प्रत्यक्षागमयोर्विरोधादुक्तं तदिति।

---

१. प्रवादी C २. विरोधि C ३. अथ om J ४. हि शेषनिषेधविषयम् C ५. वार्त्तिक १।१।६

तत्र वादजल्पौ सप्रयोजनाविति भाष्यम्। तस्य कुत उत्थानम्? **तेनानेन प्रयोजनेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्या व्याप्ता इति**। तत्र वादजल्पौ किंप्रयोजनाविति युक्तो विचार इत्यत आह—**तत्र वादजल्पौ सप्रयोजनाविति**। तस्मिन् न्यायाभास इति। **वितण्डा तु परीक्ष्यते** सप्रयोजना निष्प्रयोजना वेति। **एके** तावद् ब्रुवते[१] निष्प्रयोजना, दूषणमात्रत्वादिति। तच्च नैवं न दूषणमात्रं वितण्डा। किं तर्हि[२]? अभ्युपेत्य पक्षं यो न स्थापयति स वैतण्डिक इत्युच्यते। अथ पक्षमपि न प्रतिपद्यते, उन्मत्तवदुपेक्षणीयो भवति। अथ परपक्षप्रतिषेधज्ञापनं प्रयोजनमिति, तादृगेवैतत्। एतस्मिन्नपि चतुर्वर्गं चेत् प्रतिपद्यते सोऽस्य पक्षः। चतुर्वर्गो **भाष्य** उक्तः। अथ न प्रतिपद्यते पूर्ववदुपेक्ष्यः। प्रतिपक्षस्थापनाहीनं च वाक्यं वितण्डेत्युच्यते। तस्याभिधेयं[३] यद्यर्थं प्रतिपद्यते, सोऽस्य पक्षः। अथ न प्रतिपद्यते पूर्ववद् दोष इत्युक्तं प्रयोजनम्।

प्रत्यक्षविषयोऽर्थो दृष्टान्तः। किमुक्तं भवति? लौकिकपरीक्षकाणां दर्शनाविघातहेतुरिति। एवं चात्मादिव्याप्तिरिति। दर्शनाविघातहेतुत्वेन दृष्टान्ते वर्ण्यमाने आत्मादि व्याप्तं भवति। [४]प्रत्यक्षादिविषयतायां चात्मादि त्यक्तं भवति। ततश्चोदाहरणसूत्रं व्याहन्येत। सोऽयं दृष्टान्तः प्रमेयम्, उपलब्धिविषयत्वात्। तस्य पृथगुपदेशो न्यायस्य तन्मूलत्वात्। सति तस्मिन्ननुमानागमौ स्याताम्, असति च न स्यातामिति। [५]पूर्वप्रत्यक्षमर्थमनुमिमीते। पूर्वज्ञातं चार्थं परस्मायाचष्ट इति। नास्तिकस्य च व्याघातोऽभ्युपगमे, अनभ्युपगमे वा। तदुक्तं **भाष्य** इति।

अभ्युपगमव्यवस्था सिद्धान्तः। अभ्युपगम इदमित्थम्भूतं [६]चेति। इदमिति सामान्यतः। इत्थम्भूतमिति विशेषतः। तस्य व्यवस्था इदं **सांख्येष्वेव**,[७] इदं **योगेष्वेवेति**[८]। सर्वतन्त्रसिद्धान्तस्तर्हि न सिद्धान्तः, अव्यवस्थानात्। न ह्ययं

---

१. वर्णयन्ति C २. किं तु J ३. अभिधेयम् om C ४. आदि om J
५. पूर्वं प्रत्यक्षमदृष्टमर्थमनुमिमते, पूर्वं ज्ञातं चार्थं परस्मै आचक्षत इति C ६. वेति C
७, ८. एव om C

क्वचिद् व्यवतिष्ठत इति। तच्च न[१], योऽयं सर्वैरभ्युपगम इयमेव व्यवस्था। तस्य प्रमेयेऽन्तर्भूतस्य पृथग्वचनं वादादिविषयत्वात्। सिद्धान्तभेदे सति वादजल्प-वितण्डाः प्रवर्तन्त इति।

अथावयवाः। अवयवा वाक्यैकदेशाः। किं पुनर्वाक्यम्? पूर्वपदस्मृत्य-पेक्षोऽन्त्यपदप्रत्ययः स्मृत्यनुग्रहेण प्रतिसन्धीयमानो विशेषप्रतिपत्तिहेतुर्वाक्यम्। तस्य भागा एकदेशा इति। ते कियन्तः? यावद्भिः सिद्धिः परिसमाप्यत इति। का पुनरियं सिद्धिः? पदार्थस्य तथाता। का परिसमाप्तिः? विशेषप्रत्ययः। ते समाख्या-शब्दैरभिधीयन्ते प्रतिज्ञादय इति। तत्र **आगमः प्रतिज्ञेति** न युक्तम्, आगमस्य तत्त्वव्यवच्छेदकत्वात् प्रतिज्ञार्थस्य च प्रतिपाद्यत्वात्। आगमाधिगतस्य[२] प्रतिपाद्य-त्वादागमः प्रतिज्ञेति न दोषः। य एवार्थ आगमेनाधिगतः, तमेव परस्मायाचष्ट इत्यागमः प्रतिज्ञेत्युच्यते। एवं लिङ्गदर्शनमात्रे हेतूपचारात् **हेतुरनुमानमिति।** [३]यत् तद् द्वितीयं लिङ्गदर्शनं तत्संबन्धस्मृतिव्यक्तिहेतुभावाद्धेतुरित्युच्यते। स्मृतिविषयस्य प्रत्यक्षतः पुनरुपदर्शनाद् **उदाहरणं प्रत्यक्षम्,** यस्मात् पूर्वानुभूतमर्थं स्मरति [४]तं च स्मृतिविषयमुदाहरणत्वेनोपादत्त इति। तेन पूर्वानुभवप्रसिद्धमनुविधीयमानं[५] प्रत्यक्षमिव प्रत्यक्षमिति। कः पुनरुपमानार्थः? अविप्रतिपत्तिः, यथा प्रत्यक्षे न विप्रतिपद्यते एवमुदाहरणेऽपीति। यथा तथेत्युपमानैकदेशे उपमानोपचाराद् **उपमानमुपनय** इति। उपमानं खलु यथा तथेत्युपदेशोपयोगे सति [६]प्रत्यक्षागम-स्मृतिपूर्वकं सारूप्यज्ञानमुपमानमिति तत्रोपमानैकदेशे उपमानमित्युपचरन्ति। **सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनमिति।** कः पुनरेकार्थसम-वायः? एकवाक्याध्यारोपः। किं पुनः सामर्थ्यम्? इतरेतरसंप्रत्यायितार्थापेक्षि-त्वम्। एतच्च वक्ष्याम इति। निगम्यन्तेऽनेन प्रतिज्ञादय [७]एकार्थे संबध्यन्त इति। **सोऽयं परमो न्याय** इति। कः पुनः परमार्थः? विप्रतिपन्नपुरुषप्रतिपादक-

---

१. तच्च न om J २. अर्थस्य added J ३. यत्तु C ४. स्मृतं च विषय° C ५. °प्रसिद्धि° J ६. °मपू° J ७. एकार्थेन C

त्वम्। [१]एकैकशः प्रमाणानि [२]वर्त्तमानान्यविप्रतिपन्नं पुरुषं प्रतिपादयन्ति, वाक्यभावापन्नानि पुनर्विप्रतिपन्नम्, अतोऽयं परम इति। किं पुनरवयवाः प्रमाणान्तरम्, उत तेष्वेवान्तर्भवन्तीति? किं चातः? यदि प्रमाणान्तरम्, परिसंख्यानमयुक्तम्। अथ तेष्वेवान्तर्भवन्ति, पृथगभिधानानर्थक्यमवयवानामिति[३]। न प्रमाणान्तरमिति ब्रूमः। संहतानामेतेषां वाक्यपरतन्त्राणां विप्रतिपन्नपुरुषप्रतिपादकत्वेन पृथगुपादानमिति। त एतेऽवयवाः प्रमाणेभ्यः [४]पृथग्भवन्तो वादजल्पवितण्डानां प्रवृत्तिहेतवो भवन्ति, तत्त्वव्यवस्थायाश्चाश्रया भवन्तीति। क आश्रयार्थः? विशेषप्रतिपादकत्वमिति।

तर्को न प्रमाणसंगृहीतो न प्रमाणान्तरम्, अपरिच्छेदकत्वात्। प्रमाणं परिच्छेदकम्, न तर्कः। तस्मान्न प्रमाणम्। न प्रमाणान्तरमप्यत एव। प्रमाणविषयविभागात् तु प्रमाणानामनुग्राहकः, यः प्रमाणानां विषयस्तं विभजते। कः पुनर्विभागः? युक्तायुक्तविचारः, इदं युक्तमिदमयुक्तमिति। यत् तत्र युक्तं भवति तदनुजानाति, न त्ववधारयति। अनवधारणान्न [५]प्रमाणं भवति। तस्योदाहरणं **भाष्ये कर्मनिमित्तं** जन्मेति। कथं पुनः कर्मनिमित्तता जन्मनः? भेदवत्त्वात्। कः पुनर्भेदः? सुगतिर्दुर्गतिश्चेति। सुगतौ देवो मनुष्य इति। मनुष्यत्वे पुमान् इतर इति। पुंस्त्वे ब्राह्मणोऽन्य इति। ब्राह्मणत्वे पट्विन्द्रियो मृद्विन्द्रिय इति। पट्विन्द्रियतायामुच्चाभिजनो नीचाभिजन इति। उच्चाभिजनतायां सकलो निष्कल[६] इति। साकल्ये विद्वान् मूर्ख इति। विद्वत्तायां समाश्वासी परित्रस्त इति। समाश्वासे वशी परायत्त[७] इति। दुर्गतावपि तिर्यग्गारक इति। नारकत्वेऽपि कूटशाल्मल्यामयः-कुम्भ्यामिति। तिर्यक्तायां गौरितर इति। सोऽयं भेदोऽनेकमवस्थितमनित्यमेकद्रव्यं प्रत्यात्मनियतं निमित्तमन्तरेण न युक्तः। किं कारणम्? पृथिव्यादीनां

---

१. एकशः J २. प्रवृत्तानि न विप्र° C ३. पृथक् [अव]यवानर्थक्यम् J
४. °वयवाः पृथ° C ५. प्रमाणान्तरम् C ६. विकल J ७. पराधीन J

सर्वपुरुषसाधारणत्वात्[१] पृथिव्यादिगतस्य च नियमहेतोरभावात् सर्वं सर्वात्मकं[२] प्रसज्येत। दृष्टश्च नियमभेदः। तस्मात् कर्म नियामकमिति। **सोऽयमित्थंभूतस्तर्क** उपलब्धिविषयत्वात् प्रमेयम्।

निर्णयस्तत्त्वज्ञानं प्रमाणानां फलम्। कदा पुनर्निर्णयः प्रमाणानां फलं भवति[३]? यदा वस्त्वन्तरपरिच्छेदहेतुभावेन[४] नोपादीयते तदा फलम्, यदा तेन परिच्छिनत्ति तदा प्रमाणमिति न व्यवतिष्ठते प्रमाणफलभावः। एतच्च वक्ष्यामः–

प्रमेया[५] च तुलाप्रामाण्यवत् [२।१।१६]

इत्येतस्मिन् **सूत्रे** निमित्तद्वयसमावेशादेकं वस्तु द्विशब्दवाच्यमिति। **तावेतौ तर्कनिर्णयौ लोकयात्रां वहत**[६] इति। बुद्ध्वा बुद्ध्वा लोकः प्रवर्तमानः तर्कनिर्णयाभ्यां हेयं जहाति, उपादेयं चोपादत्ते। अस्यान्तर्भावः प्रमाणेषु प्रमेयेषु[७] वा। यदा फलं तदा प्रमेयम्, यदानेन परिच्छिद्यते[८] तदा प्रमाणम्।

वादो नानाप्रवक्तृक इति। सिद्धान्तभेदानुविधानात् नानाप्रवक्तृकः। **प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्णयावसान** इति। अधिकरणमधिकरणं प्रति प्रत्यधिकरणम्। अस्य साधनम्। किमुक्तं भवति? उभाभ्यां साधनं वक्तव्यमिति। अन्यतरस्मिन्नधिकरणे निर्णयः। एतच्च वक्ष्यामः[९]। सोऽयं किंरूपो वादः? **वाक्यसमूह** इत्याह। ननु च प्रमाणतर्कसाधनोपालम्भ इति श्रूयते। प्रमाणानि च ज्ञानात्मकानि,

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम् [१।१।४]

इत्येवमादिना प्रक्रमेण प्रमाणानि ज्ञानात्मकानीत्युक्तम्। तर्कश्चोहः। स चोहो ज्ञानात्मक एव। तस्माद् वाक्यसमूहो वाद [१०]इति न युक्तम्। न, प्रमाणतर्कसाधनोपालम्भशब्दस्य[११] अन्यथाव्याख्यानात्। तच्च [१२]सूत्रं वर्णयिष्यन्तो वक्ष्यामः।

---

१. °रण्यात् C २. सर्वात्मनां J ३. फलमिति C ४. हेतुत्वेन C
५. प्रमेयता C ६. उद्वहत C ७. प्रमेये J ८. यदा तेन परिच्छिनत्ति C
९. वार्त्तिक १.२.१ १०. इत्ययुक्तम् C ११. °लम्भस्य C १२. न्या. सू. १।२।१

तद्विशेषौ जल्पवितण्डे इति। कः पुनर्विशेषः? अङ्गाधिक्यमङ्गहानिश्चेति। छलजातिनिग्रहस्थानप्रयोगादधिको जल्पः। स प्रतिपक्षस्थापनाहीनस्तु वितण्डा। एतावता च विशेषेण कथामार्गभेद इति। विषयभेदाच्च भेदः। शिष्यादिविषयो वादः, शिष्यमाणविषये जल्पवितण्डे इति।

अन्यतमलिङ्गधर्मानुविधानेन प्रवर्तमाना अहेतवः सन्तो हेतुवदाभासन्त इति हेत्वाभासाः। ते च निग्रहस्थानम्। निग्रहस्थानप्राप्तानां पुनरेषां पृथगुपदेशो **वादे [१]चोदनीयत्वादिति भाष्यम्।** यस्मात् किलैते वादे चोद्यन्ते[२] अतः पृथगुपदिश्यन्त इति। न, उभयथाप्यसंबन्धात्। न वादे चोदनीयत्वं[३] पृथगुपदेशाविनाभावि, पृथगुपदेशो वा[४] वादे चोदनीयत्वाविनाभावीति[५]। यदि तावद् यः पृथगुपदिश्यते, स वादे चोद्यत[६] इति, सर्वे पदार्था वादे चोदनीयाः प्रसज्यन्त इति। किं कारणम्? सर्वे पृथगुपदिष्टा इति। अथ वादे चोद्यन्ते[७] ये ते पृथगुपदिश्यन्त इति? तदपि न, अनेकान्तात्। न तावन्निग्रहस्थानेभ्यो न्यूनाधिकयोः पृथगुपदेशः, अथ च चोद्येते[८] वाद इति। तस्माद् वादे [९]चोदनीयत्वात् पृथगुपदेश इति। यत्किञ्चिदेतत्। एतदेव तु न्याय्यं पृथगुपदेशप्रयोजनं विद्याप्रस्थानभेदज्ञापनार्थत्वादिति। अथ कस्मात् निग्रहस्थानभावापन्नानां हेत्वाभासानां पृथगुपदेश इति? प्रमाणसामान्यात् पृथगुपदेशः। अथ कस्माद् वादे देश्यन्ते? प्रमाणसामान्यात्[१०]। प्रमाणानि वादेऽभिधीयन्ते, प्रमाणसामान्यं च हेत्वाभासेष्वस्ति। अतः प्रमाणसामान्याद् वादेऽभिधीयन्त इति। अथ वादे निग्रहस्थानानि कानिचित् सन्ति कानिचिन्नेति किमयं पदार्थानां नियोगः, अथ तथाभूतानामन्वाख्यानमिति? किं चातः? यदि तावन्नियोग एवं भवतैवं मा [११]भूतेति पदार्थान्नियुञ्जानो भवानुपेक्षणीयः। अथ स्वरूपत एवावस्थिताः पदार्थाः, ताननुजानाति भवानिति

---

१. देशनीय° C २. देश्यन्ते C ३. देशनीयत्वम् C ४. वा om J
५. देशनीयत्वा° C ६. देश्यत C ७. देश्यन्ते C ८. देश्येते C ९. देशनीयत्वादेषां C १०. प्र० न्यात् om J ११. मा भवतेति, एवं पदार्थाननुयु° C

कस्मान्निग्रहस्थानानि कानिचिद् वादे भवन्ति, कानिचिन्नेति वक्तव्यम्। न, लक्षण-परतन्त्रत्वादर्थतथाभावस्येति ब्रूमः। न पदार्था वक्तुर्नियोगमनुविधीयन्ते, [१]यथा तु भवन्ति तथाभूता एवार्था अन्वाख्यायन्ते। सोऽयं लक्षणपरतन्त्रं तत्त्वमन्वाचक्षाणो नाभ्याख्येयः पदार्था भवता नियुज्यन्त इति, वादस्य शिष्यादिविषयत्वात्। न च शिष्यादिभिः सह वादं कुर्वाणेनापि अप्रतिभादिचोदना[२] कार्या, तावदस्याभिधेयं यावदसौ बोधितो [३]भवतीति। प्रमाणप्रतिरूपकत्वात् तु हेत्वाभासानामवरोध[४] इति। किं कारणम्? भ्रान्तेः पुरुषधर्मत्वात्। पुरुषधर्म एवायं भ्रान्तिरिति। सोऽयं भ्रान्त्या प्रमाणं ब्रुवन् प्रमाणाभासमपि ब्रूते। अतोऽस्य निग्रह इति। कः पुनः शिष्याचार्ययोर्निग्रह इति? विवक्षितार्थाप्रतिपादकत्वम्। न्यूनाधिकापसिद्धान्तानां वादे कथमवतारः? प्रमाणसामान्यादेव। न्यूनस्यापि प्रमाणसामान्यम्। अधिक-स्यापि [५]प्रमाणसामान्यमस्ति। अवयवहीनता चावयवाधिकता च वाक्यस्य भ्रान्त्या भवत इत्यस्त्यवतारः[६]। **जल्पवितण्डयोस्तु निग्रहस्थानानीति।** विजिगीषुर्जल्प-वितण्डाभ्यां प्रत्यवस्थेयः[७]। तस्य यथासंभवं निग्रहस्थानानि वक्तव्यानीति नोपेक्षणीयः।

छलजातिनिग्रहस्थानानां स्ववाक्ये परिवर्जनम्, परवाक्ये पर्यनुयोगः परिज्ञानार्थमेव केवलम्। छलजातिनिग्रहस्थानानि स्वयं न प्रयोज्यानीति[८]। जातेस्तु[९] **स्वयं च सुकरः प्रयोग** इति। न, व्याघातात्। स्ववाक्ये परिवर्जनं सुकरश्च प्रयोग इति व्याहतम्। यदि सुकरः प्रयोगः, न स्ववाक्ये परिवर्जनम्। अथ स्ववाक्ये परिवर्जनम्, न सुकरः प्रयोग इति व्याघातः। न व्याघातः, प्रश्नापाकरणार्थत्वात्। स्वयं च सुकरः प्रयोग इति किमुक्तं भवति? परेण जातौ प्रयुक्तायां प्राश्निकान् ब्रवीति जातिरनेन प्रयुक्तेति। त एवं प्रत्यनुयुञ्जीरन्[१०] कथं जातिः, कतमा

---

१. यथानुभवन्ति J २. °देशना C ३. भवति om J ४. अविरोधः C
५. प्रमाणसामान्यमस्ति om C ६. °त्यस्यावतारः C ७. विजिगीषुभिः ...प्रत्यवस्थेयम् C
८. प्रयोक्तव्यानि। C ९. जातेश्च C १०. पर्यनुयु° C

जातिरिति। अतो जात्यभिज्ञः सुखं[१] शक्नोति वक्तुम् एवं जातिः, इयं च जातिरिति। एवं च सुकरः प्रयोग इति। तस्मादेते संशयादयः पदार्थाः प्रमाणे[२] प्रमेये चान्तर्भवन्तो विद्याप्रस्थानभेदज्ञापनार्थं पृथगुपदिष्टा इति।

सेयमान्वीक्षिकी न्यायविद्या **प्रमाणादिभिः पदार्थैर्विभज्यमाना प्रदीपः सर्वविद्यानां** भवति, प्रकाशकत्वात् प्रदीपः[३]। प्रमाणादिप्रतिपादितमर्थमितरा विद्याः प्रतिपद्यन्त इति। किमितरासु विद्यासु प्रमाणादीनि न सन्ति? न सन्तीत्याह। कथं न सन्ति? अनधिकारात्। न ता विद्याः प्रमाणादिपरिज्ञानेनाधिक्रियन्त इति, प्रमाणादिप्रकाशिते त्वर्थे ताः प्रवर्तन्त इति। **उपायः सर्वकर्मणामिति।** [४]प्रमाणप्रकाशितानां करणादुपायः। यस्मात् [५]प्रमाणप्रकाशितमर्थमितरा विद्याः कुर्वन्ति। **आश्रयः सर्वधर्माणामिति।** सर्वविद्योपकारकत्वादाश्रयः। सर्वासां विद्यानामियमुपकरोति, उपकारित्वादाश्रयो राजभृत्यवदिति।

तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमश्च यथाविद्यं वेदितव्यम्। सर्वासु विद्यासु तत्त्वज्ञानमस्ति निःश्रेयसाधिगमश्चेति। त्रय्यां तावत् किं तत्त्वज्ञानं कश्च निःश्रेयसाधिगम इति? तत्त्वज्ञानं तावदग्निहोत्रादिसाधनानां स्वागतादिपरिज्ञानमनुपहतादिपरिज्ञानं च। निःश्रेयसाधिगमोऽपि स्वर्गप्राप्तिः। तथा ह्यत्र स्वर्गः फलं श्रूयत इति। अथ वार्तायां किं तत्त्वज्ञानं को वा निःश्रेयसाधिगम इति? भूम्यादिपरिज्ञानं तत्त्वज्ञानम्। भूमिः कण्टकाद्यनुपहतेत्येतत् तत्त्वज्ञानम्। निःश्रेयसं सस्याधिगमस्तत्फलम्[६]। दण्डनीत्यां किं तत्त्वज्ञानं को वा निःश्रेयसाधिगम इति? सामदानभेददण्डानां यथाकालं यथादेशं यथाशक्ति विनियोगस्तत्त्वज्ञानम्। निःश्रेयसमपि पृथिवीविजय इति। **इह त्वध्यात्मविद्यायामात्मादिज्ञानं[७] तत्त्वज्ञानम्, निःश्रेयसाधिगमोऽपवर्गप्राप्तिरिति।**

---

१. सुखम् om C २. प्रमाणेषु J ३. प्रदीपवत् C ४. प्रकाशितानां C ५. प्रमाणादि J ६. कृष्याद्यधिगमश्च निःश्रेयसमिति, तत्फलत्वात् C ७. °विद्यायाः J

यत् पुनः प्रमाणादितत्त्वज्ञानान्निःश्रेयसम्, न तद् विवक्षितम्। मदमानादिनिमित्तत्वाद् वादादिपरिज्ञानस्य नाभिसंबन्धो निःश्रेयसेनेति **केचित्**। न चानभिसंबद्धं[१] प्रतिपादयतीति अयुक्तमुक्तं प्रमाणादितत्त्वज्ञानान्निःश्रेयसमिति। न, सूत्रार्थापरिज्ञानात्। सूत्रार्थं नो न व्यज्ञासीः, यत एवं [२]प्रत्यपत्थाः। क एवं सूत्रार्थं वर्णयन्ति प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसमिति? अपि तु यत्परिज्ञानान्निःश्रेयसं [३]तदानन्तरसूत्रे वक्ष्यामः। **उक्तं च आत्मादेः खलु प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसाधिगम** इति। यच्चेदमुच्यते, [४]मदमानादिनिमित्तभूता वादादय इति, एतच्च न, असति भावात् सति चाभावात्। असति वादादिज्ञाने रागादयः सनकादीनां भवन्ति, सति च तत्त्वविदां न भवन्ति। तस्मान्न निमित्तं वादादिपरिज्ञानं रागादीनामिति॥१॥

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ॥१।१।२॥

न तत्त्वपरिज्ञानादपवर्ग उभयथा दोषात्। यदि [५]तावत् तत्त्वज्ञानानन्तरमेवापवर्गः [६]स्यात्, तद्वतामवस्थानं न स्यात्। तद्वतां चावस्थानं दृष्टम्, कुतः? शास्त्रसम्प्रदायाविच्छेदात्। संप्रदायो नाम [७]शिष्याचार्यसंबन्धस्याविच्छेदेन शास्त्रप्राप्तिः। यदि [८]तत्त्वज्ञानादनन्तरमपवर्गः स्यात्, शास्त्रसम्प्रदायो विच्छिद्येत। यस्य यदा तत्त्वज्ञानमुत्पन्नं[९] स तदैवापवृक्त इति। अथोत्पन्नतत्त्वज्ञानोऽवतिष्ठते, न तत्त्वज्ञानं कारणम्, [१०]सत्यप्यभावात्, सत्यपि तत्त्वज्ञाने यस्याभावान्नापवृज्यते सोऽन्योऽर्थ इति। कारणं हि नाम तस्य तद्भवति यस्मिन् सति यद्भवति, यस्मिंश्चासति यन्न भवति। अनधिगतार्थपूर्वकत्वं वा शास्त्रस्य[११] स्यात्। अथ तत्त्वज्ञानानन्तरमपवर्गे[१२] **वात**-

---

१. °संबन्धं J २. प्रत्यवास्थाः J ३. तदुत्तरसूत्रे C ४. °निमित्तं वादा° C
५. तावत् om C ६. स्यात् om J ७. शिष्योपाध्याय° C ८. अनन्तरं om C
९. वृत्तम् C १०. अपि om C ११. °पूर्वं वा शास्त्रं C १२. अपवर्गो J

पुत्रीयं शास्त्रं प्राप्नोति, [१]न तत्त्वदृक्पूर्वकमिति—न, निःश्रेयसस्य परापरभेदात्। यत्तावदपरं निःश्रेयसं तत् तत्त्वज्ञानानन्तरमेव भवति। तथा चोक्तम्,

जीवन्नेव हि विद्वान् संहर्षायासाभ्यां विप्रमुच्यते[२] इति।

अयं शास्त्रार्थ इति। परं तु[३] निःश्रेयसं तत्त्वज्ञानात् क्रमेण भवति। क्रमप्रतिपादनार्थं चेदं सूत्रम्–**दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामित्येव**मादि।

एतत्संबन्धेनैवा[र्थेना]र्थवत्। पदार्थस्तु वक्तव्यः। तत्रात्माद्यपवर्गपर्यन्तं प्रमेयं ज्ञेयम्। तस्मिन् मिथ्याज्ञानमनेकप्रकारकं वर्तते। को वृत्त्यर्थः? विषयार्थः। तत्रायं भेदः। तत्र **आत्मनि** तावन्नास्तीति। आत्मा तावदस्तित्वेन प्रमाणसामर्थ्यात् समधिगतः। [४]अस्तित्वेन समधिगते नास्तीति विज्ञानं मिथ्याप्रत्ययः। तस्यानुपपत्तिः सदसतोः सारूप्याभावादिति चेत्–न, प्रमाणगम्यतोपपत्तेः। न हि सदसती सरूपे [५]यतोऽसत्साम्यादसद्धर्माध्यारोपेणात्मनि[६] मिथ्याप्रत्ययः स्यात्। तच्च नैवम्, प्रमाणगम्यतोपपत्तेः। सदसतोः प्रमाणगम्यत्वं [७]सारूप्यम्, क्रियागुणव्यपदेशः। तद्रहितता च विशेषः। सोऽयमसद्धर्मान् सत्यात्मनि समारोप्य विपर्येति, नास्त्यात्मेति। एवम् **अनात्मनि** शरीरे **आत्मेति**। किं पुनरनात्मनः शरीरादेरात्मना साधर्म्यं यत एतद् भवति अनात्मन्यात्मेति? अहङ्कारविषयत्वं सामान्यम्[८]। इच्छाद्याधारतानाधारतेति विशेषः। यथैवात्मा अहङ्कारस्य विषयः, तथा शरीरादयोऽपि। कथं पुनः शरीरे अहङ्कारः? शरीरवाचकशब्दसामानाधिकरण्यात् शरीरेऽहङ्कारो [९]गौरोऽहमित्येवमादिः। इच्छाद्याधार आत्मा न शरीरादय इति विशेषः। एतच्चोपरिष्टात् प्रतिपादयिष्यामः[१०]। सोऽयमात्मधर्मान् इच्छादीन् शरीरादिष्वध्यारोप्य विपर्येति अहमेत इति। एवं सामान्यविशेषधर्मपरिज्ञाने[११] सति तद्विपरीतधर्माध्यारोपेण विपर्ययः सर्वत्र भवतीति। कः पुनरयं विपर्ययः? अतस्मिंस्तदिति प्रत्ययः। शेषं भाष्ये[१२]।

---

१. स्यात् C २. विमुच्यते C ३. च C ४. अस्तित्वेन om J ५. °स्तत्सामान्यात् J ६. °र्मारोपेणा° C ७. सामान्यम् J ८. सारूप्यम् C ९. °हमित्या° C १०. द्र. ३।२।१८, ४।१।२ ११. °विशेषपरि° C १२. भाष्य इति J

त इमे दुःखादयो मिथ्याज्ञानपर्यवसाना **अविच्छेदेन प्रवर्तमानाः संसार** इति। कः [१]पुनरयं संसारः? दुःखादीनां कार्यकारणभावः। स चानादिः, पूर्वापरकालभावस्यानियमात्। न च[२] शक्यं वक्तुं पूर्वं दुःखादयः पश्चान्मिथ्याज्ञानम्[३], पूर्वं वा मिथ्याज्ञानं पश्चाद् दुःखादय इति[४]। **यदा तु** तत्त्वज्ञानान्मिथ्याज्ञानमपैतीति कथमपायः? समाने विषये तयोर्विरोधात्। यस्मान्मिथ्याज्ञानं तत्त्वज्ञानं चैकस्मिन् विषये विरुध्येते, वस्तुनो द्वैरूप्यासंभवात्। न ह्येकं वस्तु द्विरूपं भवति। तस्मान्मिथ्याज्ञानं तत्त्वज्ञानेन निवर्त्यत इति। कथं पुनः पूर्वोत्पन्नं मिथ्याज्ञानं पश्चाद्भाविना[५] तत्त्वज्ञानेन निवर्त्यते? मिथ्याज्ञानस्यासहायत्वात्। मिथ्याज्ञानमसहायमतो निवर्तत इति। सम्यग्ज्ञानस्य पुनर्विषयः सहायीभवति[६]। कस्मात्? तथात्वेनावस्थानात्। [७]तथाभूतोऽसौ विषयो यथा तत्र तत्त्वज्ञानमिति। प्रमाणान्तरानुग्रहाच्च। आगमानुमानादि च[८] प्रमाणं तत्त्वज्ञानस्य [९]सहायीभवति। यदा ह्ययमागमानुमानयोः प्रतिसंहितयोर्विषयं भावयति समाहितोऽनन्यमनाश्चिन्तयति, ततोऽस्य विपच्यमाने ध्याने विविक्तायां ध्यानभावनायां तस्मिन्नर्थे तत्त्वप्रतिबोधि ज्ञानं[१०] प्रत्यक्षमुत्पद्यत इति। सोऽयमागमानुमानप्रत्यक्षाणां विषयं प्रतिपद्यमानस्तत्त्वमेतदिति प्रतिपद्यते। तत्त्वप्रतिपत्तेरस्य मिथ्याज्ञानं निवर्तत इति। निवृत्ते च मिथ्याज्ञाने न पुनस्तद्विषयं मिथ्याज्ञानमुत्पद्यते [११]विरोधादित्युक्तम्। कः पुनर्विरोधः? सहासंभवः। मिथ्याज्ञानाभावे रागादयोऽपयन्तीति कार्यकारणभावादेव। कारणं मिथ्याज्ञानम्, कार्या रागादयः। न [१२]हि कारणेऽसति कार्यमुत्पत्तुमर्हतीति। ये तावदनुत्पन्ना रागादयस्ते कारणाभावान्मा भूवन्। ये तूत्पन्नास्ते कथम्? तेषामपि वैराग्यान्निवृत्तिः। किं पुनर्वैराग्यम्? भोगानभिष्वङ्गलक्षणमित्युक्तम्।

---

१. पुनः सं॰ J २. न शक्यम् J ३. ॰ज्ञानोत्पत्तिरिति C ४. न शक्यं वक्तुमिति added C ५. ॰दुत्पद्यमानेन C ६. च विषयः सहायो C ७. तथासौ J ८. ॰दि प्रमाणं C ९. सहायो भ॰ C १०. ॰र्थे प्रबोधज्ञा॰ J ११. इति वि॰ C १२. च कारणं विना कार्यं भवितु॰ C

असक्तिश्च सक्तिं बाधते। तत्पुनर्वैराग्यं कथं भवति? तत्त्वज्ञानाद् विषयदोषदर्शनादिति। दोषाभावे प्रवृत्त्यभावः। यदास्य सम्यग्ज्ञानवतो दोषा अपयन्ति, अथ दोषाभावे प्रवृत्तिर्निवर्तते[१]। का पुनरियं प्रवृतिः? धर्माधर्मौ, जन्मसाधनत्वात्। नास्मिन् **सूत्रे** क्रिया प्रवृत्तिशब्देनोच्यते, अपि तु धर्माधर्मौ, तत्साधनभावात्। जन्मसाधनं धर्माधर्मौ न प्रवृत्तिः[२] क्षणिकत्वात्। धर्माधर्मयोस्तु प्रवृत्तिशब्दः प्रवृत्तिसाधनत्वात्[३]। यौ तावदनागतौ धर्माधर्मौ तयोर्दोषाभावादभावो युक्तः। यौ[४] वर्तमानौ तयोर्न युक्तः। किं कारणम्? निर्दोषस्यापि भावात्। निर्दोषोऽप्ययमवतिष्ठते धर्माधर्मयोश्च फलमुपभुङ्क्त इति। न, अनागतयोः साधनाभावेनेष्टत्वात् न ब्रूमो यौ वर्तमानौ धर्माधर्मौ तौ दोषाभावान्न भवत इति, अपि तु यावनागतौ तौ कारणाभावान्नोत्पद्येते इति। वर्तमानयोः पुनः कार्यावसायात्[५] प्रक्षयः। यौ तु[६] वर्तमानौ धर्माधर्मौ तयोर्यदावसानिकं कार्यं तेन व्यावृत्तिः। प्रवृत्त्यभावे [७]जन्माभावः। अत्रापि धर्माधर्मयोः व्यावृत्तयोर्यदन्यच्छरीरं तन्न भवति। न पुनर्वर्तमानं न भवतीति। अथ वर्तमानस्य कथं निवृत्तिः? संस्कारक्षयात्। यावदस्य स्थितिहेतुः संस्कारो धर्माधर्मसमाख्यातोऽवतिष्ठते, [८]तावत् तिष्ठतीति। जन्माभावे दुःखाभाव इति निरायतनस्यानुत्पत्तेः, न हि निरायतनं दुःखमुत्पत्तुमर्हतीति[९]। एतच्च तदाहुः, यावदात्मनि धर्माधर्मौ तावदायुः शरीरमिन्द्रियाणि विषयाश्चेति। सोऽयं मिथ्याज्ञानादिना कलापेन[१०] सर्वतो वियुक्तो विमुक्त इत्युच्यते।

तत्त्वज्ञानं तु खलु मिथ्याज्ञानविपर्ययेण व्याख्यातम्। स्वरूपतस्तु यथाव्यवस्थितपदार्थाधिगतिरित्युक्तम्[११]। कस्मात् पुनरयं हाता सुखदुःखे जहाति, न पुनः सुखमादाय दुःखं जहातीति? विवेकहानस्याशक्यत्वात्। [१२]विवेकहानमशक्यं कर्तुम्। अतः सुखमुपभोक्तुकामेन दुःखमपि भोक्तव्यम्। दुःखं वा जिहासता

---

१. °र्तत इति। C २. क्रियायाः क्ष° C ३. °त्वादिति C ४. यौ तौ C
५. °वसानात् C ६. तौ C ७. °न्मापायः C ८. °दवतिष्ठत इति C ९. °मर्हति C
१०. °नादिकला° C ११. °त्युच्यते C १२. न हि विवेकहानं शक्यं C

सुखमपि हातव्यम्, सविषान्नवदिति। **सुखं दुःखानुषक्तमनादेयमिति।** अनुषङ्गोऽविनाभावः, यत्रैकं तत्रेतरदिति। समाननिमित्तता वानुषङ्गः, यानि वा सुखसाधनानि तान्येव[१] दुःखसाधनानीति। समानाधारता वानुषङ्गः, यत्र सुखं तत्र दुःखमिति। समानोपलभ्यता वानुषङ्गः, येन सुखमुपलभ्यते तेन दुःखमपीति॥२॥

॥अभिधेयप्रयोजनसम्बन्धप्रकरणम्॥

[प्रमाणलक्षणप्रकरणम्]

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥१।१।३॥

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरिति भाष्यम्। प्रवृत्तेस्त्रैविध्यं कुतः? अर्थस्य तथाभावात्। नामी पदार्था वक्त्रा त्रेधा व्यवस्थाप्यन्ते एवं भवतेति। किं त्वर्थ एवायं तथाभूतो येन त्रेधा भवतीति। **नामधेयेन [२]पदार्थमात्रस्याभिधान**मुद्देश इत्ययुक्तम्, घ्राणादि**सूत्र**व्याघातात्।

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि [१.१.१२]

इति लक्षणमुक्तम्। न चेदं नामधेयेनोद्देशमात्राद् भिद्यते। मात्रग्रहणसामर्थ्यादप्रसङ्गः। [३]पदार्थाभिधानमात्रमित्युक्तम्। न च घ्राणादीनां पदार्थाभिधानमात्रत्वम्[४], कारकशब्दत्वात्। कारकशब्दा एते घ्राणादीनीति[५], तस्मान्नोद्देशत्वप्रसङ्गः। उद्दिष्टस्य विभागो द्वेधा भवति, लक्षितस्यालक्षितस्य च[६]। लक्षितस्य छलादेः। अलक्षितस्य प्रमाणादेरिति। अथोद्दिष्टविभागद्वारेण सूत्रम्—**प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति।**

---

१. यान्येव C २. पदार्थमात्राभिधानम् C ३. पदार्थमात्राभि° C ४. °दीनी...मात्रम् J ५. °दीति C ६. °क्षितस्य C

सूत्रार्थो निगदेनैव व्याख्यातः। उद्दिष्टस्य विभागानर्थक्यम्, व्याघातात्। **त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः** इत्युक्तम्। उद्दिष्टविभागश्च न त्रिविधायां शास्त्रप्रवृत्तावन्तर्भवति। तस्मादुद्दिष्टविभागो न युक्तः। न, उद्दिष्टविभागस्य उद्देश एवान्तर्भावात्। उद्दिष्टविभाग उद्देश एवान्तर्भवति। कस्मात्? लक्षणसामान्यात्। समानं लक्षणं नामधेयेन पदार्थाभिधानमात्रमुद्देश इति। किं पुनर्विभागेन प्रयोजनम्? नियमः। यदि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि [१.१.३] इति विभागो न क्रियेत नियमो न गम्येत, चत्वार्येव प्रमाणानीति। लक्षणतश्चतुष्ट्वाधिगतिरिति चेत्—न[१], लक्षणस्य इतरेतरव्यवच्छेदहेतुत्वात्। स्यादेषा बुद्धिर्लक्षणतः प्रमाण-चतुष्ट्वं गम्यत इति, यस्मात् चतुर्णां लक्षणमुक्तमिति। न, [२]लक्षणस्येतरेतर-व्यवच्छेदहेतुत्वात्। लक्षणं खलु लक्ष्यं पदार्थं समानासमानजातीयेभ्यो व्यवच्छि-नत्ति, नियमं तु न शक्नोति कर्तुमन्यार्थत्वात्[३]। अन्यासंभवस्य ततोऽनधिगतेः। न हि लक्षणतोऽन्यासंभवोऽधिगम्यते। ततश्चतुर्णामनभिधाने चतुर्णां लक्षणोपदेशे[४] स्यात् संशयः—किं विद्यमानानि न लक्षितानि, उताहो[५] अविद्यमानानीति। तस्मात् संशयनिवृत्त्यर्थं युक्तो विभागोद्देश इति।

अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षमिति। अयं च सूत्रविवक्षायाम्[६] अव्ययीभावः समासः। अन्यथा तु वस्तुनिर्देशो न समासः। समासे हि[७] अक्षस्येति षष्ठी न श्रूयेत। कः पुनरत्र समासः? प्रादिसमासोऽयं द्रष्टव्यः प्रतिगतमक्षं प्रत्यक्षमिति, यथोपगतो गोभिरुपगुरिति। एवमनुमानादिष्वपि द्रष्टव्यम्। **मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानमिति** न युक्तम्, फलाभावात्। एतस्मिन् व्याख्यानेऽफलम् अनुमानं प्राप्नोति[८]। किं कारणम्? अर्थस्य मितत्वात्। नैष दोषः। मितेन लिङ्गेन अर्थस्य पश्चान्मानं यतो भवतीति ब्रूमः[९]। भवतु वायमर्थो

---

१. °स्येतरव्यव° C २. °स्येतरव्यव° C ३. °त्वादिति C ४. °देशात् C ५. आहोस्वित् C ६. °विवक्षया J ७. प्रत्यक्षस्येति J ८. मानमिति C ९. भवति यत इत्यर्थः C

लैङ्गिकी प्रतिपत्तिरनुमानमिति। ननु च फलाभावो दोष उक्तः? न दोषः, हानोपादानोपेक्षाबुद्धीनां फलत्वात्। सर्वं च प्रमाणं स्वविषयं प्रति भावसाधनम्, प्रमितिः[१] प्रमाणमिति। विषयान्तरं प्रति करणसाधनम्, प्रमीयतेऽनेनेति प्रमाणम्[२]। यदि भावसाधनः प्रमाणशब्दः, किं फलम्, विषयस्याधिगतत्वात्? उक्तं फलं हानादिबुद्धय इति। ज्ञाते तद्भावात्। ज्ञाते खल्वर्थे त्रिविधा बुद्धिर्भवति हेयो वोपादेयो वोपेक्षणीयो वेति। **केचित्** तु सन्निकर्षमेव प्रत्यक्षं वर्णयन्ति। न तन्न्याय्यम्, प्रमाणाभावात्। सन्निकर्ष एव प्रमाणमिति न प्रमाणमस्ति। उभयं तु युक्तम्, परिच्छेदकत्वात्। उभयं परिच्छेदकं सन्निकर्षो ज्ञानं च। **एकान्तवादिन**स्तु दोष इति।

सामीप्यमानमुपमानमिति न युक्तम्, उपमानस्यान्यथाव्याख्यानात्। **समाख्यासंबन्धप्रतिपत्तिरुपमानार्थः** [भा १.१.६] इत्युक्तम्, इदानीं तूच्यते सामीप्यमानमुपमानमिति। ननु व्याघातः[३]? नास्ति व्याघातः, सामीप्यमानेन समाख्यासंबन्धप्रतिपत्तेरिष्टत्वात्। यस्मादयमुपयुक्तोपमानो गोदर्शी आगमप्रत्ययाहितस्मृतिपूर्वकं [४]गवा सादृश्यं प्रत्यक्षेण प्रतिपद्य अस्य गवयशब्दः संज्ञेति संज्ञासंज्ञिसंबन्धं प्रतिपद्यते, तस्मादव्याघात इति।

शब्दविषया प्रतिपत्तिः शाब्दं प्रमाणम्। फलं तदेव।

केचित् तु क्रमे प्रयोजनं वर्णयन्ति, आदौ, प्रत्यक्षग्रहणं प्राधान्यात्। तदनन्तरमनुमानं तत्पूर्वकत्वात्। तदनन्तरमुपमानं तत्साधर्म्यात्। [५]तदनन्तरं शब्दो महाविषयत्वादिति। तच्चायुक्तमिति **अपरे** मन्यन्ते, क्रमाभिधानस्य न्यायप्राप्तत्वात्। न्यायप्राप्तं क्रमाभिधानं [६]क्रमवर्णवृत्तित्वाद् वाच इति। महाविषयतायां च शब्दस्यादावभिधानप्रसङ्ग इति। एतच्चायुक्तम्, क्रमवर्णवृत्तित्वाद् वाचोऽयुगपदभिधानं युक्तम्[७]। पूर्वापराभिधाने तु न साधनमेतत्। तस्मादन्यो न्यायो

---

१. प्रमा J २. प्रमाणम् om J ३. °मिति व्याघातः? C ४. प्रत्यक्षं गवा सादृश्यं प्रति J ५. अन्ते C ६. क्रमवृ° C ७. क्रमवृत्ति...युगपदभिधानमयुक्तम् J

वक्तव्यः। स चायं न्यायः, प्रत्यक्षं पूर्वं प्राधान्यात्। महाविषयत्वादादौ शब्दोपदेश इति। न, उभयं[१] महाविषयं शब्दः प्रत्यक्षं च। कथमिति? प्रत्यक्षेणापि सामान्य-विशेषतद्वतां ग्रहणम्, शब्देनापीति। तत्र किं शब्दस्यादावुपदेशो भवतु, [२]आहोस्वित् प्रत्यक्षस्येति? प्रत्यक्षस्येति युक्तम्। किं कारणम्? सर्वप्रमाणानां प्रत्यक्षपूर्वकत्वादिति।

किं पुनरेतानि **प्रमाणानि संप्लवन्ते, [३]अथ प्रतिप्रमेयं व्यवतिष्ठन्त इति? उभयथा दर्शनम्।** तच्च प्रमाणत [४]इत्यत्रैव दर्शितम्।

सेयं प्रमितिः प्रत्यक्षपरेति। प्रत्यक्षेणाधिगतेऽर्थे आकाङ्क्षाभावात् तत्परा। यथायं लौकिकोऽमुत्राग्निरित्याप्तोपदेशादग्निं प्रत्याहितप्रत्ययस्तं देशं गच्छति। प्रत्यासीदन् पुनर्धूमविशेषणं धूमाङ्गत्वेन व्यवस्थितं हुतभुजं प्रतिपद्यते। आसन्नतर-स्त्विदानीमिन्द्रियार्थसन्निकर्षवशादग्नावग्निप्रत्ययं करोति। तदा निराकाङ्क्षो भवति। तस्मात् प्रधानं प्रत्यक्षमिति। यत्र संप्लवस्तत्रैवम्। यत्र पुनर्व्यवस्था तत्र [५]प्रधानगुणभावो न चिन्त्यत इति॥३॥

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥१।१।४॥

अथेदानीं[६] **विभक्तानां लक्षणवचनमिति** [७]लक्षणमुच्यते। तत्र **इन्द्रियार्थ-सन्निकर्षोत्पन्नमित्येवमादि सूत्रम्।** सूत्रार्थस्तु समानासमानजातीयविशेषकत्वम्। अथ पदानामर्थः। [८]कथमिन्द्रियार्थसन्निकर्षोत्पन्नमिति? इन्द्रियेणार्थस्य सन्निकर्षाद् यदुत्पद्यते ज्ञानं तत् प्रत्यक्षमिति। इन्द्रियाणि पुनर्वक्ष्यमाणकानि[९]। अर्थाश्च[१०]। सन्निकर्षः पुनः षोढा भिद्यते। संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः

---

१. इत्युभयं J २. आहो प्र० J ३. अथ व्यव० J ४. इत्येतस्मिन् पदे वर्णितम् J ५. गुणप्रधानता C ६. इदानीं om C ७. तत्र प्रत्यक्ष० added C ८. कः C ९. द्रः १।१।१२ १०. द्रः १।१।१४

समवायः समवेतसमवायो विशेषणविशेष्यभावश्चेति। तत्र चक्षुरिन्द्रियम्, रूपवान् घटादिरर्थः। तेन सन्निकर्षः संयोगः, तयोर्द्रव्यस्वभावत्वात्। अद्रव्येण तु तद्गत-रूपादिना संयुक्तसमवायः, यस्मात् चक्षुषा संयुक्ते द्रव्ये रूपादि वर्तत इति। वृत्तिश्च समवायः। एवं रूपादिवृत्तिना सामान्येन संयुक्तसमवेतसमवायः सन्निकर्षः। एवं घ्राणादिषु गन्धवदादिद्रव्येण संयोगः। तत्समवेतेषु गन्धादिषु संयुक्तसमवायः। तद्वृत्तिषु च [१]सामान्येषु संयुक्तसमवेतसमवायः। शब्दे च समवायः।

अयं खलु शब्दः संयोगविभागयोनिराद्यः। तत्र कतमः शब्दः संयोगयोनिः कतमश्च विभागयोनिरिति? आकाशगुणत्वात् शब्दस्याकाशवृत्तिः संयोगः कारणम्। गुणकर्मस्वारब्धव्येषु सापेक्ष इति सापेक्षो न निरपेक्ष इति। किमपेक्षते? भेर्याकाश-संयोगस्तावत् शब्दस्यासमवायि कारणम्, तस्यानुग्रहे भेरीदण्डसंयोगो दण्डगत-वेगापेक्ष इति। यदि पुनर्भेरीदण्डसंयोग एव शब्दस्य कारणं स्यात्, व्यधिकरणः संयोगः शब्दकारणमिति सर्वत्र शब्दस्योत्पत्तिप्रसङ्गः। विभागजविभागाच्च शब्दः। वंशदलविभागानुगृहीताद् वंशदलाकाशविभागाच्छब्द इति। स उत्पन्नः शब्दः सर्वदिक्कानि शब्दान्तराणि करोति। तान्यपि प्रत्येकं शब्दान्तराणि तावत् यावत् [२]कर्णशष्कुलीमानाकाशदेश इति। यः कर्णशष्कुलीमत्याकाशदेशे समवैति, स समवायादुपलभ्यते। तद्गतेषु च सामान्येषु समवेतसमवायादिति। समवाये चाभावे च विशेषणविशेष्यभावादिति। सोऽयं सन्निकर्षशब्दः संयोगसमवाय-विशेषणविशेष्यभावव्यापकत्वादुपात्त इति। सोऽयं सन्निकर्षः प्रत्यक्षस्य कारणं भवतीति लक्षणत्वेनोच्यते।

यदीन्द्रियार्थसन्निकर्षः प्रत्यक्षस्य कारणत्वादुपदिश्यते, अत्यल्पमिदमुच्यते। अन्यान्यपि प्रत्यक्षस्य कारणानि बहूनि सन्ति। तान्यपि वक्तव्यानि। तद्यथा— आत्ममनःसंयोगः इन्द्रियमनःसंयोगः विषयप्रकाशसंयोगः विषयस्थं रूपम् विषयसंयोगिस्थं च महत्त्वम् अनेकद्रव्यवत्त्वम् उपलब्धिफलः संस्कार इति।

---

१. तद्वर्तिषु च सामान्यादिषु C २. °मत्याकाश° C

कस्मात्? तद्भावे भावात् तदभावे चाभावादिति। तद् यदि कारणभावादिन्द्रियार्थसन्निकर्षग्रहणम्, एतान्यपि कारणान्तराणि वक्तव्यानि।

न वक्तव्यानि। नेदं कारणावधारणार्थं **सूत्रम्,** अपि तु समानासमानजातीयविशेषणार्थम्। यत् प्रत्यक्षस्यासाधारणं कारणं[१] तदभिधीयते, न पुनः साधारणं कारणं[२] निवर्त्यत इति। इन्द्रियमनःसंयोगस्तर्हि असाधारणत्वादुपसंख्येयः, न ह्ययमनुमानादिज्ञानानां कारणत्वेन संभवति[३]। न, अनेनैव तस्योक्तत्वात्। इन्द्रियार्थसन्निकर्षग्रहणेन इन्द्रियमनःसंयोग उक्तो वेदितव्यः। किं कारणम्? उभयोरसाधारणत्वात्। न च यावदसाधारणं कारणं [४]सर्वं तद् वक्तव्यमिति सूत्रार्थः। अपि तु अन्यतरेणापि भिद्यत इत्यन्यतरोपादानम्। इन्द्रियार्थसन्निकर्षग्रहणं वा विशेषकत्वात्। [५]यदिन्द्रियार्थसन्निकर्षादुपजायते विज्ञानं तस्यान्यतरद् विशेषकं भवति। इन्द्रियमर्थो वा तद्विशेषकम्[६], तेन व्यपदेशात्। यस्मादिदं विज्ञानमिन्द्रियेण वा व्यपदिश्यते अर्थेन वा, रूपविज्ञानमिति वा चक्षुर्विज्ञानमिति वा। न पुनरिन्द्रियमनःसंयोगेन व्यपदिश्यते। न हि भवति रूपालम्बने विज्ञाने मनोविज्ञानमिति। यदा त्वात्ममनःसंयोगान्मानस्यो बुद्धयः संप्रवर्तन्ते तदात्मना व्यपदिश्यन्ते मनसा वा[७]। यच्चासाधारणं कारणं[८] तद् व्यपदेशभाग् भवति। तद्यथा, ऋत्वादिकारणसन्निधानात् प्रादुर्भवन्नङ्कुरो नर्त्वादिभिर्व्यपदिश्यते, अपि त्वसाधारणेन बीजेन व्यपदिश्यते यवाङ्कुर इति, तथेहापीत्यदोषः।

इन्द्रियमनसोः संयोगस्य वा अग्रहणम्, भेदेऽभेदात्। यस्मात् प्रत्यक्षज्ञानभेदे इन्द्रियमनःसंयोगो न भिद्यत इति। यद्यभेदादग्रहणं इन्द्रियार्थसन्निकर्षस्यापि तर्ह्यग्रहणम् एकेन्द्रियग्राह्येषु अभेदादिति प्राप्तं यथा शुक्लो गौर्गच्छतीति? न, उक्तोत्तरत्वात्। उक्तोत्तरमेतत्–नेदं कारणावधारणार्थं **सूत्र**मिति। अनभ्युपगमाच्च। इन्द्रियमनःसंयोगस्य चाग्रहणं **समानत्वात्।** केन समानत्वादिति वाच्यम्। आत्ममनः

---

१. कारणं om J २. कारणं सं॰ C ४. तावत् सर्वमभिधातव्यमित्यर्थः C
५. यद् वा यदि॰ J ६. ॰षकत्वम् J ७. च C ८. कारणं om J

संयोगेन समानत्वात्। किं पुनस्तत्? व्यपदेशाभाव इत्युक्तम्। अतीन्द्रियाधारता वा सामान्यम्। यथा वात्ममनःसंयोगोऽतीन्द्रियाधारः, एवमिन्द्रियमनःसंयोगोऽपीति। विषयावृत्तित्वं वा। यथा वात्ममनःसंयोगो [1]विषयावृत्तिः तथेन्द्रियमनःसंयोगोऽपीति। मनोवृत्तित्वं वा। यथा वात्ममनःसंयोगो मनोवृत्तिरेवमिन्द्रियमनःसंयोगोऽपीति। [2]तस्मादिन्द्रियमनःसंयोगस्यात्ममनःसंयोगसामान्यादन्यतराभिधानेन वा चरितार्थत्वादनभिधानमिति।

इन्द्रियार्थसन्निकर्षोत्पन्नमित्ययुक्तम्, इन्द्रियस्याप्राप्यकारित्वात्। अप्राप्यकारिणी चक्षुःश्रोत्रे इति **एके**। तत्र च न्यायं ब्रुवते, अप्राप्यकारि चक्षुः सान्तरग्रहणात् पृथुतरग्रहणाच्चेति। सान्तरस्यार्थस्य विप्रकृष्टदेशावस्थितस्य ग्रहणं दृष्टम्, न तु चक्षुषस्तेनार्थेन प्राप्तिरस्ति, भूतविशेषस्येन्द्रियभावात्। य एवायं कृष्णसारलक्षणो भूतविशेषः स बाह्यभूतविशेषप्रसादानुगृहीतस्तत्तृष्णापूर्वककर्मापेक्षः चक्षुरित्युच्यते। तथा चोक्तम्—रूपोपलब्धिसंवर्तकेन कर्मणा तत्तृष्णापूर्वकेण चक्षुरभिनिर्वृत्तमतो रूपोपलब्धेः कारणं भवतीति। एवं शेषेषु। न च भूतविशेषानुगृहीतस्य गोलकस्य प्राप्तिर्विषयेण अस्ति। तस्मात् सान्तरग्रहणादप्राप्यकारीति। **अपरे** तु सान्तर इति ग्रहणं हेतुं वर्णयन्ति। न हि प्राप्यकारिषु घ्राणादिषु सान्तर इति ग्रहणं दृष्टम्, दृष्टं तु चक्षुषि।

पृथुतरग्रहणाच्च। राष्ट्रवनादिरूपं च महदुपलभ्यते, न चाक्ष्णोस्तथा पृथ्ववभास इति।

दिग्देशव्यपदेशाच्च। यदि प्राप्यकारि चक्षुर्भवेत्, दिग्देशव्यपदेशो न स्यात्। न हि प्राप्यकारिषु घ्राणादिषु एतदस्तीति।

सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणाच्च। यत् खलु गतिमद्भवति तत् तां गतिमभिन्दत् सन्निकृष्टमाशु प्राप्नोति, विप्रकृष्टं चिरेण। शाखाचन्द्रमसोस्तुल्यकालग्रहणं दृष्टम्, तस्मादप्राप्यकारीति।

---

१. न विषयवृ॰ J २. ॰योगेन सा॰ C

यत् तावत् सान्तरग्रहणादिति, तदयुक्तम्, विकल्पानुपपत्तेः। सान्तरग्रहणमिति कोऽर्थः? किं तावत् सान्तरस्य [१]ग्रहणमप्राप्तस्य ग्रहणमित्ययमर्थः, आहोस्वित् [२]सहान्तरेण ग्रहणं सान्तरग्रहणमिति? अस्तु तावत् पूर्वः पक्षः अप्राप्तस्य ग्रहणं सान्तरग्रहणमिति। नन्वयं प्रतिज्ञार्थ एव, ततश्च हेत्वभावः। किं कारणम्? हेत्वर्थस्य प्रतिज्ञार्थेन आक्षिप्तत्वात्। एतदुक्तं भवति, अप्राप्यकारि चक्षुः, अप्राप्यग्रहणादिति न प्रतिज्ञार्थाद् भिद्यते। अथ ब्रूषे सहान्तरेण ग्रहणमिति। किं तदन्तरं नाम, यच्चक्षुषा विषयेण सहोपलभ्यत इति? किमाकाशमभावो द्रव्यान्तरं वा? यद्याकाशम्, तत्र चक्षुषो विषयः। न ह्याकाशं चक्षुर्ग्राह्यम्, अरूपत्वादिति[३]। अथ [४]रूपवद्द्रव्यान्तरमन्तरशब्दवाच्यम्, तस्य व्यवधायकत्वात् तेन सह ग्रहणं न युक्तम्[५]। अथाभावोऽन्तरशब्दवाच्यः? स स्वतन्त्रश्चक्षुर्विषयो न भवतीति तेन सहोपलब्धावनैकान्तिकम्। न चान्या गतिरस्ति। तस्मात् शून्यमभिधानं सान्तरग्रहणादिति। यैरपि विद्वस्यमानैः सान्तरग्रहणादित्यस्य सान्तर इति ग्रहणमित्येतद्व्याख्यानं क्रियते, तदप्ययुक्तम्, सान्तर इति ग्रहणस्यान्यनिमित्तत्वात्। अन्यथैव[६] सान्तर इति ग्रहणं भवति, शरीरावधिनिमित्तत्वात्। शरीरमवधिं कृत्वा सान्तरनिरन्तरे भवतः, न पुनरिन्द्रियप्राप्त्यप्राप्त्यपेक्षे[७]। यत्र शरीरमिन्द्रियं चोभयमर्थेन संबध्यते तत्र निरन्तरमिति ग्रहणं भवति। यत्र पुनः इन्द्रियमात्रे संबन्धः[८] तत्र सान्तर इति। तस्मात् सान्तर इति ग्रहणस्यान्यनिमित्तत्वात् न सान्तरग्रहणादप्राप्यकारित्वं सिध्यतीति।

यदपि पृथुतरग्रहणादिति तदप्ययुक्तम्, संबन्धमात्रेण महदण्वोर्ग्रहणात्। संबन्धमात्रेणैव महति वाणौ वा विषयभेदानुविधायी प्रत्यय उपजायते। तस्मादचोद्यमेतदपीति[९]।

---

१. ग्रहणम् om C २. सहान्तरेण ग्रहणम् om J ३. °पित्वाद् वाय्वादिवदिति C ४. °द्रव्यमन्तर° C ५. ग्रहणमनुपपन्नम् C ६. °थैतत् C ७. °प्राप्तिनिमित्ते भवतः C ८. °मात्रं संबध्यते C ९. °ददेश्यम् C

यत् पुनरेतदुक्तं दिग्देशव्यपदेशादिति[१], तदपि शरीरावधिनिमित्तत्वेन प्रत्युक्तम्। यत्रेन्द्रियं शरीरं चार्थेन संबध्यते तत्र दिग्देशव्यपदेशो न[२] भवति, दूरान्तिकानुविधानं वा। यत्र पुनरिन्द्रियमेव केवलं संबध्यते तत्र शरीरमवधिं कृत्वा संयुक्तसंयोगाल्पीयस्त्वं तद्भूयस्त्वं वापेक्षमाणस्य दिग्देशप्रत्यया: सन्निकृष्टविप्रकृष्टप्रत्ययाश्च भवन्तीति।

यत् पुनरेतत् शाखाचन्द्रमसोस्तुल्यकालग्रहणादिति[३], तदपि न, अनभ्युपगमात्। को हि स्वस्थात्मा शाखाचन्द्रमसोस्तुल्यकालग्रहणं प्रतिपद्यते? कालभेदस्याग्रहणान्मिथ्याप्रत्यय एष उत्पलदलशतव्यतिभेदवदिति। कथं पुनरवगम्यते कालभेदाग्रहणनिमित्त एष युगपत्प्रत्ययो न पुनरेककालग्रहणनिमित्त [४]एवेति? इदमनुमानम् आवरणानुपपत्तेरिति। यद्यप्राप्यकारि चक्षुर्भवति, न कुड्यकटादेरावरणस्य सामर्थ्यमस्तीत्यावरणानुपपत्ति: स्यात्। न च व्यवहितार्थोपलब्धिरस्ति। तस्मात् नाप्राप्यकारि। दूरान्तिकानुविधानं चानुपलब्ध्युपलब्ध्योर्न स्यात्। अप्राप्य चक्षुरर्थं गृह्णातीति यदिदमर्थस्य दूरे अग्रहणम् अन्तिके च ग्रहणमुभयमेतत् न स्यात्। [५]दृष्टं तु। तस्मात् नाप्राप्यकारि। विषयीभावादिति [६]चेत्—तच्च नैवम्, संबन्धव्यतिरेकेण[७] तु विषयीभावानभ्युपगमात्। अथापीदं स्यात् य: चक्षुषोर्विषयीभवत्यर्थ: स उपलभ्यते। यस्तु न भवति नासावुपलभ्यत इति। न च व्यवहितानां दूरावस्थितानां वार्थानां चक्षुषो विषयीभावोऽस्ति, तस्मात् न ते गृह्यन्त इति। तच्च नैवम्, संबन्धव्यतिरेकेण[८] विषयीभावानभ्युपगमात्। क: पुन: संबन्धव्यतिरेकेण विषयीभाव:? केवलं भवतां [९]संज्ञामात्रं भिद्यते नार्थ इति। मयोच्यते संबन्ध इति। भवताभिधीयते विषयीभाव इति। न कश्चिद् विशेष इति।

---

१. ३१।१९ २. न om J ३. ३१।२२ ४. एककाल एव C ५. इष्टं J
६. चेत्-न, C ७,८. ०न्धमन्तरेण C ९. ०मात्रं om J

अथ प्राप्यकारित्वे चक्षुषः किं प्रमाणम्? इन्द्रियत्वमेव। प्राप्यकारि चक्षुः इन्द्रियत्वात् घ्राणादिवत्। घ्राणादीन्द्रियं प्राप्यकारि दृष्टम्। तथा च चक्षुः। तस्मात् प्राप्यकारीति। अथ पुनर्न किञ्चिदपीन्द्रियं प्राप्यकारि प्रतिपद्यते, तदा सर्वाणि पक्षीकृत्य करणत्वादिति वाच्यम्। करणं [१]वास्यादि प्राप्यकारि दृष्टम्। तथा चेन्द्रियाणि। तस्मात् प्राप्यकारीणीति।

अथ पुनर्वैयात्यात् सर्वानेवार्थानप्राप्यकारिणः प्रतिपद्यते, तदा कथम्? सोऽपि दृष्टसामर्थ्यानां कारणानां सर्वत्र कार्यानुत्पत्त्या प्रत्यवस्थेयः। यदि खल्वेतानि कारणानि परस्परप्राप्त्यनपेक्षाणि स्वयमनुपजातशक्तिकानि कार्यमारभन्त इति कस्मात् कार्यं सर्वत्र न भवतीति वक्तव्यम्। अतो न [२]करणमप्राप्यकारि अस्तीति। अनेकदण्डचक्राद्युदाहरणं लोक इति। तस्माद् [३]व्यवस्थितमिन्द्रियार्थसन्निकर्षोत्पन्नमिति[४]।

अथ ज्ञानग्रहणं किमर्थम्? सुखादिव्युदासार्थम्[५]। इन्द्रियार्थसन्निकर्षात् सुखदुःखे अपि भवतः। तद्व्युदासार्थमाह—**ज्ञानमिति**। तच्चेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं विषयनामधेयेनाभिधीयत इति **भाष्यम्**। तत्प्रतिषेधार्थमाह—**अव्यपदेश्यमिति**। यदिदमनुपयुक्तशब्दार्थसंबन्धस्य विषयभेदानुविधायि ज्ञानं तत् प्रत्यक्षम्। कृतशब्दार्थसंबन्धस्यापि तदुत्पत्तिकाले तादृगेव।

अपरे तु अव्यपदेश्यमित्यनेनानुमानं निराकुर्वन्ति। तच्च नैवम्। कस्मात्? इन्द्रियार्थसन्निकर्षोत्पन्नमिति वचनात्। न ह्यनुमेयस्येन्द्रियेण सन्निकर्षादनुमानं भवति। अतो न प्रसङ्गोऽनुमान इति।

ग्रीष्मे मरीचय इति **भाष्यम्**। तत्प्रतिषेधार्थमिदमुच्यते–**अव्यभिचारीति**। किमिदं व्यभिचारि? यदतस्मिंस्तदिति भवति। किं पुनरत्र व्यभिचारि, किमर्थः, आहो ज्ञानमिति? **एके** तावद् वर्णयन्ति–अर्थस्य व्यभिचारः, अर्थस्तु

---

१. वा स्यादिति C २. कारण° C ३. °स्थितमेतदिन्द्रि° C ४. °पन्नं ज्ञानमिति C ५. °दिव्यवच्छेदार्थम् C

तथा न भवतीति तद्व्यभिचारात् तद्विषयं [१]ज्ञानमपि व्यभिचारीत्युच्यत इति। तच्च नैवम्। कस्मात्? अर्थस्य तथाभावात्। यत् तदुदकादिज्ञानमुपजायते मरीचिषु स्पन्दमानेषु न तत्रार्थो व्यभिचरतीति। न हि ते न मरीचयो न वा[२] स्पन्दन्ते, किं तु ज्ञानं व्यभिचरति, अतस्मिंस्तदिति भावादिति। न हि तत्रोदकमस्ति। तांस्तु मरीचीन् इन्द्रियोपघातदोषादिन्द्रियेणालोच्य विपर्येति इति ज्ञानस्य व्यभिचारो नार्थस्येति।

दूराच्चक्षुषा ह्ययमर्थं पश्यन्नावधारयतीति भाष्यम्। तद्व्युदासार्थमाह— **व्यवसायात्मकमिति।** न, संशयस्यानिन्द्रियार्थसन्निकर्षजत्वात्। न हीन्द्रियार्थसन्निकर्षात् संशयज्ञानं भवति, अपि तु मानसः प्रत्ययः। संशीतिः संशय इति। तच्च नैवम्। संशयस्योभयनिमित्तत्वात्। उभयं तु संशयनिमित्तम् आत्मान्तःकरणसंयोग इन्द्रियार्थसन्निकर्षश्चेति। तत्र यदिन्द्रियार्थसन्निकर्षा**नवधारणपूर्वकं मनसानवधारणं** तदिह संबध्यते। तस्य हीन्द्रियार्थसन्निकर्षः कारणमिति। पूर्वं तु न संबध्यते, यदात्मान्तःकरणसंयोगाद् भवतीति। तस्मादस्ति विषयो विशेषणस्येति [३]युक्तमुक्तं व्यवसायात्मकमिति।

इन्द्रियार्थसन्निकर्षोत्पन्नमित्येवमादिलक्षणम् **आत्मादिषु सुखादिषु** च नास्ति, मनसोऽनिन्द्रियत्वादतोऽव्यापकमेतत् प्रत्यक्षलक्षणमिति। कथं पुनरिन्द्रियं मनो न भवति? इन्द्रिय**सूत्रे**ऽपठितत्वात्। परिपठितानि घ्राणादीनीन्द्रियाणि, न च तेषु मनः परिपठितम्। तस्मान्मनो नेन्द्रियम्। पृथक् [४]च विधानात् नास्ति मनस इन्द्रियत्वे प्रमाणम्। ततश्च नेन्द्रियं मन इति। न चैवं प्रत्यक्षाः सुखादयो भविष्यन्तीति। प्रत्यक्षाश्चैते, नानुमानिकाः लिङ्गाभावात्। न हि लिङ्गमन्तरेणानुमेयोऽर्थो[५] गम्यते। नाप्यन्यत् प्रमाणं प्रतिपादकं[६] सुखादीनाम्। न च तेषामप्रमेयत्वम्[७]। न चान्या गतिरस्ति। तस्मात् कर्तव्यं सुखादीनां प्रत्यक्षेण ग्रहणोपसंख्यानमिति।

---

१. अपि om J २. वा om J ३. युक्तम् C ४. चानभिधानात् C
५. °नुमेयार्थो C ६. °कमस्ति C ७. °मनुमेय° C

कश्चैवमाह—न प्रत्यक्षा सुखादय इति? इन्द्रियार्थसन्निकर्षजन्यप्रत्यक्षवाद्याह—नैष दोषः, मनस इन्द्रियत्वादिन्द्रियार्थसन्निकर्षोत्पन्नं सुखादिज्ञानमिति। यत् तु **सूत्रे**ऽनभिधानं तद् वैधर्म्यात्। [१]वैधर्म्यं सर्वविषयत्वासर्वविषयत्वे[२]। सर्वविषयं मनः। असर्वविषयाणीन्द्रियाणि[३]। सर्वविषयत्वं तु मनसः, स्मृतिकारणसंयोगाधारकत्वादात्मवत्। सुखग्राहकसंयोगाधारत्वात्[४] समस्तेन्द्रियाधिष्ठातृत्वाच्च आत्मवत्। भौतिकाभौतिकत्वं तु न, विरोधात्। न हि भौतिकं मनो नाप्यभौतिकमिति। कार्यधर्मावेतौ भौतिकत्वम् अभौतिकत्वं च। न च कार्यं मनः। तस्मान्न भौतिकं नाप्यभौतिकमिति। श्रोत्रे चासंभवः। यदि भौतिकाभौतिकत्वलक्षणाद् वैधर्म्यादपरिपाठः **सूत्रे** मनसः, श्रोत्रमपि तर्हि न पठितव्यम्, न हि श्रोत्रं भौतिकं न चाप्यभौतिकमिति। स्वार्थे प्रत्ययाधानमिति चेत्—[५]न, प्रत्ययवैयर्थ्यात्। स्यादेषा बुद्धिः स्वार्थिक एष प्रत्ययो भूतमेव भौतिकमिति। तच्च न, प्रत्ययवैयर्थ्यात्। न हि भौतिकमित्यनेन आकाशे कश्चित् तद्धितार्थो जन्यते। तस्माद् व्याहतमेतत् स्वार्थे प्रत्ययविधानमिति।

यत् पुनरेतत् पृथगभिधानं नास्तीति। न नास्ति, अयुगपज्ज्ञानोपपत्तेरिति। युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् [१.१.१६] इत्युक्तम्। तेन च प्रतिपादितमेतन्मनसः करणत्वमिति।

सगुणानामिन्द्रियभावो वैधर्म्यमित्येतदपि न युक्तम्, श्रोत्रानभिधानप्रसङ्गादेव। तस्मात् सर्वासर्वविषयत्वं वैधर्म्यमित्येतदेव च ज्यायः।

तन्त्रान्तरसमाचाराच्च मन इन्द्रियमिति[६]। तन्त्रान्तरेषु मन इन्द्रियमिति पठ्यते । तच्चेह न प्रतिषिद्धम्। अप्रतिषेधादुपात्तं तदिति न, शेषाभिधानवैयर्थ्यदोषात्[७]। शेषाण्यपि इन्द्रियाणि तैः परिपठितानि। तस्मात् तान्यपि न वक्तव्यानि, यद्यप्रतिषेधादुपादानं भवतीति। न, तन्त्रयुक्त्यनवबोधात्। न भवता तन्त्रयुक्तिः

---

१. किं तद् वै° C २. °विषयत्वम् J ३. °पीतराणि C ४. °धिकरणत्वात् C ५. न ... वैयर्थ्यात् om J ६. मन...मिति om C ७. वैयर्थ्यात् C

परिज्ञायते। परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः। न च यस्य स्वपक्षपरिग्रहो[१] नास्ति, तस्य स्वमतं परमतं वा विद्यते[२]। भवता च परमतानुरोधेन[३] सर्वं स्वमतं निवार्यत इति। तन्निवारणात् स्वमतं परमतमित्येतदेव न स्यात्। तस्मादस्ति मन इन्द्रियं चेति। तदुपपन्नम् इन्द्रियार्थसन्निकर्षोत्पन्नं सुखादिषु ज्ञानमिति व्यापकं लक्षणम्।

समस्तमसमस्तं चेति सन्देहः। [४]किमिदं प्रत्यक्षलक्षणं समस्तमाहो असमस्तमिति सन्देहः। कुतः? उभयथा दर्शनात्, समस्तं च लक्षणं भवति व्यस्तं च। [५]इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् [१.१.१०] इति व्यस्तलक्षणम्। एकशः प्रतिपादकत्वात्। तथा समानानेकधर्मोपपत्तेः [१.१.२३] इत्येवमादि च व्यस्तम्। समस्तं पुनः वचनविघातोऽर्थविकल्पोपपत्त्या छलम् [१.२.१०]। समस्तेनानेन छलं लक्ष्यते। प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् [१.१.६] इति च। लक्षणं चेदम्। अतः सन्देहः, किं समस्तम्, उतासमस्तमिति?

समस्तमित्याह। यस्मादेकशोऽनुमानसुखशाब्दविपर्ययसंशयज्ञानानि निवर्तन्त इति। यदीन्द्रियार्थसन्निकर्षोत्पन्नमित्येवमाद्येकशः[६] पदमभिधीयते, [७]यो य एकैकेन पदेनार्थः संगृहीतः स स प्रत्यक्षः स्यादिति। तेन पूर्वोक्तानामनुमानादीनां [८]प्रत्यक्षत्वप्रसङ्गः स्यादिति। एवं द्वयोः पदयोरुपादाने [९]पदद्वयेनोपात्तस्य प्रत्यक्षत्वप्रसङ्गः। एवं त्रयाणां पदानामुपादाने तैरुपात्तस्य प्रत्यक्षत्वप्रसङ्गः। एवं चतुर्णां पदानामुपादाने तैरुपात्तस्य प्रत्यक्षत्वप्रसङ्गः। तस्मादेकद्वित्रिचतुष्पदपर्युदासात् पञ्चपदपरिग्रहेण त्रिंशत्कोटीर्व्युदस्य समस्तं लक्षणमित्युच्यते। तत्रैकपदपरिग्रहेण तावत् पञ्च कोटयः। द्विपदपरिग्रहेण दश। त्रिपदपरिग्रहेणापि दशैव। चतुष्पदपरिग्रहेण पञ्च। एकत्रिंशत्तमी पुनः समस्तपरिग्रहेणोपात्तेति। कस्मात्?

---

१. स्वमत॰ C २. भिद्यते C ३. °तानिषेधेन J ४. किमिदं...सन्देहः om J ५. इच्छाप्रयत्नद्वेष॰ C ६. एवम् om C ७. योऽयम् C ८. प्रत्यक्षत्व॰ om J ९. पदद्वयोपा॰ C

विशेषविधिप्रतिषेधयोः शेषप्रतिषेधविध्यभ्यनुज्ञाविषयत्वात्। अयं खलु विशेषविधिः प्रवर्तमानः शेषं प्रतिषेधयति, यथा दक्षिणेनाक्ष्णा पश्यतीति। विशेषप्रतिषेधश्च शेषाभ्यनुज्ञाविषयो भवति, यथा वामेनाक्ष्णा न [१]पश्यामीति, तथेहाप्येकदेशाभ्युपगमे शेषप्रतिषेधः, शेषविधानं वा गम्यत इति व्यवस्थितं प्रत्यक्षमिति।

अपरे पुनर्वर्णयन्ति–ततोऽर्थाद् विज्ञानं प्रत्यक्षमिति। तन्न, ततोऽर्थादिति, यस्यार्थस्य यद्विज्ञानं व्यपदिश्यते यदि तत एव तद्भवति नार्थान्तरात्[२], तत् प्रत्यक्षम्। एतेनानुमानादिज्ञानमपक्षिप्तं भवति। न हि तत एव तद्भवति। किं तर्हि? ततश्चान्यतश्च तद्भवति। अत्र तावदर्थग्रहणं न कर्तव्यम्। ततो विज्ञानमित्युच्यमाने गम्यत एव तदर्थादिति। अवधारणार्थोऽर्थशब्द इति चेत्, स्यान्मतिरेषा अवधारणार्थोऽर्थशब्दो भविष्यतीति, यदुक्तं भवति तत एवेति, तदुक्तं भवति ततोऽर्थादिति। तन्न युक्तम्, [३]एकपदस्याप्यवधारणार्थस्य[४] दृष्टत्वात्, अब्भक्ष इति यथा। एतेनैवानुमानादिव्युदासोऽपि प्रत्युक्तः। यत् पुनरेतत् [५]संवृतिज्ञानमनेनापक्षिप्तमिति, तदेतन्न बुध्यामहे कथं तत् अपक्षिप्तमिति। यदि ब्रूषे रूपादिभ्य उत्पन्नं ज्ञानं घटस्य व्यपदिश्यत इति, अतो[६] न ततो भविष्यतीत्यपक्षिप्तमिति, तन्न युक्तम्। न हि रूपादिभ्य उत्पन्नं विज्ञानं घटस्य व्यपदिश्यते। रूपादिभ्य उत्पन्नं रूपादीनां घटाद्[७] विज्ञानं घटस्येत्यतो न प्रसङ्गः। अथाप्ययं मनोरथो न रूपादिव्यतिरिक्ता घटादय इति [८]मनोमोदकोपयोगमात्रमेतत्। यथा तु तद्व्यतिरिक्ता घटादयः, तथा [९]वक्ष्यामः। सर्वं च स्वविषयाद् विज्ञानं भवतीति ततोग्रहणमनर्थकमिति। ननु च मिथ्याज्ञानमतस्मादपि भवति, न ह्यतस्मात् तद् भवतीति। किं तर्हि? अतस्मिंस्तद्भवतीति[१०]। न भवता मिथ्याज्ञानमपि व्यज्ञायि। ततोग्रहणम् अर्थग्रहणं चान्तरेण विज्ञानमात्रमवशिष्यते। तथा च न लक्षणमुक्तं

---

१. पश्यतीति C २. °राद्भवति C ३. अपि om C ४. °अर्थ° om J ५. संवृत्ति° C ६. इत्यतो om C ७. घटादिभ्य उत्पन्नं ज्ञानं C ८. °भोग° C ९. उपरिष्टाद् व° C द्रः १।१।१४ १०. °स्मिंस्तु तदिति तद्° C

स्यात्। सर्वं च ज्ञानं प्रत्यक्षं स्यात्। यद्यप्येतत्**सूत्रं** यथाश्रुति भवति, तथापि ग्राह्यग्राहकविज्ञानयोरयुगपद्भावाज्ज्ञानमप्रत्यक्षं स्यात्। नाशोत्पादौ सममिति चेत्—तच्च न, उदाहरणाभावात्। न हि समं नाशोत्पादे किञ्चिदुदाहरणमस्ति। विनष्टश्चार्थः प्रत्यक्ष इति स्यात्। तुल्यमिति चेत्–स्यान्मतिर्भवतां युगपदवस्थाने किमुदाहरणमिति? तच्च नैवम्, उक्तोत्तरत्वात्। उक्तोत्तरमेतत् स्फाटिकादि**सूत्रे**[१] इति।

अपरे तु मन्यन्ते—प्रत्यक्षं कल्पनापोढमिति। अथ केयं कल्पना? नामजात्यादियोजना[२]। यत् किल न नाम्नाभिधीयते, न च जात्यादिभिर्व्यपदिश्यते विषयस्वरूपभेदानुविधायि[३] परिच्छेदकमात्मसंवेद्यं तत् प्रत्यक्षमिति। ते इदं प्रष्टव्याः, अथ प्रत्यक्षशब्देन कोऽर्थोऽभिधीयत इति? यदि प्रत्यक्षम्, कथमवाच्यम्? अथ न प्रत्यक्षमवाचकस्तर्हि प्रत्यक्षशब्दः। अथ प्रत्यक्षशब्देन सामान्यमुच्यत इति, एतदपि सामान्यं किं प्रत्यक्षव्यतिरेकि, आहोस्विदव्यतिरेकीति? यदि प्रत्यक्षव्यतिरेकि? न प्रत्यक्षमुक्तम्। अथाव्यतिरेकि? कथं नोक्तम्? कल्पनापोढशब्देनापि यदि प्रत्यक्षमुच्यते, तदा व्याघातः। अथ नोच्यते, तथापि कल्पनापोढशब्दोच्चारणं[४] व्यर्थम्। प्रत्यक्षं कल्पनापोढमिति च वाक्यम्। अथास्य वाक्यस्य कोऽर्थः? यदि प्रत्यक्षम्, व्याघातः। [५]कथम्? प्रत्यक्षं कल्पनापोढमिति चानेन वाक्येनाभिधीयते, न चाभिधेयमिति कोऽन्यो **भदन्ताद्** वक्तुमर्हति? अथ न प्रत्यक्षमस्यार्थः, वर्णोच्चारणमात्रं तर्ह्येतद्वाक्यं प्रत्यक्षं कल्पनापोढमिति। अनित्यादिशब्दविषयत्वाच्च न सर्वथा अवाच्यम्। अनित्यं प्रत्यक्षं दुःखं शून्यम् अनात्मकं च [६]प्रत्यक्षम्। एषां चेत् शब्दानां विषयतामुपयाति, कथमवाच्यम्? अथ नोपैति? न सर्वं संस्कृतमनित्यमित्येतत् **तथागतेन** आख्यातव्यम्। अथ स्वरूपतो न व्यपदेश्यमित्ययं कल्पनापोढशब्दार्थः? सर्वेऽर्थास्तर्हि प्रत्यक्षाः प्राप्नुवन्ति। किं कारणम्? न हि कश्चित् सुशिक्षितोऽपि पदार्थानां स्वरूपं निर्देष्टुं शक्नोति,

---

१. द्रः ३।२।९ २. जात्यादि° J ३. °भेद° om C ४. °पोढवचनं C ५. कथम् om J ६. °क्षमिति C

असामयिकत्वात्। सर्वस्य च वस्तुनो द्वावाकारौ सामान्याकारो विशेषाकारश्च। तत्र वस्तु सामान्येनैव आकारेणाभिधीयते, न विशेषाकारेण। न च [१]तथानभिधानात् नोक्तं भवति। न हि मनुष्यशब्दस्य ब्राह्मणो न वाच्यः। ये तु तस्यासाधारणधर्माः पुरुषान्तरव्यावृत्तप्रत्ययहेतवो[२] [३]न तैः सहाभिधीयते। न च तैः सहानभिधानान्नोक्तो भवतीति। एवं [४]प्रत्यक्षम् अपि सामान्यविशेषाकारवत्, तस्य विशेषाकारेण नाभिधानम्, सामान्याकारेण त्वभिधानमेव। यदि च विशेषाकारेणानभिधानम्, यत् तल्लक्षणं प्रत्यक्षस्य, न केवलं प्रत्यक्षस्य, त्रैलोक्यस्यैतल्लक्षणम्। एवं च प्रत्यक्षस्य लक्षणं नोक्तं स्यात्। अथ कल्पनापोढशब्देन प्रत्यक्षस्य स्वरूपमभिधीयते, एवमपि अनिवृत्तो व्याघातः, स्वरूपं चानभिधेयम्, अनेन च शब्देनोच्यत इति। अथानेन शब्देन नैव किञ्चिदभिधीयते, किमस्य शब्दस्योच्चारणसामर्थ्यं प्रत्यक्षं कल्पनापोढमिति? अप्रतिपादकत्वान्मूकस्वप्नसदृशमेतत्। एवं यथा यथेदं लक्षणं विचार्यते, तथा तथा न्यायं न सहत इति।

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति[५]। एतदपि [६]संशयाद्युत्पत्तिनिमित्तत्वादलक्षणमिति। तथा चोक्तं प्रत्यक्ष**सूत्रं** वर्णयद्भिरिति।

एतेन प्रत्यक्षमिन्द्रियार्थसन्निकर्षमनःप्रकाशविशेषेषु सत्स्विति प्रत्युक्तम्। तथा श्रोत्रादिवृत्तिरिति। किं कारणम्? पञ्चपदपरिग्रहेण प्रत्यक्षलक्षणमुक्तम्, यत्रान्यतमपदपरिग्रहो नास्ति, तत् प्रत्यक्षाभासमिति। एवमनेन न्यायेन यान्यप्यनुक्तानि लक्षणानि तान्येतस्मात् लक्षणात् न भिद्यमानानि न लक्षणानीति। व्याख्यातं प्रत्यक्षलक्षणमिति॥४॥

---

१. विशेषानभिधानात् C　२. °न्तरावृत्तयो धर्माभेदप्रत्यय° J　३. न धीयते om C
४. ज्ञानमपि C　५. जै. सू. १.१.४　६. °द्युपलब्धि° J

अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टं च ॥१।१।५॥

अथ तत्पूर्वकं त्रिविधमनुमानमिति। अथेत्यानन्तर्ये। अनुमानविशेषणार्थं सूत्रम्। तत्पूर्वकमनुमानमित्यनेन समानासमानजातीयेभ्योऽनुमानं व्यवच्छिद्यत इति। तानि ते तत् पूर्वं यस्य तदिदं तत्पूर्वकम्। यदा तानीति विग्रहः, तदा समस्त-प्रमाणाभिसंबन्धात् सर्वप्रमाणपूर्वकत्वमनुमानस्य वर्णितं भवति। पारम्पर्येण पुनस्तत् प्रत्यक्ष एव व्यवतिष्ठत इति [१]प्रत्यक्षपूर्वकत्वमुक्तं भवति। यदापि [२]विग्रहः ते द्वे पूर्वे यस्येति, ते द्वे प्रत्यक्षे पूर्वे यस्य प्रत्यक्षस्य तदिदं तत्पूर्वकं प्रत्यक्षमिति। [३]कतरे द्वे प्रत्यक्षे? लिङ्गलिङ्गिसंबन्धदर्शनमाद्यं प्रत्यक्षम्, लिङ्गदर्शनं च द्वितीयम्। बुभुत्सावतो द्वितीयात् लिङ्गदर्शनात् [४]संस्काराभिव्यक्त्यनन्तरकालं स्मृतिः, स्मृत्यनन्तरं च पुनर्लिङ्गदर्शनमयं धूम इति। तदिदमन्तिमं प्रत्यक्षं पूर्वाभ्यां प्रत्यक्षाभ्यां स्मृत्या [५]चानुगृह्यमाणं लिङ्गपरामर्शरूपमनुमानं भवति।

कः पुनरनुमानार्थः? अनुमीयतेऽनेनेति करणार्थः। किं पुनरस्य फलम्? अग्निविषया प्रतिपत्तिरिति। कथं पुनरन्यविषयं करणमन्यविषयां क्रियां करोति? [६]न हि शाल्यादिविषयस्य मुसलादेः करणस्य श्यामाकेष्वभिहतिर्भवति। न, अनियमात् **इत्येके**[७]। यद्विषयं करणं तद्विषया [८]क्रियेति न नियमोऽस्ति। दृष्टा हि वृक्षादिविषयस्य छेदनस्यावयवेषु क्रिया। वृक्षश्छिद्यते अवयवेषुच्छिदा भवति। क्वचित् पुनर्यद्विषयं करणं तद्विषयैव क्रिया। यथा तण्डुलाः पच्यन्ते, पाकस्तेष्वेव। क्वचित् पुनरात्मैव भवति कर्ता करणं च। क्रिया च तस्यैव। तद्यथा वृक्षस्तिष्ठतीति। [९]किमुक्तं भवति? वृक्षः स्वात्मना तिष्ठतीति। किमुक्तं भवत्यात्मनेति? यस्मादयं

---

१. तत्पूर्वक॰ C २. विवेकात् C ३. ते च द्वे C ४. ॰व्यक्त्युत्तरकालं C ५. ॰माणो लिङ्गपरामर्शोऽनुमानं J ६. न हि om C ७. एके J ८. क्रियेति C ९. कि...वति J

स्वस्थितौ [१]कारकान्तरं न प्रयुङ्क्त इति। एवमन्यविषयस्य [२]करणस्यान्यविषया क्रियेति। क्वचित् पुनर्यद्विषयं प्रमाणं तद्विषयैव क्रिया, यदा स एवार्थः प्रमीयत इति। किं पुनस्तस्य प्रमीयते, प्रमितत्वात्? प्रमीयते हेयत्वेनोपादेयत्वेनोपेक्षणीयत्वेन वावगम्यत इति।

तन्न, प्रमाणफलयोर्विषयभेदानभ्युपगमात्। यदा पुनस्तत्पूर्वं यस्य तदिदं तत्पूर्वकमिति, तदा भेदस्याविवक्षितत्वात् लिङ्गलिङ्गिसंबन्धदर्शनानन्तरं लिङ्गदर्शनसंबन्धस्मृतिभिर्लिङ्गपरामर्शो विशिष्यते, तस्य तत्पूर्वकत्वात्। किं पुनस्तैरनुमीयते? शेषोऽर्थ इति। अनुमानमित्यत्र किं कारकम्? भावः करणं वा। यदा भावः, तदा हानादिबुद्धयः फलम्। यदा करणम्, तदा शेषवस्तुपरिच्छेदः फलमिति।

लिङ्गलिङ्गिसंबन्धस्मृतिर्लिङ्गदर्शनं वेति सन्देहः। **एके** तावद् वर्णयन्ति—लिङ्गलिङ्गिसंबन्धस्मृतिरनुमानमितरैर्लिङ्गलिङ्गिसंबन्धदर्शनादिभिरनुगृह्यमाणा। **अपरे** [३]पुनर्मन्यन्ते—लिङ्गपरामर्शोऽनुमानमितरैरनुगृह्यमाण[४] इति। वयं तु पश्यामः, सर्वमनुमानम्, अनुमितेस्तन्नान्तरीयकत्वात्। प्रधानोपसर्जनभावविवक्षायां तु लिङ्गपरामर्श इति न्याय्यम्। कः पुनरत्र न्यायः? आनन्तर्यप्रतिपत्तिः। यस्मात् लिङ्गपरामर्शात् अनन्तरं शेषार्थप्रतिपत्तिरिति, तस्मात् लिङ्गपरामर्शो न्याय्य इति। स्मृतिर्न प्रधानम्। किं कारणम्? स्मृत्यनन्तरमप्रतिपत्तेः। न हि भवति यत्र धूममद्राक्षं तत्राग्निमद्राक्षम् इति। एतस्याश्च स्मृतेरनन्तरं तस्मादग्निरिति शेषार्थग्रह इति युक्तं वक्तुम्। तस्मात् स्मृत्यानुगृह्यमाणो[५] लिङ्गपरामर्शोऽभीष्टार्थप्रतिपादको भवतीति। एवं चोपनयस्यार्थवत्ता। यदि चायं स्मृत्यानुगृहीतो लिङ्गपरामर्शोऽनुमानं भवति, एवं सति उपनयोऽर्थवानिति। एवं च सति वाक्याङ्गत्वमुपनयस्योक्तं भवति। तस्माद् व्यवस्थितम् एतत् तत्पूर्वकमनुमानमिति।

---

१. करणा॰ C २. प्रमाणस्य J ३. तु मन्यन्ते C ४. इतरैरनुगृह्यमाणः om C
५. °गृहीतो C

यदि प्रत्यक्षपूर्वकमनुमानं संस्कारे निर्णये च प्रसङ्ग इति। प्रत्यक्षपूर्वको भावनाख्यः स्मृतिहेतुः संस्कारो निर्णयश्च [१]प्रत्यक्षफलत्वादनुमानं प्रसज्यत इति। नैष दोषः, विज्ञानस्याधिकृतत्वात्। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति ज्ञानाधिकारो वर्तत इति तेन न संस्कारेऽतिप्रसङ्गः। निर्णयस्तूभयथा, कदाचित् प्रमाणं कदाचित् फलम्। स्वविषयपरिच्छेदकत्वात् फलम्। शेषपरिच्छेदकत्वात् प्रमाणमिति।

त्रिविधमिति। अन्वयव्यतिरेकी, अन्वयी, व्यतिरेकी चेति। तत्रान्वयव्यतिरेकी विवक्षिततज्जातीयोपपत्तौ विपक्षावृत्तिः, यथा अनित्यः शब्दः सामान्यविशेषवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वाद् घटादिवदिति। अन्वयी विवक्षिततज्जातीयवृत्तित्वे सति विपक्षहीनः, यथा सर्वानित्यत्ववादिनामनित्यः शब्दः कृतकत्वादिति। अस्य हि विपक्षो नास्ति। व्यतिरेकी विवक्षितव्यापित्वे सति सपक्षाभावे सति विपक्षावृत्तिः, यथा नेदं जीवच्छरीरं निरात्मकम्, अप्राणादिमत्त्वप्रसङ्गादिति।

अथ वा त्रिविधमिति, पूर्ववत् शेषवत् सामान्यतोदृष्टं चेति। पूर्वं साध्यम्, तद् व्याप्त्या यस्यास्तीति तत् पूर्ववत्। साध्यसजातीयः शेषः, स यस्यास्ति तत् शेषवत्। पूर्ववन्नाम साध्यव्यापकम्। शेषवदिति तत्समानेऽस्ति। सामान्यतश्चादृष्टम्। चशब्दात् प्रत्यक्षागमाविरुद्धं चेति। एवं चतुर्लक्षणं पञ्चलक्षणमनुमानमिति।

अथ वा त्रिविधमिति। पूर्ववत् शेषवत् सामान्यतोदृष्टं चेति। तत्र पूर्ववन्नाम यत्र कारणेन कार्यमनुमीयत इति **भाष्यम्।** किं पुनरिदमुक्तं भवति कारणेन कार्यमनुमीयत इति? यदि तावदयमर्थः, कारणदर्शनात् कार्यास्तित्वं प्रतिपद्यत इति? तन्नास्ति, न हि कारणं गृहीत्वा [२]कश्चित् स्वस्थात्मा कार्यं प्रतिपद्यत इति। [३]तथा च व्याहतं भवतीति। अथ पुनरेवमनुमीयते यत्र कारणं तत्र कार्यमिति? एतदपि नास्ति, कार्यकारणयोर्भिन्नदेशत्वात्। तन्तवः स्वावयवेषु अंशुषु, पटस्तन्तुष्विति।

---

१. प्रत्यक्षपूर्वकत्वात् C २. कश्चित् om C ३. तथा च ... भवतीति om J

कारणदर्शनाच्च कार्यमनुमीयत इति ब्रुवाणोऽनुमानमुद्रां भिनत्ति। का पुनरियमनुमानमुद्रा? नानुपलब्धे न निर्णीते न्यायः प्रवर्तत इति। यदि कारणदर्शनात् कार्यमनुमीयते, अनुपलब्धेऽर्थे न्यायः प्रवर्तत इति स्यात्। तथा च व्याहतं स्यात्, नानभ्युपगमात्। क एवमाह कारणदर्शनात् कार्यास्तित्वं प्रतिपद्यत इति? को वा ब्रवीति यत्र कारणं तत्र कार्यमिति। कार्यं तु कारणविशेषत्वेनोपयुक्तं गुणभूतमनुमीयत इति **सूत्रार्थः**। तथा च न मुद्राभेद इति। एवं शेषवदादिष्वपि [१]व्याख्येयम्। तत्रापि कारणं कार्यस्याङ्गभूतमनुमीयत इति। कथं पुनः शेषशब्देन कार्यमुच्यते? द्वयोरनुमानभावेनोपक्षिप्तयोः कारणस्योपयोगाद् अनुपयुक्तं कार्यमिति कार्यं शेषशब्दवाच्यम्। उदाहरणम्–मेघोन्नत्या भविष्यति वृष्टिरिति कारणेन कार्यानुमानम्। कथं पुनरस्य प्रयोगः? वृष्टिमन्त एते मेघाः गम्भीरध्वानवत्त्वे सति, बहुलबलाकावत्त्वे सति अचिरप्रभावत्त्वे च सति [२]उन्नतत्वात्, तदन्यवृष्टिमन्मेघवदिति।

नद्याः पूर्णत्वं शेषवदुदाहरणम्। कथं पुनर्नदीपूरो नद्यां वर्तमानं उपरिवृष्टिमन्तं देशमनुमापयति, व्यधिकरणत्वात्? नोपरिवृष्टिमद्देशानुमानं नदीपूरः। किं तर्हि? नद्या एवोपरिवृष्टिमद्देशसंबन्धित्वमनुमीयते नदीधर्मेणैव। उपरिवृष्टिमद्देशसंबन्धिनी नदी शीघ्रतरस्रोतस्त्वे सति फलकाष्ठादिवहनवत्त्वे च सति पूर्णत्वात् [३]तदन्यवृष्टिमत्पूर्णनदीवत् इति। भविष्यति, भूता वेति कालस्याविवक्षितत्वात् यः कश्चित् काल उपादेय इति।

सामान्यतोदृष्टं नाम अकार्यकारणभूतेन यत्राविनाभाविना विशेषणेन विशेष्यमाणो धर्मी गम्यते, तत् सामान्यतोदृष्टम्। यथा बलाकया सलिलानुमानम्। कथं पुनर्बलाकया सलिलानुमानम्? यावानस्य देशो बलाकयाजहद्वृत्तित्वेन प्रसिद्धो भवति, तावन्तमन्तर्भाव्य वृक्षादिकमर्थं पक्षीकृत्य बलाकावत्त्वेन साधयति।

---

१. द्रष्टव्यम् C २. उन्नमितत्वात् वृष्टि° C ३. तदन्य° J

अपरे पुनर्मन्यन्ते–सामान्यतोदृष्टम् आदित्यस्य गत्यनुमानमिति। तत्तु न बुद्ध्यामहे कथमनुमीयत इति। यदि तावद् गतिमानादित्य इति [१]अनुमीयते, तत् केन प्रतिपद्यते? न ह्यादित्यगतेः किञ्चित् संबद्धं लिङ्गमस्ति। न चासंबद्धोऽर्थोऽनुमातुं शक्यते। तथा च सर्वं सर्वेणानुमीयेत। अथापि देशान्तरप्राप्तिर्लिङ्गमिति? तन्न, अदृष्टत्वात्। न हि सवितुः कश्चिद् देशान्तरप्राप्तिं पश्यति। देशान्तरं खलु आकाशदेशो वा दिग्देशो वा भवेत्। उभयं चाप्रत्यक्षम्। न चान्या गतिरस्ति। तस्माद् देशान्तरप्राप्तिदर्शनमयुक्तम्। सर्वत्र खल्वयमादित्यस्य मण्डलमेव केवलमुपलभते। न च वस्तुमात्रदर्शनादनुमानं युक्तम्। अपि च केनचित् प्रकारेणादित्यस्य गतिः शक्या द्रष्टुम्, उपलब्धिलक्षणप्राप्तत्वात्। न पुनर्देशान्तरप्राप्तिर्नित्यमतीन्द्रियत्वात्। न हि कदाचिदपि प्रत्यक्षाप्रत्यक्षवृत्तिः संयोगो भवति प्रत्यक्षः। अथ देवदत्तस्य देशान्तरप्राप्तिदर्शनेनादित्यस्य गत्यनुमानं सामान्यतोदृष्टमिति मन्यसे, न केवलमादित्यस्य, सर्वार्थानां गत्यनुमानमेतत्। तर्हि भवानपि गच्छतीत्येवं कस्मात् [२]नानुमिमीषे? नैवेदम् आदित्यगत्यनुमानं साक्षात्। किं तर्हि? देशान्तरप्राप्तिमनुमाय तया गत्यनुमानमित्यदोषः। देशान्तरप्राप्तिमानादित्यो द्रव्यत्वे सति क्षयवृद्धिप्रत्ययाविषयत्वे च प्राङ्मुखोपलभ्यत्वे च तदभिमुखदेशसंबन्धादनुत्पन्नपादविहारस्य परिवृत्य तत्प्रत्ययविषयत्वात्, [३]मण्यादिवत्। मण्यादावेतत्सर्वमस्ति। स च देशान्तरप्राप्तिमान्। एवं चादित्यः। तस्माद् देशान्तरप्राप्तिमानिति। अनया तु देशान्तरप्राप्त्या अनुमितया गतिरनुमीयत इति। देशान्तरप्राप्तिमत्त्वे वा [४]साधनम्–देशान्तरप्राप्तिमानादित्यः, अचलचक्षुषो व्यवधानानुपपत्तौ दृष्टस्य पुनर्दर्शनाविषयत्वात् देवदत्तवदिति। **एके** तु दिक्प्रत्यक्षत्वेऽनुमानं ब्रुवते–प्रत्यक्षा दिक्, अङ्गुल्यादिव्यपदेशात् चन्द्रवदिति। तच्च न, अरूपत्वात्। अरूपा दिक् कथं बाह्यकरणप्रत्यक्षा भविष्यति? कथं तर्हि अङ्गुल्या दिग्व्यपदेशः? दिग्देशसंबन्धिषु वृक्षादिषु दिग्व्यपदेशात्। ये दिग्देशसंबन्धिनो वृक्षादयस्तान् दिगित्युपचरन्ति, आदित्येन सहोपलब्धेः। प्राचीत्ययं

---

१. अस्य गतिरनु° C २. °मीयते C ३. मण्यादिवत् J ४. वानुमानम् C

शब्द आद्यादित्यदर्शनविशिष्टदिग्देशे वर्तते। तेन आद्येनादित्यदर्शनेन सह यान् वृक्षादीनुपलभन्ते, तान् प्राचीत्युपचरन्ति। उपचर्य चाङ्गुल्या व्यपदिशन्तीति।

अथ वा त्रिविधमिति लिङ्गस्य प्रसिद्धसदसन्दिग्धतामाह। प्रसिद्धमिति पक्षे व्यापकम्। सदिति [१]सजातीयेऽस्ति। असन्दिग्धमिति सजातीयाविनाभावि।

अथ वा त्रिविधमिति नियमार्थम्। अनेकधा भिन्नस्यानुमानस्य त्रिविधेन पूर्ववदादिना संग्रह इति नियमं दर्शयति। कथमनेकधा भिन्नमिति? अन्वयव्यतिरेकि द्वेधा सजातीयेऽपि द्वेधा सदेव, सदसच्च। अन्वय्यपि द्वेधैव। एवं व्यतिरेक्येकरूपम्, सपक्षाभावात्। तदिदं पञ्चधाभिन्नमनुमानं कालभेदेन पञ्चदशधा भवति। तदपि पुनः पुरुषभेदानुविधानात् षष्टिभेदं भवति। तस्य त्वान्तर्गणिकोऽनन्तभेद इति। सोऽयम् अनुमानभेदः एवंभिन्नः त्रिविधमित्यनेन संगृहीत इत्यतो नियमार्थं त्रिविधग्रहणमिति।

पूर्ववदित्युक्तम्। किं पुनरत्र पूर्ववत्, किं कार्यमुत कारणमिति? यदि पूर्वमस्यास्तीति पूर्ववत्, कार्यं पूर्ववत् प्राप्नोति। ततश्च कारणेन कार्यानुमानमिति व्याघातः। पूर्वमस्यास्तीति पूर्ववदिति ब्रूमः, न पुनः कार्यम्। किं तर्हि? ज्ञानम्। ज्ञानस्य पूर्वं विषयः। तदिदं [२]ज्ञानं पूर्ववदिति। तेन च कार्यानुमानमिति। एवं शेषवदादिष्वपि तद्विषयाणि ज्ञानानीत्युक्तं भवतीति।

अथ वा पूर्ववदिति वतिप्रयोग एषः। यथा पूर्वं प्रत्यक्षेण दृष्टोऽर्थः तथानुमानेन अपि तमेवार्थं प्रतिपद्यत इति पूर्ववद् दृष्टो भवति।

अन्ये पुनरन्यथा वर्णयन्ति। यथा तेनैव धूमेन [३]तमेवाग्निं प्रतिपद्यत इति। किं पुनरयं धूमेन प्रतिपद्यते? किमग्निम्, उत देशम्, उत सत्ताम्, उताग्निमन्तं देशम्? तत्र न तावदग्निं प्रतिपद्यते, धर्मधर्मिभावानुपपत्तेः। नाग्निर्धूमस्य धर्मः, न वाग्निधर्मो धूमः। प्रतीतत्वाच्चाग्नेर्नानुमेयत्वमस्ति। एतेन सत्ता देशश्च व्याख्यातः, अग्निसत्तायाः प्रतीतत्वाद् देशस्य चेति। अग्निमान् देश इति चेत्–न, धूमस्यात–

---

१. सजातीये सदेव C २. ज्ञानं om C ३. तमेव om C

द्धर्मत्वात्। अथापीदं स्यात् अग्निमान् देशो धूमेनानुमीयते? तच्च नैवम्। कस्मात्? अतद्धर्मत्वात्। न हि धूमोऽग्निमतो देशस्य धर्मः। न चाग्नेर्देशमात्रसंबन्धो न प्रतीतः। अयमग्निमानिति चेत्–न, तस्यादृष्टत्वात्। देशविशेषोऽग्निमत्तयानुमीयते, न देशमात्रम्। न, तस्यादृष्टत्वात्। न ह्ययं देशविशेषं पश्यति। केवलं शून्यमभिधानमुच्चारयति अयं देशोऽग्निमान् इति। न च धूममात्रमग्निप्रतिपादकम्, धूममात्रं चायं पश्यति। अतो न देशविशेषोऽप्यनुमेयः। अविनाभावेन प्रतिपादयतीति चेत्, अथापीदं स्यात् अविनाभावोऽग्निधूमयोः, अतो धूमदर्शनादग्निं प्रतिपद्यत इति? न, विकल्पानुपपत्तेः। अग्निधूमयोरविनाभाव इति कोऽर्थः? किं कार्यकारणभावः, उतैकार्थसमवायः, उत तत्संबन्धमात्रमिति? अस्तु तावत् पूर्वः कार्यकारणभाव इति। तन्न, अतद्वृत्तित्वात्। न हि धूमोऽग्नौ वर्तते नाप्यग्निर्धूमे, स्वकारणवृत्तित्वात्। अतो न कार्यकारणभावः। नैकार्थसमवायोऽपि, ताभ्यामन्यस्यानारम्भात्। न हि भिन्नजातीयाभ्यां द्रव्यमारभ्यत इति। न च तावप्यन्यत्र वर्तेते स्वकारणवृत्तित्वादित्युक्तम्। संबन्धमात्रं तत्र वर्तत इति चेत्? तदप्यनुमातुं न शक्यते। कथम्? यदि तावदेवं कुरुते अस्ति संबन्धोऽग्निधूमयोरिति–तन्न, अप्रतीतत्वात्। अनग्निकस्यापि धूमस्य दर्शनात् न संबन्धानुमानम्। रूपस्पर्शवत् साहचर्यं भविष्यतीति चेत्–न, उभयोर्व्यभिचारो दृष्टः[१]। अनग्निर्धूमो दृष्टः, अधूमश्चाग्निरिति उभयं व्यभिचारि। तस्मात् न साहचर्यमपि। यत्र धूमस्तत्र वह्निरित्यनेनैव प्रत्युक्तम्। न चान्या गतिरस्ति। तस्मात् न धूमेन वह्निरनुमीयत इति। लोकविरोध इति चेत्, यदि धूमेनाग्निर्नानुमीयते[२] ननु लोको विरुध्यत इति चेत्? नास्ति विरोधः, धूमविशेषेण अग्निविशेषणस्य धूमस्य प्रतिपाद्यत्वात्। कथं पुनरयमग्निर्धूमविशेषणं भवति? यदा [३]गुणभूतोऽनुमेयो भवति, अग्निमानयं धूम इति। धूमविशेषेणासाधारणेन प्रतिपद्यते[४]। उभयं च तदा प्रत्यक्षं धूमश्च तद्गताश्च सातत्य–

१. °भिचारित्वात् C २. अग्नेरनुमानं न भवेत् C ३. गुणभूतो भवति अनुमेयोऽग्निः C ४. °नानुमीयत इति C

संहत्यूर्ध्वगतिस्वाभाव्यादयो[१] धर्मा इति। ते चैते धूमधर्मा धूमवृत्तयोऽप्रसिद्धं धूमधर्ममनुमापयन्ति। सर्वस्य चानुमेयस्य वस्तुनो धर्मी प्रतिपादकश्च धर्मः प्रसिद्धो भवति। यथा शब्दस्यात्मसत्ता प्रसिद्धा, कृतकत्वं च। धर्मस्तन्नित्यलक्षणोऽ-प्रसिद्ध इति। तद्विशेषणोऽयमनुमीयत इति।

शेषवन्नाम परिशेष इति **भाष्यम्।** न कर्म शब्दः शब्दान्तरहेतुत्वात् इत्युभयव्यावृत्तेरसाधनम्[२], न हि शब्दान्तरहेतुत्वं कर्मणि नाकर्मणीति। न, अन्यार्थत्वात्। शब्दान्तरहेतुत्वादित्यस्य[३] समानजातीयारम्भकत्वादित्ययमर्थः। तथा च न दोष इति।

सामान्यतोदृष्टं नाम यत्राप्रत्यक्षे लिङ्गलिङ्गिनोरिति **भाष्यम्।** लिङ्गलिङ्गिनोः संबन्धोऽप्रत्यक्ष इति किं यदानुमीयते तदा अप्रत्यक्ष आहो न कदाचिदपि[४] प्रत्यक्ष इति? यदि यदानुमीयते तदा अप्रत्यक्षः, तदा सर्वमनुमानमेवमिति विशेषणम-नर्थकम्। अथ न कदाचित् प्रत्यक्षः कथं तर्हि अनुमानमत्र प्रवर्तते? व्याहतं च भवति नानुपलब्धे न निर्णीत इति। न, विशेषणभूतस्य अप्रत्यक्षस्य सर्वदा अनुमेयत्वात्। यदितरधर्मदर्शनाद् धर्मिणोऽधिगतिसाधनं तत् सामान्यतोदृष्टम्, यथा इच्छादिभिरात्मा। इच्छादयः खलु धर्मिणो भवन्ति। आत्मा च विशेषणं गुणभूत इति। इच्छादीनां गुणत्वं प्रतीतो धर्मः। तेन धर्मेण तानेव इच्छादीनात्म-गुणविशिष्टाननुमिमीते। परतन्त्रा इच्छादयो गुणत्वात्, रूपवदिति। [५]पारतन्त्र्यमात्र-प्रतिपत्तिरस्मादनुमानात्, आत्मतन्त्रता तु कुतः? आत्मतन्त्रता परिशेषात्, आत्मसंवेद्यत्वात् बाह्यकरणाप्रत्यक्षत्वाच्च। न पृथिव्यादिषु। पृथिव्यादिगुणाः प्रत्यक्षा ये ते स्वात्मपरात्मप्रत्यक्षा[६] बाह्यकरणप्रत्यक्षाश्च। [७]आत्मप्रत्यक्षास्त्विच्छादयः। तस्मान्न पृथिव्यादिषु आकाशान्तेषु। न दिक्कालमनःसु, तद्गुणानां तद्वदतीन्द्रियत्वात्। न च द्रव्यान्तरं शिष्यते। आत्मा च शेषः। तस्मात् तत्तन्त्रा इति।

---

१. °स्वभावादयो C २. °रसाधारणम् C ३. °त्वमित्यस्य C ४. अपि om C
५. °तन्त्र्यप्रति° C ६. गुणाः आत्म° C ७. आत्माबाह्यकरणाश्चेच्छा° C

सद्विषयं च प्रत्यक्षं सदसद्विषयं चानुमानमिति **भाष्यम्**। किं तावद् धर्मिणमभिप्रेत्यार्थभेद उत धर्ममिति? यदि तावद् धर्मिणमभिप्रेत्य, न कदाचित् असद्विषयमनुमानम्। न ह्यनुपलब्धसामान्येऽर्थे अनुमानं प्रवर्तत इत्युक्तम्। न चासतः सामान्यदर्शनमस्ति। अथ धर्ममभिप्रेत्य ब्रूषे? धर्मा अपि त्रिविधा भवन्ति। विधीयमानाः, प्रतिषिध्यमानाः स्वतन्त्राश्चेति। तत्र विधीयमानो धर्मः पृथिव्यां गन्धवत्त्वम्, प्रतिषिध्यमानोऽपामगन्धवत्त्वम्, स्वतन्त्रः समवायिनां समवाय इति। कथं पुनः स्वतन्त्रः समवायः? समवायान्तराभावात्। यद्धि यत्र वर्तते तद् वृत्त्या तत्र वर्तते। न च [१]समवायान्तरं समवायस्य वृत्तिरस्ति। अथ समवायान्तरं स्यात् समवायस्य तस्यापि [२]समवायान्तरपरिकल्पनायामनवस्था। अथ नानवस्था, आद्य एव व्यवस्थास्तु[३]। किमिदं श्रद्दधानेन प्रतिपत्तव्यमनाश्रितः समवाय इति, आहोस्वित् न्यायोऽप्यस्ति? न सन्देहः, अस्त्येव न्यायः, पञ्चपदार्थवृत्तिशब्दवाच्यत्वात् परमाणुवदनाश्रितः समवाय इति न्यायः। अनाश्रितः समवायो[४] व्यापकत्वे सतीहबुद्धिनिमित्तत्वादात्मवत्। यदि पुनराश्रितः समवायः स्यात्, ततः किं स्यात्? कार्यमनाधारं स्यात्। कथमिति? पूर्वं तावत् कार्यमात्मानं लभते, पश्चात् कारणेषु समवायेन वर्तत इति प्राग्वृत्तेरनाश्रितं प्राप्नोति। समवायश्च कार्यकारणयोर्वर्तत इति वृत्तिरस्य वाच्या, न हि वर्तमानं किञ्चिदवृत्तिमद् दृष्टम्। प्राप्तित्वात् संयोगवद् वर्तत इति चेत्—न, व्याघातात्। प्राप्तिः संयोगः, वर्तत इति, किमियं वृत्तिः, प्राप्तिधर्म आहोस्वित् कार्यधर्म इति? वयं तु ब्रूमः कार्यधर्मो न प्राप्तिधर्म इति। तथा च कार्यान्तराण्यपि प्राप्तिमन्ति सन्तीति। यदि पुनरियं वृत्तिः प्राप्तिधर्मोऽभविष्यत्, प्राप्तेरपि प्राप्त्यन्तरमभविष्यदित्यनवस्थादोषः, प्राप्तेर्वृत्तिमत्त्वात्। न चैनामनवस्थां कश्चित् शक्तः प्रतिपादयितुम्, प्रमाणाभावात्, समवायश्च समवायान्तरेण वर्तत इति ब्रुवाणः **शास्त्रं** बाधते, तत्त्वं भावेन व्याख्यातम् [वै. सू. ७.२.२८] इति।

---

१. समवायान्तरं om C २. आश्रयान्तर° J ३. अनवस्था स्यात्, व्यवस्थायामाद्य एव व्यवस्था। C ४. अना° वायः om C

संबन्धिनिवृत्तौ संबन्धोऽवतिष्ठत इति न प्रमाणमस्ति। न नास्ति, ख्यातिनिमित्तानां निवृत्तेः, ख्यातिनिमित्तान्यस्य निवर्तन्ते। न समवायः, अकृतकत्वात्। अकृतकः समवाय इति च कार्यस्याधारवत्त्वेनानुमीयते। यद्ययं कृतकः स्यात् कार्येण [१]सहोपादानादनाश्रितं कार्यं स्यात्। अथ कार्यात् पूर्वं भवति? तथापि कस्येति वाच्यम्? अथ पश्चाद् भवति? कार्यानाधारतादोषस्तदवस्थः। तस्मात् स्वतन्त्रः समवाय इति सिद्धम्। तत्र प्रतिषिध्यमानधर्मविषयमनुमानम् असद्विषयं न पुनर्विधीयमानस्वतन्त्रधर्मविषयमिति।

भवतीत्यसद्विषयमिति चेत् भवति जायत इत्येकोऽर्थ इति। न, जायमानार्थानभ्युपगमात्। भवति विद्यत इति। एवं तावद् व्यवस्थितमेतत् तत्पूर्वकमनुमानमिति।

अपरे तु ब्रुवते नान्तरीयकार्थदर्शनं तद्विदोऽनुमानमिति। अस्यार्थः योऽर्थो यमर्थमन्तरेण न भवति, स भवति नान्तरीयकः। नान्तरीयकश्चासावर्थश्चेति नान्तरीयकार्थः। तस्य दर्शनं तद्विदोऽनुमानम्। यस्तं वेद तन्नान्तरीयकोऽयमिति। अत्रार्थग्रहणमतिरिच्यते। न हि नान्तरीयकः स्यान्न चार्थ इति। नान्तरीयकार्थ इति च समासपदम् एतत्। तत्र यदि षष्ठीसमासो नान्तरीयकस्यार्थ इति, नान्तरीयकं तावत् कृतकत्वम्। तस्यार्थो धर्मः, प्रयोजनं वा? यदि तावद् धर्मः कृतकत्वस्यार्थः, सत्त्वप्रमेयत्वाभिधेयत्वाद्यनुमानं प्राप्तम्। अथ प्रयोजनम्, अनित्यत्वप्रतिपत्तिर्हेतुः प्राप्तः। अथ बहुव्रीहिः नान्तरीयकोऽर्थो यस्येति, तत्रापि कृतकत्वं नान्तरीयकमिति। तद्यस्य स हेतुः प्राप्तः। तच्च कृतकत्वं घटादेः, शब्दस्यानित्यत्वस्य वा? यदि घटादेः, घटादिर्हेतुः प्राप्तोऽनित्यः शब्दो घटादिति। अथ शब्दस्य, शब्दो हेतुः प्राप्नोति, अनित्यः शब्दः शब्दादिति। अथानित्यत्वस्य साधनभावेन कृतकत्वं धर्मः, तथाप्यनित्यः शब्दोऽनित्यत्वादिति हेतुः प्राप्नोति, अनित्यत्वस्यार्थः कृतकत्वमिति। सर्वथा कृतकत्वमनित्यत्वे न हेतुः। अथ समानाधिकरणो

---

१. सहोत्पादात् C

नान्तरीयकश्चासावर्थश्चेति, तथाप्यसमर्थः समासः विशेषणविशेष्यनियमासंभवात्। उभयपदव्यभिचारे सति समानाधिकरणे भवति नीलोत्पलादिवत्। नीलशब्दस्याप्यनेकार्थवृत्तित्वात् उत्पलशब्दस्य च तथाभावात् सामानाधिकरण्यं भवति। न पुनरिह नान्तरीयक इत्युक्ते अस्ति व्यभिचारोऽर्थोऽनर्थ इति, यतोऽर्थग्रहणं [१]समर्थं स्यादिति। एकपदव्यभिचारेऽपि दृष्टं सामानाधिकरण्यम्, यथा पृथिवी द्रव्यमिति। अत्रापि उभयपदव्यभिचारः, प्रधानाङ्गभावस्य भेदेन पृथिवीशब्देन द्रव्यमुच्यते, पृथिवीत्वं च। द्रव्यशब्देनापि प्रधानाङ्गविवक्षायां द्रव्यं द्रव्यत्वं च। अत उभयपदव्यभिचारात् पृथिवी द्रव्यमिति युक्तं वक्तुम्। इदं पुनर्न युक्तं नान्तरीयकार्थदर्शनमिति। कस्मात्? अर्थप्रत्यायनार्थत्वात् शब्दप्रयोगस्य, अर्थप्रत्यायनार्थं हि शब्दस्य प्रयोगमिच्छन्ति। नान्तरीयक इति चोक्ते अर्थो गम्यते, अतो न युक्तोऽर्थशब्द इति। तद्विद इति च न युक्तम्, नैवान्यथा नान्तरीयक इति। न हि नारिकेलद्वीपवासिनो धूमदर्शने नान्तरीयकमिति ज्ञानमस्ति। अतस्तद्विद इत्येतदपि न वक्तव्यम्।

एतेन तादृगविनाभावि धर्मोपदर्शनं हेतुरिति प्रत्युक्तम्। कोऽतिदेशार्थः? यथा [२]नान्तरीयकार्थदर्शनेऽर्थग्रहणमयुक्तं तथा धर्मग्रहणमपीति। उदाहरणं तु यथा धूमोऽग्नेरिति। एतच्च न संभवतीत्यनेकधा वर्णितम्।

अपरे तु मन्यन्ते,

अनुमेयेऽथ तत्तुल्ये सद्भावो नास्तितासति।

इत्यनुमानम्। एतेन चानुमेयैकदेशवृत्तिरपि संगृहीत इत्यलक्षणम्। यथा अनित्याः परमाणवो गन्धवत्त्वाद् घटवदिति। अनुमेये सद्भाव इत्यभिधानादप्रसङ्गोऽयम्। नाप्रसङ्गः, एकदेशवृत्तेस्तद्धर्मत्वाद् विपक्षैकदेशवृत्तिवत्। यथा विपक्षैकदेशे वर्तमानो न विपक्षे नास्ति, एवं पक्षैकदेशे वर्तमानो न पक्षे नास्तीत्येतद्व्युदासे यत्नः कर्तव्यः। न न कर्तव्यः, अवधारणान्निवृत्तेः। अनुमेये

१. सामर्थ्यं J २. नान्तरीयकार्थ° C

सद्भाव इत्यत्रावधारणे द्वे। किमनुमेय एव सद्भावोऽथानुमेये सद्भाव एवेति। किं पुनरनेन पूर्वेणावधारणेन क्रियते–किमसंभवो निवर्त्यते, अथ संभवो ज्ञाप्यते? [१]उभयथा च नावधारणेनार्थः, विनैव तदधिगतेर्विनाप्यवधारणेनायमर्थो गम्यते, अनुमेये सद्भावोऽसद्भावश्च नेति। न चैकदेशवृत्तिर्निराकृत इत्यवधारणं व्यर्थम्, उत्तरपदबाधा च। अथोत्तरमवधारणमभ्युपगम्यते तस्य व्याप्तिरर्थः, तथाप्यनुमेयमवधारितं भवति व्याप्त्या न धर्मः, यत एव करणं ततोऽन्यत्रावधारण–मिति। संभवव्याप्त्या चानुमेयं नियतम्, [२]व्याप्त्यव्याप्तिभ्यां च संभवः प्रसृतः। तस्य च द्वौ राशी शिष्यमाणौ तत्तुल्यो विपरीतश्च। तत्र नास्तिता असतीत्यनेन विपरीतान्निवर्त्यताम्। तत्तुल्ये सद्भाव इति किमर्थमारभ्यते? न ह्यनेन अप्राप्तं किञ्चित् प्राप्यते। तत्तुल्ये च संभवमात्रं विवक्षितमिति। संभवमात्रं च [३]व्याप्त्यतिव्याप्तिभ्यामनियतेन संभवेन लभ्यते। अथ तत्तुल्ये सद्भाव इत्येतदव–धारणार्थमारभ्यते, किं पुनरत्रावधार्यते? किं तत्तुल्य [४]एव सद्भावः अथ तत्तुल्ये सद्भाव एवेति? यदि तत्तुल्य एव सद्भाव इति सद्भावोऽवधारितः, [५]तदा पूर्वोत्तरपदे बाधिते भवतः। न हि भवति देवदत्तमेव भोजय यज्ञदत्तं च। तथेहापि तत्तुल्य एव सद्भावोऽनुमेये चेत्युन्मत्तवाक्यम्। [६]अथ तत्तुल्ये सद्भाव एव, तत्तुल्यैकदेशवृत्तेर–हेतुत्वं यस्तज्जातीयस्यैकदेशवृत्तिः प्रयत्ननान्तरीयकत्वादिस्तेन स हेतुरिति प्राप्तम्।

असति नास्तितेति चासंप्रधार्य प्रोक्तं यदसत् स्वयमेव[७] तन्नास्ति। न हि असदाधारो भवति यतस्तत्र प्रतिषेधः स्यादिति। एतदपि चावधारणार्थमारभ्यते। किमवधार्यते, नास्तितैव असत्येवेति वा? यदि तावन्नास्तितैव, असतीति व्यर्थम्, अनुक्तेऽपि तदधिगतेः। अनुक्तेऽप्येतद् गम्यतेऽसति नास्तीति। अथ पुनरसत्येव नास्तिता? गौरयं विषाणित्वादित्येतदपि हेतुः प्राप्नोति। [८]एष ह्यसत्येव नास्ति, न पुनर्नास्त्येव। [९]यद्यप्येकद्विपदपर्युदासेन सन्निकासंभवेन षट्प्रतिषेधमुक्त्वा

---

१. उभयथापि नावधारणार्थो, विनापि C २,३. व्याप्त्यतिव्याप्त C ४. अथ J
५. तथा च J ६. अथापि J ७. °स्वरूपमेव C ८. एवं C ९. द्रः पृ. १२१.११

त्रिपदपरिग्रहेण त्रिलक्षणो[१] हेतुरभिधीयते, एतदपि द्विपदयुक्तयोरन्वयिनोर्हेतुत्वात् द्विपदयुक्तस्य च व्यतिरेकिण एकस्य हेतुत्वादयुक्तम्। अनभ्युपगतनित्यपक्षस्य कृतकत्वप्रयत्ननान्तरीकत्वे द्विपदयुक्ते एव विपक्षाभावाद्धेतू भवतः। व्यतिरेक्यपि तत्तुल्यासंभवात् द्विपदयुक्तश्च भवति हेतुश्चेति, यथा नेदं निरात्मकं जीवच्छरीरम् अप्राणित्वप्रसङ्गादिति। अतोऽव्यापकत्वादलक्षणमेतदिति।

एतेन संबन्धादेकस्मात् प्रत्यक्षात् शेषसिद्धिरनुमानमिति[२] लक्षणं प्रत्युक्तम्। कथमिति? न ह्येकस्मात् प्रत्यक्षादनुमानं भवति। अथापि संबन्धादेकस्मात् प्रत्यक्षात् इति? एतदपि नैव, न ह्ययं तदा संबन्धं पश्यति यदानुमिमीत इति। अथ पूर्वं दृष्टम् इति? तथाप्युपलब्धसंबन्धस्य पूर्वानुमानकाले चानुपलब्धलिङ्गस्यानुमानं[३] प्रसज्येत। न चान्या गतिरस्ति। रूपेण च स्पर्शानुमाने स्वदृष्टिव्याकोपः। न ह्ययं रूपस्पर्शयोः संबन्धमुपलभते। अथैकार्थसमवायः संबन्ध इति। सोऽपि स्वदर्शनव्याघातादयुक्त इति। न हि रूपस्पर्शावेकस्मिन्नर्थे परस्य वर्तेते। यत्र रूपं तत्र स्पर्श इति एतदपि नास्ति। न क्वचिद्रूपं स्पर्शो वा परस्पराधाराधेयत्वेन स्यादिति चेत्, परस्पराधाराधेयभावेऽपि न रूपं स्पर्शे न स्पर्शो रूप इति।

एतेन सप्तविधः संबन्ध इति प्रत्युक्तम्। न हि कार्यकारणभावादीनां संबन्धानां रूपस्पर्शयोरन्यतमः संभवति। तस्मात् न रूपेण स्पर्शानुमानं युक्तम्। अतोऽव्यापकत्वादलक्षणमिति निष्ठितमनुमानम्॥५॥

प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम् ॥१॥१॥६॥

अथोपमानम्। **प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्॥** सूत्रार्थः पूर्ववत्। प्रसिद्धसाधर्म्यादिति। प्रसिद्धं साधर्म्यं यस्य, प्रसिद्धेन वा साधर्म्यं यस्य[४], सोऽयं

---

१. त्रि० हेण om C २. वार्षगण्यतन्त्रे ३. तथाप्यनुपलब्ध० C ४. यस्य गवयस्य J

प्रसिद्धसाधर्म्यो गवयः। तस्मात् **साध्यसाधनमिति। समाख्यासंबन्धप्रतिपत्तिरुपमानार्थः।** किमुक्तं भवति? आगमाहितसंस्कारस्मृत्यपेक्षं सारूप्यज्ञानम् उपमानम्। यदा ह्यनेन श्रुतं भवति **यथा गौरेवं गवय** इति, प्रसिद्धे गोगवयसाधर्म्ये पुनर्गवयसाधर्म्यं पश्यति प्रत्यक्षम्। ततस्तस्य[१] भवत्ययं गवय इति समाख्यासंबन्धप्रतिपत्तिः[२]।

प्रत्यक्षागमाभ्यां नोपमानं भिद्यते। कथमिति? यदा तावुभौ गोगवयौ प्रत्यक्षेण[३] पश्यति, तदायमनेन सरूप इति प्रत्यक्षतः प्रतिपद्यते। यदापि शृणोति यथा गौरेवं गवय इति तदास्य शृण्वत एव बुद्धिरुपजायते। केचिद् गोधर्मा गवयेऽन्वयिन उपलभ्यन्ते, केचिद् व्यतिरेकेण इति। अन्यथा हि यथा [४]तथेत्येतन्न स्यात्। भूयस्तु सारूप्यं गवा गवयस्य इत्येवं प्रतिपद्यते। तस्मात् नोपमानं प्रत्यक्षागमाभ्यां भिद्यत इति।

गवा [५]गवयसारूप्यं प्रतिपद्यते गवयसत्तां वेत्यहो प्रमाणाभिज्ञता **भदन्तस्य**। गवा गवयसारूप्यप्रतिपत्तेस्तु संज्ञासंज्ञिसंबन्धं प्रतिपद्यत इति सूत्रार्थः। तस्मादपरिज्ञाय **सूत्रार्थं** यत्किञ्चिदुच्यते ॥६॥

आप्तोपदेशः शब्दः ॥१।१।७॥

अथ शब्दः। **आप्तोपदेशः शब्दः॥** न शब्दमात्रमिति **सूत्रार्थः। आप्तः खलु साक्षात्कृतधर्मा। साक्षात्करणमर्थस्याप्तिः, तया** सह वर्तत **इत्याप्तः।** स्वर्गापूर्वदेवतादिषूपदेशो न प्राप्नोति अतीन्द्रियत्वात्। यदि साक्षात्करणमर्थस्याप्तिः, स्वर्गापूर्वदेवतादीन् न कश्चित् पश्यतीति तत्प्रतिपादको व्यवहारो न स्यात्। तस्मात् आप्तश्चासावुपदेशश्चेति युक्तम्, नाप्तस्योपदेश इति। नैष दोषः। न

---

१. गवा साधर्म्यं पश्यतोऽस्य C २. °संबन्धं प्रतिपद्यते J ३. प्रत्यक्षेण om C
४. तथेत्येव C ५. °सादृश्यं C

ब्रूमोऽस्मदादीनां प्रत्यक्षा स्वर्गादय इति। अपि तु यस्य प्रत्यक्षाः तस्योपदेश इति।

कः पुनरत्र न्यायः स्वर्गादयः कस्यचित् प्रत्यक्षा इति? ब्रूमः, सामान्यविशेषवत्त्वात् कस्यचित् प्रत्यक्षा इति। आश्रितत्वात्, [१]यद् यदाश्रितं तत् कस्यचित् प्रत्यक्षमिति। परार्थत्वात्, यत् परार्थं तदपि कस्यचित् प्रत्यक्षमिति। वस्तुत्वादागमविषयत्वाच्च[२]। यद् वस्तु यच्च [३]परस्य कथ्यते, तत् कस्यचित् प्रत्यक्षं [४]दृष्टम्, यथा [५]घटादय इति। अनित्यत्वात् कस्यचित् प्रत्यक्षा इति। असिद्धम् अपूर्वस्यानित्यत्वम्? न प्रायणानुपपत्तेः। यदि धर्माधर्मौ नित्यौ भवतः कस्य क्षयात् प्रायणमिति? यदि पुनरनित्यौ, विपच्यमानयोरुपभोगात् प्रक्षये सति [६]विपक्ष्यमाणकर्माशयान्तराभावात्[७] पूर्वशरीरात् प्रच्यवनं मनसः [८]उत्तरशरीरोपसंप्राप्तिश्चेति जन्ममरणे स्तः। तस्मादनित्याविति। नित्ये वा अपूर्वे परिकल्पिते तस्य साधारणता असाधारणता वा वक्तव्या। यदि साधारणता, सर्वप्राणिसाधारणोऽभ्युदयः स्यात्। न [९]जात्वन्यनियामकमस्ति क्रियालोपश्चेति। नित्यत्वे व्यञ्जकभेदान्नोभयदोषः। नित्यत्वे साधारणत्वे वा अदृष्टस्य न [१०]साधारणोऽभ्युदयदोषो नापि क्रियाविलोपदोषः। कस्मात्? व्यञ्जकभेदात्। नित्यमप्यपूर्वं योऽभिव्यनक्ति तस्य फलम्, अभिव्यक्त्यर्था च क्रिया[११]। अभिव्यक्त्यर्थत्वाच्च न[१२] क्रियालोप इति। येन यदभिव्यज्यते तस्यैव तत्फलप्रदातृ भवतीति दृष्टम्। न दृष्टम्। न हि देवदत्तप्रकाशितं घटं यज्ञदत्तो न पश्यतीति। नित्यस्य वा अपूर्वस्य काभिव्यक्तिः? किमुपलब्धिः, अथ फलप्रदानसामर्थ्यम्, आहोस्विदावरणापगमः? यद्युपलब्धिः, सा नास्ति। न हि कदाचिदप्ययमपूर्वं पश्यति, अतीन्द्रियत्वात्। अथ फलप्रदानसामर्थ्यमभिव्यक्तिः, फलप्रदानसामर्थ्यं किमपूर्वम्, अथापूर्वधर्म

---

१. यदाश्रितं C २. °त्वात् C ३. परस्य om C ४. भवति C ५. घटादि C ६. विपच्यमान° C ७. °शयान्तरात् J ८. शरीरे सं J ९. न वान्य° C १०. °भ्युदयो नापि क्रियाविलोप इति C ११. °र्था क्रियेति C १२. अतो न C

इति? यद्यपूर्वम्, न हि किञ्चित् कृतम्। अथापूर्वधर्मः, तद्व्यतिरेकिणाप्यन्यत् अपूर्वमित्यत्र[१] किं प्रमाणम्? वयं तु पश्यामः, यतः फलं तदपूर्वमिति। अथावरणाद्यपगमेऽभिव्यक्तिः, किमस्यावरणमिति वक्तव्यम्। न ह्यतीन्द्रियाणामर्थानामावरणस्य संभवासंभवौ चिन्त्येते। एतेन प्रतिपुरुषं नित्यत्वं प्रतिषिध्यं वेदितव्यम्। कथमिति? तत्रापि क्रियाविलोपो दोषः, व्यञ्जकस्य चासामर्थ्यमिति। उत्कर्षार्था च प्रवृत्तिरयुक्ता नित्यस्याभेद्यत्वादिति। व्यञ्जकभेदानुविधानाद् भेद इति चेत्–न, एकस्मिन्नदृष्टत्वात्। अथापीदं स्यात् एकमप्यपूर्वं व्यञ्जकभेदानुविधानाद् भिन्नमिव भवति, तद्भेदादुत्कर्षापकर्षौ भवत इति।[२]नैतदस्ति, एकस्मिन्नदृष्टत्वात्। न ह्येकं किञ्चिद् व्यञ्जकभेदानुविधायि दृष्टं यत[३]एतदेवं स्यादिति। ननु च खड्गादिभेदान्मुखभेदः तदनुविधानाद् दृष्टः, न दृष्ट इति ब्रूमः। किं पुनस्तद् यदि न दृष्टम्? मिथ्याप्रत्ययः स इति ब्रूमः। भिन्नमिव तत्, न पुनर्भिन्नमेव, एकस्यानेकरूपस्यासंभवात्। न ह्येकमनेकरूपं संभवति। तस्मादपूर्वस्यैकत्वं वा हातव्यम् उत्कर्षापकर्षकर्तृत्वं[४] वेति। प्रतिपुरुषमनेको नित्यो वेति[५]। अथायं पक्ष आश्रीयते, प्रतिपुरुषमनेकत्वं नित्यत्वं वा अपूर्वस्येति, अनिवृत्तो व्याघातः, प्रायणानुपपत्तिप्रसङ्गदोषः[६], क्रियाविलोपदोषश्च न व्यावर्तते।[७]अभिव्यक्तश्च फलं ददातीति, किं यदा अभिव्यक्तिः तदा फलं ददाति, उत क्रियानिवृत्त्युत्तरकालमिति? यदि [८]यदाभिव्यक्तस्तदा फलं ददाति, तन्न दृष्टम्। न ह्यश्वमेधक्रियानन्तरमेव स्वर्गप्राप्तिर्भवतीति। अथोत्तरकालम्? असती क्रिया व्यञ्जिका, तया [९]चानुगृह्यमाणः फलं ददातीति चित्रम्। न हि किञ्चिदपूर्वं नाभिव्यक्तमिति सर्वं सर्वदा फलदातृ स्यादिति। अथापि स्वपक्षसंरिरक्षयिषया क्रियानित्यत्वमपि प्रतिपद्येथाः, एवमप्यनिवृत्तो व्याघातः क्रियाविलोपादिक

---

१. अत्र om J २. एतदपि नास्ति C ३. एतत् om C ४. हेतुत्वं C
५. अनेकं नित्यं वेति C ६. °प्रसङ्ग° om J ७. अभिव्यक्तिस्तु C ८. °व्यक्तिः C
९. °नुगृह्यमाणं ददातीति C

इति। तदेवं यथा यथा अपूर्वस्य नित्यत्वं विचार्यते, तथा तथोपपत्तिं न सहत इति।

आप्तोपदेशः [१]शब्द इति किमाप्तानामविसंवादित्वं प्रतिपाद्यते, अथार्थस्य[२] तथाभाव इति? यद्याप्तानामविसंवादित्वं प्रतिपाद्यते, तदनुमानात्। अथार्थस्य तथाभावः, सोऽपि प्रत्यक्षात्। यदा ह्ययमर्थं [३]प्रत्यक्षत उपलभ्यते तदा तथाभावमर्थस्य प्रतिपद्यत इति। तन्न, **सूत्रा**र्थापरिज्ञानात्। नायं सूत्रार्थः आप्तोपदेशः शब्द इति, अपि त्विन्द्रियसंबद्धासंबद्धेष्वर्थेषु या शब्दोल्लेखेन प्रतिपत्तिः सा आगमस्यार्थः। तस्मादसंबद्धोऽयं विकल्पः॥७॥

स द्विविधो दृष्टादृष्टार्थत्वात् ॥१।१।८॥

स द्विविध इति नियमार्थम्। अनेकधा भिन्न आगमः प्रत्यक्षानुमानविषयतायामेव व्यवतिष्ठत इति। वक्तृभेदेन वा द्वैविध्यं दृष्टादृष्टार्थप्रवक्तृकत्वात्। प्रत्यक्षत उपलब्धोऽर्थः दृष्टार्थः, अनुमानत उपलब्धोऽर्थोऽदृष्टार्थ इति। ऋष्यार्यम्लेच्छानामेतत् समानं लक्षणमिति सर्वेषामागमेन व्यवहारदर्शनादनियमः।

एवं चत्वार्येतानि प्रमाणानि यैर्देवमनुष्यतिरश्चां [४]व्यवहाराः प्रकल्प्यन्त इति॥८॥

॥प्रमाणलक्षणप्रकरणम्॥

---

१. शब्द om J २. आहोस्विदर्थस्य C ३. °क्षेण C ४. °रः प्रकल्प्यते C

[प्रमेयलक्षणप्रकरणम्]

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ।।१।१।९।।

किं [१]पुनरनेन प्रमाणेनार्थजातं प्रमातव्यमिति **भाष्यम्**। अनुपपन्नोऽयं प्रश्नः, सामर्थ्यतः प्रमाणविषयाधिगतेः। न हीमानि प्रमाणानि निर्विषयानि चर्चितानि, यतोऽयं प्रश्नः स्यात्, किं पुनरनेन प्रमाणेनार्थजातं प्रमातव्यमिति। न न युक्तः, प्रमेयविशेषविषयत्वात्। नायं [२]प्रमेयमात्रविषयः प्रश्नः, प्रमेयमात्रस्य प्रमाणलक्षणोद्देशेनाधिगतत्वात्[३]। प्रमेयविशेषावधारणार्थस्तु भवेत्। कतमं तत्[४] प्रमेयं यदनेन प्रमाणेन[५] यथावत् परिज्ञायमानमपवर्गाय, अनवगम्यमानं च संसारायेति[६]। एतदर्थप्रकाशनार्थम् **आत्मादिसूत्रम्**। अयमेव च सूत्रार्थ इति। अत्रापि समासश्चार्थे द्वन्द्वः[७], यथावचनं विग्रह इति। उभयावधारणप्राप्तावन्यतरावधारणे दोषः। किं पुनरत्रावधार्यते? किमात्माद्येव प्रमेयम्, अथ प्रमेयमेवात्मादीति? यद्यात्माद्येव प्रमेयमिति अत्यल्पमिदमुच्यते[८], दिगादीनां सामान्यविशेषसमवायानां च सूत्रेऽनभिधानादव्यापकम्। अथ पुनः प्रमेयमेव चात्मादि तदा[९] प्रमेया च तुलाप्रामाण्यवत् [२.१.१६] इत्यस्य[१०] व्याघातः। तत्र हि सुवर्णादि द्रव्यं परिच्छेदसाधनत्वात् परिच्छेद्यत्वाच्च प्रमाणप्रमेयशब्दाभिलाप्यमित्युक्तम्[११]। लोकविरोधश्च, एकस्यानेककारकशब्दवाच्यत्वात् वृक्षस्तिष्ठतीति यथा, तत्रैकं वृक्षाख्यं वस्त्वनेकेन कारकशब्देनाभिधीयते[१२] तस्य तस्य निमित्तस्य सन्निपातात्। एवं प्रमेयं

---

१. अनेन प्रमाणेन॰ न न युक्तः om C २. प्रमेयविशेषः प्रमेय॰ C ३. °द्देशेन बोधितत्वात् C ४. °धारणा न सिध्यति तत् C ५. प्रमाणेन om C ६. अपरिज्ञायमानश्चासावात्मेति (for अनव॰ संसारायेति) C ७. अत्रापि (समान) (?) sic. C ८. इति॰ मुच्यते om C ९. तथा च C १०. अस्य om C ११. इत्युक्तम् om C १२. उच्यते C

प्रमाणमिति। न, सूत्रार्थापरिज्ञानात्। आत्माद्येव प्रमेयं यथावत् परिच्छिद्यमानमपवृक्तये भवतीत्ययं सूत्रार्थः, न प्रमेयान्तरनिराकरणार्थः सूत्रारम्भ इति। प्रमेयमेव चात्मादीत्यपि न दोषः। किमुक्तं भवति? मुमुक्षुणा प्रमेयमेवात्मादि बोद्धव्यमेवैतदिति[१]। नास्य प्रमेयत्वं विधीयते। न चान्यस्य[२] प्रमेयत्वं निराक्रियते। अपि तु मुमुक्षुणा बोद्धव्यमेवैतदित्यनूद्यते। तस्मात् उभयमप्यवधार्यते। न च यथोक्तो दोषः। उपेत्य वा ब्रूमो दिगाद्यप्यत्रैव लभ्यते उपपत्तिसामर्थ्यात्, का पुनरुपपत्तिः? प्रवृत्तेर्विंशतिभेदात् तत्संस्कारकत्वेन दिगादयोऽपि लभ्यन्ते, सामान्यविशेषसमवायाश्च विशेषणविशेष्यभावात्[३]। आत्मादयो विज्ञेयत्वेनोपदिष्टाः। तेषां चेतरेतरव्यवच्छेदहेतुभावेन[४] सामान्यविशेषसमवाया विशेषणं भवतीति सूत्रत उक्ता भवन्तीत्यचोद्यं दिगादिग्रहणं न[५] कृतं सूत्र इति। न पुनरिदं प्रमेयमात्रावधारणार्थं **सूत्रम्**, अपि तु[६] प्रमेयविशेषावधारणार्थम्, प्रमेयमात्रावधारणार्थायां[७] च सूत्रप्रवृत्तौ[८] विहितविधानादकुशलः **सूत्रकारः** स्यात्। आद्येन च[९] सूत्रेण प्रमेयं विहितमिति पुनः प्रमेयस्याभिधानात्[१०] प्रमत्तवाक्यमिदं स्यात्। एनं चार्थं जिज्ञापयिषुः[११] **सूत्रकारः** तुशब्दमाह। अन्यदपि प्रमेयमस्ति, यस्य तु तत्त्वज्ञानान्निःश्रेयसं तदिदं प्रमेयमिति तुशब्देन ज्ञापयति।

सुखं पुनः कस्मादस्मिन् नोक्तम्? किमभावादाहोस्विदन्यत उपलब्धेरिति? न तावदभावात्[१२], प्रत्यात्मवेदनीयत्वात्। प्रत्यात्ममेव वेदनीयं सुखमुपलभ्यमानं न शक्यं नास्तीति वक्तुम्। न चान्यत उपलब्धिः, अस्मादेव। अनभिधानं तु वैराग्यज्ञापनार्थम्। कथम्? नायं मोक्षमाणः सर्वं दुःखं भावयेदिति तस्य दुःखभावनार्थं सुखस्यानपदेशः। सर्वं दुःखं भावयतस्त्रैलोक्येऽस्यानभिरतिसंज्ञा

---

१. °मेवात्मादि बोध्यव्यमेव C २. न चास्य J ३. विशेषणविशेष्यभावेन C, विशेषणभावात् J ४. °दकभावेन C ५. भवतीति° दिगादिग्रहणं न om C ६. न तु° C ७. °मात्र° om J ८. °धारणार्थं च प्रवृत्तौ C ९. वा C १०. पुनर्विधानात् C ११. एनं चार्थमेवार्थकं C १२. °वादन्यत उपलब्धेर्वा नाभावात् C

भवति। तां चोपासीनस्य त्रैलोक्यविषया तृष्णा विच्छिद्यते। तृष्णा नाम पुनर्भव-प्रार्थना। सास्य सर्वं दुःखमिति भावयतो न भवति, न हि कश्चिद् दुःखं प्रार्थयते। तृष्णाप्रहाणाद्यानि पुनर्भवसाधनानि। तानि नोपादत्ते। तदनुपादानादनागतौ धर्माधर्मौ न भवतः। यावप्युत्पन्नौ धर्माधर्मौ[१], तावप्युपभोगात् प्रक्षयं गच्छतः। सोऽयं धर्माधर्मलक्षणस्य संसारबीजस्य उच्छेदादपवृज्यते, न पुनर्जायत इति। अस्यार्थस्य प्रदर्शनार्थं सुखानभिधानमिति॥९॥

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ॥१।१।१०॥

आत्मनः समानासमानजातीयविशेषणार्थं सूत्रम्–**इच्छेति**॥ आगमस्यानुमानेन प्रतिसन्धानार्थं वा। [२]यो हि आगमेन प्रतिपन्न आत्मा, तस्यानुमानेन प्रतिसन्धानार्थम्। प्रमाणसंप्लवस्योदाहरणार्थं [३]वा। यत्तदवोचाम प्रमाणानि संप्लवन्त इति, तस्यायं विषयः।

यज्जातीयस्यार्थस्य सन्निकर्षादिति **भाष्यम्**। तत्र[४] चेच्छादीनां प्रतिसन्धानम् आत्मास्तित्वप्रतिपादकम्। तत्रेदं विचार्यते, कथमिच्छादि अनुपलभ्यमानमात्मानं गमयतीति, स्मृत्या सहैकविषयभावात्? यस्मादेते[५] स्मृत्या सहैकविषया भवन्ति, तस्मात् एककर्तृकत्वं प्रतिपादयन्ति। न हि नानाकर्तृकाणां नानाविषयाणां नाना-निमित्तानां च [६]प्रत्ययानां प्रतिसन्धानमस्ति। न हि रूपरसगन्धस्पर्शप्रत्ययाः प्रति-सन्धीयन्ते। न हि भवति यद्रूपमद्राक्षं सोऽयं स्पर्श इति। नापि भवति यत् स्पर्शमस्पार्क्षं तद्रूपं पश्यामीति। नापि [७]देवदत्तेन दृष्टेऽर्थे यज्ञदत्तस्य प्रतिसन्धानं दृष्टम्। न हि भवति देवदत्तो यम् अद्राक्षीत् [८]सोऽहं यज्ञदत्तस्तमद्राक्षमिति। किं

---

१. धर्माधर्मौ om C २. यो हि om C ३. वा om J ४. च om C ५. °देवेच्छादयः C ६. प्रत्ययानां om C ७. देवदत्तदृष्टे यज्ञदत्तप्र° C ८. सोऽहं om C

कारणम्? बुद्धिभेदानां प्रतिनियतविषयत्वादिति। प्रतिनियतविषया [१]बुद्धयः इतरेतरव्यावृत्तस्वरूपा नैरात्म्यवादिनो न भवन्तीति न युक्तं प्रतिसन्धानम्। तस्माद् यः प्रतिसन्धाता स आत्मेति।

कार्यकारणभावात् प्रतिसन्धानमिति चेत्? अथापि मन्येथा नैककर्तृकत्वात् प्रतिसन्धानम्? किं तर्हि? कार्यकारणभावात्। पूर्वपूर्वबुद्धिविशेषादुत्तरमुत्तरं बुद्ध्यन्तरं पूर्वबुद्धिशक्त्यनुविधानात्[२] सकलाहितशक्तिकलापमुत्पद्यते। अतो नानात्वेऽपि बुद्धीनां कार्यकारणभावादेव प्रतिसन्धानं बीजादिवदिति। तद्यथा शालिगुटिकाद्यनन्तरमङ्कुरः प्रादुर्भवति, तस्य शालिशक्त्यनुविधानं तत्पूर्वकतया [३]व्यवतिष्ठते। अनन्तरं महाभूतैरनुगृह्यमाणमुत्तरकालं शालिबीजं [४]प्रादुर्भवति न यवबीजम्, अतत्पूर्वकत्वात्, तथेहाप्येकसान्तानिकीनां बुद्धीनां [५]कार्यकारणभावव्यवस्थानात् प्रतिसन्धानम् अतत्पूर्वकत्वात्, न सन्तानान्तरबुद्धीनामिति तत्पूर्वकत्वात्। न पुनरेककर्तृकत्वात्[६] प्रतिसन्धानमदर्शनादिति। तदिदं प्रतिसन्धानमन्यथा भवन्नात्मनः सत्तां प्रतिपादयितुं शक्नोति। न, नानात्वस्याबाधनात्, कार्यकारणभावात् प्रतिसन्धानं ब्रुवन् न नानात्वं बाधत इति। किं कारणम्? [७]कार्यकारणभावस्य नानात्वाधिष्ठानात्। कार्यकारणभावः खलु नानात्वाधिष्ठान एव[८]। उभयपक्षसंप्रतिपन्ने च नानात्वे न प्रतिसन्धानं दृष्टम्। कस्मात्? अन्येनानुभूतस्यान्येनास्मरणात्। न चास्मृतमर्थ[९] प्रतिसन्धातुं शक्नोति। अकार्यकारणभावादनुपपत्तेः। न ब्रूमः कार्यकारणभावे दृष्टं प्रतिसन्धानम्, अपि त्वकार्यकारणभावे न दृष्टमतत्पूर्वकत्वादित्युक्तम्। तस्मादयथार्थोऽयमुपालम्भ इति।

तदयुक्तम्, विवादकारणाव्यतिरेकादिति। एवं ब्रुवाणो भवान् न कारणमतिरेचयति। मयोक्तं नानात्वे न दृष्टमिति। त्वं तु ब्रूषे अकार्यकारणभावान्नानात्वे

---

१. बुद्धयः om C २. °धानेन C ३. अव° J ४. जनयति C ५. °भाव° om C ६. अतत्पूर्व°द्धीनाम्। न पुनः C ७. कार्य°त्वात् om C ८. एव om C ९. अर्थं om C

[1]सति न दृष्टमिति अनैकान्तिकत्वान्न विवादकारणमतिरिच्यते। तुल्यं भवतोऽपि, नानात्वे अदर्शनादिति ब्रुवता न विवादकारणमतिरेचितं भवतीति। अभ्युपगमादनुत्तरं तुल्यमिति ब्रुवता भवताभ्युपगतं भवति। नासाधनात्, न मया कार्यकारणभावात् प्रतिसन्धानं साध्यते, अपि त्वन्यथैव तद्भवतीति हेतोरसिद्धार्थतादोषोऽभिधीयत इति। न, हेत्वर्थापरिज्ञानात्। न भवता हेतुरूपं विशेषतो व्यज्ञायि, केवलं हेतुसामान्यात् अन्यथैव[2] संभवतीति हेतुदोषोऽभ्यधायि। विशेषितं चैतत् प्रतिसन्धानम्, स्मृत्या सह पूर्वापरप्रत्यययोरेकविषयत्वेन प्रतिसन्धानम्। सा च स्मृतिर्भवत्पक्षेऽनुपपन्ना। कस्मात्? अन्येनानुभूतस्यान्येनास्मरणात्। न ह्यन्येनानुभूतस्यान्येन स्मरणम्, न ह्यन्येनानुभूतमन्यः स्मरतीति। अस्ति च स्मृतिः। तस्माद् यस्मिन् पक्षें स्मृतिः संभवति तत्र प्रतिसन्धानमिति न्याय्यम्। भवानस्मान् स्मृत्यनुपपत्त्या भाययति, न हि नः पक्षे स्मृतिर्न संभवतीति। कथमिति? कार्यकारणभावादेव यत्कायचित्तसन्तानप्रभवोऽनुभवः स्मृतिहेतुरसाविति। यस्मिन् कायचित्तसन्ताने[3] स्मृतिरनुभवश्चोत्पद्येते[4] स कायचित्तसन्तानः स्मर्ता चानुभविता च भवतीति। न, अस्थिरत्वाद् बुद्धीनाम्[5]। स्थिरं हि वासकेन वास्यमानं दृष्टम्। न च बुद्धीनां [6]स्थैर्यमस्ति। असंबन्धाच्च। असंबद्धं च वासकेन वास्यमानं दृष्टम्। न च वासकेन सह संबन्धो बुद्धीनामस्ति। शक्तिविशिष्टश्चित्तोत्पादो वासनेति चेत्? अथाप्येवं कल्प्येत पूर्वचित्तसहजाच्चेतनाविशेषात् पूर्वशक्तिविशिष्टं चित्तमुत्पद्यते। सोऽस्य शक्तिविशिष्टचित्तोत्पादो[7] वासनेत्युच्यते। अत्रोक्तमस्थिरत्वात्, वासकेनासंबन्धाच्चेति। यश्चासौ चेतनाविशेषः पूर्वचित्तसहभावी स नापि वर्तमाने चेतस्युपकारं करोति, नाप्यनागते। कथमिति? वर्तमानं तावदविकार्यं यथाभूतं जायते तथाभूतमेव नश्यति। [8]अनागतेनापि न संबध्यते।

---

१. सति om C २. एव om J ३. °नप्रभवोऽनु° चित्तसन्ता° om C ४. °रनुभवो वो° C ५. बुद्धीनाम् om J ६. स्थिरत्वम् C ७. °चित्त° om J ८. अनागते सोऽपि C

न चासंबद्धं वासयतीत्युक्तम्। तस्मात् कार्यकारणभावात् स्मृतिरित्यशिक्षितोत्त्रासनमेतदिति[१]।

इतश्च न भवत्पक्षे स्मृतिः भावस्य भवित्रपेक्षत्वात्। सर्वो हि भावो भवितारम् अपेक्षते क्रियात्वादुत्पत्तिवदिति। स्मृतेश्च भविता कर्म वा भवेत् कर्ता वा। तण्डुलानां [२]पाक इति कर्मणि, देवदत्तस्य गतिरिति कर्तरि। [३]तत्र न तावत् [४]कर्माधारा असतोऽपि स्मरणात्। यदा [५]त्वविद्यमानं स्मरति तदानाधारा स्मृतिः प्राप्नोति। अथ कर्त्राधारा सा, [६]तदास्मत्पक्षे प्रयुक्ता न भवत्पक्षे। कस्मात्? कर्तुरनभ्युपगमात्। न हि भवन्तः कर्तारं [७]स्मृत्याधारं प्रतिपद्यन्त इति। अनाधारैव स्मृतिरिति यदायं पक्षो भवति [८]तदाप्यनुमानं नास्ति, कार्यस्यानाधारस्यादर्शनादिति। कार्यं सर्वमाधारवद् दृष्टं [९]यथा रूपादि। [१०]कार्यं च स्मृतिः। तस्मादाधारवतीति। कार्यकारणयोर्भावभवितृव्यवहारः। कार्यक्षणो भावः, कारणक्षणो भवितेति। एवं च किमन्येन भवित्रा कल्पितेनेति। तच्च न, कालभेदात् [११]कार्यकारणक्षणयोर्भिन्नकालत्वादाश्रयाश्रितभावानुपपत्तिः[१२] कुण्डबदरादिवदिति। अथापीदं स्यात् उत्पत्तिर्भावः उत्पत्ता भवितेति स्मृतिरप्युत्पद्यते। तस्मात् तस्या अप्युत्पत्तिर्भावो भविष्यतीति स्मृतिरप्युत्पत्त्री भवित्रीति[१३]। तच्च न, विरोधादनभ्युपगमाच्च। यदि स्मृतिव्यतिरिक्तोत्पत्तिः, व्याहतं भवति, स्वरूपं च वक्तव्यम्। न हि भवन्त उत्पत्तिमद्व्यतिरेकेणोत्पत्तिं प्रतिपद्यन्ते[१४]। व्यतिरिक्तां चोत्पत्तिं [१५]प्रतिपद्यमानेन भवता तस्याः स्वरूपं वक्तव्यम्। स्वरूपं च निरूप्यमाणं तन्त्रं बाधते। कथमिति? उत्पत्तिः स्वकारणसत्तासंबन्धः, सत्ता वा स्वकारणसंबन्धविशिष्टा। उभयं च [१६]स्वतन्त्रेणाभ्युपगतमिति व्याघातः[१७]। अथ स्मृत्यव्यतिरिक्तोत्पत्तिः[१८], किं क्व

---

१. °रित्यनु° J, °त्यशिक्षितो वासनमिति C, °तो वासमानं Vvar. २. पाचक C ३. तत् C ४. कर्मण्यसतोऽपि सम्भवात् C ५. तु om C ६. तदा om J ७. °त्यर्थकं C ८. अपि om C ९. यथा om C १०. तच्च C ११. °क्षण° om C १२. °पत्तेः C १३. भवितेति C १४. मन्यन्ते C १५. मन्यमानेन, भवता om J १६. स्व° om C १७. विरोधः C १८. °त्तिपूर्वकम् C

वर्तत इति शून्यमभिधानम्। उत्पत्तिर्भाव उत्पत्त्री स्मृतिरिति। यदा चोत्पत्तिः स्मृतेर्भावत्वेन विवक्षिता भवति तदैवं वक्तुं न्याय्यम्। यदा तु स्मृतिर्भाव इति तदा भवित्रा भवितव्यम्। कस्मात्? भावस्य भवित्रपेक्षत्वादित्युक्तम्[१]। तस्मात् न कथञ्चन[२] भवत्पक्षे स्मृतिः संभवतीति स्मृतिं चान्तरेण न प्रतिसन्धानमस्ति। अस्ति चेदं प्रतिसन्धानम्। तस्मात् यत्कर्तृकमेतत् सोऽर्थोऽन्य एक आत्मेति।

अथ वा अन्वयेनान्यः सूत्रार्थोऽभिधीयत इति। देवदत्तस्य [३]रूपरसगन्धस्पर्शप्रत्ययाः एकानेकनिमित्तकाः स्मृत्या सह मयेति प्रतिसन्धानात्। कृतसङ्केतानां [४]बहूनाम् एकस्मिन् नर्तकीभ्रूक्षेपे युगपदनेकपुरुषप्रत्ययवत्[५]। यथा नानाकर्तृकाणां [६]कृतसमयानां बहूनां नानाभूताः प्रत्यया निमित्तस्य भ्रूक्षेपस्यैकत्वात् प्रतिसन्धीयन्ते, तथेहापि नानाविषयाः प्रत्यया निमित्तस्यैकत्वात् प्रतिसन्धास्यन्ते। यत्तन्निमित्तं स आत्मेति।

अथ वा इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् [१.१.१०] इत्यन्यथा वर्णयन्ति। गुणा इच्छादयः। गुणाश्च परतन्त्रा भवन्तीति न्यायः। गुणत्वं च पारिशेष्यात्। न [७]सामान्यविशेषसमवायभावोऽनित्यत्वात्। न द्रव्यं कर्म वा व्यापकद्रव्यसमवायात् [८]शब्दवदिति। एवमादि सामान्यतोदृष्टमित्येतस्मिन्ननुमानं [९]वर्णितम्। एतेन अनित्यत्वात् पारतन्त्र्यमिच्छादीनां कार्यत्वाच्च रूपादिवदित्युक्तम्। अयावद्द्रव्यभावित्वेन च शरीरगुणत्वप्रतिषेधः। तत्प्रतिषेधाच्चात्मगुणत्वमिति [१०]पारिशेष्यात् सिद्ध आत्मेति॥१०॥

---

१. द्रः पृः ६३।३ २. तस्मात् कथं च न भव° C ३. °गन्ध° om C ४. वृद्धानां C ५. °दनेकप्रत्ययवत् C ६. °संकेतानां C, बहूनां om C ७. °समवायाः C ८. शब्दवदित्यादि सामा° C ९. व्यवस्थितम् C १०. परिशेषात् C

चेष्टेन्द्रियार्थाश्रयः शरीरम् ।।१।१।११।।

चेष्टेन्द्रियार्थाश्रयः शरीरमिति। का पुनरियं चेष्टा? हिताहितप्राप्तिपरिहारार्थः [१]परिस्पन्दः। सुखसाधनोपलब्धौ तदीप्साप्रयुक्तस्य यः परिस्पन्दः सा चेष्टा इत्युच्यते[२]। एवं दुःखसाधनोपलब्धौ तज्जिहासानुष्ठानलक्षणः परिस्पन्द इति।

कथमिन्द्रियाणां शरीरमाश्रयः? स्वकारणवृत्तित्वादवृत्तित्वाच्च। यानि तावत् कार्याणीन्द्रियाणि तानि स्वकारणवृत्तीनि। यदकार्यं तदवृत्ति। घ्राणादीनि त्वक्पर्यन्तानि कार्याणि, श्रोत्रमनसी त्वकार्ये। न च घ्राणादिमनःपर्यन्तमिन्द्रियं शरीरवृत्ति। तस्मादयुक्तमिन्द्रियाश्रयः शरीरमिति। शरीरानुविधानमिन्द्रियाश्रयत्वं ब्रूमः। न पुनः आधाराधेयभावेनेन्द्रियाणि शरीरे वर्तन्त इति। अपि तु [३]शरीरानुग्रहोपघातानुविधानम् इन्द्रियाश्रयत्वस्यार्थः। शरीरानुग्रहेणानुगृह्यन्ते, तदुपघाते चोपहन्यन्त[४] इत्ययमाश्रयार्थः। तस्मादयथार्थोऽयमाक्षेप[५] इति।

एतेनार्थानामाश्रयार्थ उक्तो वेदितव्यः। किं कारणम्? न हि गन्धादयोऽर्थाः शरीरवृत्तयः। यत्तु तेषां कार्यं सुखदुःखोपलब्धिनिमित्तत्वम्, तन्नासति शरीरे भवतीति शरीराश्रया इत्युच्यन्ते। यथा ग्रामीणा ग्रामण्यमाश्रिता इति। कथं पुनरेते चेष्टादयः सामान्यशब्दाः सन्तो विशेषवृत्तयो भवन्तीति? सामान्यशब्दानामपि विशेषवृत्तित्वं सामर्थ्यात्। सामर्थ्यं प्रकरणादि। ब्राह्मणान् [६]भोजयेदिति यथा अशेषब्राह्मणभोजनस्याशक्यत्वात् विशेषेण सन्निधीयमानं प्रकरणापन्नं ब्राह्मणविशेषमाह, एवं [७]चेष्टादिशब्दानामपि समानतायां सत्यां सामर्थ्याद् विशेषेऽवस्थानम्। सामर्थ्यं च लोकतस्तदधिगतिः प्रमाणासंभवो वा। [८]लोकस्तावत् चेष्टाशब्दं न क्रियामात्रे प्रयुङ्क्ते किं तु [९]क्रियाविशेष इति, यथा स्पन्दते सर्पति

---

१. स्पन्दः C २. गम्यते C ३. शरीरस्योपघात° C ४. °तेनोप° J
५. अयम् om C ६. भोजयेति C ७. °शब्दानामपि साम° C ८. लोकतः C
९. क्रिया° om C

धावतीति। यथैते स्पन्दादिशब्दाः क्रियावाचकाः सन्तः क्रियाविशेषेष्ववतिष्ठन्ते, तथा चायं चेष्टाशब्दः सामान्यवाच्यपि प्रमाणासंभवात् क्रियाविशेषे वर्तते, न क्रियामात्राधारस्य शरीरत्वव्यक्तिहेतुत्वं संभवतीति। एवं च न घटादिषु प्रसङ्गः। यैरप्यत्राद्यादिपदप्रयोगे घटादिषु प्रसङ्ग[१] इति देश्यं क्रियते, तदप्यनेन व्याख्यानेन प्रत्युक्तम्। सति च प्रसङ्गे समस्तपदप्रयोगेऽपि न परमाणुषु प्रसङ्गो [२]निवर्तत इति। यथा त्वस्माभिर्वर्णितं तथा न क्वचिदपि शरीराद् अन्यत्र [३]वर्तत इति॥११॥

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥१।१।१२॥

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्य इति **सूत्रम्।** लक्षणसूत्राणि समानासमानजातीयविशेषणार्थानि सर्वाणीति सूत्रार्थो द्रष्टव्यः। उद्देशसामान्यान्न[४] लक्षणाभिधानम्। नामधेयेन पदार्थमात्रस्याभिधानमुद्देश इत्युद्देशलक्षणमुक्तम्[५] इदं च तथा। तस्मात् नेदं लक्षणमिति। नेदं तथा, करणभावात् स्वविषयग्रहणलक्षणत्वमिन्द्रियाणाम्। करणस्वभावकानीन्द्रियाणीति। तेषामतीन्द्रियाणाम् [६]इन्द्रियाणां यत् स्वविषयग्रहणं तेन लक्ष्यन्त इति स्वविषयग्रहणलक्षणत्वं वेदितव्यम्, असाधारणत्वादिति।

भूतेभ्य इति पृथिव्यादिकारणोपदेशो नियमार्थः। कः पुनरयं नियमः? भूतगुणविशेषग्रहणसाधनत्वम्, न सर्वमिन्द्रियं सर्वभूतगुणविशेषं[७] गृह्णाति। अपि तु यज्जातीयमिन्द्रियं भवति, तस्य यो गुणविशेष इतरेतरभूतव्यवच्छेदहेतुर्गन्धादिः[८] स तेनैवेन्द्रियेण गृह्यत इत्ययं नियमः। ऐकात्म्ये पुनरयं नियमो न स्यात्। यदि पुनः इन्द्रियाण्येकात्मकानि एककारणकानि स्युः, कारणस्वभावानुविधानादैकात्म्याद् विषयव्यवस्था न स्यात्। सर्वं सर्वार्थमेकं वा सर्वार्थमिति

---

१. दिष्वप्र॰ C २. वार्यते C ३. प्रसङ्ग इति J ४. न om C
५. द्रः पृ २५।१४ ६. इन्द्रियाणां J ७. भूतगुणं J ८. गन्धादिः om C

स्यात्। एककारणानामपि स्वभावभेदो रूपादिवदिति चेत्? [१]अथापि मन्येथाः दृष्ट एककारणाणां पाकजरूपादीनां स्वभावभेदः। कतमत् पुनरेकं कारणं रूपादीनाम्? अग्निसंयोग इति। न, सिद्धान्तापरिज्ञानात्। न ब्रूमोऽग्निसंयोगात् [२]केवलाद् रूपादय इति, अपि तु पूर्वरूपादिविशेषापेक्षात्। यद्द्रव्यं पच्यतेऽग्निसंयोगेन, तस्य ये पूर्वरूपादयः, तेषां यः स्वगतो विशेषः, तमपेक्षमाणोऽग्निसंयोग उत्तरान् रूपादीन् विशिष्टानारभते। एवं च कृत्वा परमाणोः पक्वतरतमादिभेदः। तस्मान्नैककारणपूर्वका रूपादय इति न किञ्चिदप्येककारणकं कार्यं दृष्टमिति। सर्वं हि कार्यं प्रादुर्भवत् समवाय्यसमवायिनिमित्तकारणेभ्यो भवतीति। एकं कर्म संयोगविभागयोः कारणं दृष्टमिति चेत्–न, अनभ्युपगमात्। स्यान्मतिः, ननु च [३]दृष्टमेकं कर्म संयोगविभागयोः कारणमिति। न, अनभ्युपगमात्। नैतदभ्युपगच्छामो निरपेक्षं कर्म संयोगविभागयोः कारणमिति। यदि तर्हि कर्मापि सापेक्षं संयोगविभागौ करोति, [४]ततः कर्मलक्षणहानिः। यन्निरपेक्षं संयोगविभागकारणं तत् कर्मेत्युक्तम्[५] तद्धीयते, लक्षणहानेश्च न कर्म। ततश्च संयोगविभागौ न कर्मपूर्वकाविति। नैष दोषः। न ब्रूमो निरपेक्षं कर्म कारणमिति न किञ्चिदपेक्षत इति। अपि तु चरमभाविनिमित्तान्तरं नापेक्षत इत्ययं निरपेक्षार्थः। यथा द्रव्यजातं समानजातीयद्रव्यं संयोगं च चरमभाविनमपेक्षमाणं द्रव्यमारभते, नैवं कर्मजातं[६] पश्चाद्भावि-निमित्तमपेक्षते। [७]अपि तु उत्पन्नं सत् कर्म संयोगविभागावारभत इति। तस्मान्न कर्मलक्षणहानिः। न चैकपूर्वकत्वं संयोगविभागयोरिति॥१२॥

पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ।।१।१।१३।।

पृथि.....भूतानि॥१३॥

---

१. अपि om C २. एकस्मात् C ३. एकं om C ४. ततः om C
५. द्रः वै. सू. (च) १.१.१६ ६. °जातीय C ७. अपि तु कर्म सत् C

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः।।१।१।१४।।

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्था इत्येतत् **सूत्रम्**। पृथिव्यादिगुणा इत्येतस्मिन् पदेऽनेकः समासः संभवति। कथमिति? पृथिव्यादीनां गुणाः इति षष्ठीसमासः। पृथिव्यादीनि च गुणाश्चेति द्वन्द्वः। पृथिव्यादयो गुणा येषामिति बहुव्रीहिः। तदेवमनेकसमासोपपत्तेः संशयः किमत्र[१] तत्त्वमिति। द्वन्द्वः समास इत्येतत्[२] तत्त्वम्। षष्ठीसमासस्तावन्न, पृथिव्यादीनामनिन्द्रियार्थत्वप्रसङ्गात्। यदि पृथिव्यादीनां गुणा इति षष्ठीसमासः आश्रीयेत[३], पृथिव्यादीनां गन्धादिगुणविशेषणत्वेनोपयुक्तानाम् इन्द्रियार्थत्वं न स्यात्, विशेषणवैयर्थ्यं च स्यादिति। गन्धरसरूपस्पर्शशब्दा इत्युक्ते पृथिव्यादिगुणा इति गम्यते[४]। अतश्च पृथिव्यादिग्रहणं व्यर्थम्। न हि गन्धादीनां द्वैराश्यमस्ति पृथिव्यादिगुणत्वं चान्यगुणत्वं च यतो विशेषणमर्थवत् स्यात्। तस्मान्न षष्ठीसमासः। गुणिनामसिद्धेर्न बहुव्रीहिरपि पृथिव्यादयो गुणा येषामिति[५]। के ते गुणिनो येषां पृथिव्यादयो गुणाः। न च पृथिव्यादीनां गुणत्वं शक्यं प्रतिपादयितुम्। न चान्यथा बहुव्रीहिः। प्रायेणायं समानाधिकरणपूर्वो भवति, यथा चित्रगुरिति। गोमत्तायां प्रसिद्धायां चित्रगुणसम्बन्धे सुप्रसिद्धे च गवां चित्रगुरिति बहुव्रीहिर्भवति[६]। न पुनरिह गुणी प्रसिद्धः। नापि पृथिव्यादीनां गुणत्वं प्रसिद्धम्[७]। विशेषकत्वाद् गुणाः पृथिव्यादय इति स्यात्। तन्न[८], सर्वो गुणः स्यादेतस्यां[९] कल्पनायाम्। न हि कस्यचित् कश्चित् विशेषणं वा विशेष्यो वा न भवतीति सर्वगुणत्वप्रसङ्ग इति। तस्माद् बहुव्रीहिरपि न। उभयसमासप्रतिषेधादन्यसमासाभावाच्च द्वन्द्वः। यस्मात् [१०]प्रसक्तौ षष्ठीतत्पुरुषबहुव्रीही। तौ च[११]

---

१. सन्देहः, अत्र च किं C २. एतत् om C ३. स्यात् C ४. गुणाः गम्यन्ते C ५. न बहुव्रीहिः पृथिव्यादयो गुणा येषां C ६. भवति om C ७. गुणत्वमिति C ८. इति चेत् ननु J ९. स्यादित्येतस्यां J १०. प्रसक्तौ om C ११. तौ च om C

प्रतिषिद्धौ, समासान्तरं च न सम्भवति। शिष्यमाणश्च द्वन्द्वः। तस्माद् द्वन्द्वः समास इति। न द्वन्द्वः समासः, शास्त्रयुक्त्योरभावात्[१]। यद्ययं द्वन्द्वो भवति शास्त्रं युक्तिर्वा पृथिव्यादीनामिन्द्रियार्थत्वे वक्तव्या इति। न, उभयस्यापि उपपत्तेरिति। उभयं पृथिव्यादीनामिन्द्रियार्थत्वे शास्त्रं युक्तिश्च सम्भवति। शास्त्रं तावत् दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् [३.१.१] इति। युक्तिरपि दर्शनस्पर्शनप्रत्यययोरेकविषयत्वेन प्रतिसन्धानम्, यमहमद्राक्षं तं स्पृशामीति [२]यं चास्पार्क्षं तं पश्यामीति दृष्टिस्पर्शनविषया युक्तिः। शास्त्रमप्यस्मिन् पक्षेऽवतरतीति[३]। ऐन्द्रियकत्वाभिधानाच्च सामान्यस्येति। तस्मात् सिद्धं पृथिव्यादीनि च गुणाश्चेति द्वन्द्वः समास इति।

पृथिव्यादिग्रहणेन पृथिव्यप्तेजांसि बाह्यकरणग्राह्याण्यपदिश्यन्ते, गुणग्रहणेन च सर्व आश्रितो गुण इति संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहद्रवत्वसंस्कारकर्मसामान्यविशेषाः[४], अनाश्रितश्च समवायस्तद्धर्मत्वाद् गुण इति। गन्धरसरूपस्पर्शशब्दास्तर्हि पृथङ् न वक्तव्याः, गुणग्रहणेन ग्रहणात्। पृथिव्यादिगुणास्तदर्था [५]इत्येवं च वक्तव्यम्। लघु चैवं[६] **सूत्रं** भवति। स एव चार्थः सेत्स्यतीति। तन्न कर्तव्यम्। गन्धरसरूपस्पर्शशब्दानां पृथगभिधानम् इन्द्रियविषयनियमज्ञापनार्थम्[७]। इन्द्रियाणि गन्धरसरूपस्पर्शशब्देषु तत्सामान्येषु नियतानि। अन्यत्रानियतानीति। तत्र पृथिव्यप्तेजांसि द्वीन्द्रियग्राह्याणि, शेषश्च गुणराशिः, सत्तागुणत्वे च सर्वेन्द्रियग्राह्ये। समवायोऽभावश्च तथा।

दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येतदमृष्यमाणः **पर** आह–स्पर्शग्रहणमेव स्पर्शनेन, रूपग्रहणमेव चक्षुषेति। स पर्यनुयोज्यः, अथ रूपस्पर्शौ चक्षुस्पर्शनाभ्यां गृह्येते इति कथमवगम्यते, यस्मात् चक्षुःस्पर्शनाभ्यां तद्विशिष्टः प्रत्ययो भवति? अनास्पदस्तर्हि प्रतिषेधः, घटादावपि तद्विशिष्टप्रत्ययदर्शनात्। घटादिकमप्यर्थं दर्शनस्पर्शनाभ्यामुपलभमानश्च तद्विशिष्टं घटादिकमर्थं प्रतिपद्यते। तस्मादसंप्रधारितः

---

१. °रसम्भवात् C २. यं °पश्यामी om C ३. सम्भवतीति C ४. वेग for द्रवत्वसंस्कार C ५. इति सूत्रे वक्तव्यम् C ६. च J ७. °विशेषनि° C

प्रतिषेध इति। रूपादिभ्यस्तथा सन्निविष्टेभ्यो घटादिप्रत्यय इति चेत्? यदिदं भवतापदिश्यते दर्शनस्पर्शनाभ्यामयं घटं प्रतिपद्यत इति, मिथ्यैतत्। रूपादय एव तेन तेनाकारेण सन्निविशन्ते, तानयमुपलब्ध्या तथाकारान् प्रतिपद्यमानो घट इति प्रतिपद्यते। न पुना रूपादिव्यतिरिक्ता घटादय इति। न, आकारार्थानभिधानात्। अतथाभूतस्य तथाभूतेन सामान्यमाकारशब्दस्यार्थोऽभिधेयम्। तद्यथा स्थाण्वाकारः पुमानित्यपुरुषस्य स्थाणोराकारः पुरुषेण यत् सामान्यं स आकारशब्दस्यार्थः स्थाणु-पुरुषप्रसिद्धौ सत्यां भवति। न पुनर्भवतां घटाकारा रूपादय इति रूपादिषु घटाकारबीजं किञ्चिदस्ति। तस्माद् घटाकारा रूपादय इति यत्किञ्चिदेतदिति। रूपादिमात्रे च घटादिबुद्ध्यभावः, यस्य च रूपादिमात्रं घटादयः तस्य तेषां समान-त्वात् [१]या इमा विभक्ता बुद्धयो गौरश्वो घट इति, ता न प्राप्नुवन्ति, रूपादिगतस्य बुद्धिनियामकस्य विशेषहेतोरभावात्। [२]सस्थानविशेषात् भेदप्रत्यय इति चेत्-केनचित् संस्थानविशेषेणावतिष्ठमाना रूपादयः संस्थानभेदानुविधानाद् घटादिबुद्धि-हेतवो भवन्तीति। नैतदस्ति, संस्थानस्यान्यत्वेऽनन्यत्वे संज्ञाभेदमात्रात् व्यर्थाभिधान-प्रसङ्गाच्च। यदि [३]तावत् संस्थानं रूपादिभ्योऽन्यत्, द्रव्यं तदिति संज्ञाभेदमात्रम्। अथानन्यत्, तथापि रूपादीनां संस्थानभेदानुविधानात् घटादिप्रत्यया इति व्यर्थमभि-धानम्। घटादिप्रत्यया मिथ्याप्रत्यया इति चेत्-स न मन्येत घटादिप्रत्ययाः सम्यक्प्रत्यया इति, किं तु शब्दवासनावशात् मिथ्याप्रत्यया भवन्तीति। तदयुक्तम्, मिथ्याप्रत्ययानां सम्यक्प्रत्ययानुकारित्वात्। [४]य एते मिथ्याप्रत्यया लोके भवन्ति [५]सर्व एते सम्यक्प्रत्ययानुकारिणो भवन्ति, न पुनर्घटादिप्रत्ययानां मिथ्याप्रत्ययत्वेन कल्पितानां किञ्चिद्[६] बीजमस्ति। न चैते निर्बीजाः प्रादुर्भवन्ति। तस्मान्न मिथ्या-प्रत्यया इति। मिथ्याप्रत्ययाश्चैत इत्यव्यतिरेके प्रमाणोपपत्तौ सत्यां सिध्यति, न चाव्यतिरेकप्रतिपादकं प्रमाणमस्ति। न नास्ति, तदग्रहे तद्बुद्ध्यभावात्, यद्

---

१. यास्ता बुद्धयो विविक्ता C २. °भेदात् C ३. तावत् om C ४. यत्र ते C
५. सर्वत्र ते C ६. किञ्चित् om C

यस्मादनर्थान्तरं भवति तदग्रहे तस्याग्रहो दृष्टः, तद् यथा यूषस्य पङ्क्तेश्च। यच्च यतोऽर्थान्तरं भवति तदग्रहेऽपि तस्य ग्रहो दृष्टः, तद् यथा रूपाद्यग्रहे [१]रसग्रह इति।

नायं हेतुरनेकान्तात्, ये घटादिभावमापन्नाः पृथिव्यादयस्तेषां पृथिव्यां [२]संगृह्यमाणायामर्थान्तरभूतानामबादीनामग्रहणम्। अथ चार्थान्तरभूता अबादयो न दर्शनविषयभाजो भवन्ति, तस्मादनेकान्तः। अथ न चत्वारि महाभूतानि तथा सन्निविष्टानीति पक्षस्तथापि रूपं चत्वारि महाभूतानीति वचनं व्याहन्यते। अथ ब्रूषे, नैव नो रूपादिव्यतिरिक्ताः पृथिव्यादय इति? तथाप्यस्य वाक्यस्यायमर्थो भवति रूपादयो रूपमिति, [३]तथा च कामेऽष्टद्रव्यकोऽणुरिति[४] व्याहन्येत। अथ पृथिव्यादीनां संघातमात्रे रूपादिव्यवहारः? तथापि न रूपं पृथिव्यादयो वस्तुतः सन्ति। कथमिति? पृथिव्यादीनां संघातो रूपं पृथिव्यादयश्च रूपादिसंघात इति संहन्यमानस्याभावात् न संघातोऽस्ति। सर्वः संघातः संहन्यमानतन्त्रो दृष्ट इति सर्वथा न व्याघातान्मुच्यसे[५]।

तदग्रहे तद्बुद्ध्यभावादिति च तच्छब्दार्थानुसृतावसंबद्धार्थम्। यदा तच्छब्दार्थोऽनुस्रियते तदा तदग्रहे तस्यैवाग्रह इति प्राप्तम्। एतच्चासंबद्धम्। यदा पृथिव्यादि रूपादिविशेषणं साध्यते तदा तदग्रहे तद्बुद्ध्यभावादित्यस्य हेतोः [६]पृथिव्याद्यग्रहे पृथिव्यादिबुद्ध्यभावादिति हेत्वर्थः प्राप्नोति। किं कारणम्? पृथिव्यादिविशेषणानां रूपादीनां तच्छब्देनानभिसंबन्धात्। एतेन पृथिव्यादिविशेषणा रूपादयः प्रत्युक्ताः। अत्रापि रूपाद्यग्रहे रूपादिबुद्ध्यभावादिति हेत्वर्थः प्राप्नोति, तच्छब्दस्य प्रधानसंबन्धित्वादिति। एवं रूपादिमात्रं पृथिवी, पृथिवीमात्रं रूपादय इति पृथिव्येव रूपादयो रूपादय एव पृथिवीति पूर्ववत् प्रसङ्गः। सर्वत्र च

---

१. बालग्रह C २. अगृह्य° J ३. ततश्च C, तथा च Alaṃkāra
४. व्याघातः J द्रः अभिधर्मकोशः २।२२ ५. मुच्यते C ६. पृथिव्याद्यग्रहे° किं कारणं J, C var

प्रतिज्ञापदयोर्व्याघातो वचनभेदात्। पृथिवीत्येकवचनं रूपादय इति बहुवचनम्। वचनभेदानुविधानं च यत्र तत्रार्थभेदः। तद् यथा नक्षत्राणि शशीति। अस्ति चात्रापि वचनभेदः। तस्मात् अत्राप्यर्थभेदेनैव[१] भवितव्यम्। नन्वेकस्मिन्नप्यर्थे वचनभेदो दृष्टः। तद् यथा चत्वार आश्रमाश्चातुराश्रम्यमिति। तन्नानभ्युपगमात्। नायं वचनभेदः क्वचिदेकत्वे दृष्टः, चातुराश्रम्यमिति चतुर्णामाश्रमाणां समानं धर्मसाधनत्वमभिधीयते। एतेन षडेव गुणाः षाड्गुण्यम्, विशेष एव वैशेषिकमिति प्रत्युक्तम्।

तदग्रहे तद्बुद्ध्यभावादिति चासिद्धोऽप्ययं हेतुः। कथमसिद्धः? रूपाद्यग्रहे द्रव्यग्रहात्। यस्मान्नीलाद्युपधानभेदानुविधायिनः स्फटिकमणे रूपाद्यनुपलब्धौ स्फटिक इति प्रत्ययो दृष्टः। योऽप्ययं दृष्टान्तो यूषवत् पंक्तिवच्चेति, तन्न भवता यूषो व्यज्ञायि न पंक्तिः। यूषो हि नाम उत्पन्नपाकजानां द्रव्याणां कालविशेषानुग्रहे सति द्रव्यान्तरसंपृक्तानां पाकजोत्पत्तौ यः संयोगः स यूष इति। स [२]चार्थान्तरमित्यसिद्धो दृष्टान्तः। एतेन पानककाञ्जिकविरेकावक्षारादयः प्रत्युक्ताः। पंक्तिरप्येकदिग्देशसंबन्धिषु परस्परप्रत्यासत्त्यनुगृहीतेषु अवधारितानवधारितेयत्तेषु भिन्नभिन्नजातीयेषु आधारेषु वर्तमाना बहुत्वसंख्यैवोच्यते। एवमनियतदिग्देशसंबन्धिषु [३]गजपुरुषतुरंगमस्यन्दनेषु [४]परस्परप्रत्यासत्त्युपगृहीतेषु अवधारितानवधारितेयत्तेषु वर्तमाना बहुत्वसंख्यैव सेनेत्युच्यते। एवं जातिविशिष्टपुरुषोपग्रहेण वर्तमाना परिषत्। प्रव्रजितविशेषोपग्रहेण वर्तमाना [५]बहुत्वसंख्या सङ्घः। एवं यथासंभवं पूगवनयूथव्रातगणशब्दा[६] अपि द्रष्टव्याः। एवमनियतदिग्देशसंबन्धिषु अनाद्यन्तेषु मध्यशून्येषु वर्तमाना कुण्डलकं बहुत्वसंख्यैवेति। तस्मात् पंक्तिरनर्थान्तरमित्यसिद्धो दृष्टान्तः। अर्थान्तरे किं प्रमाणमिति? उपलभ्यस्य समस्तैरुपलभ्यैर्व्यपदेशः। यदिदं चन्दनमुपलभ्यते तस्य श्वेतं रूपं तिक्तो रसः पटुर्गन्धः शीतः स्पर्श इति। यश्चायं प्रत्यक्षस्य प्रत्यक्षेण व्यपदेशः सोऽर्थान्तरे दृष्टः। [७]तद् यथा,

---

१. एव om C २. अर्थान्तरवदि॰ C ३. गजतुरगस्यन्द॰ C ४. ॰प्रत्यासत्त्यनुगृहीतेषु C ५. बहुत्वसंख्या J ६. ॰यूथब्राह्मणगण॰ C ७. तद् om C

ब्राह्मणस्य कमण्डलुरिति। न खल्वयमेवं प्रतिपद्यते यदिदं श्वेतं रूपमुपलभ्यते[१] तदनुमीयमानानां रसगन्धस्पर्शानामिति। सेनावनादिभिरनेकान्त इति चेत्? अथापीदं स्यात्[२], दृष्टोऽनर्थान्तरेऽपि व्यपदेशः सेनाया हस्ती, काननस्य वृक्ष इति? न, असिद्धत्वात्। असिद्धमेतद् अनर्थान्तरत्वं सेनायाः काननस्य च। यथा च तदर्थान्तरं सेना वनं वा तदुक्तमिति।

तदसत्त्वमिति चेत्? अथाप्येवं कल्प्येत, संख्यैव तावन्नास्ति, कुतोऽर्थान्तरभाव इति? नैवम्[३]। संख्या नास्तीति ब्रुवता एकानेकप्रत्ययानां विधीयमानं प्रतिषिध्यमानं वा निमित्तमुपादेयम्। कस्मात्? एकानेकप्रत्ययानामप्रत्याख्येयत्वात्। विशिष्टाश्च प्रत्यया भवन्तो न निमित्तप्रत्याख्यानेन भवितुमर्हन्तीति। किं कारणम्? कुम्भप्रत्ययनिमित्तान्यनिमित्तक एकानेकप्रत्ययः कुम्भप्रत्ययविलक्षणत्वात्, नीलादिप्रत्ययवत्[४]। तस्माद् यत्तत्प्रययनिमित्तं सा संख्येति। तत्प्रत्ययविषयनिमित्तप्रत्ययव्यतिरेकेण ततोऽन्यस्य तद्विशिष्टप्रत्ययस्योत्पत्तौ [५]निमित्तान्तराकांक्षित्वाद् यस्तत्प्रत्ययविषयनिमित्तप्रत्ययव्यतिरेकेण प्रत्ययो भवति, तस्य निमित्तान्तराकांक्षित्वं दृष्टम्। तद्यथा वस्त्रचर्मकम्बलेषु वस्त्रचर्मकम्बलप्रत्ययास्तेभ्य एव भवन्ति। तेषु तु योऽन्यो नीलमिति प्रत्ययः स निमित्तान्तराद् भवन् दृष्टः। तथा च घटादिष्वपि घटादिविषयनिमित्तव्यतिरेकभाजस्तत्रैकादिप्रत्ययाः। तस्मात् तैरपि निमित्तान्तराद् भवितव्यम्, यन्निमित्तं ते संख्यादय इति। महत्पुष्पितशब्दाभ्यां सामानाधिकरण्यात् न संख्या सेना वनं वा भवितुमर्हति। यदि संख्या सेना वनं वा, महती सेना पुष्पितं वनमिति न प्राप्नोति[६]। न संख्याया महत्त्वमस्ति, न पुष्पयोग इति। नैष दोषः। महती सेनेति किमुच्यते? तानेव गजादीन् संख्याधारानवधारितानवधारितेयत्तान् स्थान्यङ्गान्तरोपचये सति महती सेनेति व्यपदिशन्ति।

---

१. उपलभ्यते om C २. अथापि स्याद् बुद्धिः C ३. नैवम् om J ४. उक्तप्रत्यय° J ५. निमित्तान्तरा° भवति तस्य rejected as text C ६. स्यात् J

तत्रेयं स्थानिषु गजादिषु महच्छब्दवाच्येषूपचयकरणा[१] बहुत्वसंख्या महतीत्युच्यते। पुष्पितं वनमित्यत्रापि पुष्पसंबन्धिषु वृक्षेषु पुष्पसंबन्धेनैकार्थसमवायमनुभवन्ती बहुत्वसंख्यैवाभिधीयते, यथा मधुरो रसः, स्निग्धोऽशीतो[२] गुडश्चेति। अतएव व्यपदेशात् संख्यादीनामपि अर्थान्तरभावः।

असति दर्शनान्न हेतुरिति, यथा गर्तश्छिद्रमिति। न, अपरिज्ञानात्। गर्तो हि नाम रूपादिमद्भिः सावयवैरारब्धकायैर्मध्यशून्यैः संस्थानविशेषोपगृहीतमाकाशमिति[३]। एतेन छिद्रं व्याख्यातम्। एकस्मिन्नपि दर्शनात् व्यपदेशादर्थान्तरभावो न युक्तः, तद् यथा खदिरस्य स्थाणुरिति। बहुषु चासंयुक्तेषु दर्शनात्, तद् यथा प्रासादानां मालेति। संयुक्तेषु [४]चासमानजातीयेषु दर्शनाद् यथा त्रिवृत्पृथिव्युदकतेजसां[५] विरेक इति। यत्तावदेकस्मिन्नपि दर्शनादिति, तदयुक्तम्, खदिरशब्दस्य जातिविशिष्टद्रव्यवाचकत्वात्। खदिरशब्देन जातिविशिष्टं द्रव्यमुच्यते। स्थाणुशब्देनापि संस्थानविशेषोऽभिधीयते। संस्थानविशेषश्च प्रचयाख्यः संयोगः। स चार्थान्तरम्। एतेन सर्पकुण्डलकम्, प्रतिमायाः शरीरम्, सुवर्णस्याङ्गुरीयकम्, शिलापुत्रकस्य शरीरमित्येवमादि[६] भेदवाचकमित्युक्तं भवति। प्रासादानां माला पंक्तिवद् द्रष्टव्या। संयोगो विरेक इत्युक्तमेतत्। गुणसमुदायव्यतिरेकेणाग्रहणादिति चेत्–अथापि मन्येथाः, यदि रूपादिव्यतिरिक्तं द्रव्यं स्यात् [७]तदा रूपादीनन्तरेण पृथगुपलभ्येत। न तूपलभ्यते। तस्मान्नास्ति। अग्रहणस्य द्विनिमित्तत्वादनेकान्तः। किमिदमग्रहणं ग्राह्यस्याभावादाहो ग्रहणाभावादिति[८] सन्दिह्यते। ग्राह्याभावादिति चेत्? प्रतिज्ञार्थेन हेत्वर्थस्याक्षेपात् अयुक्तो हेतुः। ग्रहणाभावादिति चेत्? न व्यतिरेकप्रतिषेधः। यश्च तदग्रहे तद्बुद्ध्यभावादिति हेतोर्दोषः, सोऽस्यापि द्रष्टव्य इति। सोऽयमनन्यत्ववादो यथा यथा विचार्यते तथा

---

१. वाच्येष्वपचयोपचयकरणात् C २. तिक्तः for स्निग्धोऽशीतः C ३. °षोपहित° C ४. चासजातीयेषु C ५. °नात् तृवृताद्युदकतेजसां J ६. इत्यादिकं C ७. तद्रूपा° C ८. आहो ग्रहे हेत्वभावात् C

तथा स्पष्टमन्यत्वं प्रतिपादयति, प्रमाणानामेकत्रोपपत्तेः, एकत्र चानुपपत्तेरिति। तस्माद् व्यवस्थितमेतत् पृथिव्यादीनि गुणाश्चेति चार्थे द्वन्द्वः समास इति॥१४॥

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥१।१।१५॥

अथ बुद्धेरवसरप्राप्ताया लक्षणापदेशद्वारेण **सूत्रम्, बुद्धिरुपलब्धिरि**त्यादि। एतैः पर्यायशब्दैर्योऽभिधीयते पदार्थः, सा बुद्धिरिति। पर्यायशब्दाः कथं लक्षणम्? व्यवच्छेदहेतुत्वात्। [१]सर्वं हि लक्षणमितरेतरपदार्थव्यवच्छेदकम्। एतैश्च पर्यायशब्दैर्नान्यः पदार्थोऽभिधीयत इत्यसाधारणत्वात् लक्षणम्।

उपपत्तिसामर्थ्यात् पर्यायशब्दाभिधानाद् बुद्धिवृत्तेर्निराकरणम्। य आहुः बुद्धेर्ज्ञानं वृत्तिरात्मन उपलब्धिरिति[२] तन्निराकरणार्थं समानार्था एते शब्दा इति बुद्धिवृत्तिः पृथङ्निराकृता भवति। का पुनरत्रोपपत्तिः? आत्मा उपलभते बुद्धिर्जानीत इति ब्रुवाण उभयोश्चैतन्यं प्रतिपद्यते। उभयचैतन्ये च प्रत्ययव्यवस्थानुमानं न स्यादिति। यदि बुद्धिश्चेतना आत्मा च चेतनो न बुद्ध्यवसितानर्थानात्मोपलभेत। किं कारणम्? [३]चेतनोपलब्धानामर्थानां चेतनान्तरस्याप्रतिपत्तेः। अस्ति च प्रतिपत्तिः। तस्मादेकश्चेतन इति। बुद्धिवृत्त्यविशिष्टायां [४]च ज्ञातृवृत्तौ कल्पितायामात्मनः स्वरूपं वक्तव्यमिति। बुद्धिरध्यवस्यत्यात्मा चेतयत इति चेत्? अथापीदं स्यात् यथा बुद्धिरर्थानध्यवस्यति, तथा आत्मा अधिदेशमधिकालं चोपलभत इति। अध्यवस्यत्युपलभत इति पर्यायशब्दौ। न च पर्यायशब्दैः पदार्थानां नानात्वं युक्तम्, यथा ध्वनिः [५]शब्दो नाद इति। अन्यथा हि [६]इन्द्रः शक्र इति नानात्वं स्यादिति। अथात्मा चेतयते बुद्धिर्ज्ञापयतीति[७]? अद्धा बुद्ध्या जानीते पुरुषो न बुद्धिः। बुद्धिर्ज्ञापयतीति ज्ञानसाधनं भवतीति॥१५॥

---

१. सर्वथा लक्षणमितरेतर° J २. °लब्धिर्वृत्तिरिति C ३. चेतनान्तरोप° C ४. चाज्ञ-वृत्तौ J ५. शब्दः om C ६. ध्वनिर्नाद इत्यत्रापि नाना° C ७. °तीति चेत् C

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ।।१।१।१६।।

स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहा इति **भाष्यम्**। एते स्मृत्यादयो मनसो लिङ्गं भवन्ति। किमेत एव? नेत्युच्यते[१]। किं तर्हि? [२]इदं चान्यत्। युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्।

यस्मादिन्द्रियार्थसन्निकर्षेषु सत्स्वपि युगपज्ज्ञानानि न संभवन्ति, अतोऽवगम्यते अस्ति तत्तदिन्द्रियसंयोगि सहकारि निमित्तान्तरमव्यापि, यस्य सन्निधानासन्निधानभेदानुविधानात्[३] ज्ञानस्योत्पत्त्यनुत्पत्ती भवत इति। कुतः? कारणवैकल्ये कार्यप्रतिबन्धदर्शनादिति[४] **सूत्रार्थः**।

कथं पुनः स्मृत्यादयो मनसो लिङ्गं भवन्ति, अन्यत्र वर्तमाना इति? न ब्रूमः स्मृत्यादयो मनोवृत्तित्वान्मनसो लिङ्गम्[५], अपि तु गन्धादिक्रियान्यत्वे सति क्रियात्वात् करणान्तरप्रयोजकत्वम्, या गन्धादिभ्योऽन्या क्रिया सा [६]करणान्तरप्रयोजिका दृष्टा, यथा रथादिक्रिया। क्रिया चेयं गन्धादिव्यतिरिक्ता[७] स्मृत्यादिका। तस्मादियम् अपि करणान्तरं प्रयोजयतीति। सुखादयोऽपि गन्धादिभ्योऽन्यत्वे सति विषयत्वात् चक्षुरादिव्यतिरिक्तकरणान्तरप्रयोजका रथादिवदिति। तद् यथा रथादयो विषयाः चक्षुरादिव्यतिरिक्तं करणं वास्यादि प्रयोजयन्ति, विषयाश्च सुखादयः, तस्मात् तैरपि करणान्तरं प्रयोजयितव्यमिति। [८]अथायुगपज्ज्ञानोत्पत्तिर्ज्ञानधर्मः, स कथं [९]मनोऽस्तित्वे लिङ्गं भवति? अथासंबद्धमपि लिङ्गमिष्यते, सर्वं सर्वस्य लिङ्गं स्यात्। अस्त्यात्मा काकस्य काष्ण्यादित्यपि सिध्येत्[१०]। न त्वेवं भवति। तस्मात् नासंबद्धं लिङ्गमिति[११]। असंबद्धमपि लिङ्गमि**त्येके**। यथा प्रत्यग्रशरावदर्शनं कुलालावृत्ति कुलालसद्भावं बोधयति, भ्रान्तिमच्चक्रदर्शनं

---

१. इत्युच्यते om C २. इयं च युग° C ३. °भेद° om C ४. °बन्धादिति C
५. °ङ्गं भवन्ति C ६. °प्रयोज्या C ७. गन्धादिव्यतिरिक्ता om C ८. °पदुत्पत्तिः J
९. मनोलिङ्गं C १०. °दित्येतदपि स्यात् C ११. °ङ्गं संभवति C

चेति। तत्र, नैवात्र कुलालसद्भावो बोध्यव्यः, किं तु देश एवाविदूरकुलालवत्त्वेन साध्यः। तस्य च प्रत्यग्रशरावकवत्त्वं धर्मः। भ्रान्तिमच्चक्रवत्त्वेनापि देशोऽविदूरकुलालवत्त्वेन साध्यते। तस्मात् नासंबद्धमनुमानं क्वचिदपीति। युगपज्ज्ञानानुत्पत्तिस्तर्हि कथं मनसा असंबद्धा मनोलिङ्गं भवति। [१]अयुगपज्ज्ञानोत्पत्तेरेव पक्षीकरणात् नासंबद्धम्। कथमिति? रूपादिग्रहणानि चक्षुरादिव्यतिरेकेणाधिष्ठायकान्तरप्रयोज्यानीति[२] अयुगपदुत्पत्तेः। तद् यथा अनेकशिल्पपर्यवदातस्य पुरुषस्य अनेकं वास्यादि युगपत्सन्निधानेनोपस्थितं हस्ताद्यधिष्ठायकापेक्षं न युगपदनेकरथादिक्रियां निर्वर्तयति, तथा च चक्षुरादि न युगपदनेकं ज्ञानं करोति। तस्मात् तदप्यधिष्ठायकान्तरमपेक्षत इति।

इन्द्रियाणि वा पक्षीकृत्य वक्तव्यम्। कथमिति? चक्षुरादीन्द्रियम् आत्मप्रवृत्तावधिष्ठायकान्तरापेक्षम्, अयुगपत्प्रवृत्तेः वास्यादिवदिति। यदि तर्हि चक्षुरादीन्द्रियं मनःसन्निधानापेक्षमर्थानामयुपद्ग्राहि, य एकेन्द्रियग्राह्यास्तेषु कथमयुगपद्ग्रहणम्? न हि तत्रासन्निहितं मन इति। संबन्धिभेदादिति चेत्, युगपत्संबन्धिषु कथम्? भवतु तावन्नीलादिभेदेषु एकेन्द्रियविषयेषु इन्द्रियविषयसंबन्धिभेदादयुगपद्ग्रहणम्, अथ ये युगपत्संबध्यन्ते तेषु कथं शुक्लो गौर्गच्छतीति प्रत्यया युगपत् न[३] प्राप्नुवन्ति? बुभुत्साभेदादयुगपद्ग्रहणमि**त्येके**। **एके** तावद् वर्णयन्ति, संबद्धोऽप्यर्थोऽबुभुत्सितत्वान्न युगपद् गृह्यत इति। तन्न, [४]मनोनिवृत्तिप्रसङ्गात्। एवं तर्हि मनः परित्याज्यम्, यदि बुभुत्साभेदादयुगपद्ग्रहणानि भवन्ति। अन्यत्रापि बुभुत्साभेदो न दण्डवारित इति मन इदानीमनर्थकं परित्याज्यम्। सत्यां च बुभुत्सायामयुगपद्ग्रहणे न्यायोऽन्योऽवधारणीयः तस्मादन्यनिमित्तमयुगपद्ग्रहणमिति। किं पुनर्निमित्तम्? करणत्वम्। यथैवायं करणधर्मो नानधिष्ठितं करणं प्रवर्तत इति, तथा [५]संबद्धस्याप्यनेकसमानकालक्रियाकर्तृत्वं नास्ति। न हि करणं संबद्धमपि एकदानेकां क्रियां

---

१. युग° C २. °रापेक्षाणि C ३. न om J ४. मनोऽतिवृत्ति J
५. °समानकाल° om C

शक्नोति कर्तुम्। यदि पुनरात्मैवाधिष्ठाता भवेत्, तथाप्यात्मनो युगपदनेकेन्द्रियसंबद्धस्यानिषेधादयुगपज्ज्ञानोत्पत्तौ न्यायोऽन्योऽवधार्यः। स च नान्तरेण मनः [१]सिध्यतीति सिद्धं मन इति॥१६॥

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥१।१।१७॥

प्रवृत्तिर्वाग्बुद्धिशरीरम्भ इति। शरीरेण वाचा मनसा च सेयं प्रवृत्तिः प्रत्येकं दशविधा, पुण्या पापा च। पुण्या कायेन परित्राणं परिचरणं दानमिति। वाचा सत्यं हितं प्रियं स्वाध्यायश्चेति। मनसा दया अस्पृहा श्रद्धा चेति। विपर्ययेण पापा दशविधैव। क्षणिकत्वात् प्रवृत्तेर्जन्मकारणत्वानुपपत्तिः। सेयं प्रवृत्तिः क्षणिका। [२]क्षणिका च सती जन्मकारणमिति न युक्तम्। ततश्च द्वितीयसूत्रव्याघातः। न व्याघातः, प्रवृत्तिफले प्रवृत्त्युपचारात्। प्रवृत्तिफले धर्माधर्मौ अस्मिन् **सूत्रे** प्रवृत्तिरित्युच्यते। कस्मात्? तत्साधनत्वात्, अन्नं वै प्राणिनः प्राणा इति यथा॥१७॥

प्रवर्त्तनालक्षणा दोषाः ॥१।१।१८॥

का पुनरियं प्रवर्तना, यया अवशः प्रवर्तते? [३]ज्ञाता तावत् प्रवर्तते, प्रवर्तमानं रागादयः प्रवर्तयन्तीत्यतः। सेयं प्रवृत्तिहेतुत्वात् प्रवर्तनेत्युच्यते यथा कारणाहारणेति। सा पुनरियं प्रवर्तना कथं गम्यते? प्रत्यात्मं प्रत्यक्षा। परशरीरे त्वानुमानिकी आत्मवदिति। यथा आत्माहङ्कारविषयत्वेनावतिष्ठमानः प्रत्यात्मं प्रत्यक्षो भवति। न हीयमहङ्कारबुद्धिरानुमानिकी, न चागमिकी। कथं नानुमानिकी? लिङ्गाभावात्। कथं नौपदेशिकी? अनुपदिष्टार्थप्रतिपत्तेः। तस्माद् रूपादिवत् प्रत्यात्ममात्मा प्रत्यक्ष इति। प्रवृत्तिनिवृत्त्यनुमेयस्तु [४]पुनः परशरीर इति॥१८॥

---

१. सिध्यति om C २. क्षणिका च om C ३. ज्ञाताऽ वर्तते om C ४. पुनः om C

पुनरुत्पत्तिः प्रेत्यभावः ।।१।१।१९।।

[1]पूर्वोपात्तशरीरादिपरित्यागादन्यशरीराद्युपसंक्रान्तिः [2]प्रेत्यभाव इति। पुनर्ग्रहणं संसारस्यानादित्वज्ञापनार्थम्। पुनः पुनर्जन्ममरणे भवत इत्यनादित्वं संसारस्य [3]ज्ञापयति। कः पुनरयं संसारः? [4]दुःखादीनां कार्यकारणभावः। दुःखादीनां मिथ्याज्ञानान्तानामविच्छेदेन यः कार्यकारणभावः स संसार इति। स चानादिः पूर्वापरकालानियमात्[5]। यदि पूर्वं दुःखम्, [6]तत् जन्मना विना न युक्तम्। अथ पूर्वं जन्म, [7]तदपि धर्माधर्मावन्तरेण न युक्तम्। अथ पूर्वं धर्माधर्मौ तावपि विना रागद्वेषाभ्यां न युक्तौ। अथ पूर्वं रागद्वेषौ, न मिथ्याज्ञानादृते तयोः प्रादुर्भाव इति। मिथ्याज्ञानं तर्ह्यादिः? तदपि शरीरादीनन्तरेण न युक्तम्। सोऽयं दुःखादीनां मिथ्याज्ञानपर्यन्तानां कार्यकारणभावोऽविच्छिन्नः संसार इति [8]आजरञ्जरीभाव इति चोच्यते। सोऽयं संसारः [9]कस्य? किमात्मनः, आहो मनस इति? यदि क्रियामधिकृत्योच्यते, तदा मनसः, तद्धि संसरतीति। अथोपभोगमधिकृत्योच्यते, तदात्मनः। स हि सुखदुःखे उपभुङ्क्त इति॥१९॥

प्रवृत्तिदोषजनितोऽर्थः फलम् ।।१।१।२०।।

प्रवृत्तिदोषजनितोऽर्थः फलम्॥ शरीरादिजन्यं सर्वं फलम्, धर्माधर्मपूर्वकत्वात्[10]। मुख्यतया तु कल्पनया[11] सुखदुःखोपभोग एव, तदवसानात्। यस्माद्

---

१. °र्वोत्पन्न J २. °रीरोपसंक्रान्ति सः C ३. दर्शयति C ४. दुःखा° भावः om C ५. °कालनियमाभावात् C ६. तत् om C ७. तदा C ८. °जवञ्जवीभा° in other texts like निरुक्तम् १४।८; मध्यमकशास्त्रम् २५।९; बुद्धचरितम् १२।४१; युक्तिदीपिका पृः १४७; तुलः महाव्युत्पत्तिः २२४।२४; पञ्चास्तिकायसमयव्याख्या अमृतचन्द्रकृता [मुम्बई सं] पृः ६ ९. कस्य om C १०. °र्मप्रवर्तकत्वात् C ११. मुख्यकल्पनायां C

धर्माधर्मयोः सुखदुःखोपभोग एवावसानिकं फलम्, तस्य तु नान्तरेण शरीरादीन् संभव इति कृत्वा शरीरादीन् धर्माधर्मावारभ्य सुखदुःखोपभोगं कुरुत इति। सोऽयं फलशब्दः सुखदुःखोपभोगे मुख्यः, शरीरादिषु[१] गौण इति॥२०॥

बाधनालक्षणं दुःखम् ॥१।१।२१॥

एतदेव शरीरादि बाधनानुषङ्गाद् दुःखमित्युच्यते। स्वभावतस्तु दुःखमेव दुःखम्। लक्षणशब्दोऽनुषङ्गार्थः, सर्वमिदं शरीरादि दुःखानुषक्तमिति। तत्र शरीरं दुःखस्य निमित्तम्, निमित्तार्थोऽनुषङ्गः। इन्द्रियाणि विषया बुद्धय इति साधनम्, साधनार्थोऽनुषङ्गः। सुखं दुःखेनाविनाभावि, [२]अत्राप्यविनाभावोऽनुषङ्गः। स्वरूपतस्तु [३]दुःखमिति। सर्वं स्वरूपतो दुःखमिति **केचित्**। न, प्रत्यक्षविरोधात्। न हि प्रत्यक्षं सुखं शक्यं प्रत्याख्यातुमिति। दुःखविकल्प इति चेत्? अथापीदं स्याद् दुःखविकल्प एव सुखमिति, न पुनः स्वरूपतोऽस्तीति? न, विकल्पे नञ्प्रयोगासम्भवात्। न हि विकल्पे नञ् प्रवर्तमानो दृष्टः। न हि ब्राह्मणविशेषे भवत्यब्राह्मण इति। एवं दुःखविशेषेऽदुःखमिति न स्यात्। यदि च सुखं न स्याद् धर्मवैयर्थ्यम्। किं कारणम्? सुखसाधनं धर्म इति, सुखं च नास्तीति व्यर्थो धर्मः। दुःखप्रतिषेधः फलमस्येति न युक्तम्, धर्मस्याभावफलत्वप्रसङ्गात् अभाव-फलो धर्म इति [४]स्यात्। [५]प्रवृत्तिद्वैतं च लोके दृष्टं तन्न स्यात्। हितमाप्स्यामी-त्येकः प्रवर्तते, अनिष्टं हास्यामीत्यपरः[६], हितस्याभावात् प्रवृत्तिद्वैतं लोके न[७] स्यात्। दुःखभावनोपदेशश्च[८] न स्यात्, प्रतिपक्षाभावे सक्त्यभावात्[९]। न हि कश्चिद् दुःखे सज्यत इति [१०]दुःखभावनोपदेशो न स्यात्। तस्मान्न मुख्यतः सर्वं दुःखम्, दुःखभावनोपदेशेन तु[११] दुःखमित्युच्यत इति॥२१॥

---

१. शरीरे C २. इत्यप्य° J ३. दुःखं दुःखमिति C ४. स्यात् om C ५. प्रवृत्तिद्वैविध्यं J ६. °परः प्रवर्तते C ७. °द्वैतं च न C ८. च om C ९. °पक्षा-सम्भवात्। सक्त्यभावश्च C १०. दुःख° स्यात् om C ११. च C

तदत्यन्तविमोक्षोऽपवर्गः ।।१।१।२२।।

तेन शरीरादिना [१]दुःखान्तेनात्यन्तिको वियोग इति। आत्यन्तिकी सुखाभिव्यक्तिरित्येके। **एके** त्वात्यन्तिकीं सुखाभिव्यक्तिमपवर्गं[२] ब्रुवते। तत्र, प्रमाणासम्भवात्। मुक्तस्यात्मनो नित्यं सुखमिति न प्रमाणमस्ति। न नास्ति, नियामकत्वादिति चेत्, अनेककारणनिष्पन्नसुखस्यात्मनि समवायो नियामकम् अन्तरेण न युक्तः। तस्मादात्मनि नित्यं सुखमस्ति, येनेदं सुखं नियम्यमानमात्मानमाश्रयत इति चेत्[३]–न, सर्वोत्पत्तिमत्प्रसङ्गात् सुखवदात्मनि दुःखमपि नित्यं कल्पयितव्यम्, इच्छादयश्चेति। अनैकान्तिकता वा। अभिव्यक्त्यर्थानभिधानाच्च। नित्यं सुखमभिव्यज्यत इति कोऽभिव्यक्त्यर्थः? ज्ञानमिति चेत्, नित्यमनित्यं वेति [४]कल्पानुपपत्तिः। अनित्यमिति चेत्, कारणं [५]वक्तव्यम्। आत्ममनःसंयोगः कारणमिति चेत्, तस्यापेक्षाकारणं वक्तव्यम्। यदि मन्यसे आत्ममनःसंयोगो ज्ञानस्य कारणमिति, तस्य तर्हि अपेक्षाकारणं [६]वक्तव्यम्। न हि द्रव्यगुणकर्मस्वारब्धव्येषु संयोगो निरपेक्षं कारणमिति। आत्ममनःसंयोगः सुखापेक्षो [७]ज्ञानकारणमिति चेत्–न, कैवल्यविरोधात्। अथ मन्यसे आत्ममनःसंयोगो नित्यमात्मनि व्यवस्थितं सुखमपेक्षमाणो ज्ञानकारणं भवतीति, तन्न युक्तम्, कैवल्यविरोधात्। यथायमात्ममनःसंयोगो विषयमात्रमपेक्षमाणः अन्यनिमित्तनिरपेक्षः सुखज्ञानं करोति, एवं रूपादीनपि विषयानपेक्षमाणः तद्विषयाणि ज्ञानानि कुर्यात्। ततश्च कैवल्यं निवर्तते, सर्वानर्थानयमात्मा उपलभत इति। नित्योपलब्धिप्रसङ्गाच्चेति। योगजधर्मानुगृहीतो नित्ये सुखे ज्ञानं करिष्यतीति? [८]तन्न युक्तम्, तत्क्षये तदभावात्। यदा योगजो धर्मः क्षीणो भवति, तदास्य किमनुग्राहकमिति वाच्यम्। योगजो धर्मो न क्षीयत इति चेत्? न युक्तम्, उत्पत्तिधर्मकस्य

---

१. दुःखेन J २. मुक्ति C ३. चेत् om J ४. कल्पना॰ C ५. आत्ममनःसंयोगो वा कारणं तस्या॰ C ६. वचनीयम् J ७. ज्ञान॰ om C ८. चेत् for तत् C

सर्वस्यानित्यत्वात्, सर्वमुत्पत्तिधर्मकमनित्यं दृष्टमिति। नित्योऽसौ योगसमाधिजो धर्म इति न युक्तम्[१]। योगसमाधिजश्च नित्यश्चेति व्याहतम्। नित्यं ज्ञानमिति चेत्–न, सुखवत् प्रमाणाभावात्[२], मुक्तसंसारावस्थयोरविशेषप्रसङ्गाच्च। सुख-दुःखसंवेदनपर्यायश्च न स्यात्, नित्यमयं सुखमुपलभते। ततश्च मोक्षार्थः प्रयासो व्यर्थः स्यात्। न चायं सुखं जिहासति, विवेकहानस्याशक्यत्वात्, दुःखं [३]हातुकामः सुखमपि जहाति। न चायं कदाचिद् दुःखमुपलभत इति कस्य हानार्थः प्रवर्तेत? शरीरादिप्रतिबन्धादप्रसङ्ग इति चेत्? नित्यं सुखमुपलभत इति नास्ति प्रसङ्गः, यस्माच्छरीरादयो नित्यस्य सुखस्योपलब्धेश्च प्रतिबन्धका भवन्तीति। न, शरीरादी-नामुपभोगार्थत्वात् [४]नित्यशरीरादिप्रसङ्गाच्च। यथा मुक्तस्य नित्यं सुखं कल्प्यते, एवं शरीरादयोऽपि नित्याः कल्पयितव्याः। एवमस्य कैवल्यं साधीयो भवति। शरीरादीनां नित्यत्वं दृष्टविरुद्धमशक्यं कल्पयितुमिति चेत्–न, सुखस्यापि तर्ह्यस्मादेव दृष्टविरोधात्[५] नित्यत्वमशक्यं कल्पयितुमिति, प्रमाणाभावादित्युक्तम्, तच्च नास्ति। कस्मात्? इष्टार्थाधिगमार्थत्वात्। इहायं लोकः प्रवर्तमान इष्टाधिगमार्थं प्रवर्तते। प्रवर्तन्ते च मोक्षमाणाः। तेषामपीष्टाधिगमार्थया प्रवृत्त्या भवितव्यम्, सेयं प्रवृत्तिर्नित्यसुखेऽर्थवती नान्यथेति। न, प्रवृत्तिद्वैतदर्शनात्। द्वे प्रवृत्ती लोके दृष्टे, इष्टाधिगमार्थानिष्टादिहानार्था च। तत्रेदं पारिव्राज्यं किमिष्टाधिगमार्थमाहोऽनिष्ट-हानार्थमिति सन्दिह्यते। आगमादिति चेत्, आगमादेतद् गम्यते मुक्तस्यात्मनो नित्यं सुखमिति। मुक्तः सुखी भवतीति श्रूयते। आगमोऽप्येवं विचारणीयः। किमयं नित्येन सुखेन योगमाह, उत दुःखेनात्यन्तिकं वियोगमाहेति। दृष्टश्च दुःखाभावेऽपि सुखशब्दप्रयोगो बहुधा लोक इति। एवं च ज्वरादिवियोगे लौकिका अप्याचक्षाणका भवन्ति सुखिनः संवृत्ताः स्म इति। यदि पुनरयं सञ्चक्षाणको मोक्षे नित्यं सुखमिति सुखरागेण प्रवर्तते, न मुच्येत। कस्मात्?

---

१. इति चेत् C २. °भाव उक्तः J ३. जिहासमानः J °जिहासति C ४. नित्यं शरी° C ५. °स्मदादेर्दृष्टविरुद्धं C

रागस्य बन्धनसमाज्ञानात्। बन्धनसमाज्ञातो हि राग इति। यद्यपि द्वेषात् प्रवर्तते दुःखं हास्यामीति, तथापि न मुच्येत, द्वेषस्य बन्धनसमाज्ञानादिति, रागद्वेषौ हि बन्धनमिति। न, अप्रतिकूलत्वात्। अप्रतिकूलं दुःखहानं भवति। न पुनरयं दुःखं द्वेष्टि। अद्विषंश्चायं प्रवर्तमानोऽप्रतिकूलं दुःखहानमधिगच्छतीति।

चित्तं विमुच्यत इति **अन्ये**, रागादीनां तत्र सामर्थ्यात्, यस्माद् रागादिवशं[1] चित्तमालम्बनानन्तरगत्यन्तरेषु उत्पद्यते। न पुनरात्मनि रागादीनां सामर्थ्यमस्ति। न, अयत्नतस्तत्सिद्धेः। ये चित्तस्यानुत्पादनं निरोधं चापवर्गमिच्छन्ति, तेषामयत्न-सिद्धो[2] मोक्षः। कि कारणम्? जन्मनो विनाशार्थत्वात्। जातं विनश्यतीत्ययत्नेन सिद्धमेतत्[3]। सन्ततेरनुत्पादोऽपवर्ग इति चेत्–न, तस्याशक्यत्वात्। सन्ततेरनुत्पादो न शक्यः कर्तुम्। कार्यकारणभावप्रवाहस्य सन्ततिभावात्। अनागतानुत्पादः क्रियत इति चेत्? अनागतानुत्पादस्य विद्यमानत्वात् किं क्रियत इति सर्वथा न चित्तस्यापवर्गः सिध्यतीति।

कस्य तर्ह्यपवर्गः? योऽपवृज्यते। कोऽपवृज्यते? आत्मा। अथ काप-वृक्तिः? दुःखादिभिर्वियोग इति॥२२॥

॥प्रमेयलक्षणप्रकरणम्॥

[न्यायपूर्वाङ्गलक्षणप्रकरणम्]

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥१।१।२३॥

प्रमेयानन्तरं प्राप्तिः संशयस्य, स्थानवतो लक्षणवचनमिति। या प्रमेयानन्तरं क्रमप्राप्तिः साभिधीयत इति।

---

१. °न्तरं गत्य° C २. °त्नतः सिद्धो C ३. विनष्टमित्ययत्नसिद्धमेतदिति C

समा.....त्तेरिति सूत्रम्। तत्र समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्च त्रिविधः एव संशय इतरपदविशेषणाद् भवतीति सूत्रार्थः। तत्र विषयस्वरूपानवधारणात्मकः प्रत्ययः संशय समानधर्मादिभ्य उत्पन्नो विषयस्य विशेषं नावधारयति यः [१]प्रत्ययः स संशय इत्युच्यते। प्रत्ययोऽनवधारणात्मकश्चेति व्याहतम्। प्रत्ययस्यैतत् प्रत्ययत्वं यदुत[२] विषयस्वरूपावधारणात्मकत्वं नाम। न चेदयं विषयस्वरूपमवधारयति, प्रत्ययत्वं तर्हि व्याहतं भवति। न, स्वरूपप्रत्यायनात्। स्वरूपमस्य प्रतीयते, न पुनरयं विषयस्वरूपमवधारयति, अतश्च संशयः। प्रतीयत इति हि प्रत्यय इत्युच्यते।

समानशब्दः साधारणार्थः समानस्य धर्मस्योपपत्तेरिति साधारणस्येति यावत्। किं पुनरत्र साधारणम्, किं गुण आहो सामान्यमिति? यदि गुणः, स न साधारणः। कस्मात्? एकद्रव्यवृत्तित्वात् परिमाणस्य। एकद्रव्यवृत्ति परिमाणम्, तत् कथं साधारणं भविष्यतीति? सामान्यमपि न युक्तम्, द्रव्यावृत्तित्वात् न ह्यूर्ध्वत्वं द्रव्ये वर्तते। किं [३]तर्हि? गुणे परिमाणे। न चोर्ध्वत्वं परिमाणे वर्तमानं सामान्यं द्रव्ये संशयं कर्तुमुत्सहते। कस्मात्? गुणस्यावधारितत्वात्, यद्वृत्ति सामान्यं सोऽर्थोऽवधारित इति। न, साधारणार्थस्यान्यथा व्याख्यानात्। न ब्रूमो गुणः साधारण इति। नापि सामान्यम्, अपि तु सादृश्यार्थः समानार्थः[४]। यावहमर्थौ पूर्वमद्राक्षं तयोर्यो धर्मः ऊर्ध्वत्वलक्षणो वर्तते, तेन धर्मेण सदृशोऽयं धर्म उपलभ्यत इति। तस्य उपपत्तिरध्यवसायः। यदुक्तं भवति सदृशस्य धर्मस्योपलब्धिः, तदुक्तं भवति समानस्य धर्मस्योपपत्तिरिति। कस्मात् पुनरेवमेव नोच्यते समानधर्मोपलब्धेरिति? अनुक्तमपि यस्मादेतद्गम्यते, गम्यमानस्य चाभिधानं व्यर्थम्। केन पुनरेतद् गम्यत इति विशेषापेक्ष इति वचनेन। कथम्? विशेषस्यापेक्षा आकाङ्क्षा। सा चानुपलभ्यमाने विशेषे युक्ता। यदि चायं विशेषं न पश्यति

---

१. प्रत्ययः om K २. उत om K ३. तु K ४. समानार्थः om C

विशेषानुपलब्धेर्गम्यत [१]एतत् सामान्यं पश्यतीति। अथ पुनरयं न सामान्यं न विशेषं पश्येत्, तदा विशेषापेक्ष इति व्यर्थं वचनं स्यात्। एतेन सामर्थ्येन गम्यते सामान्यमुपलभत इति। अथ वोपलब्धिपर्याय एवोपपत्तिशब्द इति। उपपत्तिः प्रमाणगम्यता। सा चोपलब्धिः। यः पुनरनुपलभ्यमानसद्भावो धर्मः, सोऽविद्यमानवद् भवतीति। का पुनर्विद्यमानस्याविद्यमानेन समानता? प्रमाणानालम्बनत्वम्। अविद्यमानम् अपि प्रमाणस्यालम्बनं स्वतन्त्रं न भवति, [२]सदप्यनुपलब्धिलक्षणप्राप्तमिति। विषयशब्देन वा विषयिणं [३]प्रत्ययमाह, समानधर्मोपपत्तिशब्देन वा विषयी प्रत्ययोऽभिधीयत[४] इति। लौकिकं वा न्यायमनेन वाक्येनावरुणद्धीति, यथा लोके वक्तारो भवन्ति धूमेनाग्निरनुमीयत इति। न च वाक्ये दर्शनशब्दः श्रूयते। अर्थप्रत्यायकत्वाद् वाक्ये दर्शनशब्दम् अनुजानाति धूमं दृष्ट्वाथाग्निरनुमीयत इति।

अव्यवच्छेदहेतोरिति वक्तव्यम्। यदिदं समानधर्मोपपत्तेरिति पदम् एतस्मिन्नव्यवच्छेदहेतोः समानस्य धर्मस्योपपत्तेरिति वक्तव्यम्। न हि केवला समानधर्मोपपत्तिः संशयकारणं भवति। अन्यथा[५] कृतकत्वादिनापि संशयः स्यात्। समानं हि कृतकत्वं सर्वानित्यानामिति व्यवच्छेदहेतुत्वान्न भवति। न, समानार्थापरिज्ञानात्। व्यवच्छेदहेतुश्च[६], समानश्च धर्म इति न युज्यते। व्यवच्छेदहेतुर्नाम विवक्षिततज्जातीयवृत्तित्वे सति यो विजातीयावृत्तिः स व्यवच्छेदहेतुः। तस्य च समानार्थता नास्ति। समानो हि नाम[७] विवक्षिततज्जातीयवृत्तित्वे सति अन्यजातीयवृत्तिः। तस्मादव्यवच्छेदहेतोरिति न वक्तव्यम्।

सोऽयं साधारणो धर्म उपलभ्यमानः संशयहेतुः, किं केवल इति? न केवलः। किं तर्हि? उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च। यदि चोपलब्ध्यनुपलब्धी न व्यवस्थिते भवत इति। किमेतावन्मात्रं साधनमिति? नेत्युच्यते। यदि च[८] विशेषाकाङ्क्षा

---

१. एव C २. तदपि C ३. प्रत्याह C ४. विधीयते C ५. कारणमन्यथा C ६. °श्च भवति C ७. धर्मो यो C ८. च om C

भवति समानधर्ममुपलभते। उपलब्ध्यनुपलब्धी न व्यवतिष्ठेते इदन्तया [१]नेदन्तया वा। विशेषाकाङ्क्षायां च सत्यामर्थसन्देहो भवतीति।

किमिदं समस्तं कारणम्, उतासमस्तमिति? समस्तमिति ब्रूमः। यदि समानधर्मोपपत्तेरिति[२] केवलमुच्येत उपलब्धविशेषस्यापि सामान्योपलब्धिरस्तीति[३] तदापि संशयः स्यात्[४]। यदि पुनरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च संशय इत्येतावदुच्येत, अनुपलब्धसामान्यस्यापि क्वचिदुपलब्ध्यनुपलब्ध्यव्यवस्था अस्तीति संशयः स्यात्। विशेषापेक्ष इत्येतावति चोच्यमानेऽनुपलब्धसामान्यस्यापि क्वचिद् विशेषस्मृतिरस्तीति संशयः स्यात्। एवं समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेति पदद्वयेऽपि नौयानप्रेङ्खादिगतस्य न भवति संशयः। एवमुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्ष इति पदद्वये [५]विधीयमानेऽत्यन्तानुपलब्धे [६]सामान्येऽर्थे संशयः स्यात्। एवं समानधर्मोपपत्तेर्विशेषापेक्ष इति चोच्यमाने सामान्यधर्मदर्शने सत्यपि विशेषापेक्षायां च सत्याम् उपलब्ध्यनुपलब्ध्योर्व्यवस्थानात् न भवति संशयः। एवं च यदायं द्रष्टा दृष्टपूर्वं सामान्यविशेषवन्तमर्थमुपलभते, तत्र चोपलब्ध्यनुपलब्धी व्यवस्थिते भवतः। सोऽयं द्रष्टा तस्मात् स्थानाद् यदापैति ततोऽस्यापगमाद् विषयविप्रकर्षान्निमित्तादल्पविषया विशेषा नावभासन्ते। महाविषयं सामान्यमवभासते। उपलब्ध्यनुपलब्धी पुनर्व्यवस्थिते भवतः[७]। [८]विशेषानुस्मृतिश्चास्ति, न च सन्दिह्यते। तस्मादेकद्विपदपर्युदासेन समस्तं लक्षणमुच्यत इति समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्ष इति चैकैकपदपर्युदासः[९]। समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च समानधर्मोपपत्तेर्विशेषापेक्ष इति च उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्ष इति च द्विपदपर्युदासः कृतः समस्तपदपरिग्रहेण। यस्मात्

---

१. वानिदं॰ C २. °लब्धेरिति J ३. °न्यत उप॰ C ४. तस्यापि॰ स्यादिति C
५. अभिधीय॰ C ६. सामान्ये J ७. व्यवतिष्ठेते C ८. विशेषार्थ॰ om C
९. चैकपर्युदासः कृतः C

समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इत्याह, तेन ज्ञापयति समस्तमेतल्लक्षणमिति। विमर्श इति। नानार्थावमर्शनं विमर्शः। उभावर्थौ [१]स्पृशतीव संशीतिः संशय इति भावसाधनम्, करणसाधनं वा संशेतेऽनेनात्मा इति सुप्त इव भवति। क उपमार्थः? अर्थानवधारणमुपमानार्थः। एतेनानेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति व्याख्यातम्। कोऽतिदेशार्थः? यथाद्ये पक्षे त्रिपदपरिग्रहेण एकद्विपदपर्युदासः कृतः, तथाद्यानन्तरयोरपि द्रष्टव्यमिति।

अनेकधर्मोपपत्तेः संशय इति। अनेकस्यानेकश्च धर्म इति **केचित्**। अनेकस्य धर्मोऽनेकधर्मः। अनेकस्य द्रव्यगुणकर्मलक्षणस्य संयोगजत्वं धर्मः। अनेकश्च धर्मः संयोगजत्वनिर्गुणत्वनिष्क्रियत्वक्षणिकत्वानि शब्दे। तदेवमनेकधर्मोपपत्तेः संशय इति **केचित्**। तदयुक्तम्, समानधर्मोपपत्तेरित्यनेनैव[२] चरितार्थत्वात्। समानधर्मोपपत्तेरित्यनेनैव यश्चैकोऽनेकवृत्तिः यश्चानेक एकवृत्तिः, स लभ्यत इति चरितार्थत्वात्। न पुनरनेकधर्माभिधानेन प्रयोजनमस्तीति। अथानेकधर्मशब्दस्य कोऽर्थः? असाधारणो धर्म इति। कथं पुनरसाधारणो धर्मोऽनेकधर्म इत्यनेन समासपदेनाभिधीयते? समानासमानजातीयविशेषकत्वात्। समानजातीयमसमान-जातीयं चानेकम्। तस्माद् विशेषो विशेषको धर्मः, अनेकस्माद् विशेषोऽनेकधर्म इति। तस्य चानेकस्य धर्मो यथास्वं सोऽयमनेकधर्म इति। एकानेकप्रत्ययहेतुर्वा धर्मोऽनेकधर्मः, यत एष प्रत्ययो भवति इदमेकमिदमनेकमिति। तत्रैकप्रत्ययहेतुरभेदः अनेकप्रत्ययहेतुर्वा धर्मो विशेषः। यथा शब्दस्य विभागजत्वम्। सामान्य-विशेष-समवायेभ्यः शब्दस्य सदादिना विशेषेण निर्भक्तस्य, तस्मिंस्तु द्रव्यं गुणः कर्म वेति विभागजत्वात् संशयः। न हि[३] द्रव्यगुणकर्मणामन्यतमं[४] विभागात् जायमानं दृष्टं सर्वत्रासंभवात्! विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेरिति। ननु च विभागजो विभागो विद्यते गुणः? सत्यम्, अनभ्युपगतविभागजविभागस्यैतदेवं

---

१. स्पृशतीव C २. °रित्यत्र C ३. हि किञ्चित् C ४. अन्यद् J

भवति। यः पुनरभ्युपगतविभागजविभागः, तस्यायं [१]निश्चयहेतुः, गुणः शब्दो विभागजत्वात् विभागजविभागवदिति। अस्तु वा तस्यापि विभागजविभागासमवायिकारणकत्वात् विभागजविभागासमवायिकारणकः शब्दो नान्यः पदार्थ इति। तदेवं विभागजत्वं विभागजविभागासमवायिकारणत्वं वा नर्ते शब्दं संभवतीति सर्वतो [२]व्यावृत्तेः संशयहेतुः। तुल्यजातीयेष्वर्थान्तरभूतेषु च विशेषस्योभयथा दृष्टत्वादिति। समानधर्मोपयोगाद् वासमानोऽनेकधर्मो भवति। यद् वा द्वयस्यापि संशयकारणत्वेनोपनीतस्य समानधर्मस्यासमानस्य च समानधर्मस्योपयोगादनुपयुक्तोऽसमानः सोऽनेकशब्दस्य विषयविशेष इति।

कस्मात् पुनरेवमेव नोच्यते समानासमानधर्मोपपत्तेरिति? नैवं शक्यं भवितुम्[३]। अनेकस्माद् व्यावृत्तो यो धर्मः सोऽनेकधर्म इत्ययं विग्रहो न लभ्यते। लाघवं च[४] प्रयोजनम्। एकाक्षरापचयात् लाघवं प्रयोजनमाश्रित्यैवमभिधानं वा[५]। यद्यनेकधर्मार्थोऽसाधारणार्थः, असाधारणश्च धर्मः संशयकारणमिति, नेदं निरात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गादित्ययमप्यसाधारणत्वात् संशयहेतुः प्राप्तः। नैष दोषः। यथैव साधारणो धर्मः संशयहेतुरिति नान्वयिनः साधारणत्वे सति संशयहेतुत्वं भवति, [६]अन्वयाव्यभिचारात्। एवं व्यतिरेकिणोऽपि सत्यप्यसाधारणत्वे विपर्ययसंबन्धस्याव्यभिचारात् हेतुभाव इति। तस्मात् नैकवृत्तित्वमनेकवृत्तित्वं वा संशयकारणत्वे निर्णयकारणत्वे वा हेतुः। किं तर्हि? साधारणासाधारणत्वे सति व्यभिचाराव्यभिचारौ संशयनिर्णयहेतू। यो व्यभिचारी स संशयहेतुः, योऽव्यभिचारी स निर्णयहेतुरिति। यदि तर्ह्युभयोर्व्यभिचारित्वात् संशयहेतुत्वम्, ननु समानधर्मोपपत्तेरित्यनेनैव गतमेतत्[७]। गतार्थत्वात् न संशयकारणत्वेन पृथगुपादेयमिति? सत्यम्, न व्यभिचारितामन्तरेणान्यत् संशयकारणम्, अपि तु व्यभिचारितायां सत्यां विधीयमानव्यभिचारः प्रतिषिध्यमानव्यभिचारश्चेति भेदः। समान-

---

१. निर्णय° C २. व्यावृत्तः C ३. अभिधातुम् C ४. वा C ५. वा om J
६. अन्वयस्याव्यभि° J ७. गतमेतत् om J

धर्मोपपत्तेरित्यनेन विधीयमानस्य व्यभिचार उपदिश्यते, अनेकधर्मोपपत्तेरित्यनेन[१] प्रतिषिध्यमानो व्यभिचार इति। एतावता च भेदेन[२] पृथगभिधानम्।

नञः पर्युदासविषयत्वादव्यभिचारिधर्मद्वयोपनिपातोऽनेकधर्म इति **केचित्। एके** त्वनेकधर्मोपपत्तेरित्यन्यथा व्याचक्षते, एकस्मादन्योऽनेकधर्म इति। एवं च विरुद्धाव्यभिचारिधर्मद्वयोपनिपातो लभ्यत इति यत् तं प्रति[३] तर्कमाहुः। स च संशयहेतुः, यथा श्रावणत्वकृतकत्वे शब्दस्येति। तदयुक्तम्, असंभवात्। न ह्यव्यभिचारिणौ विरुद्धावेकस्मिन्नर्थे धर्मौ संभवतः वस्तुनो द्वैरूप्यासंभवात्। यद्युभावव्यभिचारिणौ स्याताम्, एकं वस्तु द्व्यात्मकं भवेत्। न चैतदस्ति। तस्मात् नोभावव्यभिचारिणाविति।

न चायं प्रयोगो युक्तः। कथमिति? यदि तावदेवं प्रयुङ्क्ते, यथा प्राक्तनो हेतुः, तथायमपीति। प्रसिद्धेन व्यपदेशा[४] भवन्तीति सिद्धं पूर्वस्य हेतुत्वम्। विरुद्धार्थप्रतिपत्तिबाधितत्वादुत्तरस्यानभिधानम्। अथैवं क्रियते यथेदं द्वितीयमनुमानं न भवति तथा प्राक्तनमपीति? एवमपि प्रतिपन्नं द्वितीयस्यानुमानस्यासाधकत्वम्[५]। अथ विरुद्धधर्मावेकत्र संभवत इति संभवान्न विरुद्धौ? कश्च विरुद्धार्थः? किं सहासंभवः, आहो विरुद्धार्थसाधकत्वम्, अथ स्वरूपमिति? यदि सहासंभवो विरोधः, स नास्ति, दर्शनात्। अथ विरुद्धार्थसाधकत्वं विरोधः, तदपि न युक्तम्, वस्तुनो द्व्यात्मकत्वासंभवात्। यदि विरुद्धार्थसाधकत्वमनयोर्धर्मयोर्भवेत्, एकं वस्तु द्व्यात्मकमापद्यते। अथ स्वरूपम् अनयोर्विरुद्धमिति, न किञ्चिद् बाधितं भवति। यस्मात् कृतकत्वं न श्रावणत्वं श्रावणत्वं वा न कृतकत्वम्, तस्मात् न संशय इति।

उपेत्य वा विरोधं यदि विरुद्धार्थाभ्यां कृतकत्वश्रावणत्वाभ्यां शब्दे संशयः क्रियते, स [६]विशेषदर्शनादुपजातः कस्य दर्शनात् निवर्तेत? न हि विशेषदर्शने

---

१. विभागजत्वादित्यनेन C २. च भेदेन om C ३. लभ्यते, यं प्रति C ४. °नाति-देशाः J ५. प्रतिपन्नद्वितीयानु° C ६. विशेषादर्श° K

[१]सति विशेषाकाङ्क्षा अस्ति यथोपलब्धसामान्यस्य विशेषाकाङ्क्षेति[२]। प्रत्यक्षतो निवर्तिष्यत इति चेत्–न, योऽनुमानाभ्यां सन्निपतिताभ्यामर्थे संशयः, स प्रत्यक्षदर्शनान्निवर्तिष्यत इति न[३] युक्तम्, प्रत्यक्षाविषयत्वात्। नायमर्थः प्रत्यक्षस्य विषयः, किं शब्दो नित्यः अथानित्य इति। आगमान्निवर्तिष्यत इति चेत्–न, आगमस्य च विचार्यमाणत्वात्। आगम एवायं विचार्यते किं शब्दो नित्योऽथानित्य इति? न चायं प्रत्यक्षविषयो नागमविषयः, [४]अनुमानाभ्यां चायं परिच्छेत्तुमशक्यः[५]। सोऽयमनिवर्त्यः संशयः प्राप्तः। भवतु किं नो बाध्यते? कथं न बाध्यते, यदा वस्त्वन्तरपरिच्छेदकमनुमानं न भवति, यथानित्या बुद्धिः कृतकत्वादिति? इदं खलु कृतकत्वं शब्दे दृष्टम्। स चानवधारितस्वभावो नित्योऽनित्य इति। [६]तथा चोपलभ्यमानं कृतकत्वमन्यत्र बुद्ध्यादौ संशयहेतुरिति सर्वमनुमानमनित्यत्वसाधनं न स्यात्। सर्वं चानुमानमयं न्यायो बाधत इति। यश्च न्यायोऽनुमानमूलमुच्छिनत्ति, नासौ न्यायविदा युक्तोऽभिधातुम्। नित्यासंभवात् नायमस्मात् न्यायो बाधते। यस्य नित्यं किञ्चिदस्ति, तस्य विरुद्धाव्यभिचारी भवति। अस्माकं तु पक्षे नित्यं किञ्चित् नास्ति। न, बाधापरिज्ञानात्। न भवता बाधविषयोऽवलोकितः, किं तु नित्यमस्माकं नास्तीति एतावन्मात्रवमवधार्य परपक्षे दोषोऽभिधीयत इति भवतामपि पक्षे विरुद्धाव्यभिचारी कृतावकाशः। कथम्? सप्रतिघं विज्ञानं सत्त्वाद् रूपादिवदित्येकः, अप्रतिघं विज्ञानमरूपत्वाद् वेदनावदित्यपरः। तदेवमव्यभिचारिधर्मद्वयोपनिपातान्न सप्रतिघं नाप्रतिघं सिध्येत्। तस्मादपन्यायोऽयं विरुद्धयोश्च धर्मयोः सन्निपातात् शब्दे संशय इति। धर्मयोः सातत्यादभिलापानुपपत्तिः। नायमतद्धर्मा कदाचिदपि शब्द उपलभ्यते। सततं तु तद्धर्मैव भवति। श्रावणः कृतकश्चेति अभिलापो न स्यात्, नित्योऽनित्यो वेति। न हि कदाचिदयं द्रष्टा एकस्मिन् वस्तुनि स्थाणुपुरुषधर्मावुपलभमानः शक्नुयाद् वक्तुं स्थाणुर्वा पुरुषो

---

१. भवति C　२. °काङ्क्षा भवति C　३. प्रत्यक्षन्निव° तन्न C　४. अनुमानोपमानाभ्यां C　५. नायं परिच्छेत्तुं शक्यते C　६. तत्र C

वेति। नैवं भविष्यतीति चेत्? व्याहतमुच्यते। ननु च भवताभिधीयते नित्य इति, मयाप्यभिधीयत अनित्य इति। कथं नाभिलप्यते? सोऽयं विरुद्धाव्यभिचारी न्यायो विचार्यमाणः सर्वथानुमानमूलं बाधत इत्यलमनेन।

अथ कृतकत्वश्रावणत्वे सहिते संशयहेतू भवत इति? तथापि कृतकत्वश्रावणत्वे सहिते न विभागजत्वादन्यत्रासंभवाच्च संशयहेतू भवतः। सोऽयमस्माद् भिद्यते। यथैव विभागजत्वं [१]सर्वतो व्यावृत्तत्वादसाधारणं शब्दे संशयं करोति, तथा कृतकत्वश्रावणत्वे अपि शब्दवृत्तित्वादन्यत्रासंभवाच्च संशयहेतू भवतः। सोऽयमसाधारण एव न धर्मान्तरम्, अतस्तद्ग्रहणेनैवायं संगृहीत इति। तस्मादेकस्मादन्यो धर्मोऽनेकधर्म इति न वक्तव्यमिति।

यदा पुनरेवम्भूतौ धर्मावेकस्य वस्तुनो भवतः, तदोपलब्ध्या तस्य वस्तुनः किं प्रतिपत्तव्यमिति? तदा तयोरेव धर्मयोः सामर्थ्याधिगतौ यत्नः कर्तव्यः। नोभावत्र साधनम्[२]। कतरोऽत्र साधनं कतरश्च न साधनमिति सामर्थ्याधिगमे यत्नः करणीय इति। यत्नश्च क्रियमाणोऽनित्यत्वसाधनेष्वेवावतिष्ठत इति। कुतः? नित्यत्वस्य प्रमाणबाधितत्वात्। तच्चोपरिष्टात् वक्ष्यामः[३]। तदेवं व्यवस्थितमेतत्, अनेकधर्मोपपत्तेरसाधारणात् धर्मात् संशय इति।

विप्रतिपत्तेः संशय इति व्याहतार्थः प्रवादो विप्रतिपत्तिशब्दस्यार्थो [४]व्याहतार्थप्रवादविषयमर्थमुपलभमानस्योपलब्ध्यनुपलब्ध्योरव्यवस्थाने सति तद्गतविशेषानुस्मृतौ च सत्यां संशयो भवतीति।

तत्र समानोऽनेकश्च धर्मो ज्ञेयस्थः उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे इति **भाष्यम्।** तत्रोपलब्ध्यनुपलब्ध्योस्तावत् पृथक् संशयकारणत्वं न भवतीति चर्चितमेतत्। समानः अनेकश्च धर्मो ज्ञेयस्थ इत्येतदपि न बुध्यामहे, किमत्र धर्मः संशयकारणमुत ज्ञानमिति? न धर्मः संशयकारणमित्यनेकधा समर्थितम्। समाना-

---

१. अन्यावृत्तित्वात् C २. नोभावेतौ साधने C ३. न्या. सू. २.२.२२ ४. °विषयत्वमुप° C

नेकधर्मज्ञानं तु संशयकारणम्। तच्च ज्ञातरि वर्तत इति नास्ति भेदः। समानानेकधर्मयोस्तु पृथगभिधाने उक्तं प्रयोजनम्, विधीयमानप्रतिषिध्यमानधर्मभेदादिति। विप्रतिपत्तेरित्ययं वक्तृगतः संशयहेतुः। केऽत्र सम्यक्प्रतिपन्नाः के मिथ्येति श्रोतुः संशयो भवति। एतावता भेदेन पृथगभिधानम्।

समानधर्मः सर्व एवायमिति चेत्? समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति सर्व एवायं समानधर्म एवाभिधीयते। तस्माद् वैयर्थ्यात् पृथगनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति न प्रयोजनमस्ति। अत एवं कर्तव्यम्, समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति। न, सूत्रार्थापरिज्ञानात्। **सूत्रा**र्थमपरिज्ञायैवैतच्चोद्यत इति। यथा च भेदः समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति तथा च वर्णितम्।

अपरे पुनः समानधर्मोपपत्त्यादिभिः पदैः पृथक् पञ्चविधं संशयं वर्णयन्ति। समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति। एवं शेषेषु पदेषु। तन्न युक्तम्, उपलब्ध्यनुपलब्ध्यव्यवस्थायाः पूर्वपदविशेषणत्वात्। समानधर्मोपपत्तौ सत्यामुपलब्ध्यनुपलब्ध्यव्यवस्थायां च सत्यां विशेषापेक्षो विमर्शः संशय इति सूत्रार्थः। एवमनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति वाच्यम्। तस्मान्नोपलब्ध्यनुपलब्ध्यव्यवस्था पृथक् संशयकारणमिति। उपलब्ध्यनुपलब्ध्योर्द्वैविध्याच्च संशयो न युक्तः। कुतः? लोकविरोधात्। उपलब्ध्यनुपलब्ध्यव्यवस्थानात्[१] संशयो भवतीति ब्रुवाणो लोकं बाधते। कथमिति? यत्किञ्चिदयमुपलभते सर्वत्रास्य संशयेन भवितव्यम्। किं कारणम्? उपलभ्यमानं द्वेधा भवतीति। उपलब्ध्योर्द्वैविध्याच्च यः संशयो भवति तस्य कुतो निवृत्तिः? विशेषदर्शनान्निवर्तत इति चेत्? विशेषेष्वप्येवम्। य एते विशेषा उपलभ्यन्ते किमेते सन्त उताहोऽसन्त इति यावद् यावदुपलभते[२], सर्वत्रोपलब्धिद्वैविध्यात् संशय इत्यनिवर्त्यः संशयः। एवमनुपलब्धिद्वैविध्येऽपि [३]वक्तव्यम्। न चास्य क्वचित् समाश्वासः स्यात्। यदायमपवरकादौ सर्पादीन्नोपलभते तदा तस्य सर्पवदेतद्वेश्म आहोऽसर्पवदिति संशयो भवति।

---

१. उपलब्ध्योर्द्वैविध्यात् C २. °लभ्यते C ३. कर्तव्यम् J

अयमपि संशयोऽनिवर्त्त्य एवेति सर्वत्राश्वासो न स्यात्। येषां च पञ्चविधः संशय इति सूत्रार्थः, तैरप्यस्य कारणकृतो भेदो वक्तव्यः स्वभावकृतो वा। तद् यदि तावत् कारणकृतो भेदः? न पञ्चविधः, अनेकविधः संशय इति प्राप्तम्। अथ स्वभावभेदात्? स्वभावभेदस्यासंभवादेकरूपः संशयः, संशीतिः संशय इति। तस्मात् पञ्चविधः संशय इति न सूत्रार्थः।

समानधर्मग्रहणान्न संशयो धर्मिविषयत्वात्। यदिदमुच्यते समानधर्मोपपत्तेः संशय इति, तदयुक्तम्, धर्मिविषयत्वात्। न हि समाने धर्मे उपलब्धे धर्मिणि संशयो [१]युक्तः धर्मधर्मिणोर्भेदात्। न हि गवि दृष्टेऽश्वे संशयो भवति, धर्मिणश्चादृष्टत्वात् नानुपलब्धे न निर्णीतेऽर्थे संशयो भवतीति व्याघातः। धर्मधर्मिभावात् संशय इत्**येके**। **एके** तावत् परिहारं ब्रुवते, धर्मे दृष्टे धर्मिणि संशयः। न धर्मधर्मिभावात्। न पुनर्गवि दृष्टेऽश्वे संशयो भवति धर्मधर्मिभावानुपपत्तेः। न, नानात्वानिवृत्तेः। न हि धर्मधर्मिभावेन नानात्वं निवर्तते। अथ धर्मधर्मिभावो नियामकः? इच्छादिसूत्रं [१.१.१०] तर्हि व्याहन्यते। कथमिति? इच्छादयः प्रतिसन्धानादात्मानं गमयन्तीति सूत्रार्थः। तत्र परः प्रत्यवस्थितः कार्यकारणभावात् प्रतिसन्धानमिति [२]न नानात्वस्याबाधनादित्यनेन निवर्तत इति। इह पुनर्भवता धर्मधर्मिभावादिति ब्रुवता नानात्वमेव धर्मधर्मिभावविशिष्टं नियामकमुच्यत[३] इति शक्नुयात् परोऽपि वक्तुं कार्यकारणभावो नियामक इति। तस्मादपव्याख्यानमेतत् धर्मधर्मिभावात् संशय इति।

अथ समानधर्मोपलब्धेरन्यस्मिन्[४] धर्मिणि संशयो भवतीति कः परिहारः? अयं परिहारः। बहुव्रीहिः समासः। अतो धर्मिणोऽभिधानम्। समानधर्मोपपत्तेरित्यनेन पदेन बहुव्रीहिसमासवान् धर्म्येवापदिश्यते। कथम्? समानो धर्मो यस्य स भवति समानधर्मा। समानधर्मण उपपत्तिः समानधर्मोपपत्तिः। किमुक्तं भवति? समानधर्मवतो धर्मिणो दर्शनादिति।

---

१. न युक्तः C २. न om C ३. °भावनियामक° C ४. °स्मिन्ननुपलब्धे C

विशेषापेक्षो विमर्शः संशय इति। विशेषापेक्षो विशेषस्मृत्यपेक्ष इति। अथ सा विशेषस्मृतिः किं विशेषविषया, किं संशयविषयविशेषविषया[१], उतान्यविषयेति? योऽसौ संशयस्य विषयः यत् तं समानधर्माणमुपलभते[२] किं तस्यायं विशेषाननुस्मरति, उतान्यस्येति? यदि तावत् तस्य? तन्न युक्तम्, तद्विशेषाणां क्वचिदननुभूतत्वात्। योऽर्थः पूर्वमुपलब्धविशेषः तद्गतान् विशेषाननुस्मरतीति युक्तम्, तद्विशेषाणामनुभूतत्वात्। यदा पुनरयमनुपलब्धपूर्वविशेषः सामान्यत उपलभ्यमानः सन्दिह्यते तत्र विशेषानुस्मृतिः। कथम्? तद्विशेषाणामननुभूतत्वादिति। न सामान्यवचनत्वात्[३]। विशेषापेक्ष इति सामान्यवचनं, न[४] पुनरनेनावधार्यते तस्य वा अन्यस्य वेति। यदा तद्गता विशेषाः सुस्मूर्षिता भवन्ति, तदानुभूतेषु विशेषेषु[५] स्मृतिः। यदा त्वनुपलब्धपूर्वेऽर्थे संशयः, तदा सादृश्यादन्यगतान् विशेषान् सुस्मूर्षत इति। एवं तावद् व्यवस्थितं त्रिविधः संशय इति।

अनेन च संशयलक्षणेन यान्यविरुद्धानि संशयलक्षणानि तान्यपि संगृहीतानि, यथा **काश्यपीयम्**–

सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः[६]।

इति। अस्यार्थः। सामान्यप्रत्यक्षादिति। सामान्यवतः प्रत्यक्षाद् धर्मिण इति। न पुनरयं पदार्थः सामान्यस्य [७]प्रत्यक्षादिति। विशेषाप्रत्यक्षत्वमव्यवस्थितविशेषत्वम्, नास्मिन् विशेषा व्यवस्थिता इति। विशेषस्मृतेश्च संशय इति समानम्। कथं पुनरनेन सूत्रेणासाधारणो लभ्यत इति? लभ्यते, व्यभिचारित्वात्। व्यभिचारि साधारणम्। तच्चासाधारणेऽपि व्यभिचारित्वमस्तीति लभ्यते। अनेकधर्मोपपत्तिस्तर्हि पृथङ् न पठितव्या, अन्वयव्यतिरेकभेदविवक्षया[८] पृथगभिधानं पुनः संशयकारणभेदविवक्षयेति। ये त्वत्र विशेषाप्रत्यक्षाद् विशेषस्मृतेश्चेति पदयोः

---

१. संशयविषयविषया J २. किम् om C ३. न °त्वात् om J ४. न om C
५. विशेषविषया C ६. वै. सू. (च) २.२.१९ ७. °क्षत्वादिति J ८. °क्षायां C

पौनरुक्त्यं वर्णयन्ति, सामान्यप्रत्यक्षाद् विशेषस्मृतेश्च संशय इत्यभिधीयमाने किल गम्यते एवैतद् विशेषाप्रत्यक्षादिति, न हि कश्चिद् विशेषान् प्रत्यक्षान् स्मरतीति। तन्न, सूत्रार्थापरिज्ञानात्। नायं सूत्रार्थः विशेषाणां न प्रत्यक्षत्वमिति, अपि त्वव्यवस्थितविशेषवत्त्वम्, नास्मिन् विशेषाप्रत्यक्षवत्त्वमित्यतो[१] नायं दोष इति।

अन्ये तु संशयलक्षममन्यथा व्याचक्षते, साधर्म्यदर्शनाद्विशेषोपलिप्सोर्विमर्शः संशय इति। तैरपि साधर्म्यस्यावधारितत्वात् संशयस्य विषयो वक्तव्यः। धर्मीति चेत्? ननूक्तः संशयस्य विषयो धर्मी। सत्यमुक्तो न पुनर्युक्तः। कथं न युक्तः? यदि तावद् धर्मव्यतिरिक्तं धर्मिणमभ्युपैति, व्याहतं भवति। धर्मधर्मिणोश्च नानात्वाभ्युपगमे धर्मस्यावधृतत्वात् धर्मिणश्चादृष्टत्वात् न संशयः। न ह्यन्यस्मिन् दृष्टेऽन्यत्र संशयो भवति। अथाप्यस्मद्दिशा साधर्म्याभिधानेन धर्म्येवोच्येत? तन्न युक्तम्, सधर्मणो भावः[२] साधर्म्यमिति भावाभिधानेन धर्मोऽभिधीयते, न धर्मीति। न युक्तोऽन्यस्य दर्शनादन्यस्मिन् संशय इति। अथार्थान्तरभावं नाभ्युपैति? तथापि साधर्म्यस्यावधृतत्वात् क्व संशय इति। यदि चायं धर्मिणं नोपलभते, कस्यायं[३] विशेषानुपलिप्सेत? न हि साधर्म्यस्य विशेषाः सन्ति। अथ सामान्यवतो विशेषा इति? तन्न, तस्यादृष्टत्वादित्युक्तम्। न सामान्यस्य विशेषाः सन्तीति सामान्यवतो विशेषा भवन्तीत्येवं[४] ब्रुवता सामान्यविशेषतद्वतां भेदोऽभ्यनुज्ञातो भवति। व्यर्थं चाभिधानं न सामान्यस्य विशेषाः [५]किं तु तद्वतो विशेषा इति। उपलब्ध्यनुपलब्धिव्यवस्थाने च साधर्म्यस्य दर्शने सत्यपि विशेषोपलिप्सायां च [६]सत्यां न संशयो भवति। उपलब्ध्यनुपलब्ध्यव्यवस्थात इति वक्तव्यम्। अनेकधर्मदर्शनादिति च।

समानानेकधर्मोपपत्तेरित्येवमादिवाक्यं संशयलक्षणम्। तद्विचार्यम्। किं तावदयं कारणोपदेश आहो संशयस्वरूपपावधारणमिति? यदि कारणनिर्देशः?

---

१. °शेषा व्यवस्थिता इत्य° C २. साधर्म्यम्, साधर्म्यमिति च C ३. विशेषमुप° C
४. संभवन्ति इति C ५. किं तु om C ६. सत्यां om C

अत्यल्पमिदमुच्यते समानानेकधर्मादिभ्य इति। अन्यान्यपि संशयकारणानि, तान्युपसंख्येयानि। यथा आत्ममनःसंयोग आन्तरस्य, [१]इन्द्रियमनःसंयोग इन्द्रियार्थसन्निकर्ष [२]आत्ममनःसंयोगश्च बाह्यस्येति। अथ स्वरूपावधारणम्। कारणनिर्देशोऽनर्थकः। संशीतिः संशय इति वक्तव्यम्। अस्तु तावत् कारणावधारणम्। [३]ननूक्तं कारणान्तरमप्युपसंख्येयमिति? नैष दोषः[४]। नेदं कारणावधारणार्थम्, अपि त्वसाधारणकारणनिर्देशोऽयम्। तस्मात् इन्द्रियार्थसन्निकर्षादीनामप्रसङ्गः, [५]प्रत्यक्षादिसाधारणत्वात्। स्वरूपनिर्देशो वा भवतु। इदमेवास्य स्वरूपं समानधर्मदर्शनादिभ्यो जन्मेति। सोऽयमेवंभूतः संशयो विचाराङ्गतयोपादीयते। संशयवद् विपर्ययोऽपि विचारस्याङ्गम्। सोऽपि पदार्थत्वेन वक्तव्यः। सत्यमसौ पदार्थः, न तु विचाराङ्गमित्यतो नाभिधेयः। कथं न विचाराङ्गम्? यथा सन्दिग्धस्तद्विशेषप्रतिपत्तये प्रयतते, नैवं विपर्यस्त इति। अतो न्यायविद्यानङ्गत्वात् नाभिधीयत इति॥२३॥

यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् ॥१।१।२४॥

यमर्थमधिकृत्येति व्यवसायोऽधिकारः। कस्य व्यवसायः? सुखदुःखसाधनानाम्। इदं सुखसाधनमिति बुद्ध्वा[६] सुखावाप्तये यतते। इदं दुःखसाधनमिति चाधिगम्य दुःखहानायेति। सुखदुःखयोरवाप्तिहानाभ्यामयं लोकः प्रयुज्यत इति सुखदुःखाप्तिहानी प्रयोजनमिति। अनेन च प्रयोजनेन सर्वेऽर्थाः संगृहीता भवन्तीति। एतस्मिंश्च सूत्रार्थे परस्य दोषविवक्षया चोद्यमानस्य वक्तुमशक्तस्य व्याहारो लौकिकोऽयमर्थः प्रयुज्यतेऽनेनेति प्रयोजनमिति। न चानेन [७]किञ्चित् परीक्षाविधेः क्रियते इति न्यायाङ्गभावो नास्तीति। यथावत् लौकिकोऽयमर्थ इति। एतत् नर्ते

---

१. आत्ममनःसन्निकर्षः C २. आत्ममनःसंयोगश्च om C ३. ननु चोक्तम् J ४. एष दोषः om C ५. °आदि° om C ६. ज्ञात्वा C ७. न्यायस्य किञ्चित् क्रियते C

प्रकृष्टतार्किकादन्यो वक्तुमर्हति, [१]अयमेवैकः पदार्थो लोकिको न प्रमाणादय इति। कश्चासौ लौकिक इति? यदि प्रमाणोपपन्न इत्ययमर्थः, अतिदोषोऽयम्, प्रमाणोपपन्नं न वक्तव्यमिति। अथान्यो लौकिकशब्दार्थः? तन्न बुध्यामहे कथमन्य इति। यदपि प्रयोजनं न्यायस्याङ्गं न भवतीति, [२]तदपि न युक्तम्। या खलु निष्प्रयोजना चिन्ता, नासौ न्यायस्याङ्गमिति। परीक्षाविधेस्तु प्रधानाङ्गं[३] प्रयोजनमेव, तन्मूलत्वात् परीक्षाविधेरिति॥२४॥

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥१।१।२५॥

लौकिकपरीक्षकाणामिति सूत्रम्। बुद्धिसाम्यविषयोऽर्थो दृष्टान्त[४] इति सूत्रार्थः। एवं चाकाशावरोध[५] इति। यदि पुनरेवमवधार्येत लौकिकानां परीक्षकाणां च यो विषयः स दृष्टान्त इत्यलौकिकार्थो न दृष्टान्तः स्यादाकाशादिः। उदाहरणत्वेन तु लौकिकपरीक्षकविषयस्याभिधानं न[६] पुनर्लौकिकपरीक्षकाणामेवेति।

सोऽयं दृष्टान्तः सारूप्यव्युत्पत्त्यर्थो वा स्यात्, असिद्धसाधनार्थो वा? यदि तावत् सारूप्यव्युत्पत्त्यर्थः[७], नोपमानाद्विद्यते। अथासिद्धसाधनार्थः, नोदाहरणाद् भिद्यते। यद्युपमानं प्रमाणेऽन्तर्भावः। अथोदाहरणमवयव इति। न पृथग्दृष्टान्तोऽस्तीति। इदं तूत्तरमप्रतिसमाधेयमिति पश्यामः। कस्मात्? त्रयस्याप्यपरिज्ञानात्। एवं ब्रुवता न दृष्टान्तो नोपमानं नोदाहरणं विज्ञातमिति। सारूप्यव्युत्पत्त्यर्थं तावदुपमानं न भवतीति वर्णितम्। दृष्टान्तः सारूप्यव्युत्पत्त्यर्थः। असिद्धसाधनार्थो वेति दृष्टान्तो न भवति। उदाहरणार्थमुदाहरणं वर्णयिष्यन्तो[८]वक्ष्याम इति॥२५॥

॥न्यायपूर्वाङ्गलक्षणप्रकरणम्॥

---

१. °मेव च C २. अपि om C ३. अङ्गं om J ४. विषयो दृष्टान्तः C
५. बोधः C var ६. न तु C ७. °र्थस्तदा C ८. वर्णयन्तो C; द्रः न्या. सू. १।१।३६

[न्यायाश्रयसिद्धान्तलक्षणप्रकरणम्]

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ।।१।१।२६।।

इदमित्थंभूतं चेति **भाष्यम्**। इदमिति सामान्यतोऽधिगममाह[१]। इत्थंभूतं चेति विशेषतः। एतदुक्तं भवति, सामान्यविशेषवदर्थाभ्यनुज्ञा सिद्धान्त इति। अस्यार्थस्य प्रदर्शनार्थं **तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः** इति **सूत्रम्**।

किं पुनरिदं **सूत्रं** लक्षणार्थमाहो विभागार्थमिति? किं चातः? यदि लक्षणार्थं तन्त्राधिकरणग्रहणं न कर्तव्यम्, एतावद्धवत्वभ्युपगमव्यवस्था सिद्धान्त इति। अथ विभागार्थम्?[२] सर्वतन्त्रप्रतितन्त्रग्रहणं कर्तव्यम्, प्रतिज्ञादिवत्। यथा

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः[३]

इति समस्ताभिधानम्, एवं सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थितिरिति वक्तव्यम्। लक्षणार्थं च सूत्रान्तरं वक्तव्यम्॥२६॥

स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ।।१।१।२७।।

सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्[४] इत्यस्य[५] **सूत्र**स्यान्योऽर्थो वक्तव्यः। अथेदं विभागार्थम्? तथापि पूर्वसूत्रं परित्यज्यम्[६]। अथ विभक्तानां पुनर्विभागः? त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः इति व्याहतम्। विभागश्च नियमार्थः। विभक्तानां [७]पुनर्विभागः किमर्थः? यदि नियमार्थः, आद्येन सूत्रेण कृतत्वात् न प्रयोजनमस्तीति। तस्मात् पूर्वमुत्तरं वा सूत्रमनार्षमिति।

---

१. अवगम॰ C २. सर्वतन्त्रग्रहणं C ३. न्या. सू. १.१.१० ४. ॰धिकरणा॰ om C ५. इति च J ६. परित्यज्यताम् C ७. पुनः om C

नानार्षम्, आद्यस्य लक्षणार्थत्वादुत्तरस्य च[१] विभागार्थत्वादिति। विभागस्तु[२] नियमार्थ इत्युक्तम्। एतेन[३] अनेकधा भिन्नस्य सिद्धान्तस्य चतुर्धा संग्रह इति नियमं दर्शयति। अथाद्यं सूत्रं कथम्? लक्षणार्थमिति। तन्त्राधिकरणानामर्थानामभ्युपगम इति सूत्रार्थः। तन्त्रमधिकरणं येषामर्थानां [४]ते भवन्ति तन्त्राधिकरणाः, तेषामभ्युपगमसंस्थितिरित्थंभावव्यवस्था धर्मनियमः सिद्धान्तो भवतीति। किमुक्तं भवति? योऽर्थोऽशास्त्रितः[५] तस्याभ्युपगमो न सिद्धान्त इति॥२७॥

सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः

॥१।१।२८॥

सर्वेषां संप्रतिपत्तिविषयः सर्वतन्त्रसिद्धान्तः, यथा प्रमाणानि प्रमेयसाधनानीति। न दृष्टान्तात् सर्वतन्त्रसिद्धान्तो भिद्यते, तत्राप्यविप्रतिपत्तिरिहापीति? भिद्यत इत्याह, दृष्टान्तस्तु[६] वादिप्रतिवादिभ्यामेव निश्चितः, न चैवं[७] सर्वतन्त्रसिद्धान्त इति। अनुमानागमयोराश्रयो दृष्टान्तो न[८] सर्वतन्त्रसिद्धान्त इति। [९]यद्यनुमानागमयोराश्रयो दृष्टान्त इति प्रत्यक्षेऽपि प्रसङ्गः। प्रत्यक्षमप्यनुमानागमयोराश्रयः, तत्कारणत्वात्। अर्थो दृष्टान्तोऽवगम्यमानत्वात्[१०]। यः प्रत्यक्षस्य विषयः सोऽर्थो दृष्टान्त इति। अधिगतः अर्थः[११] कथ्यते इत्यनुमानागमयोराश्रयः। अधिगमसाधनं च[१२] प्रत्यक्षम्। तस्मान्न प्रत्यक्षे प्रसङ्गः॥२८॥

---

१. च om C २. °श्च C ३. एतेन om J ४. भवति ते तन्त्रा° C ५. न शास्त्रितः C ६. °न्तो हि C ७. न पुनरेवम् C ८. नैवम् C ९. यदि om C १०. अर्थो° °त्वात् om C ११. दृष्टान्तोऽधि° C १२. तु C

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः

।।१।१।२९।।

सामान्यविशेषतद्वतां नियमेनाभ्युपगमः प्रतितन्त्रसिद्धान्त इति। यथा भौतिकानि इन्द्रियाणीति **योगा**नाम्, अभौतिकानीति **सांख्या**नामिति॥२९॥

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः

।।१।१।३०।।

वाक्यार्थसिद्धौ तदनुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति। अस्योदाहरणं **भाष्ये,** [१]इन्द्रियव्यतिरिक्तो ज्ञाता दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति॥३०॥

अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः

।।१।१।३१।।

अपरीक्षिताभ्युपगमादिति सूत्रम्। अपरिक्षितोऽसूत्रितः[२]। योऽर्थः सूत्रेषु नोपनिबद्धः शास्त्रे चाभ्युपगतः सोभ्युपगमसिद्धान्त इति[३]। यथा **नैयायिकानां** मन इन्द्रियमिति। **वैशेषिकाणां नैयायिकाणां** च श्रोत्रमाकाशमिति। अपरीक्षितः शास्त्रानभ्युपगतः। **स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञानाच्च** प्रवर्तत इति। तत्र युक्तम्, कुतः[४]? परावज्ञानस्यायुक्तत्वात्। यदि तावत् परस्यासामर्थ्यं बुद्ध्वा नायं समर्थ इत्येवं[५] प्रवर्तते, तदानेन न परः प्रतिपादितो भवति, किं तु विप्रतिपादितः। यश्चाज्ञः किं तस्य प्रतिपादयितव्यम्? अथ परिज्ञातसामर्थ्यं

---

१. यथेन्द्रिय° C २. °सूत्रित इति C ३. इति om J ४. कुतः? परा° C ५. एवं om C

पुरुषमवजानाति? तदपि न, अतिशयबुद्धिमतोऽवज्ञानस्यायुक्तत्वात्। तस्मात् नायं सूत्रार्थोऽशास्त्रिताभ्युपगमः सिद्धान्त इति।

सर्व एवायं पक्षः स्वमुखेनार्थापत्त्या वाभिधीयत[१] इति किमनेनातिविस्तृतेनेति **केचित्**। [२]तत्पर्याय एव सिद्धान्त **इत्यपरे**। पक्षस्य किलायं पर्यायः सिद्धान्त इति। पक्षः सिद्धान्तपर्याय इति[३] न बुद्ध्यामहे। सिद्धान्त इत्युपपन्नप्रमाणकोऽयमर्थ इति तत्प्रत्ययादभ्युपगमः पक्ष इत्यन्यतरवादिसंप्रतिपन्नस्यान्यतरं[४] प्रति कर्मतया वस्तुनो यदुपादानं स पक्षः। यश्च कारकशब्दो यश्च वस्तुशब्दो नैतौ पर्यायौ, [५]तद्यथा परशुश्छेदनमिति। परशुरिति कदाभिधीयते? यदा पुरुषव्यापारनिरपेक्षं वस्तु सन्निधीयमानतयावतिष्ठते। छेदनमिति च यदोद्यम्योद्यम्य दारुणि निपात्यते तदाभिधीयते। तावेतौ छेदनपरशुशब्दौ वस्तुनः क्रियासंबन्धासंबन्धापेक्षौ[६] प्रवर्तेते इति। तथा सर्वे कारकशब्दा एवं न द्रव्यमात्रे न वा क्रियामात्रे प्रवर्तन्ते। किं तु क्रियासाधने क्रियाविशेषयुक्त इति। कारकशब्दश्च पक्षो न सिद्धान्तः, स कथं पर्यायो भविष्यतीति? सर्वतन्त्रसिद्धान्तश्च पक्षपर्याय इति। अहो, पर्यायशब्दे[७] कौशलं **भदन्तस्य**, पक्षो विचारणायामिष्टोऽर्थः इति चाभिधीयते, अविचारणीयश्चार्थः पक्षेऽन्तर्भवतीति चित्रम्।

अथ पुनः सर्वतन्त्रसिद्धान्तं न[८] प्रतिपद्यते, तेनापि सर्वतन्त्रसिद्धान्तं निह्नुवानेन तदसत्त्वप्रतिपादको न्यायोऽभ्युपेयः[९]। यश्चासौ न्यायस्याभ्युपगमः स सर्वतन्त्रसिद्धान्त इति व्याहतं भवति सर्वतन्त्रसिद्धान्तो नास्तीति। अथ न्यायमपि न प्रतिपद्येत, अनिवृत्तो व्याघातः वचनेऽवचने च। यदि तावत् न्यायो नास्तीति ब्रवीति, प्रतिपादयति च नास्ति चेति व्याहतम्। अथ ब्रवीति न अवचनेऽस्यार्थो न सिध्यति, तस्मात् सर्वतन्त्रसिद्धान्तो नास्तीति संभ्रमव्याहतम्[१०]। इदं च तावद्

---

१. विधी॰ C २. पक्षपर्याय C ३. सिद्धान्तः पक्षपर्यायोऽयमिति C ४. °वादिविप्रति॰ C ५. अन्यथा C ६. क्रियासंबन्धापेक्षौ C ७. °शब्देषु C ८. नैव C ९. अभिधेयः C १०. °व्याकृतम् C

भवान् प्रष्टव्यो जायते किं पक्षः सिद्धान्तसामान्यं भवति, अथ संग्रहः पक्षशब्देन सिद्धान्तस्य, अथ सिद्धान्तस्य पक्षशब्दः पर्याय इति? तद् यदि तावत् सिद्धान्तसामान्यम्, तन्नास्त्यव्यापकत्वात्। न हि पक्षः सर्वतन्त्रसिद्धान्तं व्याप्नोति असाध्यत्वात्। यथा सत्ता द्रव्यगुणकर्माणि व्याप्नोतीति व्यापकत्वात् सामान्यं भवति, न चैवं पक्ष इति। पर्यायशब्दोऽपि न भवतीत्युक्तम्। यदि च पक्षः सिद्धान्त इति पर्यायः, सर्वतन्त्रसिद्धान्तः साध्यो जायते। सर्वतन्त्रसिद्धान्तः साध्यश्चेति व्याघातः। अर्थापत्तितोऽधिकरणसिद्धान्तस्याभेद इति चेत्? अथापि मन्येथा अर्थापत्तितोऽधिकरणसिद्धान्तो न भिद्यते, भिद्यते[१]। वाक्यार्थप्रतिपत्तौ तद्विपरीतवाक्यार्थप्रतिपत्तिः अर्थापत्तिः, वाक्यानुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति॥३१॥

॥न्यायाश्रयसिद्धान्तलक्षणप्रकरणम्॥

[न्यायलक्षणप्रकरणम्]

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥१।१।३२॥

अवयवानां विभागोद्देशार्थं सूत्रम्। विभागोद्देशस्तु[२] नियमार्थः। किं नियन्तव्यम्? न[३] दशावयवं न[४] त्र्यवयवं च वाक्यम्। **एके** तावद् ब्रुवते दशावयवं वाक्यम्, **अपरे** त्र्यवयवमिति। उभयव्युदासात् पञ्चैवेति नियमज्ञापनार्थं[५] प्रतिज्ञादीनां विभागोद्देश इति। कथं पुनर्जिज्ञासादयः अवयवा न भवन्ति? पराप्रतिपादकत्वात्। परप्रतिपादका ये ते[६] वाक्यस्याङ्गभूता इतरेतरासंप्रत्यायितेनार्थेनार्थवन्तो वाक्याङ्गतामुपयान्ति तेऽवयवाः। वाक्याङ्गत्वमवयवार्थः। किं पुनर्वाक्यम्? यस्य प्रतिज्ञादिभिरुपकृतस्य विशेषावस्थापनमर्थः तद् वाक्यम्। वाक्यार्थं च[७] संहत्यैते पञ्च[८]

---

१. न भिद्यते, C २. ०श्च C ३,४. न om C ५. उभयनियमज्ञापनार्थः C ६. ते om C ७. च om C ८. एते पञ्च om J

निष्पादयन्तीत्यवयवा इत्युच्यन्ते, न पुनर्जिज्ञासादयः परप्रतिपादका इत्यतो न वाक्यस्यावयवा इति। निश्चितत्वाच्च, निश्चितश्च साधयिता भवति। न तस्य जिज्ञासासंशयौ स्तः। प्रयोजनमपि साधनादेव गम्यते। शक्यप्राप्तिश्चेति। न ह्यशक्यमप्रयोजकं वा कश्चित् साधयतीति। तस्मात् प्रयोजनशक्यप्राप्ती अपि न वाक्यावयवौ।

प्रकरणे तु जिज्ञासादयः समर्था इति **भाष्यम्**। प्रकरणमेते उत्थापयन्ति। न हि जिज्ञासादीनन्तरेण प्रकरणस्योत्थानमस्तीति प्रकरणोत्थापका [१]नावयवा जिज्ञासादयः। परप्रतिपादकत्वात् तु प्रतिज्ञादीनामयमधिकार इति ते [२]व्यपदिश्यन्ते। त्र्यवयवम् अपि वाक्यं यथा न भवति, तथोपनयनिगमनयोरर्थान्तरभावं प्रतिपादयिष्यन्तो वर्णयिष्यामः[३] ॥३२॥

साध्यनिर्देशः प्रतिज्ञा ।।१।१।३३।।

तेषां त्ववयवत्वेन सामान्येन संगृहीतानामितरेतरविशेषकं लक्षणमुच्यते— **साध्यनिर्देशः प्रतिज्ञेति**। तत्र प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यः। तस्य निर्देशः प्रतिज्ञा[४] परिग्रहवचनम्। उदाहरणम्, **अनित्यः शब्द** इति।

सिद्धत्वात् धर्मिणो न साध्यत्वमिति **केचित्**। धर्मी किल [५]शब्दलक्षणः सिद्ध एव। सिद्धश्च साध्यो न भवतीति। नैष दोषः, प्रज्ञापनीयधर्मविशिष्टस्येति वचनात्। न ब्रूमो धर्मिमात्रं साध्यम्, अपि तु प्रज्ञापनीयधर्मविशिष्टो धर्मी [६]साध्यः। यदि प्रज्ञापनीयः, न विशेषणम्। अथ विशेषणम्, न प्रज्ञापनीयः। नासिद्धं विशेषणं भवतीति सिद्धेनायं विशिष्यते [७]नासिद्धेनेति। सत्यम्, असिद्धमप्रज्ञातं[८] विशेषणं न भवति। प्रज्ञातं त्विदमनित्यत्वं घटे शब्दस्य साध्यमिति। एवं तर्हि शब्दस्यानित्यत्वं साध्यं न शब्द इति? शब्दस्येति विशेषणात् न दोषः। शब्दस्येति

---

१. न om J २. उपदि° C ३. वर्णयन्तो वक्ष्यामः C; द्रः वा १।१।३९ ४. प्रतिज्ञा om J ५. धर्म° C ६. इति C ७. न साध्येनेति C ८. असिद्धम् om C

ब्रुवता नानित्यत्वमात्रं साध्यत्वेनाभ्यनुज्ञायते, न धर्मिमात्रम्। किं तर्हि? धर्मिणः शब्दस्य प्रज्ञातस्य अनित्यत्वस्य चान्यधर्मत्वेन[१] योऽयं विशेषणविशेष्यभाव इतरेतरनियामकत्वेन नियमः स साध्यः। स चोभयाश्रयो भवति। उभयाश्रयत्वे सति [२]किमुक्तं भवति? धर्मी विशेषणं धर्मो वा विशेषणमिति, शब्दस्यानित्यत्वम् अनित्यत्वस्य वा शब्द इति? धर्मी विशिष्यत इति युक्तम्। सामान्यतोऽधिगतत्वात् विशेषतोऽनधिगतत्वाच्च विशेषप्रतिपादकत्वाच्चानुमानस्य न च पुनर्धर्मस्य सामान्याधिगमोऽस्ति। न नास्ति। किमयं धर्मः शब्दस्य उतान्यस्य घटस्येति[३]? एवं तर्हि शब्दस्यानित्यत्वमित्ययमर्थः साध्यः। तस्य च न कृतकत्वादियोग इति युक्तम्। प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यः। तस्य निर्देशः प्रतिज्ञा।

उभयावधारणप्राप्तावन्यतरावधारणे च दोषः। यदि साध्यनिर्देशः प्रतिज्ञेति प्रतिज्ञालक्षणम्, ततः पूर्वोत्तरे द्वे अवधारणे न कल्प्येते। कथम्? साध्यनिर्देश एव प्रतिज्ञेति प्रतिज्ञावधृता, न साध्यनिर्देशः। प्रतिज्ञा अन्यथा नास्ति, साध्यनिर्देशोऽन्यथाप्यस्तीति प्राप्तम्। ततश्च साध्यनिर्देशो न प्रतिज्ञा अवधृता अतो न साध्यनिर्देशो लक्षणम्[४], व्यतिरेकित्वादिति। अथ साध्यनिर्देशः प्रतिज्ञैवेति साध्यनिर्देशोऽवधृतः न प्रतिज्ञा, साध्यनिर्देशोऽन्यथा नास्ति, प्रतिज्ञान्यथाप्यस्तीति। एवमपि साध्यनिर्देशो न प्रतिज्ञालक्षणम्, अव्यापकत्वात्। यदपि व्यतिरेकि तदप्यलक्षणम्, यथा विषाणित्वं गोः। यदप्यव्यापकं तदप्यलक्षणं यथा गन्धवत्त्वं द्रव्यस्य। अथ पूर्वोत्तरेऽवधारणे न क्रियेते, तथापि किल वाक्यमनर्थकं भवति, न चान्या गतिरस्ति। तस्मात् साध्यनिर्देशः प्रतिज्ञेति न युक्तम्।

सर्वस्मिन् वाक्येऽवधारणमिति[५] तु न बुध्यामहे। तद् यथा, गोपालकेन मार्गेऽपदिष्टे एष पन्थाः श्रुघ्नं गच्छतीति नावधारणस्य विषयं पश्यामः। अवधारणस्य तु विषयः सामान्यश्रुतौ नियमः। येन वाक्येन समानश्रुत्या अनेकोऽर्थो गम्यते,

---

१. प्रज्ञातस्य नित्यत्वस्याधर्मत्वेन C var. २. उक्तं भवति om J ३. घटस्येति om J ४. अवधृतातो न साध्यनिर्देशो om J ५. असाधारणमिति C var

तत्रातिप्रसक्तावतिप्रसङ्गनिराकरणार्थमवधारणमिति, न पुनः साध्यनिर्देशः प्रतिज्ञेत्युक्ते क्वचित् प्रसङ्गोऽस्ति यन्निराकरणायावधारणं क्रियेत। सर्वत्र[1] चावधारणं कुर्वाणो लोकं बाधते। यत्र च विशेषणस्यावकाशः तत्रावधारणस्यापीति नायं दोषः। पूर्वोत्तरेऽवधारणे न कल्प्येते इति।

ननु च साध्यनिर्देशः प्रतिज्ञेत्युक्ते साध्ययोर्हेतुदृष्टान्तयोरपि प्रसङ्गः। यथा अनित्यः शब्दश्चाक्षुषत्वात्, नित्यः शब्दोऽस्पर्शत्वात् बुद्धिवच्चेति। न, **सूत्रा**र्थापरिज्ञानात्। साध्यनिर्देशः प्रतिज्ञेति प्रज्ञापनीयधर्मविशिष्टस्य धर्मिणः परिग्रहवचनम्। न च चाक्षुषत्वं प्रज्ञापनीयधर्मविशिष्टस्य धर्मिणः परिग्रहवचनम्, अपि तु धर्मनिर्देशोऽयं चाक्षुषत्वादिति। तथा बुद्धेर्नित्यत्वमिति[2]। अथ पुनः साध्यनिर्देशग्रहणादसाध्यनिर्देशनिवृत्तिः? साध्यनिर्देशग्रहणात् किलासाध्यनिर्देशो निवर्त्यते। असाध्यं च द्वेधा सिद्धमनुपपद्यमानसाधनं च। तत्र साध्यनिर्देश [3]इत्यनेनोभयं निवर्त्यते सिद्धमनुपपद्यमानसाधनं च। तत्रानुपपद्यमानसाधनं शब्दाचाक्षुषत्वं बुद्धिनित्यत्वं च। तस्मात् न तत्र प्रसङ्गः। अथ पुनः कृतकत्वाद्यन्यतरपक्षसिद्धं साधनं साध्यतयोपादीयते[4] तदा कृतकत्वादेः साध्यनिर्देशस्य प्रतिज्ञात्वं प्राप्तमिति।

नैष दोषः, विकल्पानुपपत्तेः। यदि तावदेवं ब्रवीति कृतकत्वं साध्यमिति, तदा न[5] **सूत्रा**र्थापरिज्ञानादिति परिहारः। अथ कृतकः शब्द इत्येतत् साध्यमित्येवं प्रत्यवतिष्ठते, तदाभ्युपगम एव दोषत्वेन दर्शित इति न किञ्चिद् बाध्यते। यच्चेदमुच्यते, असाध्यनिर्देशनिवृत्तिद्वारेण साध्यनिर्देशः प्रतिज्ञेत्युच्यत इति, तद्विधीयमानप्रतिषिध्यमानशब्दार्थाभ्युपगमात् नियमो न युक्तः। क्वचिद् वाक्ये विधीयमानोऽर्थोऽभिधीयते, क्वचित् प्रतिषिध्यमान इति। एकान्तवादिनस्तु दोषः। यथा न प्रतिषिध्यमान एव पदार्थो भवति तथोपरिष्टात् वक्ष्याम इति। साध्यनिर्देश इति च प्रतिज्ञायां साध्ययोः हेतुदृष्टान्तयोः प्रसङ्ग इति। न

---

१. च सावधा॰ C २. °त्वमपि C ३. इत्यनेन वचनेनो॰ C ४. °सिद्धं साध्यतयाप्युपाददीत C ५. न om C

प्रसङ्गः, सिद्धान्तविशेषणत्वात् साध्यशब्दस्य, सिद्धान्तविशेषणोऽयं साध्यशब्दो न साध्यमात्रम्। तथा च कः प्रसङ्गो हेतुदृष्टान्तयोः? सिद्धान्तश्चानन्तरोक्त्या साध्यशब्दस्य विशेषणं भवति सिद्धान्तानन्तरमवयवाभिधानात्। यद्यनन्तरोक्त्या सिद्धान्तो विशेषणं तन्निर्देशः प्रतिज्ञेति कार्यम्? न, सर्वतन्त्रसिद्धान्तनिराकणार्थत्वात्। यदि तन्निर्देशः प्रतिज्ञेत्यभिधीयते[१] सर्वतन्त्रसिद्धान्तोऽपि प्रकृतत्वात् तच्छब्देनानुकृष्येतेति तन्निर्देशोऽपि प्रतिज्ञा भवेदिति[२]। अतः साध्यग्रहणेन साध्यसिद्धान्तः संबध्यते, न [३]सर्व इति। सामर्थ्यात् सर्वतन्त्रसिद्धान्तनिराकरणमिति चेत्? यद्यप्ययं सामान्यशब्दः तन्निर्देशः प्रतिज्ञेति, तथापि सामर्थ्यात् सर्वतन्त्रसिद्धान्तो निराक्रियते, सर्वतन्त्रसिद्धान्तस्यासाध्यत्वात्, इतरस्य च प्रतितन्त्रादेरवस्थायां साध्यत्वादिति। उदाहरणम्, ब्राह्मणान् भोजयेति। यथा अशेषब्राह्मणभोजनस्याशक्यत्वात् सामर्थ्यान्नियम इति। यदि सामर्थ्यमाश्रीयते[४] समस्तस्यानभिधानम्, तन्निर्देशः प्रतिज्ञा इत्येतदपि न कर्तव्यम्। प्रतिज्ञा प्रतिज्ञेति वक्तव्यम्। सामर्थ्यतो नियमो गम्यत इति। मा वोचः, किं नो बाध्यत इति। कथं न बाध्यते? यदभ्युपगतं तन्निवर्तते, तन्निर्देशः प्रतिज्ञेति। जिज्ञासादिविशेषणं वा[५] न प्रसङ्गः साध्यनिर्देशः प्रतिज्ञेति। जिज्ञासादिभिः प्रकरणोत्थापकावयवैर्विशेषितमिदं वाक्यं साध्यनिर्देशः प्रतिज्ञेति। यस्मिन्नर्थे जिज्ञासादयः सोऽर्थः साध्य इति, तस्य निर्देशः प्रतिज्ञेति। तथा च हेतुदृष्टान्तयोः कः प्रसङ्गः? अर्हत्यर्थे वा कृत्याभिधानम्। साध्यनिर्देशः प्रतिज्ञेत्यर्हत्यर्थे कृत्यः। साधनमर्हतीति साध्यः। तस्य निर्देशः प्रतिज्ञा। न च हेतुदृष्टान्तौ साधनार्हावतोऽपि न प्रसङ्गः।

कर्मकरणयोर्धर्मभेदात् वा, अन्यः कर्मधर्मोऽन्यश्च करणधर्म इति। कर्तुरीप्सिततमं कर्म[६] इति कर्मधर्मः, साधकतमं करणम्[७] इति करणधर्मः। न चेतरस्य धर्म इतरधर्मो भवितुमर्हतीति। कर्मनिर्देशश्चायं साध्यनिर्देशः प्रतिज्ञेति।

---

१. °त्युच्यते C २. °ज्ञेति स्यात् C ३. सर्वतन्त्रसिद्धान्त इति C ४. °स्थीयते C
५. °षणाद् वा C ६. पा॰ सू॰ १।४।४९ ७. पा॰ सू॰ १।४।४२

करणनिर्देशश्चाक्षुषत्वादिति। अतोऽपि न प्रसङ्गः। साध्यासिद्धसिद्धभेदाद् वा। अन्यत् साध्यम्। अन्यत् सिद्धम्। अन्यच्चासिद्धमिति। साध्यमन्यतरपक्षसंप्रतिपन्नमन्यतरं प्रति कर्मतया यदुपादीयते। उभयपक्षासंप्रतिपन्नमसिद्धम्। उभयपक्षसंप्रतिपन्नं सिद्धमिति। तेन यथा सिद्धमित्युक्ते न साध्ये नासिद्धे च प्रसङ्गः, तथा साध्यमित्युक्ते नासिद्धे सिद्धे च प्रसङ्ग इति। अथाप्रसक्तमपि चोद्यते सर्वेऽर्थाः सिद्धा अपि प्रतिज्ञात्वेन चोदनीया भवन्ति। अथवा साध्यनिर्देशः प्रतिज्ञेति प्रतिज्ञाद्यवयवविषयो योऽर्थः स साध्यः। यः प्रतिज्ञादीनामवयवानां विषयो [१]धर्मी प्रसिद्धधर्मविशिष्टः स धर्मान्तराधिकरणत्वेन साध्यते, तथा च हेतुदृष्टान्तयोः कः प्रसङ्गः?

न चेदयं प्रसङ्गोऽस्ति तस्मादिष्टग्रहणमनर्थकम्, साध्यनिर्देशः प्रतिज्ञेति किल साध्यस्येष्टग्रहणेनाविशेषितत्वात्। साध्ययोर्हेतुदृष्टान्तयोः प्रसङ्ग इति मन्यमानैः **कैश्चित्** अन्यथा पक्षलक्षणानि क्रियन्ते। तद्यथा

पक्षो यः साधयितुमिष्टः

इति। अत्रेष्टग्रहणं न कर्तव्यम्, अनर्थकत्वात्[२]। साध्यपदेन हेतुदृष्टान्ताभासोक्तेर्निराकृतत्वात् तन्निराकरणार्थमिष्टग्रहणमयुक्तम्। कर्मग्रहणाच्च प्राप्तमेतदिष्टमीप्सितमिति चानर्थान्तरम्। अथाप्यनिष्टपक्षव्युदासार्थमिष्टग्रहणं क्रियेत, अर्थतः किलास्यानिष्टम्। नेष्टं तद् भवति यत् स्ववचनादिना विरुद्धमिति। यथा अवाचकाः शब्दा इति। अवाचकत्वं च शब्दानां प्रतिज्ञायते, शब्दा एवार्थप्रत्यायनायोच्चार्यन्त इति व्याहतम्। अनुष्णोऽग्निरिति प्रत्यक्षविरोधः।

अश्रावणः शब्द इति प्रत्यक्षविरोधं **केचिद्** वर्णयन्ति। तदयुक्तम्। इन्द्रियवृत्तीनामतीन्द्रियत्वात्। इन्द्रियवृत्तयोऽतीन्द्रियाः। इदमनेनेन्द्रियेण गृह्यते, नेदमनेनेति [३]च कस्यचित् प्रत्यक्षमस्ति, अपि तु[४] तद्भावाभावानुविधानात्।

---

१. धर्मो C २. °ग्रहणं तावदनर्थकम् C ३. न C ४. प्रत्यक्षं किं तु C

रूपादिज्ञानैरिन्द्रियवृत्तयोऽनुमीयन्ते। तस्मात् नेदमुदाहरणम्। उदाहरणं त्वनुष्णोऽग्निरिति युक्तम्।

आगमविरुद्धमपि **वैशेषिकस्य** नित्यः शब्द इति। [१]इदमपि नागमविरुद्धमिति पश्यामः। न हि **वैशेषिकेण** शब्दानित्यत्वमागमतः प्रतिपन्नम्, अपि त्वनुमानात्

कारणतो विकारात्[२]

इत्येवमादेः एतदप्यनुमानविरुद्धमेव। अथ **सूत्रकार**वचनात् प्रतिपन्नम् इत्यागमविरोधः? ननु च नित्यो घट इत्ययमप्यागमविरोधः प्राप्तः। तस्मात् ब्राह्मणेन सुरा पेयेत्यागमविरोधः। प्रसिद्धिविरुद्धं तु न बुद्ध्यामहे कोऽयं प्रसिद्धिविरोध इति। प्रसिद्धिः प्रत्यक्षादीनां प्रमाणानामन्यतमेनार्थप्रतिपत्तिः। तद् यथा अचन्द्रः शशीति। तस्मात् पूर्वप्रमाणविरोध एवान्तर्भवतीति न प्रसिद्धिविरोधाभिधानेन पृथक् प्रयोजनं पश्यामः। शक्यं तु वक्तुं[३] सर्व एवायं प्रसिद्धिविरोध इति। एतदर्थनिराकरणार्थमिष्टग्रहणं पठन्ति।

एतच्च सर्वं न युक्तमिति पश्यामः। कथम्? स्वार्थापवादादिदोषाणां प्रतिज्ञादोषत्वेनाभ्युपगमात्। सर्व एते स्वार्थापवादादिदोषाः प्रतिज्ञादोषत्वेन संभवन्ति, न पक्षदोषत्वेन। कथमिति? अर्थस्य तादवस्थ्यात्। यथाभूतोऽर्थोऽभिधीयमानः तथाभूत एवानभिधीयमान इति। वचनमपि तर्ह्येवमेवेति चेत्? वचनेऽप्येते दोषा मा भूवन्। सत्यं नामी अर्थदोषाः, न वचनदोषाः, किं तु पुरुषदोषाः। ये हि कर्तृदोषास्ते क्रियाद्वारेण उद्भाव्यन्त इति क्रियायां कर्तृदोषानुपचर्य दुष्टा क्रियेत्युच्यते। एवं वक्तृदोषान् वचने उपचर्य दुष्टं वचनमित्युच्यते। मुख्यतस्तु नार्थे दोषाः, न वचने दोषा इति। अर्थस्य स्वक्रियासु सामर्थ्यात् सर्वोऽर्थः स्वस्यां स्वस्यां क्रियायां समर्थः। स तु स्वक्रियाव्यतिरेकेण क्रियान्तरे विनियुज्यमानः कर्तुरेवाकौशलं प्रकाशयति। एवं वचनमपि स्वस्मिन् स्वस्मिन्नर्थे समर्थं विषयान्तरेषु प्रयुज्यमानं वक्तुः संमोहं प्रकटयति।

---

१. यथेदम् C २. वै. सू. (च) २.२.३४ ३. प्रतिपत्तुं C

अथ[१] प्रतिज्ञायाः पक्षविषयत्वात् प्रतिज्ञादोषाः पक्षदोषा इत्युच्यन्ते। नैतद् युक्तम्, हेत्वादिदोषाणामपि पक्षदोषत्वप्रसङ्गात्। एवं सति हेत्वादयोऽपि पक्षविषया इति कृत्वा हेत्वादिदोषा अपि पक्षदोषा [२]एव। ततश्च दूषणं पक्षदोषा इति वक्तव्यम्। न पुनर्दूषणानि न्यूनतावयवोत्तरदोषाक्षेपभावोद्भावनानीति। अथ वाच्य-वाचकभावेन नियमो भविष्यति, न साध्यसाधनभावेनेति? नैतद् युक्तम्, प्रमाणा- भावात् साधनविषयत्वेन व्यवतिष्ठते पक्षो वचनविषयत्वेन च। तत्र वाच्यवाचक-भावनियमाद् वचनदोषाः पक्षे भवन्तु, मा भूवन् साध्यसाधनभावात्। साधनदोषाः पक्षदोषा इति न प्रमाणमस्ति। वचनदोषाश्च पक्ष उपचर्यन्त इति। न हि संभवे सत्युपचारो लभ्यते। तद्यथा मञ्चाः क्रोशन्तीति क्रोशनक्रियाया मञ्चेष्वसंभवात् लौकिकप्रयुक्तवाक्यान्वाख्यानं कुर्वता मञ्चस्थाः पुरुषा इति स्थानिषु पुरुषेषु मञ्चशब्दमारोप्य प्रमाणासंभवेनोपचारः क्रियते मञ्चाः क्रोशन्तीति। न पुनः [३]प्रतिज्ञा-दोषाः प्रतिज्ञायां न संभवन्ति। यतः तत्रासंभवन्तोऽवश्यमन्वाख्येयतया व्यवस्थिताः पक्षे उपचर्येरन्निति। आकस्मिकं च मुख्यार्थव्यतिक्रमं कुर्वाणेन यदुक्तं **नैयायिक**-हेतुप्रतिषेधेनाकस्मिको मुख्यार्थव्यतिक्रमो लभ्यत इति तद् व्याहन्येत।

अथेष्टग्रहणेन लौकिकोऽर्थोऽभिधीयते इष्टमभिप्रेतमिति[४]। अयमप्यर्थः साधनादेव गम्यते। न हि कश्चिदनिष्टं साधयति। योऽप्यनिष्टभयात् साधयति तस्याप्यनिष्टनिवृत्तिरिष्टेति नानिष्टं साधयति। तस्मादिष्टग्रहणमनर्थकम्। एवं

विचारणायामिष्टोऽर्थः पक्ष

इत्यत्रापीष्टग्रहणं न कर्तव्यम्[५]। का चेयं विचारणा? यदि साधनदूषणप्रयोगः, तत्रानेकार्थसन्निपाते न ज्ञायते कथमिष्टमिति? किं साध्यत्वेन, [६]उत साधनत्वेन; दूषणत्वेन उत दूष्यत्वेन [७]इति। अथ संशयो विचारणा? तद्यथा आत्मनोऽस्तित्वना-स्तित्वविचारणायामिति। आत्मनोऽस्तित्वनास्तित्वसंशय इति यावदुक्तं भवति,

---

१. अथ om C २. भवन्तु C ३. प्रतिज्ञादिदोषाः C ४. °प्रेतमपि मे मतमिति C ५. °ग्रहणमनर्थकम् C ६. उत om C ७. वेति C

तावदिदमुक्तं भवति आत्मनोऽस्तित्वनास्तित्वविचारणायामिति। संशयो विचारणापदस्य नार्थः, नापि विचारणा संशयपदस्य। विचारणा हि नाम संशयोत्तरकालभाविनी साधनदूषणप्रयोगरूपा अन्यतराधिकरणनिर्णयावसाना सा न संशय इति। संशयः पुनरनवधारणात्मकः प्रत्यय इति। न च वादे संशयो भवति, उभयोर्निश्चितत्वात्। निश्चितौ हि वादं कुरुत इति।

एतेन

साध्यत्वेनेप्सितः पक्षः

इत्यपि प्रत्युक्तम्। ईप्सितग्रहणस्य चानिष्टनिराकरणार्थत्वात्

विरुद्धार्थानिराकृतः

इति न वक्तव्यम्। पक्षो यः साधयितुमिष्टः इत्यत्रेष्टग्रहणेनानिष्टपक्षनिराकरणमिति इहापि ईप्सितग्रहणादनिष्टपक्षनिरास इत्युत्तरकारिकार्द्धं न कर्तव्यम्, विरुद्धार्थानिराकृत इति। अथ विरुद्धार्थानिराकृत इत्यनेनानिष्टाः पक्षदोषा निराक्रियन्ते, ईप्सितग्रहणं तर्हि व्यर्थम्। अथोभयमीप्सितग्रहणं विरुद्धार्थानिराकृत इति च पक्षदोषाणां निराकर्तृ, तथापि पक्षो यः साधयितुमिष्ट इत्यत्रापि विरुद्धार्थानिराकृत इति कर्तव्यम्। सर्वथैते पक्षलक्षणे विचार्यमाणे एकस्य न्यूनत्वमन्यस्याधिक्यं ख्यापयत इति। स्वयं साध्यत्वेनेप्सित इति च स्वयंग्रहण न कर्तव्यम्। किं कारणम्? कर्मणः कर्त्रपेक्षत्वात्, यथा कर्ता वृक्षं छिनत्तीत्युक्ते स्वयमिति गम्यते, न ह्यन्यस्य च्छेद्यो वृक्षोऽन्यश्छिनत्तीति[१], एवं यस्य साध्यः स एव साधयितेति स्वयमिति गम्यते। सोऽयं परस्याक्षराधिक्यदोषान् विचिन्वानः स्ववचनप्रयोगे संमूढ इति।

यदपि **वादविधानटीकायां** साधयतीति शब्दस्य स्वयं परेण च तुल्यरूपत्वात्[२] स्वयमिति विशेषणम्, साधयतीति किलायं शब्दः प्रयोज्ये प्रयोक्तरि च तुल्यरूपो भवतीति। सत्यम्, तुल्यरूप एष शब्दो न पुनः साधारणप्रयोगे प्रयोजनं

---

१. °च्छेद्यमन्य° C २ तुल्यत्वात् C

पश्याम:। अत एवं वक्तव्यम्, पक्षो य: साधयितुमिष्ट इति। तत्त्वभाक्तयोश्च तत्त्वसंप्रतिपत्ति: प्रयोक्तर्यसंप्रतिपत्ति:, यद्यप्ययं तुल्यरूप: शब्दस्तथापि प्रयोज्य एव संभवति साधयतीति। न प्रयोक्तरि भाक्तत्वात् प्रयोज्ये चाङ्गसत्वात्। तुमुनश्च समानकर्तृकेष्वेव नियमात्। साधयितुमिति तुमुन: प्रयोगोऽयम्। स चायं समानकर्तृकेष्वेव दृष्ट:। तद्यथा स्नातुं गच्छामीति। न पुनरनुन्मत्त एवं ब्रूयात् स्वयं स्नातुं गच्छामीति। तथेहापीति। यद्यपि साधयति शब्दस्तुल्यरूपस्तथापि तुमुना विशेषितत्वात् प्रयोक्तर्यनतिप्रसङ्ग:[१]। यदपि स्वयंशब्देन च शास्त्रानपेक्षमभ्युपगमं दर्शयतीति अत्रोक्तम्, किमुक्तम्? परावज्ञानस्यायुक्तत्वात् इत्येवमादि। किं पुन: शास्त्रं यदनपेक्षमभ्युपगमं दर्शयति? ननु च शास्त्रं प्रत्यक्षानुमानाभ्यामविरुद्धम्[२] आगम: तदनपेक्षमभ्युपगमं दर्शयतीति ब्रूवता अप्रमाणकमर्थमभ्युपैतीत्युक्तं भवति[३]। यश्चाप्रमाणकोऽभ्युपगमो नासावभ्युपगन्तुं स्वस्थात्मना युक्त:, नापि प्रतिपादयितुं शक्य इति।

यद्यपि **वादविधौ** साध्याभिधानं प्रतिज्ञेति प्रतिज्ञालक्षणमुक्तं तदप्युभयथा दोषात् न युक्तम्। कथमिति? यदि तावत् पूर्वप्रकृतपक्षमपेक्षमाणेनेदमुच्यते साध्याभिधानं प्रतिज्ञेति, तदा साध्यग्रहणं व्यर्थम्[४]। प्रकृत: पक्षस्तच्छब्देनाभिसंभन्त्स्यत इति तदभिधानं प्रतिज्ञेति वक्तव्यम्। अथ पक्षानपेक्षं स्वतन्त्रमेतत् लक्षणम्, तथापि यो **नैयायिक**प्रतिज्ञायां दोष उक्त: स इह प्रसक्त:। यस्तु तत्रभवता परीहार: क्रियते, ममापि स एव परीहारो भविष्यतीति न [५]युक्तम्, [६]तस्य मयानभ्युपगमात्, भवता चाभ्युपगतत्वात्। यथा नाम कश्चित् परं ब्रूयात् माता ते बन्धकी स्त्रीत्वादिति, स तस्योत्तरं ब्रूयात् न बन्धकीत्वे स्त्रीत्वं हेतु: किं तु स्वपुरुषव्यतिरेकेण पुरुषान्तरसंबन्ध इति। स्त्रीत्वाद् बन्धकीत्वं ब्रूवाणस्य स्वस्या[७] मातुर्बन्धकीत्वमपरिहार्यम्। अथ परपुरुषसंबन्धं हेतुमभ्युपेयात् स्त्री-

---

१. प्रयोक्तर्यप्रसङ्ग: J २. °क्षागमाभ्या°द्धम् C ३. भवति om C ४. °ग्रहणानर्थक्यम् C ५. वक्तव्यम् C ६. तस्य om C ७. स्वस्या: om C

त्वाद् बन्धकीत्वं व्याहतं भवति, तथा भवतोऽपीति व्याघातः साध्ययोर्हेतु-दृष्टान्तयोर्निर्देशः प्रतिज्ञा प्राप्नोति। तस्मादपेतसर्वदोषमिदं वाक्यं साध्यनिर्देशः प्रतिज्ञेति॥३३॥

उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः ॥१।१।३४॥

हेतोरवसरप्राप्तस्य लक्षणापदेशद्वारेण सूत्रम्—**उदाहरणसाधर्म्यादि**ति। उदाहरणेन साधर्म्यमुदाहरणसाधर्म्यम्। किं पुनरुदाहरणम्? वक्ष्यमाणकम्। तेन साधर्म्यं समानधर्मता। यो धर्मः साध्ये भवति तथाभूत एवोदाहरणेऽपीति, न पुनः स एव, अन्यधर्मस्यान्यत्रावृत्तेः। न हि अन्यस्य धर्मोऽन्यत्र वर्तते, किं तु तत्तुल्यः स एवेत्युच्यते।

यदि पुनः साधर्म्यं हेतुरित्येतावन्मात्रमुच्येत[१] भवत्वेवं विवक्षितार्थसिद्धिः, अनिष्टप्रतिषेधस्तु न स्यात्। साधर्म्यमात्रं [२]हेतुरित्येतावता अनिष्टप्रतिषेधो न स्यादित्यतोऽनिष्टप्रतिषेधार्थमुदाहरणसाधर्म्यग्रहणम्। उदाहरणसाधर्म्यग्रहणादनुदाहरणसाधर्म्यमर्थात् निराकृतं भवति। अवधारणेन वा निराक्रियते। उदाहरणेनैव साधर्म्यमुदाहरणसाधर्म्यम्[३], न पुनरनुदाहरणेनापि साधर्म्यमेव उदाहरणेन[४], न पुनर्वैधर्म्यमपीति। कस्य पुनरुदाहरणेन साधर्म्यम्? कस्यान्यस्य [५]पुनः स्यात्, साध्यस्य प्रकृतत्वात् प्रत्यासत्तेश्च। प्रकृतं प्रत्यासन्नं च साध्यम्। तस्मात् उदाहरणसाधर्म्यं साध्यस्य। अत्रापि च साध्येन[६] साधर्म्यमिति साधर्म्यमेवेत्यवधार्यते, [७]न पुनः साध्यस्यैव। किं पुनरनेनावधारणेन लभ्यते? साध्यैकदेशवृत्तिरहेतुरिति, [८]एतत् लभ्यते। सोऽयं हेतुः साध्योदाहरणाभ्यां प्रतिसंहितः। किं

---

१. °मुच्यत इति J २. हेतुरित्यतो C ३. उद°र्म्यं om C ४. उदाहरणेन om C ५. पुनः om J ६. साध्यस्य J ७. न °स्यैव om C ८. एतत् om C

पुनरस्य प्रतिसन्धानम्? साध्ये व्यापकत्वम्, उदाहरणे च [१]संभवः। एवं द्विलक्षण-स्त्रिलक्षणश्च हेतुर्लभ्यते। उदाहरणेनैव साधर्म्यमित्येवं ब्रुवतानभ्युपगतविपक्ष-स्याप्युदाहरणेनैव साधर्म्यमिति द्विलक्षणोऽपि हेतुर्भवतीत्युक्तम्। यदा पुन-र्विपक्षमभ्युपैति तदाप्युदाहरणेनैव साधर्म्यं नानुदाहरणेनेति त्रिलक्षणो हेतुरि-त्युक्तं भवति। [२]तत्र द्वावन्वयव्यतिरेकिणौ यथा **वैशेषिकस्य** अनित्यः शब्दः कृतकत्वात् सामान्यविशेषवतः अस्मदादिबाह्यकरणप्रत्यक्षविषयत्वाच्चेति[३]। द्वावन्वयिनौ यथा सर्वानित्यतावादिनः अनित्यः शब्दः प्रमेयत्वात् अमूर्तत्वाच्चेति। तदेवमन्वयव्यतिरेकभेदवान् अन्वयभेदवांश्चतुष्प्रकारो हेतुरित्युक्तं भवतीति। तदेवं हेतुस्वरूपावधारणाद् हेत्वाभासा निराकृता भवन्ति। तत्रोदाहरणेनैव साधर्म्य-मिति[४] विपर्ययहेतोरनैकान्तिकस्य च निराकरणम्। साधर्म्यमेवोदाहरणेने-त्यनेनावधारणेन साध्यावृत्तिः साध्यैकदेशवृत्तिश्च निराक्रियत[५] इति। तत्र तावद् विपर्ययहेतुरश्वोऽयं विषाणित्वात्। गौर्विषाणित्वादित्यनैकान्तिकः[६]। साध्यावृत्ति-श्चाक्षुषत्वादनित्यः शब्द इति। साध्यैकदेशावृत्तिरनित्याः परमाणवो गन्धवत्त्वादिति। स्वरूपतस्तर्हि अनैकान्तिकादिग्रहणं न कर्तव्यम्। यद्यनेन हेतुलक्षणेन एवं भाव्यमानेनार्थादनैकान्तिकादयो[७] निराक्रियन्ते, नन्वनैकान्तिकः सव्यभिचार[८] इत्येव-मादि**सूत्रा**नारम्भः। नातिप्रसक्तस्य नियमार्थत्वात् अनेकधा हेत्वाभासा भिन्ना इति तेषां नियमज्ञापनार्थमनैकान्तिकादिग्रहणमिति।

उदाहरणसाधर्म्याच्च किमन्यत् साध्यसाधनमित्**येके**। न किलोदाहरणसाधर्म्य-व्यतिरेकेण [९]अन्यत् साध्यसाधनमस्तीत्यत एवं **सूत्रं** कर्तव्यम्, उदाहरणसाधर्म्यं हेतुरिति। अथ पुनः साध्यसाधनशब्दोपादानमुदाहरणसाधर्म्यविशेषणार्थम्, एव-मपि पञ्चम्यपदेशो निरर्थक इति। न हि भवति नीलादुत्पलमिति। **अन्ये** तु पञ्चम्यपदेशानर्थक्यमन्यथा वर्णयन्ति। अर्थान्तरे दृष्टत्वात् इहानर्थक इति। अर्थान्तरे

---

१. असंभव C २. तदेवं द्वावप्यन्व° C ३. °द्वेति C ४. °त्यनेन C ५. °कृत C
६. द्रः वै. सू. (च) ३.१.१२ ७. °हेत्वादयो C ८. न्या. सू. १.२.५ ९. अन्यत् om C

किल पञ्चमी दृष्टा, यथा ग्रामादागच्छति।[१] न [२]पुनरुदाहरणसाधर्म्यव्यतिरेकेणान्यत्[३] साध्यस्य साधनम् अस्तीत्यतः पञ्चम्यपदेशोऽनर्थक इति। [४]साध्यसाधनविशिष्टं चोदाहरणसाधर्म्यं हेतुरिति ब्रुवाणेनाभिधेयो हेतुरित्युक्तं भवति। तथा च साध्यनिर्देशः प्रतिज्ञेति व्याहतं भवति। न चाभिधानाभिधेयात्मकः समुदायो दृष्ट इति [५]नोभयेषामवयवत्वम्। तत्र त्वेष दोषो न [६]परिहारवाक्यं प्रयोजयति, तेनैवापाकृतत्वात्। उदाहरणसाधर्म्यात् साध्यसाधनवचनं हेतुरित्येवं व्याचक्षाणेन समस्त एव दोषोऽपाकृतो भवतीति। अतो न परिहारवाक्यं[७] प्रयोजयति। साधर्म्यस्य व्यभिचार्यव्यभिचारित्वाद् विशेषणयोगो न तद्वचनस्यापकारकत्वात्। यत् तत्प्रकारवत् तद् विशेष्यते, साधर्म्ये चैतदस्ति न च वचसीति। वचसः [८]प्रकारवत्त्वं न संभवतीति न बुद्ध्यामहे, यथैवार्थः प्रकारवान् तथा वचोऽपीति। [९]अर्थः कथं प्रकारवान्? उभयथाभावात्, यस्मादसावर्थ उभयथा भवति, नित्योऽनित्यः, मूर्तोऽमूर्तश्च, वचनमपि तर्ह्युभयथा भवतीति तुल्यं नित्यानित्यमूर्तामूर्तशब्दाभिधेयम् इति। दृष्टश्च शब्दे विशेषणप्रयोगः। यथा किमयमाह, गौरित्ययमाह इति। इतिपरतया शब्दः शब्दान्तराद् व्यवच्छिद्यते। स्वयं वचनविशेषकाणि बहूनि वाक्यानि प्रयुक्तानि। तद्यथा स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वाद इति। अथ वचनं नैव विशिष्यते[१०], सिद्ध्यसिद्ध्यर्थं वचनं वाद इत्येवमादि व्याहतम्। सोऽयं सूक्ष्मेक्षिकया परस्य दोषानभिदधानो लोकादप्यपभ्रष्ट इति।।

यदप्यर्थान्तरे दृष्टत्वादिहानर्थकः[११] पञ्चम्यपदेश इति? एवं ब्रुवाणः स्वसिद्धान्तं बाधते। न हि भवन्तः सेनावनादीन्यर्थान्तरभूतानि प्रतिपद्यन्ते। अथ च पञ्चम्यपदेशो भवति वनादयं वृक्ष आनीतः सेनातोऽश्व इति। दृष्टश्च तन्त्रान्तरे पञ्चम्यपदेशः अनर्थान्तरे

---

१. °मादिति C २. °रिहोदा° C ३. अन्यत् om C ४. °विशिष्टे चोदाहरणे साधर्म्यहेतुत्वेन ब्रुवाणो नाभि° C ५. नैवोभ° C ६ °हारान्तरं C ७. °हारान्तरं C ८. कारकत्वं न भव° C ९. वचनमपीति, अर्थस्तावत् C १०. नैवंविधमिति C ११. °दित्यन° C

सन्धिविग्रहाभ्यां षाड्गुण्यं संपद्यत

इति। अनभ्युपगतार्थान्तरविपक्षस्य च हेतुर्विपक्षाद् विशेष इति पञ्चम्या अर्थान्तरवाचकत्वं कुतः? यदप्युदाहरणसाधर्म्यस्येति वक्तव्यम्, नोदाहरणसाधर्म्यादिति तदपि न, विवक्षातः कारकशब्दप्रयोगात्। यदा साधर्म्यमभिधीयमानतया विवक्षितं भवति, तदा उदाहरणसाधर्म्यस्येति युक्तम्। यदा तूदाहरणसाधर्म्यस्य निमित्तभावो वचनेऽपि विवक्षितः, तदोदाहरणसाधर्म्यादिति निमित्तपञ्चमी युक्ता। कथं पुनरुदाहरणसाधर्म्यस्य निमित्तभावः? सति भावात्, यस्मादुदाहरणसाधर्म्यं बुद्ध्वा विवक्षाप्रयत्नवायूदीरणताल्वाद्यभिघातादयः शब्दस्य निमित्तं भवन्ति। अतः पारम्पर्येणोदाहरणसाधर्म्यमपि निमित्तमिति। तस्मात् पञ्चम्यभिधानमेव ज्यायः।

उदाहरणम्, अनित्यः शब्द उत्पत्तिधर्मकत्वादिति। उत्पत्तिधर्मकमनित्यं स्थाल्यादि दृष्टमिति। किं पुनरिदमनित्यं नाम? यस्यानित्यत्वमस्ति[१], तदनित्यम्। अथानित्यत्वं किम्? [२]उभयान्तपरिच्छिन्नवस्तुसत्तासंबन्धः, सत्ता वा तद्विशेषणा। अथोत्पत्तिधर्मकं किम्? उत्पत्तिर्धर्मो यस्य स उत्पत्तिधर्मा। उत्पत्तिधर्मैवोत्पत्तिधर्मकः। का पुनरियमुत्पत्तिः? असद्विशेषणस्य सतोऽत्यन्तमभावभावप्रतिषेधः। यदसद्विशेषणं सद्भवति तत् पूर्वं नासीत् पश्चाद् भवतीति गम्यते, तस्य [३]नात्यन्तमभावो नात्यन्तं च भाव इति प्रतिषेधो यः स उत्पत्तिशब्दार्थः। सत्ता चैवंविशेषणा। वाक्यार्थाभ्यनुज्ञानाच्च पदार्थाभ्यनुज्ञानम्[४]। यो वाक्यस्यार्थोऽभूत्वा भवतीति स पदस्यार्थ उत्पद्यत इति। सा उत्पत्तिर्धर्मो यस्य स भवत्युत्पत्तिधर्मक इति॥३४॥

---

१. अस्ति om C २. °न्ताव° C ३. तस्यात्यन्तमभावोऽत्यन्तं C ४. °र्थोऽभ्यनुज्ञातो भवति। C

तथा वैधर्म्यात् ।।१।१।३५।।

किमेतावद्धेतुलक्षणमिति? नेत्युच्यते। किं तर्हि? **तथा वैधर्म्यात्।** अत्रापि उदाहरणवैधर्म्यादित्युदाहरणेनैव वैधर्म्यं नानुदाहरणेनेति। वैधर्म्यमेव चोदाहरणेन[१], न साधर्म्यमपीति। उदाहरणम्, अनित्यः शब्दः उत्पत्तिधर्मकत्वात्। अनुत्पत्तिधर्मकं नित्यं दृष्टम् आत्मादय इति **भाष्यम्।** एतत्तु न समञ्जसमिति पश्यामः, प्रयोगमात्रभेदात्। प्रयोगमात्रं हि भिद्यते नार्थ इति। न च प्रयोगमात्रभेदाद् वस्त्वन्तरं भवितुमर्हति। उदाहरणमात्रभेदाच्च। उदाहरणमात्रं केवलं भिद्यते आत्मा घट इति। यदि चोदाहरणभेदाद् भेदो भवति, तथा वैधर्म्यादिति न पठितव्यम्। किं कारणम्? उदाहरणभेदादेव भेदो गम्यते। उदाहरण**सूत्रं** च भेदकमस्ति तद्विपर्ययाद् वा विपरीतमिति। तस्मात् नेदमुदाहरणं न्याय्यमिति। उदाहरणं तु नेदं निरात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गादिति[२]। यदुभयपक्षसंप्रतिपन्नमप्राणादिमत्, तत् सर्वं निरात्मकं दृष्टम्। न चेदमप्राणादिमद्भवति[३]। तस्मान्नेदं निरात्मकमिति।

सोऽयमवीतः परपक्षप्रतिषेधाय भवतीति[४]। तावेतौ वीतावीतहेतू लक्षणाभ्यां पृथगभिहिताविति। तत्र स्वरूपेणार्थपरिच्छेदकत्वं वीतधर्मः। अवीतधर्मः पुनः परपक्षप्रतिषेधेनैव [५]प्रवर्तत इति। एकस्य विधीयमानोऽर्थः, इतरस्य प्रतिषिध्यमानः। कथं पुनरयमवीतोऽर्थपरिच्छेदक इति? अथ योऽभ्यनुज्ञातो [६]वीतोऽर्थपरिच्छेदकः स कथम्? वीतोऽन्वयादिति चेत्? वीतो हेतुरन्वयेन प्रतिपादयति। अथ प्रमेयत्वं कस्मान्न हेतुः, यद्यन्वयस्यैतत् सामर्थ्यम्? व्यभिचारात् प्रमेयत्वं न हेतुः? न तर्ह्यन्वयः प्रतिपादकः, अपि त्वव्यभिचारः। यदि चाव्यभिचारात् हेतुरर्थं प्रतिपादयति, तदा अचोद्यमेतत् कथमवीतः प्रतिपादक इति अवीतस्यापि

---

१. ॰मेवोदा॰ C २. इति om J ३. भवति om J ४. ॰र्थ एव भवति C ५. भवति J ६. वीतः om C

व्यतिरेकाव्यभिचारित्वात् प्रतिपादकत्वमिति। कथम्? यावदप्राणादिमत् तत् सर्वं निरात्मकं दृष्टमिति, अप्राणादिमत्त्वं च जीवच्छरीरात् निवर्तते। तस्मात् तदव्यभिचारि निरात्मकत्वमपि निवर्त्स्यतीति। अथ पुनरप्राणादिमत्त्वनिवृत्तिमेव प्रतिपद्यते[१] न पुनर्निरात्मकत्वस्य? न युक्तमेवं भवितुम्। किं कारणम्? पक्ष एवं सति व्यभिचारो दर्शितः स्यात्। पक्षव्यभिचारोपदर्शने च सति शक्यं वक्तुम्। अन्वयिनि तु हेतौ शब्दे नित्यत्वमस्तु सति कृतकत्व इति। तस्मात् यथान्वयिनोऽन्वयसंबन्धाव्यभिचारः प्रतिपादकः, तथा व्यतिरेकिणोऽपि विपर्ययसंबन्धाव्यभिचार[२] इति। एतेन यथा वीतहेतोरव्यभिचारिण एकस्य धर्मस्य दर्शनादितरधर्मानुमानम्, एवमवीतहेतावपि एकधर्मनिवृत्तिदर्शनादितरधर्मनिवृत्त्यनुमानमिति।

सर्वात्मकत्वप्रसङ्ग इति चेत्–न, विकल्पानुपपत्तेः। यद्येकधर्मनिवृत्तिदर्शनादितरधर्मनिवृत्तिरनुमीयते, तन्निवृत्त्या च सात्मकत्वं सिध्यतीति मन्यसे, एवं सति[३] सर्वात्मकं शरीरं प्राप्नोति। किं कारणम्? अप्राणादिनिवृत्तेरडित्थादिनिवृत्तिप्रतिपादकत्वात्। नेदमडित्थवच्छरीरमप्राणादिमत्त्वप्रसङ्गात्। [४]एवमडवित्थादिप्रतिषेधोऽपि वक्तव्य इति। तच्च नैवम्, विकल्पानुपपत्तेः। इदं तावद् भवान् पृष्टो व्याचष्टाम्, किमवधारितकार्यस्वभावः पदार्थो डित्थशब्दवाच्यः, आहोस्वित् नेति। यद्यवधारितकार्यस्वभावः, संज्ञाभेदमात्रमात्मा स इति। अथानवधारितकार्यस्वभावः, तस्य व्यावृत्तिरशक्या प्रतिपादयितुम्। व्यावृत्तिप्रधानं चेदं वाक्यम्। तस्मादवीतहेतोरर्थमबुद्ध्वा सर्वात्मकता चोद्यत इति।

यदि तर्हि असाधारणो धर्मो हेतुर्नित्या पृथिवी गन्धवत्त्वादित्येवमादयोऽपि हेतवः[५] प्राप्नुवन्ति। न, हेत्वर्थापरिज्ञानात्। सत्यम्, असाधारणो वैधर्म्यहेतुः न पुनर्वैधर्म्यं व्यभिचारि। गन्धवत्त्वं च[६] नित्यानित्यव्यभिचारि। तस्मादन्वयिनो व्यतिरेकिणश्च नान्वयव्यतिरेकौ हेतुभावे निमित्तम्[७], किं त्वन्वयव्यतिरेकयोरव्यभि-

---

१. °त्तिरेव प्रतिपाद्यते C २. व्यतिरेकव्यभि° C ३. च C ४. अडित्थादि° C
५. इत्यादयो हेतवः C ६. तु J ७. °भावनि° C

चार इति। यः पुनरसाधारणो धर्मः पक्ष एव केवलं यस्य तत्तुल्यविपक्षौ न स्तः, स कस्मात् न हेतुः, यथा सर्वं नित्यं सत्त्वात्? सत्यमयमसाधारणो न तु व्यावृत्तः। अव्यावृत्तेर्न हेतुरिति। एतेन यः पक्षैकदेशवृत्तिरविद्यमानसपक्षविपक्षः स न हेतुरित्युक्तं [1]भवति, यथा सर्वं नित्यममूर्तत्वादिति। यः पक्षैकदेशे वर्तते अविद्यमानसपक्षो विपक्षाच्च निवर्तते यथानभ्युपेतनित्यपक्षस्य नित्ये वाङ्मनसे श्रावणत्वादिति, स कस्मात् न हेतुः? अयमपि न हेतुः, सूत्रार्थेनापोदितत्वात्, सूत्रार्थस्तथा वैधर्म्यादिति। अत्र च वैधर्म्यमुदाहरणेनैव। वैधर्म्यमेव चोदाहरणेन न पुनरिदं वैधर्म्यमेव। तस्मात् न प्रसङ्ग इति। एवमनयोर्वीतावीतहेत्वोः पृथगर्थ-प्रतिपादकत्वस्य आकुमारं[2] प्रसिद्धेः, यदुक्तं वीतावीतौ न पृथक्प्रतिपत्तिहेतू इति तत् संमूढेनोक्तम्।

हेतुर्विपक्षाद् विशेष इत्**यन्ये**। **अन्ये** त्वन्यथा हेतुलक्षणं व्याचक्षते, हेतुर्विप-क्षाद् विशेष इति। यदि पुनरेतावन्मात्रमुच्यते हेतुर्विशेष इति, किं स्यात्? विशेष-मात्रं हेतुः स्यात्। साधर्म्यमात्रनिराकरणं च स्यात्। साधर्म्यमात्रनिराकरणे विशेषमात्रपरिग्रहे च इष्टानिष्टसंग्रह[3] इति। अतोऽनिष्टहेतुनिराक्रियायै विपक्षग्रहणम्। विपक्षाद् यो विशेषः स हेतुः। विपक्षाद् विशेषो हेतुरित्येतावति चोच्यमाने विपक्षाद् विशेषमात्रस्य हेतुत्वम्। स चानेकभेदः। तन्निवृत्त्यर्थं विपक्षादेवेत्यवधार्यते। अवधारणे चैतस्मिन् विपक्षैकदेशवृत्तिरेकोऽनुषज्यते गौर्विषाणित्वादिति[4]। स हि विपक्षादेव विशेष इति। नायमनेनावधारणेन निराक्रियत इति [5]तन्निवृत्त्यर्थं द्वितीय-मवधारणं [6]विपक्षाद् विशेष एव। न त्वयं विशेष एव, विपक्षैकदेशवृत्तित्वात् सामान्यमपि। तदेवमाभ्यामवधारणाभ्यामन्वयव्यतिरेकी त्रिलक्षणो हेतुर्लभ्यत इति।

सत्यमेकस्त्रिलक्षणो हेतुर्लभ्यते। [7]सपक्षैकदेशवृत्तिश्च एकः त्रिलक्षण एव निराक्रियते। कथम्? आद्येनावधारणेन विपक्षादेव यो विशेषः स हेतुरिति ब्रुवता

---

१. भवति om J २. °दकत्वमाकु° J ३. °ग्रहणम् J ४. द्रः वै. सू. (च) ३.१.१२ ५. °न्निराक्रियायै C ६. विशेष एव च विपक्षात् C ७. समानपक्ष° C

यस्तुल्यैकदेशवृत्तिः स निवर्तितो भवति। न ह्ययं विपक्षादेव विशेषः, किं तु सपक्षैकदेशादपि। विपक्षैकदेशवृत्तिप्रतिषेधात् समानादपि पक्षात् यो विशष एव स न हेतुरित्युक्तं भवति। यथा अश्वोऽयं विषाणित्वात्[१] इति। न पुनरयं प्रयत्नानन्तरीयकत्वादिर्विशेष एव न भवति, अपि तु पक्षैकदेशवृत्तित्वात् सामान्यमपि। यद्येवं विपक्षादेव यो विशेषः स हेतुरित्येतदवधारणं बाधितं भवति। न तावदयं प्रयत्नानन्तरीयकत्वादिर्विपक्षादेव विशेषः, किं तु तत्तुल्यैकदेशादपि। अथाश्रूयमाणेनाप्यर्थेनावधारणेऽर्थवती? एवं च सति तत्तुल्यैकदेशवृत्तिवत् साध्यैकदेशवृत्तेरपि हेतुत्वप्रसङ्गः। येनैव सामर्थ्येन तत्तुल्यैकदेशवृत्तिर्लभ्यते तेनैव सामर्थ्येनानुमेयैकदेशवृत्तिरपि हेतुः प्राप्तः। यथा अनित्याः परमाणवो गन्धवत्त्वादिति। ते एतेऽवधारणे यदि तावद् यथाश्रुते[२] भवतः, तत इष्टः प्रयत्नानन्तरीयकत्वादिर्न हेतुः। अथान्यथा [३]श्रूयेते, अन्यथा प्रकल्प्येते[४] अभिप्रेतार्थसिद्ध्यर्थम्, तथाप्यभिप्रेतप्राप्तिवदनिष्टोऽपि गन्धवत्त्वादिर्लभ्यत इति उभयं च लक्षणदोषः, अभिप्रेतहानिरनिष्टप्रसङ्गश्च। नैष दोषः, **वृत्तौ**[५] विशेषितत्वात्। अनिष्टस्य गन्धवत्त्वादेः प्राप्तिरिति न दोषः, यस्माद् **वृत्ता**वाह, यो धर्मः पक्षस्येति अनेन चाक्षुषत्वादिः पक्षासंभवी निराक्रियते, पक्षैकदेशवृत्तिस्तु कथम्? न ह्यसौ पक्षधर्मो न भवति। [६]तथा विपक्षैकदेशवृत्तिर्न विपक्षस्य न धर्म इति। तस्मादन्यथा निराकरणे यत्नः कर्तव्य इति। न कर्तव्योऽवधारणान्निवृत्तेः, अवधारणादेकदेशवृत्तिर्निवर्तिष्यते। किं पुनरत्रावधार्यते? किं धर्म एव पक्षस्य, उत पक्षस्यैव धर्मः? अस्तु तावद् धर्म एव पक्षस्येति, किं पुनरस्यावधारणस्य सामर्थ्यम्? किमनेन संभवो ज्ञाप्यते, उतासंभवो [७]निवर्त्यते? उभयथापि नावधारणस्य सामर्थ्यमस्ति संभवज्ञप्तेरसंभवनिवृत्तेश्चावधारणमन्तरेणाप्यधिगतेः। न चैकदेशवृत्तिर्निराक्रियत इति व्यर्थमवधारणम्। अथ पुनर्व्याप्तिरस्यावधारणस्यार्थः धर्म एव पक्षस्येति, न पुनरधर्मोऽपि।

---

१. द्रः वै. सू. (च) ३.१.१२ २. °श्रुती J ३. श्रूयते C ४. प्रकल्प्यते C
५. वृत्तौ = टीकायाम् J margin ६. यथा C ७. व्यावर्तते C

यः पुनः पक्षैकदेशवृत्तिरसावधर्मोऽपि। सत्यमनेनैकदेशवृत्तिर्निराक्रियत इति। एतस्मिन्नपि एकं सन्धित्सतोऽन्यत् प्रच्यवते। भवत्वेकदेशवृत्तेर्निराकरणं सपक्षे सिद्धे एतत् पदं किमर्थमारभ्यते? कथं पुनरिदमनारभ्यम्? यस्माद् व्याप्त्यर्थे-नावधारणेन चरितार्थमेतत्। धर्म एव पक्षस्येति पक्षो नियतः, धर्मोऽनियतः। तस्यानियतस्य व्याप्त्यतिव्याप्तिभ्यां तत्तुल्यविपक्षगतिः तत्र विपक्षे नास्तीति [१]प्रसृतस्य प्रतिषेधो भवतु। सपक्षे सिद्धे इत्येतत् पदं मा भूत्। अथ पुनरिदमवधारणमन्यथा क्रियते पक्षस्यैवेति, एवमप्युत्तरे[२] द्वे अपि पदे सपक्षे सिद्धो विपक्षे नास्तीति च बाधिते भवतः। कथम्? सपक्षे सिद्ध इत्येतदवधारणार्थबाधितं पक्षस्यैव धर्मः सपक्षे च सिद्ध इति। न हि लोक एवंप्रकाराणि वाक्यानि प्रवर्तन्ते देवदत्तमेव भोजय यज्ञदत्तं चेति। उत्तरं च[३] पदं विपक्षे नास्तीति गम्यमानत्वात् न कार्यम्। केन गम्यमानत्वादिति? अवधारणेन, पक्षस्यैव धर्मः [४]स नान्यस्येति गम्यत [५]एतदिति विपक्षे नास्तीत्येतत् न कर्तव्यमिति। न च पक्षैकदेशवृत्तिर्निराक्रियत इति यदर्थमवधारणं स एवार्थो हीयत इति। अथ पुनः सपक्षे सिद्ध इत्येतदपि पदमवधारणार्थमेवारभ्यते, सपक्ष एव सिद्धः, सिद्ध एव च सपक्ष इति। किं पुनरस्मिन् पदेऽवधारणेन लभ्यते? यदि संभवः, सोऽनवधारितोऽपि गम्यते सपक्षे सिद्ध इति। अथ व्याप्तिः, तज्जातीयस्यैकदेशवृत्तिरहेतुरिति प्राप्तम्। अथ सपक्ष एव सिद्ध इति, तथापि पूर्वोत्तरे पदे व्याहते भवतः, पक्षस्य धर्मो विपक्षे नास्तीति अवधारणार्थबाधितत्वात् पूर्वमनारभ्यं गम्यमानत्वादुत्तरमपि। अथ विपक्षे नास्तीत्येतदप्यवधारणार्थमेवेति? अत्रापि किमवधार्यते विपक्ष एव नास्तीति, नास्त्येव विपक्ष इति। यदि विपक्ष एव नास्ति, तदा गौर्विषाणित्वादिति हेतुः प्राप्तः। एष हि विपक्ष एव नास्ति। अथ विपक्षे नास्त्येवेति न[६] पुनर्मध्यमस्य पदस्यानारम्भः? कथं पुनर्मध्यमस्य पदस्यानारम्भ इति[७]? तत्र पूर्वपदं व्याप्त्यर्थ-

---

१. प्रसक्तस्य C २. °मप्यनन्तरे C ३. तु C ४. सामान्य° C ५. एवेति C
६. न om J ७. कथम्° इति om C

मुत्तरं पदं विपक्षैकदेशवृत्तिप्रतिषेधार्थम्। अथ सपक्षे सिद्ध इत्येतत् पदं किमर्थमारभ्यत इति? यदि संभवार्थं व्याप्त्यर्थेनाद्येनावधारणेन संभवो लभ्यत इति व्यर्थम्। तदेतस्मिन् लक्षणे **वृत्त्या** सह विचार्यमाणेऽनिष्टहेतूपनिपातो वा इष्टहेतुपरित्यागो वाभिप्रेतग्रस्तहानिर्वेति दोषः।

हेतुर्विपक्षाद् विशेष इति च यदा **सौत्रान्तिक**पक्षमाश्रित्य लक्षणं विचार्यते, तदा विपक्षासंभवात् हेतुर्विपक्षाद् विशेष इति च विपक्षार्थो वक्तव्यः। न ह्यसति [१]विपक्षे विपक्षार्थं पश्याम इति। न चासति पञ्चम्याः प्रयोगः संभवति। विपक्षादिति पञ्चमीविषयो वक्तव्यः। असति च विपक्षे नाधिकरणार्थः संभवतीति विपक्षे नास्तीति सप्तम्यर्थो वक्तव्यः। विपक्षासंभवे च[२] सति पक्षतज्जातीयव्यापकत्वात् कृतकत्वादेः विशेषोऽर्थश्चिन्त्यः, कृतकत्वादिति तदा[३] साधारणत्वात् सामान्यं न विशेष इति। तदेतल्लक्षणं स्वसिद्धान्तेनासङ्गतत्वादलक्षणमिति। [४]यदपि हेतुवार्त्तिकं ब्रुवानेनोक्तं सप्तिकासंभवे षट्प्रतिषेधादेकद्विपदपर्युदासेन त्रिलक्षणो हेतुरिति, तदप्ययुक्तम्। द्विपदलक्षणयुक्तयोर्हेतुत्वात् तत्र किल सप्तिका संभवति, पक्षस्यैव धर्मः, समान एव पक्षे सिद्धो विपक्ष एव नास्ति। पक्षस्य धर्मः समाने च सिद्धः पक्षस्य धर्मो विपक्षे नास्ति। समाने एव च सिद्धः विपक्षे नास्ति, पक्षस्य धर्मः समाने च सिद्धो विपक्षे च नास्तीति। तदेवं सप्तिकासंभवे सति षट्प्रतिषेधमुक्त्वा यदयं त्रिपदपरिग्रहेण त्रिलक्षणस्य हेतुतां शास्ति, तेनैकद्विपदपर्युदासं ज्ञापयतीति। तच्च नैवम्। [५]द्विपदलक्षणयुक्तयोर्हेतुत्वादिति। अनभ्युपगतनित्यपक्षस्य[६] कृतकत्वादित्ययं द्वाभ्यां लक्षणाभ्यामुपयुज्यते, प्रयत्नानन्तरीयकत्वादिति चानयोर्हेतुभावो न स्यात्। यश्चायं व्यतिरेकी हेतुः, नेदं निरात्मकं जीवच्छरीरमप्राणादिमत्त्वप्रसङ्गादित्येवमादिः स न हेतुः स्यात् [७]पदद्वयोपयोगादिति। तस्मात्

---

१. विपक्षे om C २. च om C ३. °दिस्त° J ४. द्रः पृ. ५२.२२
५. °पद° om C ६. °गतानित्य° C ७. द्विपदयोगा° C

हेतुर्विपक्षाद्विशेष इत्येतल्लक्षणं विचार्यमाणमनभिमतस्य हेतुत्वमापादयति, इष्टं वा बाधते ग्रंथं वा निराकरोति, शास्त्रं बाधत इति।

तत्र यः सन् सजातीये द्वेधा चासंस्तदत्यये

इत्यन्ये। [१]अनेन सन् सजातीये द्वेधा चेति सन् सपक्षे द्वेधा[२] चासंस्तदत्यय इत्य-
5 सपक्षे नास्तीति। एतावता च किल लक्षणेन त्रिलक्षणो हेतुर्लभ्यत इति यथाश्रुति न लभ्यते। यदि तावदेतल्लक्षणं यथाश्रुति भवति पक्षे विद्यत इति केनैतत् लभ्यते? ननु चोक्तं हेतुः तदाभासो वा प्रायः पक्षधर्म एवेति[३]। उक्तमेतत्, न पुनरनेन पक्षधर्मो हेतुरिति लभ्यते, किं त्वपक्षधर्मो न हेतुः न हेत्वाभास इति। अथाप्यर्थतो लभ्येतापक्षधर्मो न[४] हेतुर्न हेत्वाभास इत्ययं यदि वाक्यार्थो भवति, अर्थाद् गम्यते
10 हेतुर्हेत्वाभासश्च पक्षधर्म इति। सत्यम्, अर्थात् पक्षधर्मो गम्यते न तु व्यापको नियतो लभ्यत इति। अपक्षधर्मनिवृत्तिमात्रत्वेन च संभवमात्रं लभ्यत इति। तच्च द्वेधा, व्यापकमव्यापकं च। तत्राव्यापकोऽनिष्टो हेतुः प्राप्तः। न प्राप्तः पक्षधर्म एवेत्यभिधानाद् यः पक्षस्य धर्म एव स हेतुः[५], न त्वयं पक्षधर्म एव एकदेशवृत्ति-त्वात्। न, अवधारणस्यान्यार्थत्वात्। अन्यार्थमवधारणं भवन्तः कल्पयन्ति।
15 किमर्थम्? हेतुहेत्वाभासनियमज्ञापनार्थम्। तदवधारणमन्यार्थं सत् कथमव्यापकं निवर्तयिष्यति?

अथोभयकारि भवत्यव्यापकनिवृत्त्यर्थं च हेतुहेत्वाभासनियमज्ञापनार्थं च, तथापि सन् सजातीये द्वेधा चेत्यकरणीयम्। कथम्? व्याप्त्यर्थेनावधारणेन [६]पक्षो नियतो धर्मस्त्वनियत इति। अनियतस्य व्याप्त्यव्याप्तिभ्यां धर्मस्य द्वौ राशी
20 शिष्यमाणौ सजातीयः, तदत्ययश्च। तत्रातिप्रसक्तेरसंस्तदत्यय इति युक्तम्। सन् सजातीय इति किमर्थम्? यदि संभवार्थम्, तन्न, अनियमात्। व्याप्त्यव्याप्त्योः संभवो गम्यत इति किमनेन सन् सजातीय इति? द्वेधा चेति सर्वथा न वक्तव्यम्।

---

१. अनेन om J २. चेति ...द्वेधा om C ३. एव भवति C, हेतुर्न for न C ४,५. हेतुः प्राप्तः C ६. पक्षोऽपि धर्मश्च C

इदं तावद् गम्यमानत्वात् सन् सजातीय इति न [१]वक्तव्यम्। सच्छब्देन व्याप्य-व्याप्त्योः सामान्येनाभिधानाद् द्वेधा चेति प्रमत्तवाक्यम्। अथ मन्येत सन् सजातीय इत्यवधारणार्थमारभ्यत इति? अवधारणार्थो युक्त आरम्भः, अवधारणं [२]तु न युक्तम्। कथमिति? यदि तावदेवम् अवधार्यते सन्नेव सजातीय इति, [३]प्रयत्नानन्तरीयकत्वं ते न हेतुः। यस्मात् प्रयत्नानन्तरीयकत्वं सदसदपि[४] द्विधा चेति एतदवधारणार्थबाधितम्। न हि भवति ब्राह्मणमेव भोजय क्षत्रियं चेति। अथ सजातीय एव सन्नित्यवधार्यते, तथापि पूर्वोत्तरे बाधिते भवतः। कथम्? एकमवधारणार्थबाधितम्, एकं गम्यमानत्वात्। अथ पुनर्द्वेधा चेत्यवधारणार्थम्? अत्रापि किमवधार्यते, किं सजातीय एव द्विधा, द्विधैव सजातीय इति? यदि तावत् सजातीय एव द्विधा नान्यत्र पक्षे न[५] तदत्यये तद् द्विधेत्युक्तं भवति। यद्येवं सन् सजातीय इति न कर्तव्यम्, प्राप्त्यर्थेनावधारणेनाद्ये पदे सजातीये संभवस्योक्तत्वात्। द्विधा चेत्यन्यपदे द्विधा निवृत्तिपरत्वात्। द्विधा चेत्यभिधानात् संभवो गम्यत इति सन् सजातीय इति सर्वथा न वक्तव्यम्। सजातीय एव द्विधा चेत्यनेनैवावधारणेन [६]पक्षे व्याप्तिर्लभ्यत इति धर्म एव पक्षस्येति व्याप्त्यर्थमवधारणमित्ययुक्तम्। अथ मा भूत् सर्वपदावधारणव्याघात इति नावधारणम्, तथापि मध्यमे द्वे पदे अपि न कर्तव्ये। सोऽयं [७]गडुप्रवेशाक्षितारकाविनिर्गमन्याय इति। अथ पुनर्द्विधैव सजातीय इति। तथापि [८]कृतकत्वं न हेतुः, न ह्यसौ सजातीये द्विधैव इति। त्रिलक्षणं च हेतुं ब्रूवाणेन स्वसिद्धान्तोपात्तयोर्द्विपदयुक्तयोर्हेत्वोरहेतुत्वमुक्तं भवति[९]। व्यतिरेकी च न हेतुरिति प्राप्तम्। नैव हेतुरिति चेत् [१०]कृतस्तस्य हेतुत्वे यत्न इत्यनुत्तरम्। अथ पुनरवधारणानि नैव क्रियन्ते, तथापि पक्षैकदेशवृत्तिरनैकान्तिकश्चानुषक्त इति। एतेन

---

१. कर्तव्यम् C २. तु om C ३. °कत्वादिस्ते C ४. °त्वादिः सन्नसन्नपि C ५. न om C ६. पक्षवृत्तिः C ७. गृहप्र° C ८. कृतकत्वादिः C ९. त्वमिति प्राप्तम् C १०. कुतः C

ग्राह्यधर्मस्तदंशेन व्याप्तो हेतुः

इति प्रत्युक्तम्। अनेन चाव्यापकादिर्हेतुर्लभ्यत इति उक्तोत्तरमेतदपीति। असंस्तदत्यय इत्येतदपि विपक्षे नास्तीत्यनेन समानमिति।

तादृगविनाभाविधर्मोपदर्शनं हेतुरित्**यपरे**। तादृशा विना न भवतीत्यनेन किल द्वयं लभ्यते, विपक्षासत्त्वं तादृक्सत्त्वं च। उपदर्शनग्रहणेन किल [१]पक्षधर्मो लभ्यत इत्येवं किल त्रिलक्षणप्रविभावितात्मा पक्षो लभ्यत इति। यत् तावत् तादृगविनाभाविग्रहणाद् विपक्षेऽसत्त्वं तादृक्सत्त्वं च लभ्यत इति तत् न युक्तम्। तादृशा विना न भावीति एतस्माद् वचनाद् विपक्षेऽसत्त्वं गम्यते, तादृशे तु संभव इत्येतत् कुतः? न ह्ययं नियमो यो विपक्षे नास्ति सोऽवश्यं तज्जातीयेऽस्तीति। एवं च सति श्रावणत्वाद्यपि हेतुः प्राप्तः। श्रावणत्वाद्यपि तादृशा विना न भवतीति। भवतु तावत् तादृगविनाभाव्यभिधानात्[२] तत्तज्जातीये संभवः, स पुनः पक्षे संभवतीत्येतत् कुतः? ननूपदर्शनग्रहणादेतत् लभ्यत इति? न लभ्यते, उपदर्शनग्रहणस्याभिधानार्थत्वाद् उपदर्शनग्रहणमभिधानार्थम्। उपदर्श्यतेऽनेनेति, न पुनरस्यैतत् सामर्थ्यमस्तीति पक्षेऽन्यत्र चेति। क्व पुनरन्यत्र स्यात्? यत्र संभवः। क्व चास्य संभवः? तज्जातीये। तस्मादेतदुक्तं भवति तज्जातीयाविनाभाविनः तज्जातीय एवाभिधानं हेतुरिति। एवं च ते चाक्षुषत्वं हेतुर्भवति। न हि चाक्षुषत्वम् अनित्यत्वेन विना भवतीति। उपेत्य वा भवतु तादृगविनाभाविनो धर्मस्य पक्ष उपदर्शनमिति। तथापि पक्षैकदेशवृत्तिं केन निराकरोषि? उपदर्शनग्रहणेनेति चेत्— न, तस्य संभवमात्रज्ञापनार्थत्वात्। अथ मन्येत उपदर्शनग्रहणेन व्याप्तिर्लभ्यत इति, न युक्तम्, उपदर्शनग्रहणस्य संभवमात्रज्ञापनार्थत्वात्। उपदर्शनग्रहणेन संभवमात्रं गम्यते, पक्षे स पुनर्व्यापक इति न युक्तम्। अथात्रापि केनचित् न्यायेनावधारणानि क्रियेरन् तान्यव्यापकहेतुनिराकरणेऽसमर्थानीति पूर्ववत् प्रसङ्गः।

---

१. पक्षे सत्त्वं C २. भाविग्रहणे C

यत् त्विदमुदाहरणमेतस्मिन् प्रयत्नानन्तरीयकत्वादिरनित्यस्याग्नेर्धूम इति, तत्र धूमस्तावदग्नेर्न प्रतिपादक इत्युक्तम्। प्रयत्नानन्तरीयकत्वमप्यहेतुः। कुतः? प्रयत्नानन्तरीयकत्वस्य पक्षावृत्तित्वात्। न हि प्रयत्नानन्तरीयकत्वं शब्दधर्मः। न हि कश्चिच्छब्दः प्रयत्नानन्तरीयकोऽस्ति, संयोगविभागशब्दयोनित्वात् शब्दस्य[१]। अथ पारम्पर्येण प्रयत्नः शब्दकारणम्। पारम्पर्येण सर्वेऽर्थाः शब्दकारणमिति विशेषणमयुक्तं प्रयत्नानन्तरीयकत्वादिति। अनित्यः शब्दो यतस्तदुत्पत्तेरिति [२]वक्तव्यम्। यच्चेदं प्रयत्नानन्तरीयकत्वं शब्दस्यानित्यत्वे कारणं भावाभिधानेनोच्यते, किं पुनस्तत्? किं जन्म, उतोपलब्धिरिति? यदि तावत् जन्म, [३]तन्नैव समर्थमिति प्रयत्नानन्तरीयकग्रहणं व्यर्थम्। न हि भवत्यनित्यः शब्दो देवदत्तकृतकत्वादिति। अत एवं वक्तव्यं जन्मवत्त्वादिति। यदि चेदं जन्म व्यभिचारि भवेत्, ततः प्रयत्नानन्तरीयकत्वग्रहणमर्थवत्। किं कारणम्? व्यभिचारिणि विशेषणान्यर्थवन्ति भवन्तीति। अथोपलब्धिः प्रयत्नानन्तरीकत्वादित्यनेन भावाभिधानेनोच्यते, एवमप्युपलब्धेरेव सामर्थ्यमस्तीति व्यर्थं विशेषणम्। न ह्युपलभ्यमानं द्वेधा भवति नित्यमनित्यं च, प्रयत्नानन्तरमन्यथा चेति। अथ ब्रूषे प्रयत्नानन्तरमुपलभ्यमानं युष्माकं घटत्वं नित्यमिति, त्वयैवैतद् व्यभिचारितमिति शब्दानित्यत्वानुमितौ प्रयत्नानन्तरीयकत्वं न हेतुः, अव्यापकं च प्रयत्नानन्तरीयकत्वम्, शब्दराशेः पक्षीकृतत्वात्। अथ शब्दविशेषं पक्षीकृत्योच्यते, तत्राप्याद्य एव प्रयत्नानन्तरीयकत्वं संभवति। न द्वितीयादिष्विति अव्यापकत्वमनिवृत्तम्। अथ यः प्रयत्नानन्तरीयकः [४]शब्दः सोऽनित्य इति? तथाप्यन्यो हेतुर्वक्तव्यः। हेतोः पक्षविशेषणत्वेन उपात्तत्वात्।

यदप्युक्तमप्रयत्नानन्तरीयकस्य त्रयी गतिरिति, किञ्चिन्नित्यमाकाशादि एकेषाम्, किञ्चिदनित्यं विद्युदादि, किञ्चिदसदेवाकाशकुसुमादि। इदं तन्महानैयायिकत्वं महावादित्वं च यत् तावदसदप्रयत्नानन्तरीयकं च किञ्चिच्चेति चित्रम्। नित्यं तु किञ्चिद् भवति, न पुनरप्रयत्नानन्तरीयकम्। न ह्याकाशमप्रयत्नानन्तरीयक-

---

१. द्रः वै. सू. (च) २।२।३६ २. कर्तव्यम् J ३. जन्मैव J ४. शब्दः om C

मिति शक्यं वक्तुम्, अप्रयत्नानन्तरीयकस्य जन्मविशेषणार्थत्वात्[१]। न चाकाशस्य जन्मास्ति। तस्मात् न प्रयत्नानन्तरीयकं नाप्यप्रयत्नानन्तरीयकमाकाशमिति। एतेनाभावो व्याख्यातः। अभावेऽप्येवमेवेति। तदेवमेतानि न हेतुलक्षणानि संभवन्तीति इदमेवार्षं हेतुलक्षणं न्याय्यमिति॥३५॥

साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ॥१।१।३६॥

अस्योदाहरणोपलक्षणमर्थः। साध्यस्य साधर्म्यं साध्येन समानधर्मता। अत्रापि साध्येनैव साधर्म्यमेव। न पुनरसाध्येनापि, साधर्म्यमेव साध्येन न पुनर्वैधर्म्यमपि। यस्मात् साध्यसाधर्म्यात् तद्धर्मभावी भवति। किं कुतश्चित् साध्यसाधर्म्यात् तद्धर्मभावी न भवति? न भवत्यपि, यथा अमूर्तत्वादेः कर्मणः। तस्मात् साध्य-साधर्म्याद् [२]यस्तद्धर्मा भवति, स भवति तद्धर्मभावी। सोऽयं दृष्टान्तः साध्यसाधर्म्यात् तद्धर्मभावित्वेन विशेषणेन युज्यमान उदाहरणं भवति। उदाह्रियतेऽनेन धर्मयोः साध्यसाधनभाव इत्युदाहरणम्।

ननु च करणकारकपरिग्रहात् वचनमुदाहरणम्, दृष्टान्तश्चार्थः, न चानयोः सामानाधिकरण्यं युज्यते, न हि विषाणादिमदित्यभिधानं गवा समानाधिकरणं भवति। नैष दोषः, वचनविशेषणत्वेन दृष्टान्तस्योपादानात्, न स्वतन्त्रो दृष्टान्त उदाहरणम्। किं तु साध्यसाधर्म्यात् तद्धर्मभावित्वे सति अभिधीयमान इति। तद्धर्मभावीति। तस्य धर्मस्तद्धर्मः, तस्येति साध्यस्य। साध्यं च द्वेधा भवति धर्मो धर्मी च। एकदा धर्मो विशेषणत्वेन, अन्यदा धर्मी विशेषणत्वेनेति। तस्येति धर्मिग्रहणं युक्तम्, [३]पृथग् धर्मस्य ग्रहणात्। यस्माच्च धर्मिणो धर्मा उत्पत्ति-धर्मकत्वादयो न धर्मस्य, धर्मे च [४]साध्ये उदाहरणसाधर्म्यादिति व्याघातः। न हि धर्मस्योदाहरणेन किञ्चित् साधर्म्यम्, किं तु धर्मिणः। साध्यसाधर्म्यं चोदाहरणस्य

---

१. °विशेषितत्वात् C २. यत्र तद्धर्मो C ३. न, पृथग् C ४. साध्यम् K

धर्मिण[१] एव। साध्ये चोपसंहारो धर्मिण्येव। तस्माद् धर्मी साध्य इति। तस्य धर्मिणः साध्यस्य यो धर्मः[२], स यस्मिन् दृष्टान्ते भवति विद्यते, स दृष्टान्त उदाहरणम्। उदाहरणं स्थाल्यादि द्रव्यमिति। तदुत्पत्तिधर्मकं चानित्यं दृष्टमिति॥३६॥

तद्विपर्ययाद्वा विपरीतम् ।।१।१।३७।।

साध्यवैधर्म्यादतद्धर्मभावी च दृष्टान्त उदाहरणमिति। उदाहरणमवीतहेतौ द्रष्टव्यमिति।

अन्ये तु साध्यसाधर्म्यात् तद्धर्मभावित्वं दृष्टान्तस्येति **सूत्रं** पठन्ति। तेषां त्वयमभिप्रायः, दृष्टान्तोदाहरणयोर्मा भूदैक्यमिति। किं पुनस्तद्धर्मभावित्वम्? साध्यसाधनाभ्यां योगः। साध्यसाधनयोगे [३]सति तद्धर्मभावी भवति। अतो भावाभिधानेन साध्यसाधनाभ्यां योगोऽभिधीयत इति। एतच्च सूत्र**मपरे** दूषयन्ति। अस्माकं तु नायं सूत्रपाठः। तस्मात् नायं दोष इति। एतस्मिन्नपि पाठे किल भाविग्रहणमनर्थकम्। कस्मात्? सर्वावयवानां साध्यधर्मभावित्वात्। यस्मात् किल सर्व[४] एवावयवाः साध्यधर्मभाविनो भवन्ति भावयन्ति गमयन्तीति। अयं च न सूत्रार्थ इति।

अन्ये तु तद्धर्मभावीत्येतत् पदमन्यथा निराकुर्वन्ति। तद्धर्मभावी भवन्नुष्णभोजिन्यायेन वा भवेत्? दण्डिन्यायेन वा भवेत्? तद्यदि तावदुष्णभोजिन्यायेन उष्णं भोक्तुं शीलमस्येत्युष्णभोजी, एवं[५] तद्धर्मं भावयितुं शीलमस्येति तद्धर्मभावी। अत्रापि भावयितुं गमयितुमिति यावदुक्तं स्यादिति नायं सूत्रार्थ इति न किञ्चिदेतत्। दण्डिन्यायस्तु दण्डो यस्यास्ति स दण्डी। तद्धर्मभावो यस्यास्ति स भवति तद्धर्मभावी। अत्र भाविग्रहणमनर्थकं तद्धर्मभावीति। कथमिति? तद्धर्म-

---

१. धर्म्यंशः C २. धर्मः साध्यः C ३. च for सति C ४. एव om C
५. एवं om C

श्चासौ भावश्चेति तद्धर्मभावः। स यस्यास्ति स भवति तद्धर्मभावीति। एवं सति विशेष्यविशेषणभावानुपपत्तेः तद्धर्मीति[१] युक्तम्। न हि तद्धर्मश्च स्यादभावश्च यतो विशेषणविशेष्यभावः [२]समर्थः स्यादिति। अतस्तद्धर्मीति किल वक्तव्यम्। न वक्तव्यम्। तद्धर्माणामुभयथाभावात्। उभयथा भवन्ति तद्धर्माः, विधीयमानाः प्रतिषिध्यमानाश्च। तत्रान्वयिनि वाक्ये विधीयमानधर्मवान् दृष्टान्त उदाहरणम्। यथा स्थाल्यामुत्पत्तिधर्मकत्वं चानित्यत्वं च भावौ विद्यमानौ धर्माविति। तस्मात् तद्धर्मश्चासौ भावश्चेति युक्तं सामानाधिकरण्यम्। यत् पुनरेतत् तद्धर्मीति वक्तव्यम्, एतदपि न परिज्ञातम्। न हि बहुव्रीहौ पुनर्मत्वर्थीयो लभ्यत इति। अथावश्यं वयं शिक्षयितव्याः, तत एव च तद्धर्मेति वक्तव्यम्[३]। सन्ति चैवंवादिनो येषां कृतकत्वानित्यत्वेऽभाव इति। तन्निराकरणार्थं चेदमुक्तम्, तद्धर्मश्चासौ भावश्चेति युक्तं सामानाधिकरण्यम्[४]।

तदेतस्मिन्नवयवत्रये एवं लक्षणेनोपपादिते तेषां च त्रयो दुर्विहिता इत्यनेन वाक्येन महानैयायिकत्वमात्मनः ख्यापितं भवति।

तथा सिद्धो दृष्टान्त इति **अन्ये**। कः पुनरस्यार्थः? यथा साध्यः साधयितुमिष्टः, तथा यः सिद्धो नित्यत्वेन[५] यथा च स एवं साध्यो[६] विशिष्टः प्रत्ययभेदभेदित्वेन, तथा च यः सिद्धः स दृष्टान्तः साध्यसाधनवानिति। अत्र विस्फूर्जतापि स्वसिद्धान्तम् अपरित्यजता कृतकत्वानित्यत्वयोर्न शक्यः संबन्धो दर्शयितुम्, कृतकत्वानित्यत्वयोः कालभेदाद् वस्तुव्यवधानाच्च। अन्यदा कृतकत्वमन्यदा चानित्यत्वमिति। यदा च वस्तु न तदा प्राक्प्रध्वंसाभावौ स्त इति। एतेन तयोः [७]संबन्धनिदर्शनं दृष्टान्त इति प्रत्युक्तम्।

साध्येनानुगमो हेतोः साध्याभावे च नास्तिता

इति च॥३७॥

---

१. तद्धर्मभावीति C २. समर्थितः C ३. एवं च वक्तव्यम्। J ४. युक्तंण्यम् om C ५. तथायमसिद्धोऽनित्य॰ C ६. स एव साध्यो om J ७. संबन्धि C

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥१।१।३८॥

एवं चायं कृतक इति[१]। यथा तथेति प्रतिबिम्बनार्थम्। किं पुनरत्र प्रतिबिम्बनम्? दृष्टान्तगतस्य धर्मस्याव्यभिचारित्वे सिद्धे तेन साध्यगतस्य तुल्यधर्मतोपदर्शनम्। तथा[२] चायं कृतक इति। साध्ये वा संभव उपनयार्थः। ननु च कृतकत्वादित्यनेन संभव उक्तः? नोक्तः, साध्यसाधनभावमात्रनिर्देशात्[३]। साध्यसाधनभावमात्रनिर्देशः कृतः[४], कृतकत्वात् अनित्यः शब्दो भवति। तत् पुनः शब्दे कृतकत्वमस्ति नास्तीत्युपनयेन संभवो गम्यते। अस्ति च शब्दे कृतकत्वमिति। स यदा साधर्म्येणोदाहरणं तदा तथेति, यदा वैधर्म्येण तदा न तथेति॥३८॥

हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥१।१।३९॥

प्रतिज्ञायाः पुनर्वचनमिति, प्रतिज्ञाविषयस्यार्थस्याशेषप्रमाणोपपत्तौ [५]साध्यविपरीतप्रसङ्गप्रतिषेधार्थं यत् पुनरभिधानं तत् निगमनमिति। न पुनः प्रतिज्ञाया एव पुनर्वचनमिति। किं कारणम्? प्रतिज्ञा साध्यनिर्देशः, सिद्धनिर्देशो निगमनमिति[६]। एतस्मिन् सूत्रार्थे परस्यावकाशो नास्तीति। अभ्युपेत्य तद्दोषनिराचिकीर्षया वाक्यमुपक्षिप्यते,

उपनयनिगमने तु[७] नावयवान्तरे अर्थाविशेषात्

इति। इदं तावद् वाक्यं यथाश्रुति न केनचिदर्थेन संबध्यते। अथ हेतूपनयावेकत्वेन पक्षीकृत्यार्थाविशेषादिति हेतुः? स विपक्षवृत्तित्वाद् विपर्ययहेतुः अर्थाविशेषस्यैकत्वेऽदर्शनादिति नानात्वे च दर्शनादिति। यथा बहूनां घटानामेकोऽर्थः

---

१. एवं ... इति om J २. °धर्मता एवं C ३. °मात्र° om C ४. कृतकत्वम् J ५. साध° om J ६. न पुनः ... निगमनमिति om C ७. तु om C

[१]अब्धारणादिर्न चैकत्वमिति। अथैकप्रयोजनकत्वेन पक्षीकृत्य ब्रूयादेकत्वमेकप्रयोजनत्वमिति, तथापि हेतुर्नास्ति, प्रतिज्ञार्थेनाक्षिप्तत्वात् हेतूपनययोरेकोऽर्थ[२] इति प्रतिज्ञार्थः। अर्थाविशेषादिति हेत्वर्थोऽपि स एव। अन्यश्च हेत्वर्थः, अन्यश्चोपनयार्थ इति। असिद्धोऽप्ययं हेतुः। तद् वर्णितम्,

पक्षधर्मत्वसंबन्धसाध्योक्तेरन्यवर्जनम्।

इत्येतदनेनैव प्रत्युक्तम्।

यदपि, यथा तथेत्युपसंहारे कृते तथेत्यनेन शब्देन सर्वसामान्यं वा, कृतकत्वसामान्यं वाभिधीयते? कृतकत्वविशेषो वा? सर्वसामान्यं तावत् न युक्तम्, तथेति व्यपदेशाशक्यत्वादिति। कृतकत्वविशेषोऽपि न युक्तः, अन्यथा शब्दस्य कृतकत्वात्। परिशेषात् कृतकत्वसामान्यम्। तच्च हेतुनैवोक्तमिति–तदप्ययुक्तम्, उपनयस्योपमानार्थत्वात्। उपमानार्थ उपनय इति। तच्चोपमानं न सर्वथा साध्यसाधनभावमाश्रित्य प्रवर्तत इति यत्किञ्चिदेतत्। कृतकत्वसामान्यं तु शब्दसन्निधावभिधीयत इति चित्रमिदम्। कृतकत्वं शब्दसन्निधावभिधीयत इति। शब्देन च विशिष्यमाणं कथं सामान्यं भविष्यति? तस्मात् सामान्यविशेषवान् हेतुरिति गतार्थत्वाच्च[३] नोपनय इत्येतदनेन[४] प्रत्युक्तम्। यदप्युक्तं [५]यथाशब्दो घटशब्दसहितो दृष्टान्त एवेति, तदप्ययुक्तम्, यथा तथेत्युपमानमेतत्। उपमानं चोपनयो न दृष्टान्त इति।

एतेन निगमनं प्रत्युक्तम्। ते एते वीतावीतवाक्ये स्वतन्त्रे पञ्चावयवे न पुनरेकमन्वयि व्यतिरेकि चेति॥३९॥

॥न्यायलक्षणप्रकरणम्॥

---

१. जलाहरणदिः C °र्थोद्धारणदिः C var. २. °रेकार्थत्वमिति C ३. च om C
४. इत्यनेन C ५. यथाशब्दो ... तदप्ययुक्तम् om C

[न्यायोत्तराङ्गलक्षणप्रकरणम्]

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥१।१।४०॥

अविज्ञात...तर्कः इति सूत्रम्। अस्यार्थः पूर्ववत्। अविज्ञाततत्त्वेऽर्थे इति। यथा सोऽर्थो भवति सोऽस्य तथाभावस्तत्त्वम्। एतस्मिन् अविज्ञाते सामान्यतोऽधिगते[१]। कुतः पुनरेतत् सामान्यतोऽधिगतमिति[२]? अविज्ञाततत्त्वेऽर्थे इत्यभिज्ञानात्। यस्मादयमाह–अविज्ञाततत्त्वेऽर्थे इति, तेन ज्ञापयति, सामान्यतोऽधिगतमिति[३]। यदि पुनः सामान्यमपि नाधिगतं स्यात्, न ब्रूयात् अविज्ञाततत्त्वे इति। अविज्ञात इत्येवं ब्रूयादिति।

अविज्ञाततत्त्व इति समासोऽयम्। न [४]चावगम्यते किमविज्ञातं तत्त्वं येन, उताविज्ञातं तत्त्वं यस्येति। कश्चात्र विशेषः? यद्यविज्ञातं तत्त्वं येन सोऽयमविज्ञाततत्त्वः परिच्छेत्ता, तस्मिन्नविज्ञाततत्त्वे परिच्छेत्तरि तदवगमार्थमूहस्तर्क इति प्राप्नोति। अथाप्यविज्ञातं तत्त्वं यस्य [५]तद्वस्त्वविज्ञाततत्त्वम्, तस्मिन्नविज्ञाततत्त्वे इति षष्ठीविग्रहेणातियुक्तमेतत्। न, विशेषहेत्वभावात्[६]। नात्र विशेषहेतुरिति किमयं तृतीयाविग्रहेण समास उत षष्ठीविग्रहेणेति? षष्ठीविग्रहेणेति[७] युक्तम्, अर्थग्रहणसामर्थ्यात्। यस्मादयमाह[८] अविज्ञाततत्त्वेऽर्थे इति, अर्थश्चार्यमाणत्वात् कर्म, तेन ज्ञापयति षष्ठीसमासोऽयं न तृतीयाविग्रह इति, अर्थग्रहणमन्तरेणापि सामर्थ्यतोऽधिगतेः[९]। अविज्ञातं तत्त्वं यस्येत्यनुक्तेऽप्यर्थे गम्यत एवैतदर्थ इति। एवमपि समासे सन्देहतादवस्थ्यम्। मा भूत् समासो वाक्यमेवास्तु अविज्ञातं तत्त्वं यस्येति[१०]।

---

१. ज्ञाते C २. अवगत° C ३. सामान्यमवग° C ४. चार्थो C ५. तदवि° C ६. °भावान्नार्थाधिगमः C ७. षष्ठीविग्रहेणेति om C ८. अयमाह om C ९. सामान्यतोऽव° C १०. तत्त्वमस्येति C

भवत्येवमभीष्टार्थप्राप्तिः, लाघवार्थं तु समासकरणम्। अनुक्तेऽप्यर्थशब्दे सामर्थ्यतो गम्यते अविज्ञातं तत्त्वं यस्येति। अत्रोक्तं सन्देह एव स्यादिति। समस्तानभिधान-प्रसङ्गाच्च। यदि च सामर्थ्यम् आश्रित्यार्थग्रहणं प्रतिषिध्यते, तदैवं युक्तमूहस्तर्क इति। सामर्थ्यतः शेषं गम्यत इति। तस्मादर्थग्रहणं ज्ञातृनिराकरणार्थमिति।

अविज्ञाततत्त्व इति न वक्तव्यम्, गम्यमानत्वात्। कारणोपपत्तितस्तत्त्वज्ञानार्थम् ऊहस्तर्क इत्युक्ते गम्यत एतत्, अविज्ञातं तत्त्वं यस्येति[१]। अत्र तावदुक्तं समस्तान-भिधानप्रसङ्गादिति। मा भूत् समस्ताभिधानम्, किं नो बाध्यते? न, बुद्धिधर्म-निराकरणार्थत्वात्। उभयथा [२]खल्वर्थेषूहो भवति विज्ञाततत्त्वे चाविज्ञाततत्त्वे चेति। तत्र तावद् विज्ञाततत्त्व ऊहः शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहत-त्त्वाभिनिवेशा बुद्धिधर्मा इति तत्त्वमवधृतं विजानाति, विज्ञातमूहत इति। किमुक्तं भवति? योऽसावर्थः पूर्वम् अनेन विज्ञातस्तमेवोहत इति पूर्वानुभूतार्थपरिच्छेद[३] ऊह इत्युच्यते, न त्वयं तर्कः। यः पुनरविज्ञाततत्त्वेऽर्थे भवति ऊहः, स तर्क इति।

षष्ठ्यभिधानमधिकरणार्थासंभवादविज्ञाततत्त्वस्यार्थस्येति वक्तव्यम्। अविज्ञाततत्त्वोऽर्थो ज्ञायमानः कर्म भवति। कर्मणि च षष्ठ्येव ज्यायसी। यथा घटस्य विज्ञानमिति। न, विभक्तिव्यत्ययात्। षष्ठीस्थल एवैषा सप्तमी द्रष्टव्या। यथा अन्यत्र,

इषावयुगपत् संयोगविशेषाः कर्मान्यत्वे हेतुः[४]

इति विभक्तिव्यत्ययः। कस्मात्? यदि व्यत्ययेन कश्चिदर्थो लभ्यते, युक्तो व्यत्ययः। यथा तस्मिन्नेव इषावयुगपत् संयोगविशेषा इति अधिकरणार्थः। इषोरपि येऽवयवाः, तेषामपि ये संयोगविशेषास्तेऽपि कर्मान्यत्वे हेतुरिति। न पुनरिह विभक्तिव्यत्ययेन फलं पश्यामः। तस्मात् न युक्तो विभक्तिव्यत्यय इति। न न युक्तः, सामान्याधिगतस्य विशेषज्ञापनार्थम्। यस्यैव सामान्यमधिगतं तद्वर्तिनो विशेषा अप्यवगन्तव्या इति। ते च विशेषाः संयोगिनः समवायिनश्च भवन्तीति।

---

१. अस्येति C २. खल्वयमूहो C ३. भूतपरिच्छेदकः C ४. वै. सू. (च) ५.१.१६

कारणोपपत्तित इति। प्रमाणोपपत्तितः। उपपत्तिः संभवः। संभवति एतस्मिन्नर्थे प्रमाणमिति [१]भवेदयमर्थ इति। उदाहरणम्, योऽयं ज्ञाता ज्ञातव्यमर्थं जानीते तं तत्त्वतो जानीयेति किमयमुत्पत्तिधर्मकोऽथानुत्पत्तिधर्मक इति [२]यावदेकतरमनुजानातीति **भाष्यम्।** अनुत्पत्तिधर्मकेनानेन भवितव्यमिति य ऊहः स तर्क इति। नन्वेतत् तत्त्वज्ञानमेव, किमुच्यते तत्त्वज्ञानार्थमिति? नेदं तत्त्वज्ञानमनवधारणात्। न ह्ययमवधारयति एवमेवेति। किं त्वनुत्पत्तिधर्मकेण ज्ञात्रा भवितव्यमिति प्रमाणविषयमभ्यनुजानाति। कथं पुनरयं तत्त्वज्ञानार्थो भवति? प्रमाणविषयविवेचनात्। प्रमाणविषयमनेन विविनक्ति अयमर्थो युक्त इति। प्रमाणानि पुनः प्रवर्तमानानि तर्कविविक्तमर्थं तथाभूतमधिगमयन्तीति।

ऊहः संशयनिर्णयाभ्यां न भिद्यत इति **केचित्।** अयं किलोहः संशयो वा स्यात् निर्णयो वा? यदि संशयस्तदा तेन संगृहीत इति पृथक् न पठितव्यः। अथ निर्णयः, तदा तेन संगृहीत इति।

अपरे तु अनुमानं तर्क इत्याहुः। हेतुस्तर्को न्यायोऽन्वीक्षा इत्यनुमानमाख्यायत इति।

अपरे त्वनुमानमेव तर्कं युक्त्यपेक्षं वर्णयन्ति।

यत्तावन्निर्णयसंशयाभ्यां नोहो भिद्यत इति तत्र प्रत्ययस्वरूपानवबोधात्[३]। अविज्ञाततत्त्वेऽर्थे भवतीति सामान्येनाक्षिप्तो भवान्। सत्यमविज्ञाततत्त्वे भवतीति, न पुनः प्रत्ययस्वरूपं व्यज्ञायि भवता। अनवधारणात्मकः प्रत्ययः संशयः किं स्विदिति। अवधारणात्मकः प्रत्यय एवमिदमिति निर्णयः। अयं तु संशयात् प्रच्युतः कारणोपपत्तिसामर्थ्यात्। न संशये कारणोपपत्तिरस्ति। निर्णयं चाप्राप्तो विशेषादर्शनात्। विशेषदर्शनात् निर्णयो भवति। न चास्मिन् विशेषदर्शनमस्ति। एतेनानुमानं तर्क इत्येतदपि प्रत्युक्तं विशेषादर्शनादिति। किं पुनरस्य स्वरूपम्? भवेदित्येष प्रत्यय इत्येतदस्य स्वरूपमिति।

---

१. तावद° J २. यावत् om C ३. °नवधारणात् J

यैरप्यनुमानं युक्त्यपेक्षं तर्क इत्युच्यते, तैरप्यनुमानात् तर्कभेदः स्वयमेवोक्तः[१]। युक्तिः प्रमाणोपपत्तिः। [२]तामपेक्ष्यमाणो यः प्रत्ययः स तर्क इति केवलं संज्ञाभेदमात्रम्। अथ न प्रमाणोपपत्तिर्युक्तिः, अनुमानं युक्त्यपेक्षमित्यपेक्षासामर्थ्यं वक्तव्यम्। स्वविषयाधिगमे चानुमानं किमपेक्षते? अथेतरप्रमाणापेक्षा युक्तिरित्युच्यते? एवमप्यनुग्रहार्थो वक्तव्यः। कथं प्रत्यक्षागमाभ्यामनुमानमनुगृह्यत इति? अथानुमानस्य प्रत्यक्षागमैकविषयत्वम्? तत्रापि कः तर्कः? त्रीण्येतानि प्रमाणान्येकविषयतया प्रतिसंहितानीति भवेत्, अवधारणप्रत्ययौ भिन्ननिमित्तौ विशेषवत्त्वात् प्रत्यक्षानुमानप्रत्ययवत्।

अनुमानं तर्कः लिङ्गलिङ्गिसंबन्धस्मृत्यपेक्षत्वात् अनुमानवदिति। न, तर्कस्वरूपानवबोधात्। नैव लिङ्गलिङ्गिसंबन्धस्मृत्यपेक्षस्तर्कः। कथमिति? द्वयस्यानधिगतेः। यत्र [३]खलु द्वयमधिगम्यते धर्मी साधनधर्मश्च, तत्रानुमानं प्रवर्तते। यत्र पुनर्धर्मिमात्राधिगतिः, न लिङ्गाधिगतिरस्ति स तर्कविषयः। तस्मात् लिङ्गलिङ्गिसंबन्धस्मृत्यपेक्षत्वमयुक्तम्[४]। अनुमानं च धर्मिगतधर्मोपलब्ध्या[५] प्रवर्तते न पुनस्तर्कः। तर्कस्त्वन्यगतधर्मदर्शनेनापि प्रवर्तते, यथा भवितव्यमनेन पुरुषेण, [६]यथा अस्मिन् देशे अश्वा वाह्यन्त इति अश्ववाहनं न पुरुषधर्मः। सोऽयमन्यगतधर्मोपपत्त्या स्थाणुव्यवच्छेदमात्रमूह इति। सोऽयं तर्कः प्रमाणानि संधत्त इति प्रमाणसहितो वादेऽपदिष्टः, न पुनरयं प्रमाणमपरिच्छेदकत्वादिति॥४०॥

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥१।१।४१॥

एतस्मिंश्च तर्कविषये **विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय** इति **सूत्रम्**। संबन्धोऽर्थश्च पूर्ववदिति। विमृश्येति विमर्शं कृत्वा। पक्षात् प्रतिपक्षाच्च

---

१. एव om C २. प्रमाणोपपत्तिं for ताम् C ३. खलु om C ४. अनुपपन्नम् C ५. °लब्धौ C ६. तथा J

पक्षप्रतिपक्षाभ्याम्। पक्षशब्देन पक्षविषयं साधनमुच्यते। प्रतिपक्षशब्देन [१]प्रतिपक्ष-विषयसाधनस्योपालम्भः। ताभ्यां साधनोपालम्भाभ्यां यदर्थावधारणं स निर्णय इति।

क्व पुनरयं नियमः? किं तावन्निर्णये? आहोस्वित् पक्षप्रतिपक्षाभ्याम्? अथ विमृश्यैवेति? यदि विमृश्य पक्षप्रतिपक्षाभ्यामेव निर्णय इति निर्णये नियमः, इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्यस्य व्याघातः। एतेन विमृश्यैवेति प्रत्युक्तम्। अथ पक्षप्रतिपक्षाभ्यां निर्णय एव? उभयाश्रयो निर्णयः प्राप्नोति। तर्कविषये नियमो नान्यत्र। योऽयं तर्कस्य विषयः, एतस्मिंश्च तर्कविषये विमृश्य पक्षप्रति-पक्षाभ्यामेव निर्णयो भवति। न पक्षप्रतिपक्षाभ्यां नियमो न निर्णये[२] विमृश्यैवेति सामान्यनिर्णयलक्षणमेतत्। कुतोऽयं नियमस्तर्कविषय इति? तर्कस्यानन्तरोद्देशात् तर्कविषये नियमः। अन्यथापि च निर्णयस्य भावात् न निर्णयभाव इति। अथ निर्णयस्य किं लक्षणम्? अर्थपरिच्छेदः अवधारणं निर्णय इति। सोऽयं निर्णयः प्रमाणविषये भवन्नैकशश्च प्रमाणैः क्रियते। संहत्य च। तर्कविषये संहत्य, अन्यत्रैकशश्चेति। शास्त्रे वादे च विमर्शवर्जम्। वादे पक्षप्रतिपक्षाभ्यामेव। न शास्त्रे वादे वा विमर्शोऽस्ति उभयोर्निश्चितत्वात्, शास्त्राभ्युपगतपदार्थस्य निश्चितत्वाच्च।

पक्षप्रतिपक्षशब्देन[३] साधनोपालम्भयोर्ग्रहणमित्ययुक्तं प्रमाणाभावात्। पक्षप्रतिपक्षशब्देन साधनोपालम्भावुच्येते इति किं प्रमाणम्? कस्मात् पुनर्यथाश्रुति न भवति? पक्षप्रतिपक्षयोः कर्मत्वात्। न च कर्मार्थपरिच्छेदकं परिच्छेद्यत्वात्। तस्मात् पक्षप्रतिपक्षशब्देन परिच्छेदकयोः साधनोपालम्भयोर्ग्रहणम्, तयोरकर्मक-त्वात्। तयोरेव कस्मात् न ग्रहणम्? एवमेव च वक्तव्यम्, विमृश्य साधनोपालम्भा-भ्यामर्थावधारणं निर्णय इति। एवं [४]सुविस्पष्टोऽर्थो भवति। न च लाघवकृतः कश्चिद् विशेष इति। न, एकविषयज्ञापनार्थत्वात्। यद्विषयौ साधनोपालम्भौ

---

१. पक्षविषयस्य सा॰ C २. ॰भ्यामेव निर्णयो C ३. ॰पक्षग्रहणेन J ४. सति for सु C

तद्विषयो निर्णयः। अन्यथा हि साधनोपालम्भाभ्यां निर्णय इत्युक्ते न ज्ञायते तत् क्व निर्णय[१] इति। पक्षप्रतिपक्षशब्दाभ्यां च साधनोपालम्भयोर्ग्रहणं तद्विषयस्य[२] चेति। अर्थग्रहणं तर्हि न कर्तव्यम्, गम्यमानत्वात्। केन? विमृश्य पक्षप्रतिपक्षाभ्यामवधारणमित्युक्ते गम्यतेऽर्थस्येति। तस्मादर्थग्रहणं न कर्तव्यम्। न न कर्तव्यम्। श्रुतिसामर्थ्यादन्यतरनिर्णयज्ञापनार्थं गम्यमानमप्यर्थग्रहणं यत् करोति, तेन ज्ञापयत्यन्यतरस्मिन् पक्षे निर्णय इति।

पक्षप्रतिपक्षाभ्यामर्थावधारणमित्ययुक्तम्, एकस्मादधिगतेः। नेदं पक्षप्रतिपक्षाभ्यां[३] संहताभ्यामवधारणम्, किं तर्हि? एकस्माद् योऽवतिष्ठत इति। उभाभ्यामेवेत्याह कथमिति? उभयनिवृत्तावनिवृत्तो विमर्शः, उभयावस्थाने चानिवृत्त इति। यदा त्वेकोऽवतिष्ठते एको निवर्तते, तदा निर्णय इति। अतः संहत्योभौ पक्षप्रतिपक्षौ निर्णयहेतू इति। एतस्मिन् विषये कदा निर्णयो भवति? किं प्रथमे, उत द्वितीये, उत तृतीय इति? सर्वत्र भवति अर्थस्य तथाभावात्। अथ वा तृतीय इति युक्तम्। कथमिति? एकस्तावत् साधनेन पक्षमवस्थापयति, द्वितीयः साधनं बुद्ध्वा निवर्तते, साधनाभासं वा बुद्ध्वा साधनदोषोद्भावयिषया प्रवर्तते[४]। तं निवर्त्य साधनं ब्रवीति। प्रथम इदानीं[५] निश्चितं साधनमिति यदि बुद्ध्यते, न प्रवर्तते। अथ दूषणाभासमिति बुद्ध्यते, तत्त्वोद्भावनार्थं प्रवर्तते। तन्निवृत्त्या च द्वितीयपक्षसाधनमपि निवर्तते। किं कारणम्? प्रथमपक्षसाधनस्य निर्दोषत्वात्। निर्दोषे च प्रथमपक्षसाधने न द्वितीयस्य अवकाश इति निवर्तते द्वितीयः पक्ष इति। योऽत्रावतिष्ठते तस्मिन्निर्णयः। स च[६] निर्णयः संभवासंभवाभ्यां पक्षप्रतिपक्षयोः संहत्य क्रियत इति।

निर्णयोऽनुमानमिति **केचित्**। केचिद् वर्णयन्ति निर्णयोऽनुमानमेव न पदार्थान्तरम् इति। न, लिङ्गलिङ्गिसंबन्धस्मृत्यपेक्षत्वादनुमानस्य। निर्णये च तदभावः

---

१. ज्ञायते क्व पुनर्नि॰ C २. ॰भ्यां साधनोपालम्भयोर्यत् ग्रहणं विषयस्य J ३. कस्मा॰ सहिता॰ C ४. प्रवर्तते, तस्मिन् [तं?] निवर्त्य C ५. निवृत्तं J ६. सोऽयं C

प्रमाणफलत्वात्। प्रमाणमनुमानम्। प्रमाणफलं तु निर्णयः। निर्णयः स्वविषय एव। अनुमानं तु स्वविषयेऽन्यत्र च। यथा धूमदर्शनं धूमपरिच्छेदे नानुमानमपि तु निर्णयः। यदा च परिच्छिनत्ति धूमेन तदानुमीयतेऽनेनेत्यनुमानम्। अग्निपरिच्छेदः फलम्। [१]यदि भावसाधनमाश्रित्योच्यतेऽनुमानं निर्णय इति तदाभ्यनुज्ञया वर्तितव्यम्। यदा तु करणसाधनमाश्रित्योच्यत अनुमानं निर्णय इति, तदा प्रतिषेधो वचनीयः, कार्यकारणयोर्भेदात्। कारममनुमानं कार्यो निर्णयः। तस्मात् नानुमानं निर्णय इति॥४१॥

॥न्यायोत्तराङ्गलक्षणप्रकरणम्॥

॥इति औद्द्योतकरे न्यायवार्त्तिके प्रथमाध्यायस्य प्रथमाह्निकम्॥

१. यदा च C

प्रथमाध्याये द्वितीयाह्निकम्

[कथालक्षणप्रकरणम्]

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ।।१।२।१।।

तिस्रः कथा भवन्ति—वादो जल्पो वितण्डेति। नायं कथानियमः, किं तु[१] विचारवस्तुनियमः। यद् वस्तु विचार्यते तत् त्रेधा विचार्यते। तत्र विचारः—वादो जल्पो वितण्डा च[२]। तत्र गुर्वादिभिः सह वादः। विजिगीषुणा जल्पवितण्डे। तत्र यथोद्देशं लक्षणापदेश इति वादस्य लक्षणमुच्यते। तत्र **प्रमाणतर्कसाधनोपालम्भो वाद** इत्यादि **सूत्रम्।**

तत्र वादः पक्षप्रतिपक्षपरिग्रहः। कौ पुनरेतौ पक्षप्रतिपक्षौ? वस्तुधर्मावेकाधिकरणौ विरुद्धावेककालावनवसितौ वस्तुधर्माविति। वस्तुविशेषौ वस्तुनः सामान्येनाधिगतत्वात् विशेषतोऽनधिगतत्वाच्च विशेषावगमनिमित्तो विचारः, तस्माद् वस्तुधर्मौ [३]तद्विशेषौ एकाधिकरणाविति। नानाधिकरणौ तु[४] विचारं न प्रयोजयतः, उभयोः [५]प्रमाणेनोपपत्तेः। तद् यथा अनित्या बुद्धिर्नित्य आत्मेति। अविरुद्धावप्येवमेव[६]। यौ विरुद्धौ तौ विचारं प्रयोजयतो नाविरुद्धाविति। तद् यथा क्रियावद् द्रव्यं गुणवच्चेति। एककालाविति भिन्नकालयोर्न विचारप्रयोजकत्वं [७]प्रमाणेनोपपत्तेः। यथा क्रियावद् द्रव्यं निष्क्रियं चेति कालभेदेनेति[८]। अनवसिताविति—अनिश्चितौ विचारं प्रयोजयतो नावसिताविति, निर्णयोत्तरकालं विचाराभावात्। तावेतौ विरुद्धावेवंविशेषणौ धर्मौ पक्षप्रतिपक्षौ। तयोः परिग्रहः

---

१. किं तर्हि? C २. ण्डेति C ३. तत् om C ४. तु om C ५. प्रमाणोप॰ C ६. एव om C ७. प्रमाणोप॰ C ८. ॰दे सति C

इत्थंभावनियमः, एवंधर्मायं धर्मी नैवंधर्मेति। सोऽयं पक्षप्रतिपक्षपरिग्रहो वादः। अस्य च[१] कथामार्गत्रयेऽपि समानत्वात् विशेषणार्थं प्रमाणतर्कसाधनोपालम्भ इति। प्रमाणैस्तर्केण च साधनमुपालम्भश्चास्मिन् क्रियत इति। अस्मिन् भवतीति[२]। अस्मिन्निति सप्तमीनिर्देशो विषयज्ञापनार्थः। अस्मिन्–विचारे।

कथं पुनस्तर्केण साधनमुपालम्भश्च[३] अप्रमाणात्मकत्वात्, प्रमाणानुग्राहकत्वात्[४]। न प्रमाणसंगृहीतस्तर्को न प्रमाणान्तरमित्युक्तम्[५]। सोऽयमप्रमाणात्मकः सन् कथं सिद्ध्युपालब्ध्योः[६] कारणं भविष्यति? न ब्रूमः तर्कः सिद्ध्युपालब्ध्योः कारणम्, अपि तु प्रमाणविषयविवेचनात् तर्कः प्रमाणान्यनुगृह्णाति। तर्कविविक्तं विषयं प्रमाणानि प्रवर्तमानानि परिच्छिन्दन्ति। सोऽयं प्रमाणानामनुग्राहकत्वात् प्रमाणसहितो वादेऽपदिष्ट इति। साधनमुपालम्भश्चास्मिन् भवतीति, किं तावत्, सिद्धिः साधनमुपालम्भनमुपालम्भः। अथ साध्यतेऽनेनेति साधनम्, उपालभ्यते अनेनेति उपालम्भः? यदि तावद्[७] भावसाधनौ साधनोपालम्भशब्दौ, तदा प्रमाणैस्तर्केण च न युक्तौ प्रमाणानां तर्कस्य च पराप्रतिपादकत्वात्। प्रमाणान्यात्मप्रतिपत्तिसाधनानि, परप्रतिपादनार्थश्चायं विचारः। तस्मात् न प्रमाणैस्तर्केण च सिद्ध्युपालब्धी भवतः। अथ करणसाधनौ[८], तथापि पञ्चावयवोपपन्न इति पृथग् न पठितव्यम्। किं कारणम्? प्रमाणतर्कसाधनोपालम्भ इति करणसाधनेन पदेनावयवार्थस्योक्तत्वात्। न, अन्यार्थत्वात् पञ्चावयवोपपन्न इत्यस्यान्योऽर्थः। तथा च वक्ष्यामः।

[९]अथैतौ साधनोपालम्भशब्दौ[१०] भावसाधनौ किंविषयौ प्रमाणैस्तर्केण च क्रियेते? ननूक्तं पक्षप्रतिपक्षविषयाविति। पक्षविषयं साधनम्, प्रतिपक्षविषय उपालम्भ इति। सत्यमुक्तम्, न पुनर्युक्तम्[११]। का पुनर्युक्तिहानिरत्र? उपालम्भस्य

---

१. च om J २. अस्मिन् ...इति om J ३. अप्रमाणत्वात् C ४. प्रमाणत्वात् om J ५. द्रः पृः १६ ६. °द्ध्युपालम्भयोः C ७. तावद् om J ८. °साधनः J ९. अथैतो K १०. °लम्भौ J ११. °क्तमुक्तम् C

प्रतिपक्षाविषयत्वात् प्रमाणतर्कसाधना सिद्धिः पक्षस्य भवतु, न पुनरुपालम्भस्य प्रतिपक्षो विषयः। न ब्रूमः प्रतिपक्षविषय उपालम्भ इति, किं तु साधनविषयः। प्रतिपक्षस्य यत् साधनं तद्विषय उपालम्भ इति। कथं पुनः प्रतिपक्षसन्निधावपदिश्यमान[१] उपालम्भशब्दः प्रतिपक्षव्यतिरेकेण साधनेन संबध्यते, सामर्थ्याद् असामर्थ्याच्च। यदुपालम्भयोग्यं तदुपालभ्यते, न च प्रतिपक्ष उपालम्भयोग्यः। कथमिति? उपालभ्यमानस्यानुपालभ्यमानस्य च वस्तुनस्तथाभावात्। [२]यथाभूतं च वस्तूपालभ्यमानं तथाभूतमेवानुपालभ्यमानम्। साधनेऽपि तर्हि तुल्यम्। साधनमपि करणम्, तदपि स्वरूपं न कदाचित् जहाति। तस्मात् साधनस्याप्युपालम्भो न युक्तः।

एवमेतत् नोपालम्भः करणे कर्मणि च[३], कर्मकरणयोः[४] स्वविषये सामर्थ्यात्। सर्वं कर्म स्वविषये समर्थम्, करणमप्येवम्। तस्य तु विषयान्तरे न सामर्थ्यमस्ति। यच्च [५]विषयान्तरेऽसमर्थं न तेन कर्मणः करणस्य वा वैगुण्यम्। कस्य तर्ह्ययमुपालम्भः? [६]योऽयं निगृह्यते। कश्च निगृह्यते? पुरुषः। अप्रतिपत्तिविप्रतिपत्ती पुरुषस्य, न कर्मणो न करणस्य। सोऽयं प्रतिपादयिता असमर्थयोः कर्मकरणयोरुपादानात् निगृह्यते। प्रतिपत्तापि यथाभिहितपदार्थाप्रतिपत्त्या विप्रतिपत्त्या चेति[७]। सोऽयं पुरुषधर्मो वचनद्वारेणोद्भाव्यत इति वचन उपचर्य पुरुषधर्मं वचनमुपालभ्यत इति। कथं पुनरयमर्थः **सूत्र**पदेषु[८] लभ्यते? लभ्यत इत्याह। कथम्? प्रमाणतर्कसाधनः [९]पक्षः, प्रमाणैस्तर्केण च साधनस्योपालम्भः प्रमाणतर्कसाधनश्च प्रमाणतर्कसाधनोपालम्भश्च प्रमाणतर्कसाधनोपालम्भः। एकस्य साधनशब्दस्य गम्यमानार्थत्वात्[१०] लोपः, यथोष्ट्रमुखी कन्येति।

---

१. °वुप° C २. तथाभूतमेव C ३. न कर्मणि C ४. कर्मणः C ५. तद्विष° J ६. अयम् om C ७. विप्र° चेति om C ८. °पदेन C ९. पक्षः om C १०. अर्थ° om J

अथ प्रमाणतर्कसाधनोपालम्भ इत्यनेन पदेन जल्पवितण्डाभ्यां कथं वादो विशिष्यते? नन्विदं पक्षप्रतिपक्षपरिग्रहवत् त्रयाणामपि समानं भवति। न समानम्, वादे प्रमाणतर्कसाधनोपालम्भस्य नियमात्[१] प्रमाणतर्कसाधनोपालम्भ एव वादः, छलजातिनिग्रहस्थानसाधनोपालम्भे जल्पवितण्डे। यथा विषाणित्वं गवि गवये च समानमपि संवृतकण्ठतया सास्नादिमत्तया च विशिष्यमाणमुभौ गोगवयौ विशिनष्टि, तथा प्रमाणतर्कसाधनोपालम्भ इति।

छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इत्यभिधानाद् वादे निग्रहस्थान-प्रतिषेधो विशेषविधानात्। ततश्च [२]नोपालम्भो वाद इति। प्रमाणतर्कसाधनोपालम्भ इत्यभिधानाद् वादेऽपि निग्रहस्थानानीत्यदोषः। उपालम्भश्रवणात्[३] समस्तनिग्रह-स्थानप्रसक्तेः[४] संज्ञाभेदमात्रम्। यद्युपालम्भग्रहणात् वादेऽपि[५] निग्रहस्थानानि विद्यन्त इति मन्यसे, ननु संज्ञाभेदमात्रम्। जल्पाद् वादस्य न विशेषः। तत्रापि निग्रहस्थानानीहापीति। न, उत्तरयोः [६]पदयोर्नियमार्थत्वात्। यस्मादेवोपालम्भशब्देन समस्तानि निग्रहस्थानानि लभ्यन्ते, अत एव नियमार्थे उत्तरे पदे आरभ्येते सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नश्चेति। सिद्धान्ताविरुद्ध इत्यनेन किल पदेन विरुद्धो हेत्वाभासो लभ्यते। तन्न, अन्यतोऽधिगतेः। अन्यत एवायं लभ्यते। पञ्चावयवोप-पन्न इति पञ्चग्रहणात् न्यूनाधिके लभ्येते। अवयवग्रहणात् तदाभासा लभ्यन्त इति लभ्यमानस्यार्थस्य पुनरभिधानेन **सूत्रकारेण** पिष्टं[७] पिष्टं स्यात्। तस्मात् नायमर्थः। अथ किमिदं पदं सिद्धान्ताविरुद्ध इत्यनर्थकमेव? नानर्थकम्, अप-सिद्धान्तावरोधार्थत्वात्[८]।

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः[९]

इति। सोऽनेनावरुध्यते। तस्मात् नानर्थकम्। कस्मात् पुनरयं नियमो वादेऽवयवा-

---

१. नियतत्वात् C २. अनुपा° C ३. ग्रह° C ४. °प्रसक्तौ C ५. अपि only in J ६. पदयोः only in J ७. °धाने पिष्टं C ८. °रोधात् C ९. न्या. सू. ५.२.२३

भासा[१] अपसिद्धान्तश्च निग्रहस्थानमिति। गुर्वादिभिः सह वादोपदेशात् नियमः। यस्मादयं तत्त्वबुभूत्सुर्गुर्वादिभिः सह त्रिविधं फलमाकांक्षन् वादं करोति ततोऽस्य तत्त्वबुभूत्सावतस्तावत् साधनं वक्तव्यम् यावदनेन ज्ञातमिति[२], अप्रतिद्वन्द्वित्वात्। प्रतिद्वन्द्विना च सह न वादः, किं तु जल्पः, तत्र समस्तनिग्रहस्थानप्रयोग इति युक्तम्। प्रमाणतर्कसाधनोपालम्भ इत्यभिधानात् उभयोः सिद्ध्यसिद्धिप्रसङ्गः। यदि प्रमाणतर्कसाधनोपालम्भो वाद उभयोर्वादिप्रतिवादिनोः प्रमाणतर्कसाधनोपालम्भाभिधानेऽधिकार इत्युभयमतसिद्ध्यसिद्धिप्रसङ्गः[३]। नैष दोषः, अप्रतिज्ञानात्। नेदं प्रतिज्ञायते उभयोर्वादिनोः प्रमाणानि सन्तीति, अपि[४] तु ताभ्यां साधनं वक्तव्यमित्येतन्नियम्यते[५]। न पुनः साधनमेवैतद् भवतीति दूषणमप्येवम्।

अपरे तु स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वाद इति वादलक्षणं वर्णयन्ति। अत्र च पक्षविशेषणार्थमुपात्तयोः स्वपरशब्दयोरनुपपत्तिर्विकल्पानुपपत्तेः समासासंभवाच्च। एतौ खलु स्वपरशब्दौ परिग्रहवर्जनार्थौ वा स्याताम्? साधनीयदूषणीयार्थौ वा? पूर्वोत्तरपक्षार्थव्यवस्थापकौ वा? पक्षप्रतिपक्षावद्योतकौ वा? प्रथमद्वितीयपक्षाभिधायकौ वा? एकस्य वानेकविशेषणाभिसंबन्धिनोऽनेकशब्दाभिधानमिति।

तत्र परिग्रहपरिवर्जनार्थता तावदनुपपन्ना, किमोऽर्थासंभवात्। न हि[६] परिग्रहार्थतायां किमोऽर्थः संभवति, कस्यायं स्वो भविष्यति, कश्च स्वार्थ इति स्वीकरणं परिग्रहार्थः। यः स्वीकरोति[७], तस्य स्व इति। एतदेव चिन्त्यते किं तत् स्वीकरणम् इति। ममेति प्रत्ययोत्पत्तिकारणभावाभावौ स्वपरशब्दार्थः। निर्दिष्टः स्वार्थो न पुनरस्य स्वम्[८]। न हि शास्त्रकारस्य स्वः परो वा संभवति यदर्थमिदं स्यात्। यच्च यस्य स्वं भवति तत् तस्य [९]सिद्ध्यर्थं कञ्चिदुपकारं करोति, न पुनः

---

१. °भासो C २. ज्ञातव्यमप्र° C ३. पक्ष for मत C ४. तूभाभ्यां C ५. इति om C ६. हि om C ७. यस्य स्वीकारो भवति C ८. स्वार्थः C; नरस्य स्वम् C var. ९. सिद्ध्यर्थं J

स्वामिनः पक्षेण कश्चिदुपकारः क्रियते। तस्मात् परिग्रहवर्जनार्थौ तावत् स्वपरशब्दौ न भवतः।

साधनीयदूषणीयार्थौ स्वपरशब्दाविति चेत्? अथापीदं स्यात् साधनीयः स्वपक्षो दूषणीयः परपक्ष इति, अहो शब्दार्थकौशलम्। साधनीयः साध्यः स्यात्। साधनीयः स्वपक्ष इति कुत एतत्? लक्षणं चैतत् पक्षस्य, साधयितुमिष्टः पक्ष इति। साधनीयशब्देनापि तदेवोच्यते। व्यवच्छेदार्थं चेदमुच्यते स्वपक्षः परपक्ष इति। परपक्षाच्चायं स्वशब्देन [१]व्यवच्छिद्यमानो न [२]समानमर्थं शक्नोति वक्तुम्। व्यर्थं वा विशेषणम्। सामान्यशब्दा अपि विशेषे वर्तन्त इति दृष्टमेतत्। न ते सामान्यशब्दा ये विशेषेषु वर्तन्त इति। किं तु प्रकरणादिभेदानुविधायिनो विशेषशब्दा एव ते[३]। अपि च साधनीयः पक्षः स्वपक्षः, दूषणीयः पक्षः परपक्ष इत्येतदपि न बुध्यामहे। साधनस्य[४] पक्षविषयत्वात् साधनीयः पक्षः स्वो[५] भवतु, दूषणं तु न किञ्चित्[६] परपक्षेण संबध्यते, परपक्षस्य तादवस्थ्याद्। अथ दूषणस्य को विषयः? कस्यचित् स्थापना विषय इति किञ्चिद् दूषणं स्थापनया संबध्यते किञ्चित्[७] स्वपरपक्षाभ्यामसंबद्धमेव। कतमत्[८] पुनर्दूषणं स्थापनया संबध्यते? का चेयं स्थापनेति? स्थापना नाम पञ्चावयवं पक्षसाधकं वाक्यम्। वाक्यदोषो दूषणम्। तद् वाक्यं न्यूनं चाधिकं[९] च भवति, अवयवाभासोपपन्नं च। तदुद्भावनं दूषणम्। एतत् स्थापनया संबध्यते, तद्विषयत्वात्। शेषं तु दूषणं न स्थापनया न स्वपरपक्षाभ्यां संबद्धम्, उत्तरदोष आक्षेपभावाश्चेति। सत्यम्, न साक्षात् पक्षस्य दूषणेनाभिसंबन्धः, स्थापनानिवृत्तिद्वारेण तु प्रवर्तमानं दूषणं न पक्षं निवर्तयति[१०] स्थापनानिवृत्तेः परपक्षं दूषयतीत्युच्यते उपचरितशब्दप्रयोगो लक्षणेऽनुपपन्नः, लक्षणस्य तत्त्वविषयत्वात्। तत्त्वव्यवच्छेदकं लक्षणम्। न पुनरुपचरितशब्दप्रयोगेण

---

१. व्यवच्छेद्य° C २. समानार्थं C J ३. ते om C ४. साधनीयशब्दस्य C ५. स्वो om J ६. कदाचित् C ७. स्थापनया° किञ्चित् only in J ८. पुनः om C ९. च om C १०. न° निवर्तयति om J

व्यवस्थास्ति। यदि च पारम्पर्येण प्रवृत्त्या प्रवर्त्तमानं दूषणं परपक्षं निवर्तयति, तदैव युक्तं कर्तुं [१]परपक्षासिद्ध्यर्थं वचनं वाद इति। एवमभिधीयमाने किं भविष्यति? लघु च **सूत्रं** भवतीत्युभयोश्च साधनदूषणयोः पारम्पर्येण परपक्षासिद्ध्यर्थतेति। अत्र मा भूदुभयत्र पारम्पर्यमिति स्वरूपत एवं सूत्रं[२] वक्तव्यम्, पक्षस्थापनयोः सिद्ध्यसिद्ध्यर्थं वचनं वाद इति। एवं हि विस्पष्टता लक्षणस्य, यथाविषयं चाभिसंबन्ध इति। स्थापनयापि न सर्वं दूषणं संबध्यत इति दोषतादवस्थ्यम्। न दोषतादवस्थ्यं कस्यचित् संभवात्। किञ्चिद् दूषणं स्थापनया संबध्यत इत्युक्तम्[३]। सामान्याभिधानेऽपि[४] सामर्थ्यात् नियमः। तस्मात् इदमप्यनुपपन्नं साधनीयदूषणीयार्थौ स्वपरशब्दाविति।

स्वपरशब्दौ पूर्वोत्तरपक्षार्थौ भविष्यत इति यदुक्तं भवति [५]पूर्वपक्षोत्तरपक्षाविति तदुक्तं भवति स्वपरपक्षाविति। न युक्तमेतदपीति, साधनदूषणयोर्नियमाभ्युपगमात्

ते साधनदूषणैः

इत्येतस्मिन् **सूत्रे** साधनदूषणयोर्नियमाभिधानम्, स्वपक्षे साधनं परपक्षे दूषणमिति। एतस्मिंश्च नियमे उत्तरपक्षविषयं दूषणं प्राप्नोति। तेनोत्तरपक्षवादी स्वमेव पक्षं दूषयतीति प्राप्तम्[६]। स्वपक्षश्चोत्तरपक्षवादिनः पूर्वपक्षादन्य इति स्वपरशब्दाभ्यां च[७] पूर्वोत्तरपक्षयोरभिधानमिति न पदार्थो न परिभाषा न च[८] रूढिः।

एतेन पक्षप्रतिपक्षार्थता प्रथमद्वितीयपक्षार्थता च व्याख्याता।

एक एवायं पक्ष इति विशेषणद्वययोगात् साध्यतया दूष्यतया च विशेष्यमाणः स्वपरपक्षशब्दवाच्य इति। युक्तमेतत्। द्विवचनं तु न युक्तम्, एकस्यानेकविशेषणयोगो न प्रतिषिध्यते। द्विवचनं तु न भवतीति ब्रूमः। न ह्येकस्यानेकविशेषणाभिसंबन्धे सति द्विवचनबहुवचने भवतः। न हि देवदत्तं छत्रदण्डाभ्यां संबद्धं

---

१. °पक्षसि° C २. सूत्रम् om C ३. उक्तम् om C ४. अपि om C
५. पूर्वोत्तर° C ६. °तो नोत्तरपक्षं बाधयतीति प्राप्तम् K var ७. च om C
८. च om J

समुपलभ्य वक्तारो भवन्ति छत्रिदण्डिनावागतावितिः। तदेवं विकल्पानुपपत्तेः स्वपरशब्दानुपपत्तिः।

समासासंभवाच्च। स्वपरपक्ष इति समासपदमेतत्। तत्र तावत् विशेषण-विशेष्यस्वरूपानवधृतेर्[१] षष्ठीसमासः। यत्र खलु[२] षष्ठी समस्यते तत्र विशेषणं विशेष्यात् पृथगवधार्यते, यथा राजपुरुष इति। भेदाच्च। यत्र च विशेषणविशेष्यभावो भवति, तत्र भेदो दृष्टो राजपुरुषवदेव। असत्यपि भेदे दृष्ट इति चेत्[३]? असत्यपि भेदे दृष्टः षष्ठीसमासः तद् यथा सेनापतिः पानकाङ्गमिति। तच्च न, अनभ्युपगमात्। को हि[४] स्वस्थात्मा पानकमङ्गेभ्यो नार्थान्तरं प्रतिपद्यते, सेनां च सैनिकेभ्य इति। यथा च सेनादीन्यर्थान्तरभूतानि तथोक्तं गुणगुणिवाद[५] इति। अथ मन्यसे स्वार्थः स्वशब्दस्यार्थः, साधनीयार्थश्च[६] पक्षशब्दस्येति? तन्न, अपोदितत्वात्। यथा स्वार्थवाचकः स्वशब्दो[७] न भवति तथोक्तम्। तस्मात् न षष्ठीसमासः। एतेन कर्म-धारयः प्रत्युक्तः, स्वश्चासौ पक्षश्चेति विशेषणस्वरूपासिद्धेर्भेदाभावाच्च। एतेन बहुव्रीहिरपि प्रत्युक्तः, साधयितृविषयं च साधनं प्राप्नोति। अतो न बहुव्रीहिः। ननु च साधनीयार्थता स्वार्थः पक्षविशेषणत्वेन संभवति? न संभवति, पर्यायत्वात्। साधनीयः पक्ष इति पर्याय एव। न च पर्यायशब्दैः समानाधिकरणो बहुव्रीहिर्वा संभवति। न हि भवति वृक्षतरुं छिनत्तीति। विरोधाच्च। यदि तावदयं पक्षशब्दः स्वपक्षाद् भिद्यते,

परपक्षवचनं प्रतिज्ञा

इति व्याघातः। किं कारणम्? प्रतिज्ञायाः स्वपक्षविषयत्वात्। अथाभिन्नः, तथापीदं न प्राप्नोति

स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वादः

---

१. °नवगतेर्न C २. पुनः C ३. असत्यपि° चेत् om J ४. सुस्थात्मा पानक-शब्दार्थ° C ५. द्रः पृ. ६८ ff,. पृ. २३०.२ ६. °योऽर्थश्च C ७. स्व° om C

इति। न चान्यः समासः संभवति। न चेदं वाक्यम्। तस्मात् स्वपरपक्षयोरिति असारमेतत्[१]।

आस्तां तावत् स्वपरशब्दार्थो विशेषणविशेष्यभावश्च स्वपरशब्दयोः। अथ समासः कस्मात् न क्रियते स्वपरपक्षसिद्ध्यसिद्ध्यर्थं वचनं वाद इति? किमेवं कृते भविष्यति? स एवार्थो लाघवं च।

अत्र **केचित्** परिहारं ब्रुवते, यदि किल समासः क्रियते, उभयाश्रिते सिद्ध्यसिद्धी प्राप्नुतः[२]। न, दोषतादवस्थ्यात्। नायं दोषोऽसमासकरणेन परिह्रियते, कथमिति? स्वपक्षसिद्ध्यसिद्ध्यर्थं [३]वचनम्, परपक्षस्य च सिद्ध्यसिद्ध्यर्थं स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थमिति। न, असामर्थ्यात्। न ह्ययं समासः समर्थः स्वपक्षस्य परपक्षस्य च सिद्ध्यसिद्ध्यर्थमिति। कस्मात्? व्याहतत्वात्। यदि सिद्ध्यर्थं यतते असिद्ध्यर्थमिति व्याघातः। यद्यसिद्ध्यर्थं यतते सिद्ध्यर्थमिति व्याघातः। यद्यसामर्थ्यात् न समासः। समासेऽपि तर्ह्यसामर्थ्यात् नोभयपक्ष-सिद्ध्यसिद्धिप्रसङ्गः।

एकवचनबहुवचनप्रसङ्ग इति **अन्ये**। यदि किल समासः क्रियेत समासोऽ-नभिव्यक्तवचनभेदः, तस्माद् वचनभेदव्यक्तिनिमित्तमसमासः[४]। कथं नाम? स्वपरपक्षयोरेव[५] सिद्ध्यसिद्ध्यर्थं वचनं वादः स्यात्, न स्वपरपक्षाणां न स्वपरपक्ष-स्येति। न, असंभवात्। एकस्य तावत् सिद्ध्यसिद्ध्यर्थं वचनं नैवास्ति। स्वपरपक्षाणां[६] साधनम् अनुमानमेकमिति कथाप्येषा नास्ति। अतोऽस्थाने आशङ्का।

अनित्यः समासविधिरिति **अपरे**। अपरे [७]पुनः समासविधेरनित्यतां वर्णयन्त एवमाहुः, नायमवश्यं विधिः सर्वत्र समास इति। क्वचित् समासो भवति[८], क्वचिच्च वाक्यम्[९]। यथा राज्ञः पुरुषः राजपुरुष इति[१०]। [११]यदि उभयप्राप्तिः,

---

१. एतत् om C २. भवतः C ३. वचनम् om J ४. ॰त्तोऽस॰ C
५. एव om C ६. साधनमेकानु॰ J ७. पुनः om C ८. भवति om C
९. क्वचिदसमासो J १०. इति च समास C ११. उभयप्राप्तौ J

असमासः कस्मात्? अनित्यः समासविधिरित्येवं ब्रुवतैतदुक्तं भवति प्राप्तमुभयम्, अथोभयप्राप्तौ कस्मादसमास इति? समासः कस्मादित्यनिवृत्तोऽनुयोगः। नानिवृत्तो लाघवार्थत्वात्। समासे लाघवम्, असमासे गौरवम्। [१]अर्थगत्यर्थं च शब्दानामुपादानमिति गुर्वभिधाने प्रयोजनं वाच्यम्। वर्णे गुरुलाघवानभ्युपगम इति चेत्–नायं परिहारोऽनुयोगस्यानिवृत्तेः। [२]वर्णे गुरुलाघवानुयोगं न प्रतिपद्यामह इति चेत्[३]–न निवर्ततेऽनुयोगः। कस्मादिति। शास्त्रत्वेन च **वादविधानम**भ्युपगम्यते, न च वर्णे गुरुलाघवमाश्रीयत इति न युक्तम्।

सिद्ध्यसिद्ध्यर्थमित्येतदपि न युक्तम्[४]। कस्मात्? द्वेधानुपपत्तेः। अयं खलु सिद्धिशब्दः कल्प्यमानो द्वेधा कल्प्येत व्यक्तावुत्पत्तौ वा। तत्र तावदुत्पत्तौ युज्यते, प्रतिज्ञादिकस्य साधनस्य साधनभावहानिप्रसङ्गात्। न हि प्रतिज्ञादिसाधनेन वस्तूत्पाद्यते, किं तु विद्यमानप्रकाशकत्वं साधनार्थः। स हीयते। सिद्धावुत्पत्तौ कल्पितायामिति व्यक्ताविति चेत्–न, अधिकरणाधारत्वात्। अथ मन्यसे सिद्धिर्व्यक्तिः नोत्पत्तिः? युक्तमेतत्, उत्तरं तु व्याहतं भवति, अधिकरणप्रत्यायनं सिद्ध्यसिद्धी इति। ये चैते अधिकरणप्रत्यायनलक्षणे सिद्ध्यसिद्धी, ते अधिकरणे वर्तमाने कथं पक्षस्य भवत इति षष्ठ्यर्थो वाच्यः। नायं दुर्वचस्तद्विषयत्वात्। तयोः सिद्ध्यसिद्ध्योः पक्षो विषयः, अतस्तद्विषयत्वात् तस्येति। न युक्तमेतत्। ये ते सिद्ध्यसिद्धी पक्षविषये, ते किं तावत् पक्षे सिद्धे उतासिद्धे? यदि तावत् सिद्धे, नाधिकरणप्रत्यायनं सिद्धिः। किं तर्हि? यतस्तत्प्रत्यायनं सा सिद्धिः। कुतश्च तद्भवति? अर्थस्य तथाभावात्, यस्मात् सोऽर्थस्तथा भवति[५]। कथं तथा भवति[६]? यथा प्रमाणैरुपसंपन्न[७] इति। यत् तत् प्रमाणाविसंवादित्वम्[८], स तथाभावः। अथासिद्धे पक्षेऽधिकरणप्रत्यायनं भवति? साधनप्रयोगात् प्रागधिकरण–

---

१. अनुग° C २. वर्णगुरुलाघवं J ३. चेत् om J ४. °मिति चायुक्तम् J
५. भवति om J ६. भवति om J ७. अभिसंबद्ध C ८. यत्प्रमाणैः C

प्रत्यायनं भवतीति[१] वादवैयर्थ्यं स्यात्। पक्षस्य सिद्धिः अधिकरणप्रत्यायनं भवतु[२], असिद्धिस्तु कथम्? न हि परपक्षासिद्धिर्दूषणेन क्रियत इत्युक्तम्। स्थापनानिवृत्तेरुपचार इति चेत्–स्यान्मतिः दूषणं प्रयुज्यमानं साक्षात् स्थापनां निवर्तयति। स्थापनानिवृत्तेस्तु परपक्षनिवृत्तिरुपचर्यत इति। न, प्रयोजनाभावात्। न हि प्रयोजनमन्तरेण[३] मुख्यार्थव्यतिक्रमो लभ्यते, अपि तु प्रमाणासंभवेनोपचारो मञ्चाः क्रोशन्तीति यथा। लोकप्रयुक्तशब्दविषयश्चोपचारः[४] लोकगत्या शब्दार्थः। न चेदं लौकिकं वाक्यं स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वादः।

अपरे तु प्रतिज्ञातार्थज्ञापनं पक्षस्यासिद्धिं वर्णयन्ति। [५]तद् यद्यधिकरणविषयम्, न निवर्तते प्रसङ्गः। कथम्? पक्षस्यासिद्धिरिति सिद्धिवत् प्रसङ्गः। तस्मात् सिद्ध्यसिद्धी पक्षधर्मावेव, यत एतद् भवति सिद्धः पक्षोऽसिद्धश्चेति। एवं सति द्रष्टृस्थे सिद्ध्यसिद्धी[६] इति व्याघातः। यदि सिद्ध्यसिद्धी पक्षधर्मौ द्रष्टृस्थे सिद्ध्यसिद्धी इति व्याहतं भवति। अथ मा भूद् व्याघात इति द्रष्टृस्थे एव ते? तथापि पक्षस्य व्यक्त्यव्यक्ती सिद्ध्यसिद्धी इति व्याहतं भवति[७]। अथ तथातथाते पदार्थस्य सिद्ध्यसिद्धी? तथाप्यधिकरणप्रत्यायनं सिद्ध्यसिद्धी इति व्याहतं भवति। के पुनरेते व्यक्त्यव्यक्ती? वस्तुधर्मावभिधानप्रत्ययहेतू, यत [८]एतावभिधानप्रत्ययौ व्यक्तोऽव्यक्तश्चेति भवतः, ते व्यक्त्यव्यक्ती इति।

अर्थशब्दानुपपत्तिर्विकल्पानुपपत्तेः। अर्थशब्दः खलु प्रवर्तमानस्त्रेधा प्रवर्तते, उद्देशप्रयोजनाभिधेयविषयत्वेन[९]। उद्देशे तावदर्थशब्दो यथा ब्राह्मणार्थं भक्तमिति। एवं च[१०] चतुर्विधवाक्यासंग्रहः। प्रयोजनेऽर्थशब्दः, किमर्थमागतोऽसीति। अभिधेय अर्थशब्दो यथा गौरित्यभिधानस्य कोऽर्थ इति। तत्र तावदुद्देशे संभवति, युक्तायुक्तत्वेन[११] विशेषितत्वात्। स्वपक्षस्य युक्तत्वेन परपक्षस्यायुक्तत्वेनेत्येवं विशेषिते

---

१. अस्तीति C २. भवतु om C ३. व्यतिक्रमेण J ४. °शब्दार्थवत् C ५. तद् व्यधि° C var ६. सिद्ध्यसिद्धी om J, C var ७. भवति om J ८. एव ताव° C ९. °भिधेयभेदविष° J १०. च om C ११. त्वेनेति C

कुत उद्देशेऽर्थशब्दः[१]? न ह्ययं युक्तायुक्तत्वशब्दो[२] दूषणाभासे साधनाभासे वा संभवतीति साधनयोगो युक्तता, दूषणयोगोऽयुक्ततेति। अथ पुनः पदार्थस्य तथात्वातथात्वे युक्तायुक्तत्वे, युक्तत्वं तथाभावोऽयुक्तत्वमतथाभाव इति? तथापि [३]तयोः कर्मतया उपादानात् युक्तत्वेनाधिकरणप्रत्यायनमयुक्तत्वेन चेति[४] व्याघातः। न हि प्रत्याय्यं प्रत्यायनं संभवतीति। अथ प्रयोजनेऽर्थशब्दः, तथापि साधनदूषणाभासवादिनोऽवादिता प्राप्नोति[५]। किं कारणम्? साधनदूषणाभासयोः सिद्ध्यसिद्ध्यप्रयोजनत्वात्। न हि साधनदूषणाभासयोः सिद्ध्यसिद्धी प्रयोजनम्। एवं च तद्वादी [६]न वादी स्यात्। तथा चावादी निगृह्यत इति दोषः। अथाभिधेयेऽर्थशब्दः[७], अभिधानस्वभावानवधृतेः? न[८] युक्तमेतदपि, न हि **ग्रन्थकारभाष्यकाराभ्यां** विशेषितमेवंप्रकारमभिधानं सिद्ध्यसिद्ध्योर्वाचकमिति। ननु च[९] विशेषितम्, येन सिद्ध्यसिद्धी अभिधीयेते तत् तयोर्वाचकमिति। सत्यमुक्तम्[१०]। एवं तु सिद्ध्यसिद्धी इत्येते अभिधाने वादः प्राप्तः । न चान्यः अर्थशब्दस्य विषयः[११]। तस्मादर्थशब्दोऽप्ययुक्तः।

सिद्ध्यसिद्ध्यर्थं वचनं वाद इति ब्रुवाणेन न [१२]पूर्वोत्तरमवलोकितम्। **नैयायिक**हेतुप्रतिषेधेन विशेष्यं वचनमित्यभ्युपगतम्[१३]। इदं पुनः **सूत्रं** समस्तं वचनविशेषणार्थमिति व्याघातः। तदेवमेतानि **सूत्र**पदानि विचार्यमाणानि स्वतन्त्रव्याघातकानीति लोकं च बाधन्त इति[१४]।

एवं तावत् सौत्राणि पदानि स्वेन न्यायेनासंबद्धानि। यथा च **वृत्ति**पदानि असंबद्धानि तथेदमुच्यते। स्वस्य पक्षस्येति स्वार्थासिद्धेरयुक्तम्, स्वार्थश्च प्रतिषिद्धः। अतोऽयुक्तं स्वस्य पक्षस्येति। यदपि षष्ठीसप्तमीद्विवचनयोस्तुल्यरूप-

---

१ उद्देशशब्दार्थः C २. °युक्तशब्दो C ३. उभयोः C ४. वेति C ५. स्यात् C ६. अवादी C ७. °शब्दप्रयोगः C ८. °धृतेरित्य° C ९. च om C १०. सत्ययुक्तम् J ११. शब्दस्यार्थ इति C १२. पूर्वमुत्तरं वा नालोचितम् C १३. °गमसिद्धम् C १४. स्वतन्त्रघातीनि J

त्वात् षष्ठ्यर्थज्ञापनार्थं स्वस्य पक्षस्येति, तदप्ययुक्तम्, अधिकरणार्थासंभवात्। न हि पक्षव्यतिरेकेण पक्षे किञ्चित् साध्यं संभवति। तस्मादयुक्तः[१] सप्तम्यर्थः। तदप्रसक्तौ विशेषणानर्थक्यमिति।

युक्तायुक्तत्वानुपपत्तिश्च विकल्पानुपपत्तेः। युक्तायुक्तत्वे खलु साधनदूषणे वा स्याताम्, साधनदूषणाभ्यां वा योगः, पदार्थस्य वा तथातातथाते इति। तत्र तावत् साधनदूषणे युक्तायुक्तत्वे। कस्मात्? साधनदूषणयोः पृथगभिधानात्।

ते साधनदूषणैः

इत्यत्र पृथगुक्ते साधनदूषणे, युक्तायुक्तशब्दाभ्यां च साधनदूषणयोरभिधानमिति।

ते साधनदूषणैः

इति सूत्रम् [२]अनुच्चार्य चरितार्थत्वादिति। अथ मन्यसे तयोरेव युक्तायुक्तयोर्विशेषणार्थं

ते साधनदूषणैः

इति? न, प्रथमाभिधानप्रसङ्गात्। यदि युक्तायुक्तत्वविशेषणार्थं

ते साधनदूषणैः

इति **सूत्रम्,** प्रथमैव न्याय्या, ते साधनदूषणानीति। न हि विशेषणविशेष्यभावे भवति नीलमुत्पलैरिति। योग इति चेत्? अथ साधनदूषणाभ्यां योगो युक्तायुक्तत्वे इत्येवं चेन्मन्यसे? तन्न, अनिर्देशात्। न साधनदूषणाभ्यां योगो निर्दिष्ट एवंविध इति। अनिर्देशादयुक्तमेतत्। साधनेन योग इति च कदा भवति, यदासौ निर्णितः पदार्थः, तदा च न साधनस्यार्थः कश्चिदस्तीति न युक्तायुक्तत्वेनाधिकरणप्रत्यायनमिति व्याघातः[३]। अतो न युक्तो[४] योगः। अथ पदार्थस्य तथात्वातथात्वे युक्तायुक्तत्वे? तदपि न, करणार्थासंभवात्। ये तथात्वातथात्वलक्षणे युक्तायुक्तत्वे, ते व्यवच्छेद्ये, न[५] व्यवच्छेदस्य साधने। तस्मात् करणार्थो नास्ति। अतो युक्तायुक्तत्वस्येति युक्तं वक्तुमिति।

---

१. °दप्रसक्तः C २. उद्वार्य J; उच्चार्य C var ३. व्याघातात् C ४. युक्तः om J ५. न तु J

अधिकरणप्रत्यायनमिति च न युक्तम्[१]। शास्त्रसंबन्धासंगतत्वात्। शास्त्रसंबन्धं कुर्वाणेनोक्तं सन्देहविपर्ययप्रतिषेधार्थः शास्त्रस्यारम्भ इति। एतन्निरपेक्षेणेदमभिधीयते[२] अधिकरणप्रत्यायनं सिद्ध्यसिद्धी इति। न च प्राश्निकेषु संशयविपर्ययौ स्तः परिच्छेदकत्वात्। तस्मात् न प्राश्निकाः प्रत्याय्या इति। [३]यच्चोक्तं प्राश्निकप्रत्यायनादेव [४]प्रतिवादिप्रत्यायनं कृतं भविष्यतीति[५], किं कारणम्? [६]तत्प्रत्यायनात् प्रतिवादिप्रत्यायनम्। प्रतिवादी किल स्वपक्षरागात् सन्तमप्यर्थं न प्रतिपद्यते। [७]सन्तमर्थं न प्रतिपद्यते चेति व्याहतमुच्यते। कथं चान्यथा प्रतिपन्नः सन्नित्यभिधीयते? अथ प्रतिपद्यमानोऽपि परस्य न कामकारं ददाति, तथापि न प्रतिपद्यत इति व्याहतम्[८]। यच्च प्राश्निकप्रत्यायनात् तत्प्रत्यायनमिति, तदपि न, प्रतीतेः कारणभेदात्। प्राश्निकप्रतीतेरन्यानि कारणानि, अन्यानि प्रतिवादिप्रतीतेरिति। न चान्यविषयस्य करणस्यान्यत्र क्रियेति। नियमाभावाच्च। न चायं नियमः, प्राश्निकप्रत्यायनार्थ एव वादः। प्राश्निकानन्तरेणापि गुर्वादिभिः सह वादो दृष्ट इति। यदा तु नायं तत्त्वबुभुत्सुः लाभपूजाख्यातिकामो वादमारभते, तदा प्राश्निकैः प्रयोजनमस्तीति। सत्यमस्ति प्रयोजनम्। वादस्तु न भवतीति। न, त्रैविध्यानभ्युपगमात्। एक एवायं कथामार्गः। तस्य प्रयोजनं तत्त्वावबोधो लाभादयश्च। न, प्रतिषेधात्। प्रतिषिद्धः स्तुतिमानलाभलिप्सोर्वादः। यदपीदमुच्यते, न त्रैविध्यानभ्युपगमादिति, नानभ्युपगमायत्तः पदार्थसद्भावः, अपि तु सद्भावे सत्यभ्युपगम इति। यथा च त्रैविध्यं कथामार्गस्य तथा लक्षणभेदात्। वादात् जल्पवितण्डयोर्भेदमुपदर्शयिष्यामः[९]। तस्मादज्ञात्वा विशेषमुच्यते त्रैविध्यानभ्युपगमादिति।

---

१. चायुक्तम् J २. तन्नि॰ °दमुच्यते C ३. यच्चोक्तं om J ४. प्रति॰ om C ५. तत्प्रत्यायनाद्वादिप्रत्यायनं भविष्यतीति added C ६. तत्प्र॰ प्रत्यायनम् only in J ७. सन्तमप्यर्थं न प्रतिपद्यते इति C ८. व्याहतमुच्यते C ९. उपपादयि॰ C

द्र. न्या. वा. १.२.२

यच्चोक्तं पक्षसिद्धिविषयं प्रत्यायनं पक्षसिद्धिशब्देनोपचरितम्, यथा शून्यताविषयः समाधिः शून्यतेति। न कामत उपचारो लभ्यते, अपि तु प्रमाणासंभवेन। लोकप्रयुक्तशब्दान्वाख्यानमुपचारः। उक्तं च नोपचरितशब्दप्रयोगो लक्षणे उपपन्न इति। तदर्थं वचनमित्येतदपि किल चतुर्विधवाक्यज्ञापनार्थमुक्तम्, साधनं साधनाभासो दूषणं दूषणाभासश्च संभन्त्स्यत[१] इति। तदयुक्तम्, युक्तायुक्तत्वेनेति विशेषितत्वात्। एवं विशेषिते एतस्मिन् कुतश्चतुर्विधवाक्यसंग्रह इति? अधिकरणं पुनर्यो वादिप्रतिवादिभ्याम् अधिकृत इत्यत्राधिकरणार्थो[२] वक्तव्यः। न हि वादे प्राश्निकाधारं किञ्चिदस्तीति। प्रत्यायनाधारत्वादधिकरणमिति चेत्? नोक्तोत्तरत्वात्। उक्तोत्तरमेतत्, पक्षविषयं प्रत्यायनं न प्राश्निकविषयमिति। तस्मिन् सति भावादिति चेत्— न, अन्यथापि दर्शनात्। अन्यथापि गुर्वादिभिः सह दृष्टो वाद इति। तद् वादे परीक्षा का कस्य क्वेति वक्तव्यम्। साधनदूषणप्रयोगः पक्षस्थापनाविषयो वादः। तस्य परीक्षा साधनदूषणतदाभासपरिज्ञानम्। तदर्थमधिकारः,[३] तस्मिन्निति सप्तम्यर्थो नास्ति। यदपि प्राश्निकप्रतिवादिनोः प्रियाप्रियवचसि [४]वादप्रसङ्ग इति चोद्यं कृत्वा प्रतिसमाधानमुक्तम्[५], तत्सिद्ध्यसिद्धिभ्यां साक्षात् पारम्पर्येणासंबन्धात् युक्तायुक्तविशेषणाच्चासंबद्धमुत्तरेण त्वसङ्गतपदार्थाभिधायिनो दत्तः स्वहस्तः, पूर्वापरयोरसंबन्धादिति। यदि त्वसंगतस्याप्युत्तरं वाच्यं तत एवं वक्तव्यम्, न, सूत्रार्थापरिज्ञानादिति। तदेतत् सूत्रं विचार्यमाणं सहवार्त्तिकं न युक्त्या संगच्छत इति यथान्यायमेवास्तु॥१॥

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥१।२।२॥

समस्तं वादलक्षणं छलजातिनिग्रहस्थानसाधनोपालम्भश्च जल्प इति।

---

१. संपत्स्यते C २. अत्र om C ३. अधिकार उभयोः C ४. वाद॰ om J ५. कृत्वा॰ उक्तम् C

यथोक्तोपपन्न इति न युक्तम्, जल्पे निग्रहस्थाननियमस्यानभ्युपगमात्। यद्येवमुच्यते[1] प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इति, न युक्तमेवं भवितुम्। सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति च पदयोरुपालम्भग्रहणात्[2] समस्तनिग्रहस्थानप्रसक्तौ नियमार्थत्वात्। नियमार्थे एते पदे सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति। जल्पे च नियन्तव्यं न किञ्चिदस्ति। तस्मात् नियमार्थे एते पदे नातिदेष्टव्ये इत्यतो न वक्तव्यं यथोक्तोपपन्न इति। नैष दोषः, [3]संभवतो[संबन्धतो?]ऽतिदेशात्। यदत्र संबध्यते तदतिदिश्यते। किं च संबध्यते? प्रमाणतर्कसाधनोपालम्भ इत्येतत्। तस्मात् यथोक्तोपपन्न इति लक्षणमात्रस्यातिदेशः। यथान्यत्र,

> [4]अनेकद्रव्येण द्रव्येण समवायाद् रूपविशेषाच्च रूपोपलब्धिः[5]।
> अनेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम्[6]।

इति न [7]रूपविशेषोऽतिदिश्यते, अपि त्वनेकद्रव्येण द्रव्येण समवायमात्रं[8] स्वगतो विशेषः[9] सामर्थ्यात्, तथेहापि यत् समर्थं तदतिदिश्यते। समर्थं च लक्षणम्। तस्मात् लक्षणमतिदिश्यते। न नियमार्थे पदे, नियन्तव्यस्याभावात्।

अथ वा [10]यथोक्तेनोपपन्नेनोपपन्नो यथोक्तोपपन्नोपन्न इति प्राप्ते गम्यमानत्वादेकस्योपपन्नशब्दस्य लोपः, यथा गोरथ इति। केन पुनरयं गम्यत इति? उक्तं सामर्थ्येनेति। न हि नियमार्थयोः पदयोर्जल्पे संभवः, तस्मात् न ते अतिदिश्येते इति। भाष्यमिदानीं कथम्? न, सूत्रपाठानुक्रमज्ञापनार्थत्वात् भाष्यस्य, एतस्मिन् सूत्रे यदुपपन्नं लक्षणत्वेन तदतिदिश्यत इति। छलजातिनिग्रहस्थानैर्न कस्यचित् साधनम् उपालम्भो वा युक्तः, अयुक्तोत्तरत्वात्। छलं तावत् न साधनाय नोपालम्भाय[11] वालम्। कस्मात्? अयुक्तोत्तरत्वात्। अयुक्तमुत्तरं छलेनाभिधीयते,

---

१. उच्येत C २. °श्रवणात् C ३. संभवादति C ४. °द्रव्यद्रव्येण C ५. द्रः. वै. सू. (च) ४.१.९ ६. द्रः. वै. सू. (च) ४.१.१० ७. स्वरूप° C ८. द्रव्यद्रव्यसम° C ९. स्व° शेषः om J १०. यथोक्तोप° C ११. साधनोपालम्भाय C

यच्चायुक्तमुत्तरं तन्नालं साधनायोपालम्भाय वेति[१]। एवं जातिः। अङ्गभाव इति चेत्? अथापीदं स्यात् यत् तत् प्रमाणतर्कैः साधनं [२]यश्चोपालम्भः तस्यैतानि प्रयुज्यमानानि छलजातिनिग्रहस्थानानि रक्षणार्थत्वादङ्गं भवन्तीति एतदप्ययुक्तोत्तरत्वादेवानुपपन्नम्[३]। किमर्थं तर्हि प्रयोगः, यद्येतानि छलजातिनिग्रहस्थानानि साधनोपालम्भयोर्न साधनं नाङ्गं वा,[४] किमर्थमेषामुपपादनमिति? साधनविघातार्थम्। साधनं विहनिष्यामीत्यनया धियापहृतः प्रवर्तते। यत्र चैतानि छलजातिनिग्रहस्थानानि प्रयुज्यन्ते, न स वादः। न पुनरेतत् अभिधीयते छलजातिनिग्रहस्थानानि साधनमङ्गं चेति[५] साधुसाधनोपादाने च परेणाकुलीकृतबुद्धिः[६] छलादीनि प्रयुङ्क्ते कदाचिच्छलादिभिराकुलीकृतस्य परस्य पराजयोऽपि स्यादिति। न पुनरेतानि तत्त्वबुभुत्सुना वक्तव्यानि, किं तु विजिगीषुणेति। सोऽयं पक्षप्रतिपक्षपरिग्रहश्छलजातिनिग्रहस्थानप्रयोगाप्रयोगाभ्यां भिद्यमानो वादो जल्पो वितण्डा च भवति।

अत्रापि विरुद्धौ धर्मावेकाधिकरणस्थाविति समानम्। विरुद्धयोर्धर्मयोरेकाधिकरणत्वानुपपत्तिरुभयात्मकवस्तुस्वभावासंभवात्[७]। यदि विरुद्धावेकाधिकरणौ धर्मौ भवतः, [८]नन्वेकं वस्तूभयस्वभावं प्राप्तम्। न चैतदस्ति। तस्मात् न विरुद्धौ धर्मावेकाधिकरणाविति। न, अध्यारोपितस्वरूपधर्मसंप्रतिपत्त्या तदुपपत्तेः। [९]एकस्तु धर्मः स्वरूपतः, एकस्त्वध्यारोपितस्वरूपप्रवृत्तिः। तस्मादुभयधर्मा धर्मीति सिद्धम्[१०]। एकधर्मिस्थौ विरुद्धार्थावित्येतदपि[११] न बुध्यामहे, को विरुद्धार्थ इति। न, स्वरूपविपर्ययोपपत्तेः। स्वरूपमात्रविपर्ययो विरोधः, न पुनर्बाधा वध्यघातकभावो वेति॥२॥

---

१. छलम्, तत्र साधनोपालम्भायेति C २. यो वा C ३. °दप्युक्तोत्तरत्वादनुप° C ४. साधनमङ्गं C ५. °मङ्गानि वेति C ६. °णाकुलितबुद्धिः C ७. °रुभयस्व° C ८. तदैकं C ९. °एकस्तत्र C १०. युक्तम् C ११. °द्धावेतदपि J

स प्रतिपक्षस्थापनाहीनो वितण्डा ।।१।२।३।।

प्रतिपक्षस्थापनाहीन इति द्वितीयपक्षस्थापनाहीन इति[१]। यावदुक्तं भवति द्वितीयपक्षवादी वैतण्डिको न कञ्चित् पक्षं स्थापयतीति।

अपरे तु ब्रुवते–दूषणमात्रं वितण्डेति। दूषणमात्रमिति मात्रशब्दप्रयोगात् वैतण्डिकस्य पक्षोऽपि नास्तीति। अयुक्तं चैतत्, चतुर्वर्गस्याभ्युपगमात्। दूषणमभ्युपगच्छन् दूष्यमभ्युपैति अयथार्थावबोधं प्रतिपद्यते प्रतिपादयितारं प्रतिपत्तारं च। दूषणमात्राभ्युपगमे सति सर्वमेतत् न स्यात्। दूषणमात्राभिधानात्[२] शेषमर्थतोऽवगम्यत इति चेत्[३]? वितण्डा वितण्डेत्येव वक्तव्यम्। यया वितण्ड्यते सा वितण्डेत्यनुगतार्थया संज्ञयैव परस्य पक्षस्य प्रवृत्तिव्याघातः[४] क्रियत इति। तस्मात् यथान्यासमेवास्तु[५] न्याय्यम्॥३॥

॥इति कथालक्षणप्रकरणम्॥

[हेत्वाभासलक्षणप्रकरणम्]

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः ।।१।२।४।।

हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदवभासमानाः त[६] इमे–**सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता[७] हेत्वाभासाः**। किं पुनर्हेतुभिः अहेतुनां सामान्यम्, येन हेतुवदाभासन्त इति? प्रतिज्ञानन्तरं प्रयोगः सामान्यम्। यथैव हेतवः प्रतिज्ञानन्तरं प्रयुज्यन्ते, एवं हेत्वाभासा अपीत्येतत्[८] सामान्यम्।

---

१. द्वितीय° इति om C २. भ्युपगमात् C ३. चेत् om C ४. परप्रतिपत्तिविघातः C ५. अस्तु om J ६. ते om J ७. °मातीतकालाः C ८. °त्येव C

अन्यतमलिङ्गधर्मानुविधानं वा। यद् वा यत्साधकस्य[१] लिङ्गस्य [२]त्रैलक्षण्यं धर्मस्तत्रैकतमधर्मानुविधानम्, द्विलक्षणस्यान्यतरधर्मानुविधानं वा विवक्षितम्। साधकासाधकत्वे तु विशेषः। हेतोः साधकत्वं धर्मः, असाधकत्वं हेत्वाभासस्य। किं पुनस्तत्? समस्तलक्षणोपपत्तिः असमस्तलक्षणोपपत्तिश्च। कः पुनरस्य सूत्रस्यार्थः? विभागोद्देशो नियमार्थ इत्युक्तम्[३]। किं पुनरनेन विभागोद्देशेन नियन्तव्यम्? अनेकधा प्रसृतस्य हेतुहेत्वाभासस्य[४] विस्तरः संक्षेप्तव्य इति।

कियता पुनर्भेदेनायं हेतुहेत्वाभासः प्रसृत इति? कालपुरुषवस्तुभेदानुविधानेन अपरिसंख्येयः। सामान्यतः साध्यवस्तूपग्रहेण हेतुहेत्वाभासभेदः प्रपञ्च्यमानः षट्सप्ततिशतम्। तत्र साध्यव्यापकधर्मभेदः षोडशधा। साध्यैकदेशवृत्तिधर्मोऽप्येवम्। एवं साध्यावृत्तिधर्मभेद इति। विशेषणविशेष्यासिद्धिभेदात् चतुःषष्टिः। एवं [५]समर्थासमर्थ विशेषणविशेष्यभेदादिति।

तत्र साध्यव्यापकधर्मभेदानां षोडशानामुदाहरणानि। तत्र

१. साध्यतज्जातीयान्यव्यापकः, प्रमेयत्वान्नित्योऽनित्यो वेति।

२. साध्यतज्जातीयव्यापको विपक्षैकदेशवृत्तिः, गौरयं विषाणित्वात्।

३. साध्यतज्जातीयव्यापको विपक्षावृत्तिः, अनित्यः शब्द उत्पत्तिधर्मकत्वात्।

४. साध्यव्यापकस्तज्जातीयावृत्तिर्विपक्षव्यापकः, नित्यः शब्द उत्पत्तिधर्मकत्वात्।

५. साध्यव्यापकस्तज्जातीयावृत्तिर्विपक्षैकदेशवृत्तिः, नित्यः शब्दः [६]सामान्य-विशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वाद् द्व्यणुकवत्।

६. साध्यव्यापकस्तज्जातीयविपक्षावृत्तिर्यथा नित्यः शब्दः सामान्यविशेषवत्त्वे सति श्रावणत्वात् घटादिवत्।

७. साध्यव्यापकस्तज्जातीयैकदेशवृत्तिर्विपक्षव्यापकश्च, अगौरयं विषाणित्वात्।

८. साध्यव्यापकस्तज्जातीयविपक्षैकदेशवृत्तिः, नित्यः शब्दोऽस्पर्शवत्त्वात्।

---

१. साधनस्य C २. त्रैविध्यं तदेक° C ३. पृः २६.५ ४. विसृतस्य हेत्वा° J ५. समर्था° om J ६. °विशेषवत्त्वे सत्यस्म° C

९. साध्यव्यापकस्तज्जातीयैकदेशवृत्तिर्विपक्षावृत्तिः, अनित्यः शब्दः सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात्। सामान्यविशेषवत इति सामान्यविशेषसमवायानां निराकरणम्। अस्मदादिप्रत्यक्षत्वादिति परमाणूनाम्। बाह्यकरणप्रत्यक्षत्वादित्यात्मनः।

१०. साध्यतज्जातीयव्यापकोऽविद्यमानविपक्षः[१] सिद्धान्तभेदाश्रयणेनैकान्तवादिनः, अनित्यः शब्द उत्पत्तिधर्मकत्वात्।

११. साध्यव्यापकस्तज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः, अनित्यः शब्दो बाह्येन्द्रियप्रत्यक्षत्वात्।

१२. साध्यव्यापकस्तज्जातीयावृत्तिरविद्यमानविपक्षः, अनित्यः शब्दः श्रावणत्वात्।

१३. साध्यव्यापकोऽविद्यमानसजातीयो[२] विपक्षव्यापकः, नित्यः शब्द उत्पत्तिधर्मकत्वात्।

१४. साध्यव्यापकोऽविद्यमानसजातीयो[३] विपक्षैकदेशवृत्तिः, नित्यः शब्दो बाह्येन्द्रियप्रत्यक्षत्वात्।

१५. साध्यव्यापकोऽविद्यमानसजातीयो[४] विपक्षावृत्तिः, नेदं निरात्मकं जीवच्छरीरम्, अनिन्द्रियाधिष्ठानत्वप्रसङ्गात्।

१६. पक्षव्यापकोऽविद्यमानसपक्षविपक्षः, सर्वं नित्यं प्रमेयत्वात्।

त एते पक्षव्यापकाः षोडश। एषां पञ्च हेतवः। शेषाः हेत्वाभासाः। तत्रान्वयव्यतिरेकिणौ द्वौ विपक्षावृत्ती तृतीयनवमौ। एकान्तवादिनोऽन्वयिनावेव दशमैकादशौ। व्यतिरेकि [५]पञ्चदश इति।

अथ साध्यैकदेशवृत्तयः,

१. साध्यैकदेशवृत्तिस्तज्जातीयविपक्षव्यापकः, पृथिव्यसेजोवाय्वाकाशानि अनित्यानि अगन्धवत्त्वात्।

---

१. °न्तभेदेनै° C २, ३, ४. °सजातिः J ५. अनन्वयी J

२. साध्यैकदेशवृत्तिस्तज्जातीयव्यापको विपक्षैकदेशवृत्तिश्च, सामान्यविशेषवदस्मदादिबाह्यकरणप्रत्यक्षे वाङ्मनसे अनित्यत्वात्।

३. साध्यैकदेशवृत्तिस्तज्जातीयव्यापको विपक्षावृत्तिः, अनित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात्।

४. साध्यैकदेशवृत्तिस्तज्जातीयावृत्तिर्विपक्षव्यापकः, नित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात्।

५. साध्यैकदेशवृत्तिस्तज्जातीयावृत्तिर्विपक्षैकदेशवृत्तिः[१], सामान्यविशेषवद् अस्मदादिबाह्यकरणप्रत्यक्षे वाङ्मनसे नित्यत्वात्।

६. साध्यैकदेशवृत्तिस्तज्जातीयविपक्षावृत्तिः, अनित्यः शब्दो विभागजविभागासमवायिकारणकत्वात्[२]।

७. साध्यतज्जातीयैकदेशवृत्तिर्विपक्षव्यापकः, अनित्याः परमाणवोऽगन्धवत्त्वात्।

८. साध्यतज्जातीयविपक्षैकदेशवृत्तिः, अनित्ये वाङ्मनसे अमूर्तत्वात्।

९. साध्यतज्जातीयैकदेशवृत्तिर्विपक्षावृत्तिः, अनित्ये वाङ्मनसे [३]सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात्।

१०. साध्यैकदेशवृत्तिस्तज्जातीयव्यापकोऽविद्यमानविपक्षः सिद्धान्तभेदाश्रयणेन, अनित्ये रूपविज्ञाने अमूर्तत्वाद् वेदनादिवत्।

११. साध्यतज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः[४], अनित्ये चक्षुर्विज्ञाने अमूर्तत्वात् रूपादिवत्।

१२. साध्यैकदेशवृत्तिस्तज्जातीयावृत्तिरविद्यमानविपक्षः, अनित्ये [५]वाङ्मनसे श्रावणत्वात्।

१३. साध्यैकदेशवृत्तिरविद्यमानसजातिर्विपक्षव्यापकः, नित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात्।

---

१. वृत्तिश्च J २. °कारणत्वात् J ३. सामान्यवतो° C ४. °विजातिः J
५. शब्दनभसी C

१४. साध्यैकदेशवृत्तिरविद्यमानसजातिर्विपक्षैकदेशावृत्तिः[१], नित्ये चक्षुर्विज्ञाने अमूर्तत्वात्[२]।

१५. साध्यैकदेशवृत्तिरविद्यमानसजातिर्विपक्षावृत्तिः[३], नेदं निरात्मकं शरीरम् अनिन्द्रियाधिष्ठानत्वप्रसङ्गात्।

१६. साध्यैकदेशवृत्तिरविद्यमानसपक्षविपक्षः, सर्वमनित्यं [४]मूर्तत्वादिति।

एते च साध्यैकदेशवृत्तयः षोडश यथोक्ताः सर्वे हेत्वाभासाः।

अथ साध्यावृत्तयः,

१. साध्यावृत्तिस्तज्जातीयविपक्षव्यापकः, अनित्या पृथिवी अगन्धवत्त्वात्।

२. साध्यावृत्तिस्तज्जातीयव्यापको विपक्षैकदेशवृत्तिश्च, अनित्यः शब्दः अश्रावणत्वात्।

३. साध्यावृत्तिस्तज्जातीयव्यापको विपक्षावृत्तिः, अर्थः शब्दः अश्रोत्रग्राह्यसामान्यवत्त्वात्।

४. साध्यतज्जातीयावृत्तिर्विपक्षव्यापकः, अर्थः शब्दः असामान्यवत्त्वात्।

५. साध्यतज्जातीयावृत्तिर्विपक्षैकदेशवृत्तिश्च[५], कारणवान् शब्दोऽनर्थत्वात्।

६. साध्यतज्जातीयविपक्षावृत्तिः, नित्यः शब्दोऽसत्त्वात्।

७. साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिर्विपक्षव्यापकः, अस्पर्शः शब्दो द्रव्यत्वात्।

८. साध्यावृत्तिस्तज्जातीयविपक्षैकदेशवृत्तिः, कारणवान् शब्दो मूर्तत्वात्।

९. साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिर्विपक्षावृत्तिः, आश्रयवान् शब्दश्चाक्षुषत्वात्, **औलूक्य**पक्षे।

१०. साध्यावृत्तिस्तज्जातीयव्यापकोऽविद्यमानविपक्षः सिद्धान्तभेदाश्रयेण, अनित्यः शब्दोऽश्रावणत्वात्।

११. साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः, अनित्यः शब्दो मूर्तत्वात्।

---

१. °वृत्तिश्च C २. मूर्तत्वात् C ३. वृत्तिश्च C ४. अमूर्तत्वात् J ५. विपक्षवृत्तिश्च C

१२. साध्यतज्जातीयावृत्तिरविद्यमानविपक्षः[१], अनित्यः शब्दोऽसत्त्वात्।

१३. साध्यावृत्तिरविद्यमानसपक्षो[२] विपक्षव्यापकः, नित्यः शब्दोऽश्रावणत्वात्।

१४. साध्यावृत्तिरविद्यमानसजातिर्विपक्षैकदेशवृत्तिः, नित्यः शब्दो मूर्तत्वात्।

१५. साध्यावृत्तिरविद्यमानसजातिर्विपक्षावृत्तिः, नित्यः शब्दोऽसत्त्वात्।

१६. साध्यावृत्तिरविद्यमानसपक्षविपक्षः,[३] अनित्यं सर्वमसत्त्वात्।

त एते षोडश साध्यावृत्तयो हेत्वाभासाः।

विशेषणविशेष्यासिद्धिभेदात् चतुःषष्टिर्भेदा[४] भवन्तीत्युक्तम्। तत् कथम्? व्यापकाव्यापकविशेषणयोगात्। ये[५] साध्यव्यापकाः षोडश, ये च पक्षैकदेशवृत्तयस्त [६]एते विशेषणविशेष्यासिद्धिभेदेन चतुःषष्टिर्भवन्तीति।

तत्र व्यापकानां तावदुदाहरणानि। अनित्यः शब्दोऽनभिधेयत्वे सति प्रमेयत्वात् इति विशेषणासिद्धः। प्रमेयत्वे सत्यनभिधेयत्वादिति विशेष्यासिद्धः। एवं सर्वेषु साध्यव्यापकेषु विशेषणविशेष्यासिद्धिभेदो वक्तव्यः[७]। तान्येव चोदाहरणानि साध्यैकदेशवृत्तीनां तूदाहरणम्, पृथिव्यप्तेजोवाय्वाकाशान्यनित्यानि अनभिधेयत्वे सति अगन्धवत्त्वात्, विशेषणासिद्धः। अगन्धवत्त्वे सत्यनभिधेयत्वादिति विशेष्यासिद्धः। एवं सर्वेषु साध्यैकदेशवृत्तिषु। एवमसमर्थविशेषणासमर्थविशेष्याश्चतुःषष्टिरेव द्रष्टव्याः, यथा अनित्यः शब्दः कृतकत्वे सति प्रमेयत्वात्, प्रमेयत्वे सति कृतकत्वादिति। एवं सर्वेषु साध्यैकदेशवृत्तिषु[८]। एवं सन्दिग्धविशेषणविशेष्यभेदा अपि द्रष्टव्याः, यथा मयूरशब्दोऽयं षड्जादिमत्त्वे सति अवर्णात्मकत्वात्, अवर्णात्मकत्वे सति षड्जादिमत्त्वात्। त एते उभयपक्षसंप्रतिपन्ना विद्यमानसाध्यधर्मा उदाहृता इति। एवमन्यतरासिद्धा इति[९] व्यापकाव्यापकभेदेन द्वात्रिंशकं शतम्। ते च [१०]पुनर्व्यधिकरणविशेषणविशेष्यसंदिग्धासमर्थविशेषण-

---

१. विजातिः J २. सजातिः C ३. °सजातिवि° C ४. भेदाः om C
५. य एव C ६. एते om C ७. °सिद्धभेदो द्रष्टव्यः C ८. शेषेषूदाहरणेषु C
९. इति om J १०. °व्यधिकरणसन्दि° C

विशेष्यभेदेन द्वानवतं शतं द्रष्टव्याः। एवमप्रसिद्धाश्रयोभयान्यतरपक्षाप्रसिद्ध्या द्वात्रिंशकं शतम्। ते च पुनः पूर्ववदेव[१] द्वानवतं शतम्। यथाग्निमान् देशो धूमवत्त्वात्। अस्ति चात्मा इच्छादिगुणत्वात्। असमर्थाव्यापकासिद्धविशेषणानामुदाहरणम्— अनित्यः शब्दः प्रयत्नानन्तरीयकत्वे सति कृतकत्वात्। अव्यापकासमर्थविशेष्याणामुदाहरणम्— अनित्यः शब्द प्रत्ययभेदभेदित्वेनोपलभ्यमानत्वात्[२]। व्यधिकरणविशेष्याणामुदाहरणम्— अस्ति प्रधानं भेदानामन्वयदर्शनात्। व्यधिकरणविशेषणानामुदाहरणम्— रूपरसगन्धस्पर्शशब्दाश्चन्दनशब्दादत्यन्तं विभिन्नार्थाः[३], समुदायसमुदाय्यसंभवे सति तेन व्यपदिश्यमानत्वात्[४]। एतदेव व्यधिकरणविशेषणविशेष्यस्योदाहरणं विपर्ययेण[५]।

अन्यथासिद्धोदाहरणम्, [६]अन्येषामभ्यासात् नित्यः शब्दः। सन्दिग्धाप्रसिद्धविशेषणानामुदाहरणं यथा, सन्दिह्यमानधूमादिभावेऽग्निमान् देशो धूमवत्त्वे सति प्रकाशकत्वात्। विपर्ययेण सन्दिग्धविशेष्या[७] द्रष्टव्याः। एवं सन्दिग्धाप्रसिद्धाप्रसिद्धा उभयान्यतरासिद्धा व्यापकाव्यापकभेदेन चतुःषष्टिर्भवन्तीति। ते च पुनः पूर्ववद्भेदेन शतत्रयं चतुरशीतम्। एवमन्यथासिद्धभेदो द्रष्टव्यः। एवं विरुद्धविशेषणा विरुद्धविशेष्याश्च[८] सर्वत्र द्रष्टव्या इति। एषां तूदाहरणानि हेत्वाभासवार्त्तिके द्रष्टव्यानि, स्वयं चाभ्यूह्यानि। त एते हेतवो हेत्वाभासाश्चासङ्कीर्णविशेषणविशेष्यभेदेन द्वे सहस्रे द्वात्रिंशके। असिद्धादिसमुच्चयेनानन्तो भेद इति। साध्यावृत्तयस्त्वसत्त्वान्न विशेषणयोगिन इत्यतो नाभिधीयन्त इति। त एते[९] विद्यमानसाध्यव्यापकाव्यापकधर्माः प्रपञ्चत उक्ताः। तत्र मुख्यासिद्धभेदाः षोडश। त एते पक्षावृत्तयः। अनैकान्तिकाः त्वसङ्कीर्णा मुख्यतः षडेव। साध्यव्यापकवर्गे विरुद्धाश्चत्वार एव[१०]। तस्मिन्[११] अन्तिमस्तु पक्षमात्रधर्मत्वादनुपसंहार्यः। शेषा हेत्वाभासाः।

---

१. पूर्ववद्भेदेन द्रष्टव्याः J २. °भेदित्वे सत्युप° J ३. °त्यन्ताभि° C ४. व्यपदेशात् C ५. एतदेव° विपर्ययेण om J ६. अन्येषाम् om J ७. वक्तव्याः C ८. °विशेषणवि° C ९. °व्यापकाव्यापक° om J १०. एव om J ११. तस्मिन्नेव J

तेऽसिद्धानैकान्तिकविरुद्धाव्यापकासिद्धभेदेन[१] सङ्कीर्णा उदाहरणेषु स्वयमभ्यूह्या इति।

केचित् तु विरुद्धाव्यभिचारिणमनैकान्तिकं वर्णयन्ति। तन्न, असत्त्वात्। नायमस्तीत्युक्तम्। उपेत्य तस्य पञ्चविंशतिधा भेदं[२] पञ्चानां हेतूनां सरूपासरूपप्रतिबन्धात्[३] पञ्च पञ्चका भवन्तीति। तेषां तु सर्वेषां नोदाहरणानि सन्तीति। तेन नोदाह्रियन्ते। त एते हेत्वाभासाः संक्षेपेणेयता[४] भेदेन भेदवन्तः। तेषां संग्रहार्थं हेत्वाभासानां विभागोद्देशार्थं **सूत्रम्**[५]। लक्षणत एव पञ्चत्वं गम्यत इति चेत्? यान्येतानि पञ्च हेत्वाभासानां लक्षणसूत्राणि तैरेव पञ्चत्वं गम्यत इति नियमार्थं सूत्रमनर्थकम्। नानर्थकम्, लक्षणस्येतरेतरव्यवच्छेदकत्वात्। [६]इतरेतरव्यवच्छेदकं लक्षणम्, न पुनर्नियमार्थम्। न हि नियमो लक्षणेन गम्यत इति॥४॥

अनैकान्तिकः सव्यभिचारः ॥१।२।५॥

तेषाम्, अनै...भिचारः। एकस्मिन्नन्ते नियत ऐकान्तिकः, विपर्ययादनैकान्तिकः। कः पुनरयं व्यभिचारः? साध्यतज्जातीयान्यवृत्तित्वम्। यत् खलु साध्यतज्जातीयवृत्तित्वे सति अन्यत्र वर्तते तद् व्यभिचारि। तद्वृत्तित्वं व्यभिचारः। सर्वोऽयं पदार्थभेदोऽन्तद्वयेऽवतिष्ठते, अन्यत्र प्रमेयात्[७]। नित्यश्चानित्यश्च व्यापकश्चाव्यापकश्च इत्येवमादिः। तत्र यो हेतुरुपात्त उभावन्तावाश्रित्य प्रवर्तते सोऽनैकान्तिकः।

अनैकान्तिक इति किं पुनरयं पर्युदास उत प्रसज्यप्रतिषेध इति? किं चातः? यदि पर्युदासः, सर्वानैकान्तिकता, ऐकान्तिकादन्योऽनैकान्तिक इति ब्रुवतः[८]

---

१. अव्यापकाव्यापकभे° J, तेऽसिद्धानैकान्तिका विरुद्धाव्यापकप्रसिद्धाव्यापकभेदेन C var २. भेदः J ३. °प्रतिसंधानात् C var ४. °णैतावता C ५. °देशसू° J ६. इतरेतर° om C ७. अन्यत्र प्रमेयात् om J; अन्यत्र प्रमेयत्वात् added J ८. ब्रूवतां भवतां C

सर्वोऽनैकान्तिकः प्राप्तः। एवं चैको हेत्वाभास इति प्राप्तम्। अथ प्रसज्यप्रतिषेधः? तथाप्यैकान्तिकाभावोऽनैकान्तिक इति प्राप्तम्। तस्य च[१] व्यभिचारोऽर्थो नास्तीति [२]अयुक्तोऽनैकान्तिको हेत्वाभासः। नायं पर्युदासपक्षः किं तु प्रसज्यप्रतिषेधः। [३]प्रसज्यप्रतिषेधेऽभाव इति चेत्–नाभावो धर्मविशेषकत्वात्। धर्मोऽयं विशिष्यते, य[४] एकान्ते सन्नियतो धर्म इति न भवति, न पुनरयमभावः। अभावे विशेषणविशेष्यासंभवात् नाभाव एकान्तसन्नियतो नानैकान्तिकः सन्नियत इति। कथम्? अब्राह्मणवदिति। यथा अब्राह्मणशब्दः प्रसज्यप्रतिषेधविषयत्वेन प्रवर्तमानो यदुत्तरं पदं तत् प्रतिषेधति न पुनरयमभावं प्रतिपादयति, तथेहापीत्यदोषः।

उदाहरणम्। नित्यः शब्दः अस्पर्शत्वात्। शब्दस्यास्पर्शत्वमिति षष्ठ्या भेदः प्रदर्श्यते। किं पुनस्तत्? स्पर्शानाधारस्य[५] स्वात्मसत्तानुभवोऽस्पर्शत्वम्, स्पर्शानाधारस्य सत्तासंबन्धो वा? उभयं च शब्दव्यतिरिक्तमित्यर्थवती षष्ठी। कुतः पुनरेतत्? तद्भावे भावात् तदभावेऽभावादिति। यत् खलु स्पर्शवत् सत्तामनुभवति, न तत्रास्पर्शशब्दः प्रयुज्यते। यच्चासत् तत्रापि न प्रयुज्यत इति। यदस्पर्शवत् सत्तामनुभवति[६] तत्र प्रयुज्यत इति। वाक्यार्थाभ्यनुज्ञानाच्च पदार्थाभ्यनुज्ञा, स्पर्शानाधारस्य वस्तुनः सत्तया संबन्ध[७] इति यो वाक्यार्थः स एव अस्पर्शत्वशब्दस्यार्थः[८]। अतिदेशानुपपत्तिरनुक्तत्वादिति चेत्–अनैकान्तिकः सव्यभिचार इति। न क्वचिदनैकान्तिक उक्तः, [९]यत इहानैकान्तिकग्रहणात् सव्यभिचारो गम्येत, अतो न युक्तमनैकान्तिकः सव्यभिचार इति। नेदमयुक्तम्, लोकतस्तदधिगतेः। यद् वस्तु[१०] लोकतो न गम्यते तत्र शास्त्रमर्थवत्। यत् पुनर्लोकत एव गम्यते तत्रोपदेशोऽनर्थकः। लोकतश्चैतद् गम्यते उभयान्तसन्नियतोऽनैकान्तिक इति। यदि च यल्लोकतो गम्यते तदनुक्तमिति मन्यसे, दुःखादीन्यपि देशयितव्यानि, किमिदं

---

१. च om C २. अनुक्तो° J ३. °षेधो° C ४. यः om J ५. °नाश्रयस्य C ६. अस्पर्शं सत्तानुभावी C ७. सत्तासम्ब° C ८. °त्वमिति पदस्या° J ९. यतः om C १०. यत् पुनः C

दुःखमिति। तस्मात् [१]परिपेलवमेतदिति। अव्यापकत्वादलक्षणमेतदिति चेत्–अथापीदं स्यादनैकान्तिकलक्षणेन न सर्वोऽनैकान्तिको व्याप्यते यथा असाधारण[२] इति। न, अनेनैव संग्रहात्। कथमिति? व्यावृत्तिद्वारेणाभिधीयमानोऽयमुभयान्तव्यावृत्तेरनैकान्तिक इति।

अपरे पुनः प्रकरणसममनैकान्तिक एवान्तर्भावयन्ति। कथमिति? [३]नित्य आत्मा शरीरादन्यत्वादिति। शरीरात् [४]किलान्यत् नित्यमनित्यं च दृष्टम्, अतोऽनैकान्तिक इति। तैस्तु न लक्षणव्यभिचारोऽवगतो नोदाहरणव्यभिचार इति। अनैकान्तिकः सव्यभिचार इत्येतत् लक्षणं व्यभिचारिणः। यदि चानेन प्रकरणसमसंग्रहो भवति प्राप्तस्तावता[५] लक्षणस्य व्यभिचारः, न [६]पुनरुदाहरणव्यभिचारादनैकान्तिकलक्षणव्यभिचार इति। लक्षणस्य [७]तूभयं दोषः, लक्ष्याव्याप्तिरलक्ष्यव्याप्तिश्चेति। वक्ष्यमाणकं च प्रकरणसमस्य लक्षणमीक्षितव्यम्॥५॥

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥१।२।६॥

सिद्धान्त...विरुद्ध इति। कोऽस्य **सूत्र**स्यार्थः? अभ्युपगतार्थविरोधी विरुद्धः। एवं च सर्वानुक्तविरुद्धसंग्रहः। यावान् [८]कश्चिद् विरुद्धभेदः सर्वोऽसावनेन संगृहीतः, यस्मादभ्युपगतं बाधते, अभ्युपगतेन वा बाध्यते। नन्वेवमेको हेत्वाभासो विरुद्धः प्राप्नोति? सत्यमेक एव हेत्वाभासो विरुद्धः। तस्य तु सामान्येन विरुद्धत्वेन संगृहीतस्य पञ्चधोपदेशः, यथा प्रमेयमित्यनेन षोडशपदार्था इति। पृथगभिधानं तर्हि विरुद्धस्य न कर्तव्यम्? न न कर्तव्यम्। सामान्यतोऽधिगतस्य विशेषज्ञापनार्थम्, यथा प्रमेयस्यैव। तत्रानैकान्तिकादिर्हेत्वाभासो द्विरूपोऽनैकान्तिकादिर्विरुद्धश्च। एतस्मिंस्तु विरुद्धतैवेत्यसाधारणतया तृणोलपादिन्यायेन निष्कृष्या-

---

१. परि° om C २. °रणम् C ३. अनित्यः C ४. अपि for किल C
५. °स्तर्हि C ६. °भिचारोऽनै° C ७. द्वयं J ८. कश्चन C

भिधीयते। तस्मादनैकान्तिकादिषु निमित्तद्वयसमावेशात् संज्ञाद्वयसमावेशः[१]। विवक्षिततज्जातीयान्यवृत्तित्वेनानैकान्तिकत्वम्, हेतुविषयस्वरूपबाधारूपेण तु विरुद्धः। एवं सर्वत्र। उदाहरणम्—[२]तदेतत् त्रैलोक्यं व्यक्तेरपैति, नित्यत्वप्रतिषेधात्। अपेतमप्यस्ति विनाशप्रतिषेधादिति। विनाशप्रतिषेधादित्यनेन वाक्येन नित्यमभ्यनुज्ञातं नित्यत्वप्रतिषेधादित्यनेन प्रतिषिद्धम्। एते ते वाक्ये परस्परार्थबाधिते, तयोश्च परस्परार्थबाधा विरोधः।

प्रतिज्ञाहेत्वोर्वा विरोधः। यो वा प्रतिज्ञाहेत्वोर्विरोधः स विरुद्धहेत्वाभासः। ननु प्रतिज्ञाहेत्वोर्विरोधः[३] पृथगुपदिष्टो निग्रहस्थाने, [४]पृथक् च हेत्वाभासाः, तस्मात् न प्रतिज्ञाहेत्वोर्विरोधो वक्तव्य इति। नैष दोषः, उभयाश्रितत्वाद् विरोधस्य विवक्षातः अन्यतरनिर्देशः प्रतिज्ञाहेत्वोर्विरोध इति प्रतिज्ञाहेतू आश्रित्य उभयाश्रितो भवति, तत्र यदा प्रतिज्ञया विरोधो विवक्षितः, तदा प्रतिज्ञाविरोध इत्युच्यते। यदा प्रतिज्ञाया हेतुविरोधो हेतोर्वा प्रतिज्ञाविरोधकत्वं तदा विरुद्धो हेतुरिति। अतः प्रतिज्ञाविरोधो वा हेतुविरोधो वेत्यदोषः। हेतुविरोधोदाहरणम्, नित्यः शब्द उत्पत्तिधर्मकत्वादिति। प्रतिज्ञाविरोधस्योदाहरणम्, नास्त्यात्मेति। [५]प्रतिज्ञाहेतुविरोधोदाहरणम्, गुणव्यतिरिक्तं द्रव्यम्, अर्थान्तरस्यानुपलब्धेरिति। हेतुविरोधोदाहरणम्, नास्त्येको भावः समूहे भावशब्दप्रयोगादिति। समूह इति ब्रुवाणेनैकोऽभ्युपगतो [६]भावो भवति, एकत्वसमुच्चयो हि समूह इति॥६॥

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥१।२।७॥

कस्मात् प्रकरणचिन्ता? तत्त्वानुपलब्धेः। यस्मादुपलब्धतत्त्वेऽर्थे निवर्तते चिन्ता, तस्मात् सामान्येनाधिगतस्य या विशेषतोऽनुपलब्धिः सा प्रकरणचिन्तां

१. द्वे संज्ञे J २. द्रः योगभाष्यम्, विभूतिपादः १३ ३. हेत्वोः om C ४. पृथक् च हेत्वाभासः C ५. हेत्वोर्वि J ६. भावो om J

प्रवर्तयतीति[१]। उदाहरणम्— नित्यः शब्दोऽनित्यधर्मानुपलब्धेः, [२]अनित्यः शब्दो नित्यधर्मानुपलब्धेः। अत एव प्रकरणमित्यतो न हेतुः। नन्वयं साध्याविशिष्ट एव यथा शब्दस्य नित्यत्वं साध्यं तथा अनित्यधर्मानुपलब्धिरपीति। नाविशिष्टः तस्यैव प्रकरणप्रवृत्तिहेतोर्धर्मस्य हेतुत्वेनोपादानात्। यत्र साध्येन समानो धर्मो हेतुत्वेनोपादीयते स साध्याविशिष्टः, यत्र पुनः प्रकरणप्रवृत्तिहेतुरेव स प्रकरणसमः।

ये तु संशयहेतुत्वात् प्रकरणसमानैकान्तिकयोरभेदं वर्णयन्ति, तेषां प्रत्यक्षानैकान्तिकप्रकरणसमानामभेदः प्राप्नोति प्रत्यक्षमपि संशयकारणमिति। समूहः संशयस्य कारणमित्यतो न प्रत्यक्षे प्रसङ्गः। सामान्यदर्शनं विशेषाव्यवस्था विशेषस्मृतिश्च समूह इति संशयस्य कारणम्[३]। नैकं प्रत्यक्षमतो न प्रत्यक्षे प्रसङ्गः। समूहः कारणमित्यभिधानादप्रतिषेधः। समूहः कारणमित्येवं ब्रुवता न प्रत्यक्षस्य संशयकारणत्वं प्रतिषिद्धं भवति, तस्मात् प्रसङ्गस्तदवस्थ एवेति।

उभयधर्मानुपलब्धावन्यतरधर्मोपादानं प्रकरणसमस्यार्थः, यत्र खलूभयविशेषानुपलब्धिस्तत्रान्यतरविशेषस्योपादानं यत्प्रकरणापनोदाय स प्रकरणसमो हेत्वाभासः, उभयविशेषानुपलब्धेरभिधानाशक्यत्वात्। न ह्युभयविशेषानुपलब्धिः शक्या प्रदर्शयितुम्। शरीरादन्यत्वं तु न सूत्रार्थः। न ह्ययं शरीरादन्यत्वमुपलभमानोऽपि यदा तत्त्वमुपलभते, तदा प्रवर्तत इति। यदा तु तत्त्वं नोपलभते शरीरादन्यत्वमुपलभमानोऽपि तदा प्रवर्तत इति। शरीरादन्यत्वं चानैकान्तिकम्। अतश्च न **सूत्रार्थः** ॥७॥

साध्याविशिष्टः साध्यत्वात् साध्यसमः ॥१।२।८॥

साध्येनाविशिष्टो यः साधनधर्मः साध्यवत् प्रज्ञापयितव्यः स साध्यसमो

---

१. प्रयोजयति C २. अनित्यः लब्धेः om C ३. द्र. वै. सू. (च) २।२।१९

हेत्वाभासः। तस्योदाहरणम्–द्रव्यं छाया गतिमत्त्वादिति। यथैव द्रव्यत्वं छायायाः साध्यं तथा गतिमत्त्वमपीति। गतिमत्त्वं देशान्तरे दर्शनादिति चेत्–अथापीदं स्यात् गतिमतीयं छाया देशान्तरे दर्शनादिति। यत् खलु देशान्तरेषूपलभ्यते तद् गतिमत् यथा कुम्भः। तथा च छाया। तस्माद् गतिमतीति। न, आश्रयासिद्धत्वात्, [१]एवमप्ययमाश्रयासिद्धो हेतुः। सति द्रव्यभावे छायाया देशान्तरे दर्शनं समर्थं स्यात्। द्रव्यभावश्चासिद्धः[२]। तस्मादाश्रयासिद्धेर्न हेतुः।

अभ्युपेत्य[३] देशान्तरे दर्शनम्, तस्यान्यथासिद्धेरसिद्धः[४]। यदेव[५] देशान्तरे दर्शनं छायायास्तदन्यथा संभवति। अन्यथा च भवन् नार्थं साधयतीति। कथमन्यथा? आवरणसन्तानादसन्निधिसन्तानस्तेजस इति। आवरके द्रव्ये सर्पति तेजसोऽसन्निधिविशिष्टं द्रव्यं यद् यदुपलभ्यते [६]तत्तत् छायेत्युच्यते।

सोऽयमसिद्धस्त्रेधा भवति, प्रज्ञापनीयधर्मसमानः, आश्रयासिद्धः, अन्यथासिद्धश्चेति। नित्यः शब्दोऽस्पर्शवत्त्वादित्येतत् नोदाहरणम्, न ह्यस्पर्शत्वं शब्दस्य ज्ञापनीयम्, नाश्रयासिद्धं नान्यथासिद्धमिति। यथा त्वस्माभिः **सूत्रं** वर्णितं यथा चोदाहृतम्, तथायमसंबद्धो दोषः। न सूत्रार्थो विज्ञातो नाक्षरार्थो न हेत्वाभासो न दृष्टान्ताभास इति ॥८॥

कालात्ययापदिष्टः कालातीतः ॥१।२।९॥

यस्यापदिश्यमानस्य कालात्ययेनैकदेशो युज्यते, स एकदेशात्ययात् कालात्ययापदिष्टः कालातीत[७] इत्युच्यते। उदाहरणम्–नित्यः शब्दः संयोगव्यङ्ग्यत्वात् इति। उपलब्धिकाले संयोगो नास्ति, सोऽयं संयोगो हेतुविशेषणत्वेनोपात्तः उपलब्धिकालमत्येति, यदोपलभ्यते तदा संयोगो नास्ति। दारुव्रश्चने दारुपरशु-

---

१. अयम् om C २. स्त्वसिद्धः C ३. अभि॰ om C ४. °सिद्धेः C
५. यत्तु C ६. तत्तु C ७. कालातीतः om J

संयोगनिवृत्तौ शब्दोपलब्धिरिति। नन्वयमनैकान्तिक एव संयोगव्यङ्ग्यत्वादिति। अनित्यमपि संयोगेन व्यज्यमानं दृष्टम्, यथा घट इति। न, संयोगव्यङ्ग्यत्वेनावस्थानस्य साध्यत्वात्–न ब्रूमो नित्यः शब्द इति, अपि त्ववतिष्ठते शब्द [१]इत्ययं प्रतिज्ञार्थः। तथा च संयोगव्यङ्ग्यत्वादित्ययं हेतुर्नानैकान्तिकः। न ह्यनवस्थितं किञ्चित् संयोगेन व्यज्यमानं दृष्टमिति।

अवयवविपर्यासवचनमपि न **सूत्रार्थः** सामर्थ्यात्। न हि पश्चादभिधीयमानो हेतुरुदाहरणसाधर्म्यादित्येतत् हेतुलक्षणं जहाति। अजहद्धेतुलक्षणं न हेत्वाभासो भवितुमर्हतीति। अवयवविपर्यासवचनमप्राप्तकालम्[२] इति निग्रहस्थानमुक्तम्। तदेव पुनरुच्यत इति।

समीकृतेऽभिधानात् निग्रहस्थानमिति चेत्? अथ मन्यसे यस्मात् समीकृते पक्षे पश्चादभिधीयते, ततो न निग्रहस्थानमिति। केन समीकृत इति वक्तव्यम्। हेत्वनभिधानेन। यदि हेत्वनभिधानेन समीकृतः, किमत्र हेतोरसामर्थ्यम्? एतदस्यासामर्थ्यं यदयं पश्चादभिधीयत इति। नैतत् हेतोरसामर्थ्यं यदयं पश्चादभिधीयत इति, अपि तु वक्तुरिति। न हि स्वतन्त्रो हेतुः साधनम्, अपि तु साधयितृतन्त्रः। [३]तत्तन्त्रत्वात् न हेतुदोषः सामर्थ्याच्चेत्युक्तम्। तस्मादवयवविपर्यासवचनं न **सूत्रार्थः**, न समीकृताभिधानमिति॥९॥

॥हेत्वाभासलक्षणप्रकरणम्॥

[छलप्रकरणम्]

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥१।२।१०॥

वचनविघातो यः क्रियते सामान्यशब्दस्य [४]विशेषानेकसंबन्धित्वे सति अविवक्षिताध्यारोपेण, छलं तद् वेदितव्यम्॥१०॥

१. अयम् om C २. न्या. सू. ५.२.११ ३. तस्मात् C ४. अनेकविशेष° J

तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं च ॥१।२।११॥

तत् त्रिविधमिति नियमार्थं पूर्ववत् अनेकधा भिन्नं छलं संगृह्णत इति ॥११॥

अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥१।२।१२॥ 5

अविशेषाभिहितेऽर्थे इति **सूत्रम्।** अविशेषाभिहितमिति सामान्यश्रुति वाक्यं पदं वा अविशेषाभिहितमुच्यते। वाक्यं सामान्यश्रुति यथा नवकम्बलोऽयमिति। पदं सामान्यश्रुति यथा[१] अश्वोऽश्व इति। अविशेषशब्दानभिधानं प्रयोगाभावात्। न ह्यविशेषशब्देन कस्यचिदभिधानं संभवति। न चास्य प्रयोगो युक्त इति। वाक्यं च सर्वमुच्चरद्विशेषमेव प्रत्याययतीति सामान्यप्रत्यायनमयुक्तम्। न, प्रकरणादीनन्तरेण 10
श्रुतिमात्रात् तदुपपत्तेः। यदा प्रकरणादिनिरपेक्षं वाक्यमुच्चार्यते श्वेतो धावतीति, तदा वाक्यश्रुतिसामान्यात् श्रोतुः सन्देहः। सन्देहे[२] सत्यविवक्षितमर्थमध्यारोप्य[३] प्रतिषेधति। एवं पदेऽपीति। अर्थग्रहणं शब्दनिराकरणार्थम्। अर्थविषयं छलं न शब्दविषयमिति। न ह्ययं प्रतिषेद्धुं शक्नोति[४] नायं नवकम्बलशब्द इति। तस्य प्रत्यवस्थानम्। ज्ञात्वा अज्ञात्वा वा प्रयोगात्[५] प्रतिषेधानुपपत्तिः। यदि तावत् 15
नवकम्बलस्यार्थं बुद्ध्वा नायं नवकम्बल इति प्रत्यवतिष्ठते, तदार्थान्तरमाह, अन्यद् बुध्यते अन्यत् प्रतिषिध्यत इति। अथ पुनर्नैव नवकम्बलस्यार्थं बुध्यते तथाप्यज्ञानमिति ॥१२॥

---

१. अश्व इति J २. सम्मोहः । सम्मोहे J ३. °तमेकम° J ४. शक्यते J
५. प्रयोगात् om J

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् ।।१।२।१३।।

संभव...कल्पना[१] **सामान्यच्छलम्**।। सामान्यस्य विवक्षितार्थातिक्रमः अतिसामान्यम्। उदाहरणम्–विद्याचरणसंपन्नो ब्राह्मण इति। [२]परस्तु ब्राह्मणत्वं विद्याचरणसंपदो[३] हेतुरिति कृत्वा प्रत्यवतिष्ठते। स्तुत्यर्थे वाक्येऽन्यथाकारं प्रत्यवस्थानम्। उभयथा दोषो बुद्ध्वा अबुद्ध्वा वेति॥१३॥

धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम् ।।१।२।१४।।

धर्मविकल्पनिर्देश इति **सूत्रम्**। धर्मविकल्पनिर्देशशब्देनाभिधानधर्मो द्वेधा अभिधीयते, प्रधानो[४] भाक्तश्च। मञ्चा इति काष्ठसंघातेषु प्रधानो[५] मञ्चशब्दः, क्रोशनक्रियाया असंभवमीक्षित्वा स्थानिषु पुरुषेषु भाक्तः। सोऽयमभिधानाभिधेयव्यवहार एवं व्यवस्थितः[६]। य एतस्मिन् [७]अन्यथाकारं प्रतिषेधः तदुपचारच्छलम्। अस्यापि पूर्ववत् प्रतिषेधो ज्ञात्वा अज्ञात्वा वेति॥१४॥

वाक्छलमेवोपचारच्छलं तदविशेषात् ।।१।२।१५।।

वाक्छ...छलमिति सूत्रम्। एकत्वम् अविशेषात्। कोऽविशेषः? इहाप्यर्थान्तरकल्पना तत्रापीति॥१५॥

---

१. °द्भूतार्थ J २. परन्तु ब्राह्मण्यं C ३. °सम्पन्नत्वे C ४. प्रधानं C ५. प्रधानं C ६. व्यवतिष्ठते C ७. °कारप्रति° C

न तदर्थान्तरभावात् ।।१।२।१६।।

अविशेषादित्यस्य हेतोरनेन **सूत्रेण** असिद्धतामुद्भावयति। कथमसिद्धिः? एकत्र वस्तुसद्भावः प्रतिषिध्यते, नैव क्रोष्टारो मञ्चा इति, एकत्र वस्त्वभ्यनुज्ञाय कम्बलयोगमभ्युपगम्य कम्बलस्यानेकता धर्मः प्रतिषिध्यत इति। यत्र धर्मः प्रतिषिध्यते, यत्र च[१] धर्मी, [२]सोऽयमतिमहान् विशेषः॥१६॥

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः ।।१।२।१७।।

अथ [३]मनुषे किं नोऽनेन विशेषणेन, इहाप्यर्थान्तरकल्पना तत्रापीति **अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः॥** कोऽस्य **सूत्रस्यार्थः**? विरोधः, द्वित्वमभ्यनुज्ञातं निवर्तत[४] इति। कतमेन पुनर्न्यायेन द्वित्वमभ्यनुज्ञातम्[५]? [६]वाक्छलोपचारच्छलयोरेकत्वं ब्रुवता सामान्यच्छलमन्यदित्यभ्यनुज्ञातं भवति। विशेषणानर्थक्यं वा। यदि सर्वं छलमेकमेवेत्यभ्युपगमः, वाक्छलमेवोपचारच्छलं तदविशेषात्[७] इति व्यर्थं विशेषणम्। कथमेकत्वप्रसङ्गः? किञ्चित्साधर्म्याद् यद्यनर्थान्तरकल्पना, अविशेषादेकत्वम्। सर्वं छलमेकं प्राप्नोति किञ्चित्साधर्म्यादिति। किं पुनस्तत्? वचनविघातः अर्थविकल्पोपपत्तिश्च [८]सर्वस्मिंश्छल इति॥१७॥

॥छलप्रकरणम्॥

---

१. च om C २. अयम् om J ३. मन्यते C ४. °ज्ञायमानं निवर्तयति C
५. ज्ञायमानम् C ६. वाक्छलमेवोपचारच्छलम्, तयो° C ७. न्या. सू. १।२।१५
८. तत् सर्व C

[पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम्]

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ।।१।२।१८।।

साधर्म्येण प्रत्यवस्थानं वैधर्म्येण प्रत्यवस्थानं जातिरिति। [१]प्रथमपक्षानुयोगं दर्शयति, स्थापनायां सत्यां प्रतीपमवस्थानं प्रत्यवस्थानं प्रतिपक्षवदिति। **सूत्रा**र्थस्तु यथाश्रुति, न पुनरुदाहरणसाधर्म्येण उदाहरणवैधर्म्येण वेति। किमर्थमिदमुच्यते? [२]व्यापनार्थम्। यदि यथाश्रुति **सूत्रा**र्थो भवति, [३]तदा सर्वजातयो व्याप्यन्ते येन केनचित् साधर्म्यं येन केनचिद् वैधर्म्यमिति। लक्षणे जातीनामव्यापकत्वं तु दोषः। **भाष्ये** [४]तूदाहरणसाधर्म्यमुदाहरणवैधर्म्यं चोदाहरणार्थमिति, यथा चोदाहरणेन एवमनुदाहरणेनापीति ॥१८॥

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ।।१।२।१९।।

अन्यथा स्थितस्यान्यथाभिहितस्य [५]अप्रतिपत्तिर्विप्रतिपत्तिः, स्वपरार्थोत्तरा-संवित्तिरप्रतिपत्तिः। समर्थे साधने निग्रहस्थानप्राप्तौ कथमप्रतिपत्तिः विप्रति-पत्तिः[६]? यदायं साधयिता समर्थेन साधनेनोपात्तेन परेण जात्यादिभिराकुली-कृतः[७] उत्तरं न प्रतिपद्यते, तदा कथमप्रतिपत्तिः कथं वा विप्रतिपत्तिरिति? तदापि साधनस्यैव सामर्थ्यापरिज्ञानादसमर्थमेतत् साधनमित्यप्रतिपत्तिर्विप्रतिपत्तिरिति ॥१९॥

तद्विकल्पाज् जातिनिग्रहस्थानबहुत्वम् ।।१।२।२०।।

ता एता जातयः कियत्यो भवन्ति, क्रियन्ति वा निग्रहस्थानानि [८]इति

---

१. °पक्षाप्रयोगं J २. व्यापकार्थम् C ३. तदा om J ४. तु om C
५. अन्यथाप्रति° J ६. विप्रतिपत्तिः om J ७. आकुलितः J ८. इत्यवधा° C

वस्त्ववधारणार्थमाह–**तद्विक...त्वम्** इति। साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पात् तयोश्च विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पाद् बह्वो जातयो बहुनि च निग्रहस्थानानि भवन्तीति। कतमा जातयः साधर्म्यप्रत्यवस्थानात् कतमाश्च वैधर्म्य-प्रत्यवस्थानात् कतमानि निग्रहस्थानानि विप्रतिपत्तिविकल्पात् कतमानि वाप्रतिपत्ति-विकल्पाद् भवन्तीति [1]प्रतियोगे विशेषलक्षणेषु उत्प्रेक्षणीयानीति। एते प्रमाणादयः पदार्था उद्दिष्टा लक्षिताश्च। यथोद्देशं च यथालक्षणं च परीक्षा वर्त्तिष्यत इति॥२०॥

॥पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम्॥

तन्त्रप्रतिज्ञासंसारस्तन्निवृत्तिश्च संविदा।
उद्देशो लक्षणं चैव तत्त्वानामिह कीर्तितम्॥

॥इति औद्द्योतकरे न्यायवार्त्तिके प्रथमाध्यायस्य द्वितीयाह्निकम्॥

॥प्रथमाध्यायः समाप्तः॥

---

१. प्रतियोगं C

द्वितीयाध्याये प्रथमाह्निकम्

[संशयपरीक्षाप्रकरणम्]

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः ॥२।१।१॥

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः, उद्देशो लक्षणं परीक्षा चेत्युक्तम्[१]। तत्रोद्देशलक्षणे पूर्वस्मिन् अध्याय एव[२] व्याख्याते, परीक्षा वर्तिष्यत इति। तत्र यथोद्देशः, तथा लक्षणं तथा परीक्षेति स्थानवतां परीक्षावचनमिति पूर्वं प्रमाणमुद्दिष्टं लक्षितं च। पूर्वमेव[३] तत् परीक्ष्यत इत्यवसरप्राप्तानि प्रमाणानि विलङ्घ्य संशयः परीक्ष्यत इति किमर्थं क्रमभेदः? परीक्षाङ्गत्वात् संशयस्य, पूर्वं संशयः परीक्ष्यते। तथा चोक्तम्

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः[४]

इति। ननु चोक्तम्, नायं निर्णये नियमो विमृश्य पक्षप्रतिपक्षाभ्यां सर्वत्र निर्णय इति। वादे पक्षप्रतिपक्षाभ्यामेव, शास्त्रे च विमर्शवर्जमिति। शास्त्रे चायं विचारः। तस्मात् न संशयपूर्वक इति। संशयपूर्वको हि विचारस्तर्कविषय एव। नायं तर्कविषय इति। सत्यम्, [५]नायं निर्णये नियमः। विचारे हि[६] नियमः। निर्णय एवं चान्यथा च। विचारः संशयपूर्वक एव[७]।

यदप्युक्तम्, वादे शास्त्रे च विमर्शवर्जमिति वादिप्रतिवादिनावधिकृत्य तदुक्तम्। शास्त्राभ्युपगमे च वादिप्रतिवादिनोः न संशयः, उभयोर्निश्चितत्वात्। शास्त्रे च न संशयः, निश्चितस्य वस्तुनः शास्त्राभ्युपगमेनाभ्युपगमात्। तत्र वादि-

---

१. भा. पृः २५.८ २. पूर्वाध्याय C एव om J ३. एव om J ४. न्या. सू. १.१.४१ ५. अयम् om C ६. तु J ७. इति for एव J

प्रतिवादिनौ तावद् विचारयतः, किं नित्यसाधनं बलीयः, आहोऽनित्यसाधनमिति। शास्त्रेऽपि च विचारः साधनस्य सामर्थ्यासामर्थ्यपरिज्ञानार्थम्, तत्र च संशय इति। तस्मात् संशयपूर्वक एव विचारः तन्मूलकत्वात् परीक्षाविधेरिति संशयः पूर्वं परीक्ष्यत इति। तत्र संशयो वस्तुस्वरूपानवधारणात्मकः प्रत्ययः। [१]निरुक्तिव्याघात इति चेत्— अनवधारणात्मकश्च प्रत्ययश्चेति व्याहतम्। न, प्रत्ययस्य स्वरूपानवधारणात्। अव्यवच्छेदात्मकं[२] स्वरूपमस्य परिच्छिद्यते, न पुनरनेन विषयस्वरूपमवधार्यत इति।

सोऽयं संशयः समानधर्मोपपत्तेरित्येवमादिभ्यः[३]। तस्याक्षेपः, **समानानेकधर्माध्यवसायात्** इत्येवमादि सूत्रम्। तस्य यथाश्रुत्युत्थानमिति। समानस्य धर्मस्य अध्यवसायात् संशयो न समानधर्ममात्रात् उपलभ्यमानो धर्मः संशयहेतुरिति धर्मधर्मिग्रहणे वा संशयाभाव इति। समानमनयोर्धर्मम् उपलभ इति धर्मधर्मिग्रहणे क्व संशय इति। धर्मिणोऽर्थान्तरभावाद् वा न संशयः, न ह्यन्यस्मिन् उपलब्धे अन्यत्र संशय इति। अथ वा न समानधर्मस्याध्यवसायः संशयस्य कारणं व्यवच्छेदात्मकत्वात् संशये च तदभावादिति।

एतेन अनेकधर्माध्यवसायादिति व्याख्यातम्। अधिगतानधिगतयोर्न संशयः। अधिगते च वस्तुनि संशयो न युक्तः, निर्णीतत्वात्। नानधिगते, अदृष्टत्वात्। न समानधर्माध्यवसायात् एव[४] संशयः, सत्यप्यभावात्—सत्यपि समानधर्माध्यवसाये न दृष्टः संशयः, यथा कृतकत्वात् शब्दे। न समानधर्माध्यवसायादेव संशयः, अन्यथापि भावात्। अन्यथापि दृष्टः संशयः। यथा विरुद्धाव्यभिचारिधर्मद्वयसन्निपाते[५]। तत्त्वानुपलब्धेश्च संशयः यथा प्रकरणसमे। एकवृत्तित्वाच्च नायं समानः। एकवृत्तिरयं धर्मः। न चैकवृत्तिः समानो भवितुमर्हति[६]। एतेन विप्रतिपत्त्यव्यवस्थाध्यवसायादिति प्रत्युक्तम्[७] ॥१॥

---

१. निरुक्त° J २. °त्मकत्वं C ३. °वमादि J ४. एव om J ५. °द्वय° om J ६. °मर्हतीति C ७. एतेन...प्रत्युक्तम् noted in a foot-note and added at the end of II.1.3.in C

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च[1] ॥२।१।२॥

न विप्रतिपत्त्यव्यवस्थाध्यवसायादिति प्रागुक्तम्। विप्रतिपत्त्यव्यवस्थाध्यवसायात् संशयो न विप्रतिपत्तिमात्रादव्यवस्थामात्राद् वा॥२॥

विप्रतिपत्तौ च संप्रतिपत्तेः॥२।१।३॥

न विप्रतिपत्तिरस्तीति सूत्रार्थः॥३॥

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः॥२।१।४॥

अव्यवस्था न विद्यत इति सूत्रार्थः॥४॥

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः॥२।१।५॥

समानधर्मादीनां [2]धर्माणां सातत्यात् नित्यं[3] संशय इति सूत्रार्थः॥५॥

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा॥२।१।६॥

अस्योत्तरम्–**यथो....वा**। न, सूत्रार्थापरिज्ञानादिति सूत्रार्थः। यत् पुनरेतद् धर्मधर्मिग्रहणे संशयाभाव इति, तन्नापरिज्ञानात्। न ब्रूमो योऽसौ धर्म्युपलभ्यते

---

१. विप्रति॰ °सायाच्च om J २. धर्माणां om C ३. नित्यः C

तस्य धर्ममुपलभ इति। अपि तु यौ मया पूर्वं स्थाणुपुरुषावुपलब्धौ तयोरयं समानो[१] धर्म उपलभ्यत इति। एतेनैकवृत्तित्वादिति परिहृतम्।

यत् पुनरेतत् नार्थान्तराध्यवसायादन्यत्र संशय इति, तत् न, अनभ्युपगमात्। नार्थान्तरभावमात्रं मया[२] संशयहेतुत्वेनोपादीयते किं त्वर्थान्तरविशेषः। कः पुनरसौ विशेषः? धर्मधर्मिभावः। धर्मे उपलब्धे धर्मिणि संशय इति परिहारं मन्यते[३]। न पुना रूपस्पर्शयोर्धर्मधर्मिभाव इति। अयं च न परिहार इति पश्यामः। किं कारणम्? अर्थान्तरत्वानिवृत्तेः[४]। यथैव रूपस्पर्शयोरर्थान्तरभावः, तथा धर्मधर्मिणोरपीति न युक्तोऽर्थान्तरदर्शनादर्थान्तरे संशयः। अत्रापि तदेवोत्तरम्, नानभ्युपगमादिति। न ब्रूमोऽर्थान्तरदर्शनात् अर्थान्तरे धर्मिणि [५]संशयः, अपि तु [६]समानधर्मादिविशिष्टधर्मिदर्शनाद् विशेषवति[७] धर्मिण्येव संशय इति।

यदप्येतत् सारूप्याभावादिति। विशेषानवधारणमुभयोः सारूप्यम्। यथैव समानधर्मदर्शनेन विशेषो नावधार्यते तथा संशयेनापीति। कारणसद्भावाच्च कार्यसद्भाव इति न सारूप्यनिर्देशोऽयम्, अपि तु कार्यकारणधर्मनिर्देशः। तथा च कार्यान्तरेष्वप्येतदस्तीति। न हि किञ्चित् कार्यं कारणसद्भावमन्तरेण संभवतीति। एतेनानेकधर्माध्यवसायादिति प्रतिषेधः परिहृतः। य एव समानधर्माध्यवसाये परिहारः स एवानेकधर्माध्यवसायेऽपीति।

यत् पुनरेतत् अधिगतानधिगतयोरभावादिति, [८]न, समानार्थापरिज्ञानादिति। न ब्रूमोऽन्यस्मिन्नधिगतेऽन्यत्र संशय इति, अपि तु सामान्यतोऽधिगते धर्मिणि विशेषानवधारणात्मकः प्रत्ययः संशय इति।

यत् पुनरेतत् सत्यप्यभावादिति, न, समानार्थापरिज्ञानात्। न हि कृतकत्वं समानो धर्मः। अन्यथा समानधर्मस्याभिधानात् समानो धर्म इति यो विवक्षिततज्जातीयान्यवृत्तिः, स समानो न पुनः कृतकत्वमेवम्।

---

१. समानः om J २. इति न, अनभ्युपगमात्। अपरे न अर्था° C ३. मन्यन्ते C ४. °न्तरभावस्यानि° C ५. सन्देहः C ६. °धर्मविशिष्ट J ७. अविशेषवति C ८. तत्र, अपरि° C

यत् पुनरेतत् न समानधर्माध्यवसायादेवान्यथापि दर्शनादिति तन्न, प्रतिषेधात् अनवधारणाच्च। विरुद्धाव्यभिचारिधर्माध्यवसायात् संशय इति प्रतिषिद्धमेतत्। न चैतदवधार्यते समानधर्माध्यवसायादेव नान्यस्मादिति अन्यस्मादपि संशयोऽनेकधर्माध्यवसायादित्युक्तम्। अनवधारणेनैव तत्त्वानुपलब्धिरिति प्रत्युक्तम्[१]।

विप्रतिपत्त्यव्यवस्थाध्यवसायादेव

इत्यनेनैव प्रत्युक्तम्। नैवं ब्रूमो विप्रतिपत्तिमात्रादव्यवस्थामात्राद् वा संशय इति। न चाव्यवस्थातः संशयः उपलब्ध्यनुपलब्ध्यव्यवस्थायाः पूर्वपदविशेषणत्वात्। पूर्वपदविशेषणे[२] उपलब्ध्यनुपलब्धी न स्वतन्त्रे संशयकारणम्। तच्च **सूत्र** एवोक्तमिति।

यत् पुनरेतत्

विप्रतिपत्तौ च संप्रतिपत्तेः

इति, न संज्ञान्यथात्वात्[३] अर्थस्यान्यथात्वम्। यस्माद् विप्रतिपत्तिशब्दस्य[४] निमित्तान्तरसन्निपातेन संप्रतिपत्तिरिति नाम कृतम्, न तावता विप्रतिपत्तिर्नास्ति। विप्रतिपत्तेश्च तथाभावात् संशयहेतुत्वमिति।

यत् पुनरेतत्

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः

नाव्यवस्थास्तीति, तदपि न, व्याघातात्। अव्यवस्था नास्ति अव्यवस्थात्मनि व्यवस्थितेति व्याघातः। न च निमित्तान्तरसन्निपातेनार्थस्य संज्ञान्तरकरणमर्थस्य तथाभावं बाधते। यथाभूत एवार्थः, संज्ञान्तरकरणे तथाभूत एवाकरणेऽपीति॥

यत् पुनरेतत्

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः

इति तदपि न, सूत्रार्थापरिज्ञानादित्युक्तम्। नायं समानधर्मादिभ्य एव संशयः, किं

---

१. C puts this sentence before the preceding one. २. विशेषणम् C ३. °न्यत्वात् J ४. °शब्दार्थस्य C

तु तद्विषयादध्यवसायादुपलब्ध्यनुपलब्ध्यव्यवस्थाने च सति विशेषस्मृतिसहितात्। एवं च नासंशयो नाप्यत्यन्तसंशयः। अन्यतरधर्माध्यवसायाद् इति चायुक्तम्[१]। नैव तस्मात् संशय इति। न हि कदाचित् अन्यतरधर्माध्यवसाये सति संशयः, अन्यतरधर्माध्यवसायस्य निर्णयहेतुत्वादिति॥६॥

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः॥२।१।७॥

कोऽस्य सूत्रस्यार्थः? स्वयं न संशयः प्रतिषेद्धव्यः। परेण तु संशये प्रतिषिद्धे परमुत्तरं वाच्यमिति शिष्यं शिक्षयति॥७॥

॥संशयपरीक्षाप्रकरणम्॥

[सामान्येन प्रमाणपरीक्षाप्रकरणम्]

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः॥२।१।८॥

अथेदानीमवसरप्राप्तानि प्रमाणानि परीक्ष्यन्त इति। किं पुनरेषां परीक्ष्यम्? आदौ तावत् संभवः। किं प्रमाणानि सन्त्युत न सन्तीति, सदसतोः सामान्यात् प्रमेयत्वाद् विशेषादर्शनाच्च संशयः। व्युदस्य संशयं परः पक्षपरिग्रहेण प्रत्यवतिष्ठते— **प्रत्यक्षा...सिद्धेः**। इति। अस्यार्थः त्रिष्वपि कालेषु प्रमाणानि नार्थं साधयन्तीति॥८॥

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः॥२।१।९॥

पूर्वं हि प्रमाणसिद्धाविति सूत्रम्। नेन्द्रियार्थसन्निकर्षापेक्षं[२] ज्ञानमुत्पद्यत इति

---

१. न युक्तम् C २. °कर्षात् प्रत्यक्षं C

सूत्रार्थे व्याघातो[१] दोषः। यदि पूर्वं ज्ञानं नेन्द्रियार्थसन्निकर्षस्तस्य कारणमिति। यदुक्तम्

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम्

इति, तद् व्याहन्यते॥९॥

पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥२।१।१०॥

पश्चात्सिद्धाविति सूत्रम्। न प्रमाणनिमित्ता प्रमेयसंज्ञेति व्याहतम्[२]। [३]प्रमाणमन्तरेण प्रमेयमात्मानं लभत इति न प्रमाणायत्ता प्रमेयसिद्धिः॥१०॥

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥२।१।११॥

युगपत्सिद्धाविति सूत्रम्। इन्द्रियार्थानां बुद्धीनां च सन्निपाते सति युगपद्भावे सति[४] क्रमवृत्तित्वं दृष्टं न स्यादिति व्याघातो दोषः। अयुगपज्ज्ञानोत्पत्तिरिति चोक्तम्[५]। तद् व्याहन्यत इति। अत्र समाधिः। उपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमादिति वाक्यस्यासिद्धतोद्भावनमर्थः। प्रत्यक्षादीनामप्रामाण्यमिति च प्रतिज्ञापदयोर्व्याघातः। प्रत्यक्षादीनि नार्थं साधयन्तीत्ययमर्थः। अयं च व्याहतः। कथमिति? प्रत्यक्षादीनि च नार्थं साधयन्तीति च यथेदं वस्तु नोपलभ्यत इति। इदं च नोपलभ्यते चेति व्याघातः। एवं प्रत्यक्षादीनि च नार्थं साधयन्तीति च। कथं चान्यथा प्रत्यक्षादीनि? न ह्येते प्रत्यक्षादिशब्दा अर्थसाधकभावमन्तरेण[६] कृतार्था भवन्तीति।

---

१. सूत्रार्थव्याघातो J २. व्याघातः C ३. न प्रमाण° C ४. °द्भाव इति C
५. युगपज्ज्ञानानुत्पत्तिरिति C ६. अर्थासाधकत्वेन C

धर्मप्रतिषेधाच्च प्रत्यक्षाद्यभ्युपगमः। प्रत्यक्षादीनामप्रामाण्यमित्येवं ब्रुवता न प्रत्यक्षादीनि प्रतिषिद्धानि, अपि तु प्रमाणत्वं धर्म इति। अथ भावस्यास्वतन्त्रत्वात् तान्यपि प्रतिषिद्धानि, प्रत्यक्षादीनामप्रामाण्यमिति भावाभिधानमेतत्। अस्वतन्त्रश्च भाव इति भावप्रतिषेधात् तद्वतां प्रतिषेध इति? एवमप्यनिवृत्तो व्याघातः। प्रत्यक्षादीनामभावः प्रतिपाद्यः। प्रत्यक्षादीनि च न सन्तीति केनाभावं प्रतिपादयसि? न हि प्रत्यक्षाद्यभावे अन्यः प्रतिपादनोपायः कश्चिदस्तीति।

विशेषप्रतिषेधाच्च प्रमाणान्तराभ्यनुज्ञा। प्रत्यक्षादीनामप्रामाण्यमित्येवं ब्रुवता प्रत्यक्षादिव्यतिरेकि प्रमाणमभ्यनुज्ञातं भवति, व्यर्थं वा विशेषणं प्रत्यक्षादीनामप्रामाण्यमिति। अथ न प्रमाणान्तरमभ्यनुज्ञायते, किमस्य विशेषणस्य सामर्थ्यं प्रत्यक्षादीनि न प्रमाणानीति? नैव प्रमाणानि सन्तीत्येवं वक्तव्यमिति। एतदपि व्याहतम्। प्रमाणानि नैव सन्ति, प्रतिपादयसि चेति। यदपि तत्प्रमाणान्तरमभ्यनुज्ञेयम्[1], तत्रापि त्रैकाल्यासिद्धेरित्ययमनुषक्तो हेतुः। यच्च त्रिष्वपि कालेषु न प्रतिपादयति कथं तस्य प्रमाणत्वमित्यनिवृत्तो व्याघातः। अथ धर्मप्रतिषेध एवायम्? तथापि यानि तानि प्रामाण्यव्यतिरिक्तानि प्रत्यक्षादीन्यभ्यनुज्ञायन्ते राजपुरुषप्रतिषेधन्यायेन, तेषां कः स्वभाव इत्यनिवृत्तोऽनुयोगो व्याघातश्च । अर्थान्तरानभ्युपगमे च षष्ठ्यास्तद्धितस्य चार्थो वक्तव्यः। यदि प्रत्यक्षादिव्यतिरिक्तं न प्रामाण्यमस्ति प्रत्यक्षादीनामिति कः षष्ठ्यर्थः? अतोऽवश्यं विधीयमानः प्रतिषिद्धमानो वा धर्मोऽभ्युपेयः। तदभ्युपगमे च प्रत्यक्षादीनां पृथक् स्वरूपं वक्तव्यमित्यनिवृत्तो व्याघातः। एतेन तद्धितार्थो व्याख्यातः।

यश्चायं हेतुः त्रैकाल्यासिद्धेरिति, अयमपि व्यधिकरणस्त्रिकालविषयत्वादिति[2]। त्रिकालस्य भावस्त्रैकाल्यम्। तस्यासिद्धिरिति न प्रमाणधर्मः। अथायमर्थः, त्रिष्वपि कालेषु प्रमाणानि नार्थं साधयन्तीति, तथापि हेत्वर्थो नास्ति

---

१. ०भ्यनुज्ञायते C २. त्रैकाल्य० C

प्रतिज्ञार्थेनाक्षिप्तत्वात्। य एव प्रतिज्ञार्थो न प्रमाणान्यर्थं साधयन्तीति, स एव हेत्वर्थः त्रिष्वपि कालेषु नार्थं साधयन्तीति।

यत् पुनरेतत् प्रमाणेन प्रमीयमाणोऽर्थः प्रमेयमित्येवं[१] भवतीति समाख्याहेतोः त्रैकाल्ययोगादप्रतिषेधः। प्रमाणमिति प्रमेयमिति चास्याः समाख्याया निमित्तं त्रैकाल्ययोगि, प्रमास्यते प्रमीयते प्रामायि वा[२] अनेनेति प्रमाणम्। प्रमास्यते प्रमीयते प्रामायि वेति प्रमेयम्। एवं च सति प्रमास्यते अयमर्थो भविष्यत्यस्मिन् हेतुत उपलब्धेरिति प्रमेयमित्येतत् सिध्यति। अनभ्यनुज्ञाने च व्यवहारानुपपत्तिरिति विरोधो दोषः। यश्च त्रैकालिकं प्रमाणप्रमेयव्यवहारं न प्रतिपद्यते तस्य पाचकमानय इत्येवमादिलोकव्यवहारो विरुध्यते।

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः

इत्येवमादि वाक्यं प्रमाणप्रतिषेधः। अथानेन प्रत्यक्षादीनां किं क्रियते? किं संभवो निवर्त्यते, अथासंभवो ज्ञाप्यत इति? किं चातः? यदि तावत् संभवो निवर्त्यते तन्न युक्तं व्याघातात् प्रतिषेधार्थापरिज्ञानाच्च। संभवो निवर्त्यत इत्येवं ब्रुवाणेन प्रमाणान्यभ्युपगतानि भवन्ति। न ह्यसतो निवृत्तिः[३]। न च प्रतिषेधस्यैतत् सामर्थ्यं यद् विद्यमानं पदार्थमन्यथा कुर्यात्। ज्ञापकत्वाच्च न संभवनिवृत्तिः। ज्ञापकोऽयं प्रतिषेधो न संभवनिवर्तक इति। [४]अथासंभवो ज्ञाप्यत इति चेत्[५]? प्रमाणलक्षणप्राप्तस्तर्हि प्रतिषेधः। अतो व्याघात इति प्रमाणानि नार्थं साधयन्तीति प्रतिषेधस्य प्रमाणलक्षणाभ्यनुज्ञानादिति[६] ॥११॥

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः॥२।१।१२॥

एवं च-**त्रैका....पत्तिः**। इति। अयमपि प्रतिषेधः त्रिष्वपि कालेषु नोपपन्न

---

१. °मिदमिति C २. प्रमितः प्रतीयते J ३. °त्तिर्भवतीति C ४. अथ om J
५. चेत् om C ६. अतो...ज्ञानादिति forms a portion of N. Var. II 1.12 in J.

इत्ययं सूत्रार्थः[१]। त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिरित्येवमभिदधानेन अभ्युपगतं भवति प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरिति। नैष दोषः, तस्य स्ववचनव्याघात-चोदनात्। स्ववचनव्याघातो मया चोद्यते, नाभ्युपगम्यते। कथमिति यत् खलु त्रिष्वपि कालेष्वसाधकं तदसाधनमिति ब्रुवता प्रतिषेधस्यासाधकत्वं स्ववा-चैवाभ्युपगतं भवति। यथा नाम कश्चित् स्वाङ्गुलिज्वालया परं दिधक्षुः स च परं दहेन्मा वा स्वाङ्गुलिदाहं तावदनुभवतीति।

यश्चायं प्रतिषेधः प्रत्यक्षादीनि नार्थं साधयन्तीति, किमयं प्रत्यक्षादीनां सामर्थ्यप्रतिषेधः, उत सत्ताप्रतिषेधः? यदि सामर्थ्यप्रतिषेधः, न प्रत्यक्षादीनि प्रतिषिद्धानि। तेषां च सामर्थ्यप्रतिषेधात् अन्यत् प्रत्यक्षादीनां स्वरूपं वक्तव्यमिति पूर्ववत् प्रसङ्गः। अथ सत्ताप्रतिषेधः, तत्रापि कथं न सन्तीति किं सामान्यतोऽथ विशेषत इति? यदि सामान्यतः प्रत्यक्षादिग्रहणं व्यर्थम्। एवं वक्तव्यं न प्रमाणानि सन्तीति। न च धर्मिणां प्रतिषेधे कश्चित् न्याय इति। अथ विशेषप्रतिषेधः, तथापि प्रमाणान्तराभ्युपगमः। न ह्यनभ्युपगतसामान्यस्य विशेषप्रतिषेधोऽवकाशं लभते।

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः प्रत्यक्षादीनां प्रामाण्यं त्रैकाल्यसिद्धे-रिति च वाक्ययोरेकार्थता वा स्यात्, भिन्नार्थता वा? यद्येकार्थता, प्रत्यक्षादीनां प्रामाण्यं त्रैकाल्यसिद्धेरित्येवमेव वक्तव्यम्, अभिन्नार्थे एते वाक्ये इति च कुतः प्रतिपत्तिः? यदि प्रमाणतः, अनिवृत्तो व्याघातः। अथान्यतः, तत् प्रमाणमिति संज्ञाभेदमात्रम्। अथ भिन्नार्थे तत् केन ज्ञातं त्रैकाल्यासिद्धेः त्रैकाल्यसिद्धेरिति चानयोर्वाक्ययोर्भिन्नोऽर्थ इति। प्रत्यक्षादीनि न सन्तीति च नास्तिना समानाधिकरणः प्रत्यक्षादिशब्दो न प्रत्यक्षादीनामभावं शक्नोति प्रतिपादयितुम्[२]। न ह्ययं नास्तिना घटशब्द समानाधिकरणो घटाभावं प्रतिपादयति, अपि तु गेहघटसंयोगं वा सामर्थ्यं वा कालविशेषं वा घटस्य प्रतिषेधति। एवमनेनापि प्रमाणसमानाधिकरणेन नास्तिना प्रमाणानां नाभावः शक्यः प्रतिपादयितुम्। अपि त्वनेनापि, तन्त्रान्तरा-

१. अतो.....ज्ञानादिति inserted here in J. २. वक्तुम् C

भ्युपगतानां वा प्रतिषेधः, सामर्थ्यप्रतिषेधो वा, कालविशेषे वा प्रतिषेध इति सर्वथा प्रमाणान्यभ्युपगतानि भवन्ति। तानि चाभ्युपगतान्यनेन प्रतिषेधेन प्रतिषिध्यन्त इति व्याघातः। प्रमाणानां चासत्त्वं प्रतिपाद्यमानं कथं प्रतिपाद्यते? कस्य प्रतिपाद्यते? कश्च प्रतिपादयिता? अप्रतिपन्नः प्रतिपाद्यते[१]। प्रतिपन्नश्च प्रतिपादयति। केन प्रतिपन्नः? यदि प्रमाणेन, व्याघातः, प्रमाणानभ्युपगमात्[२]। अथान्यथा, न दृष्टान्तोऽस्ति। प्रतिपाद्यप्रतिपादकयोश्च भेदाभ्युपगमे व्याघातः। यदि प्रतिपाद्यं प्रतिपादयितारं च भेदेन प्रतिपद्यते[३], भेदप्रतिपादकप्रमाणाभ्युपगमात् व्याघातः। अथ भेदं न प्रतिपद्यसे, क्व किं प्रतिपाद्यत इत्यनिवृत्तो व्याघातः। प्रमाणानि न सन्तीति प्रतिजानानः पर्यनुयोज्यः, कथं न सन्तीति? यदि प्रमाणं ब्रवीति, व्याघातः। अथ न ब्रवीति, अर्थोऽस्य न सिध्यति। तदेवमेतद् वाक्यं यावद् यावद् विचार्यते, तावत् तावत् प्रविलीयत इति॥१२॥

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः॥२।१।१३॥

त्रैकाल्यासिद्धेरित्यस्य हेतोरुदाहरणमुपादीयते न वा? यद्युपादीयते, तदा व्याघातो भवति। प्रत्यक्षादीनां चाप्रामाण्याभ्युपगमादुपादीयमानमपि नार्थं साधयतीति व्यर्थम्[४]। अथ साधयति, व्याघातः। अथ नोपादीयते, अप्रदर्शितं हेत्वर्थस्य साधकत्वमिति। अनुपसंहृतश्च हेतुर्दृष्टान्ते[५] न साधक इति। सोऽयं हेतुः सर्वैः प्रमाणैर्विप्रतिषिद्धो विरुद्धो भवति

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः

इति। वाक्यार्थो ह्यस्य सिद्धान्तः। स च वाक्यार्थः प्रमाणानि नार्थं साधयन्तीति। इदं च प्रमाणानामुपादानमर्थसाधनाय

---

१. इति व्याघातः। प्रमाणानभ्युपगमात् J adds २. प्रमाणानभ्युपगमात् om J
३. °पद्यसे C ४. व्यर्थम् om C ५. दृष्टान्ते om C

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः

इति। बुद्धिविवक्षाप्रयत्नवायूदीरणताल्वभिघातौष्ठप्रस्पन्दादीनवर्जयन् बुद्ध्या वाक्यमुच्चारयसि, स्थाणुकण्टकसर्पादींश्च परिहरन् पादविहरणादि करोषि। ते एते वाक्यप्रवृत्ती प्रमाणप्रतिषेधान्न संभवत इति॥१३॥

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः॥२।१।१४॥

अथ स्ववाक्याश्रितप्रमाणव्यतिरेकेण प्रमाणानि प्रतिषिध्यन्ते, एवं च सति न सर्वं प्रमाणं प्रतिषिद्धं भवति। यश्च न्यायः स्ववाक्याश्रितप्रमाणाभ्युपगमे स एवान्यवाक्याश्रितप्रमाणाभ्युपमेऽपीति। वीत्ययमुपसर्गो विशेषप्रतिषेधे न व्याघाते। किमुक्तं भवति? कानिचित् प्रमाणानि प्रतिषिध्यन्ते, कानिचिदभ्यनुज्ञायन्त इति। यानि स्ववाक्याश्रितानि तान्यभ्यनुज्ञायन्ते। यानि परवाक्याश्रितानि तानि प्रतिषिध्यन्त इति। यच्चेदं वाक्यम्

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः

इति, किमिदं प्रमाणस्वरूपमथ न[1]? यदि प्रमाणस्वरूपम्, तदा व्याघातः। अथ न, तथापि नानेन कश्चिदर्थः प्रतिपाद्यत इति व्यर्थम्॥१४॥

त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत् तत्सिद्धेः॥२।१।१५॥

त्रैका...वत् इति सूत्रम्। यत्तत् पूर्वमुक्तमुपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद् यथादर्शनं विभागवचनमिति तदुत्थानज्ञापनार्थमिति। इतः सूत्रान्तस्योत्थानमिति[2]। कस्मात् पुनस्तत्रैवेदं सूत्रं नोक्तमिति?

---

१. °स्वरूपमथ नेति C २. °न्तरस्योत्था° C var.

अविशेषात्। तत्र वाभिधीयत इह वा न कश्चिद् विशेष इति, सर्वथा तावदयमर्थः प्रकाशयितव्य इति। एकां च विधामुदाहरति— शब्दादातोद्यसिद्धिवदिति। शेषयोस्तु विधयोर्यथोक्ते उदाहरणे वेदितव्ये। यथा पूर्वसिद्धमातोद्यं पश्चात्सिद्धेन शब्देनानुमीयते, वीणा वाद्यते वेणुः पूर्यत इति। योऽसौ वीणावेणुशब्दयोरसाधारणो धर्मो वीणादिनिमित्तकत्वम्, तदुपलभमानः शब्दस्य वीणाशब्दो वेणुशब्द इति प्रतिपद्यते पूर्वसिद्धमातोद्यं पश्चात्सिद्धः शब्द इति। सहभावे उदाहरणम्— धूमदर्शनादग्निं धूमविशेषणं प्रतिपद्यते। पूर्वसिद्ध उपलब्धिहेतुरादित्यः पश्चात्सिद्धानां[1] घटादीनां प्रकाशक इति॥१५॥

प्रमेया च तुलाप्रामाण्यवत्॥२।१।१६॥

प्रमाणं प्रमेयमिति चेयं समाख्या समावेशेन वर्तते समाख्यानिमित्तवशात्। समावेशोऽनियमः। समाख्यानिमित्तवशात् समाख्यानिमित्ततन्त्रत्वादिति। प्रमाणप्रमेयसंज्ञयोर्निमित्तमुपलब्धिसाधनत्वमुपलब्धिविषयत्वं च। यदा पुनरेकं वस्त्वनेकनिमित्तसंबन्धि भवति, तदा कथम्? तदा निमित्ततन्त्रत्वात् समाख्यायास्तद्वस्तु अनेकेन निमित्तेन संबन्धे सत्यनेकशब्दाभिलाप्यम्। अस्य चार्थस्य ज्ञापनार्थं सूत्रम्—

प्रमेया...वत् इति। किमुक्तं भवति? यथा गुरुत्वपरिमाणज्ञानसाधनं तुलाद्रव्यं समाहारगुरुत्वस्येयत्तापरिच्छेदनिमित्तत्वात् प्रमाणम्, सुवर्णादिना च परिच्छिद्यमानेयत्तैषा तुलेति परिच्छेदविषयत्वेन व्यवतिष्ठमाना प्रमेयम्। उदाहरणमात्रं चैतत्। एवमनवयवेन तन्त्रार्थो वेदितव्यः। यथा च प्रमाणप्रमेयसमाख्ये तथा सर्वे कारकशब्दाः निमित्तसमावेशनियमेन[2] वर्तन्ते। तथा च लौकिकमुदा-

---

१. °सिद्धादीनां J २. निमित्तनियमान्नियमेन J

हरणम्। एकमनेकेन कारकशब्देनाभिधीयते। वृक्षस्तिष्ठतीति स्वस्थितौ स्वातन्त्र्यात् कर्ता। किं पुनर्वृक्षस्य स्वस्थितौ स्वातन्त्र्यम्? कारकान्तरानपेक्षित्वम्। न हि वृक्षस्तिष्ठन् स्वस्थितौ कारकान्तरं प्रयुङ्क्ते। यदायं स्थितिशब्दो गतिप्रतिषेधवचनो भवति तदैवम्। यदाप्यस्तेरभिधायकः, तदाप्यस्तेर्व्यक्तिनिमित्तत्वेनावतिष्ठमानोऽस्ति व्यनक्तीति कर्तेत्युच्यते। यदापि गेहसंबन्धाद्यभिधायको भवत्यस्तिशब्दः, यथा देवदत्तो गेहे तिष्ठतीति प्रतिनिर्दिष्टेऽस्तीति गम्यते तदा न सत्तामाह न गतिप्रतिषेधम्, अपि तु देवदत्तगेहसंबन्धम्, तदापि देवदत्तगेहसंबन्धानुभवक्रिया। तस्यामपि न कारकान्तराणि प्रयुङ्क्ते इति स्वतन्त्रो भवति। यदाप्ययमभग्नवचनः स्थितिशब्दः, तिष्ठति वृक्षो न भग्न इति, तदापि स्वस्थितौ न कारकान्तरं[1] प्रयुङ्क्ते इति स्वतन्त्रो भवति। समुदायैकदेशं वा स्वस्थितौ प्रयुङ्क्ते वृक्षो मूलैस्तिष्ठति, प्रासादः स्तम्भैर्ध्रियत इति। पूर्वापरप्रत्ययैकविषयता वा स्थितिः। यद्वस्तु प्राक् प्रसिद्धं पुनर्निमित्तान्तरसन्निपाते[2] सत्युपलभ्यते यत् तस्यानेकायुगपत्कालप्रत्ययविषयत्वं सा स्थितिः।

तस्यां स्थितावस्य यत् सहकारि साधनं चक्षुरादि तत् करणमिति। चक्रभ्रान्तिप्रदीपप्रत्ययवत् मिथ्याप्रत्ययः स इति चेत्-न, प्रमाणाभावात्[3]। अथ मन्यसे नैव किञ्चिद् वस्तु अयुगपत्कालानेकप्रत्ययविषयो भवति। यदि न भवति[4], कथं तर्हि स एवायं वृक्षस्तिष्ठतीति प्रत्ययः? न हि कदाचिदाद्येन दर्शनेन स एवायं वृक्षस्तिष्ठतीति प्रत्ययो भवति। दृष्टोऽन्यत्वेऽप्यवस्थितिप्रत्ययः, चक्रं भ्रमत्तिष्ठतीति प्रदीपो ज्वलंस्तिष्ठतीति। अनवस्थितेषु नानाभूतेषु चक्रभ्रान्तिप्रदीपादिषु य एते तद्भावप्रत्यया अतस्मिंस्तदिति मिथ्याप्रत्यया एते। यथा चैते मिथ्याप्रत्यया एवं वृक्षादिस्थितिष्वपीति। न, प्रमाणाभावात्। न हि भवता प्रमाणं किञ्चित् वृक्षादीनां नानात्वस्थापकमभिधीयत इति। मिथ्याप्रत्ययाश्च सम्यक्प्रत्यया-

---

१. °न्तराणि C २. °सन्निधाने C ३. न प्रमाणाभावात् om J ४. यदि न भवति om J

नुकारेण भवन्तीति क्वामी सम्यक्प्रत्यया इति वक्तव्यम्। अथ भवतः कालान्तरावस्थाने किं प्रमाणम्? उक्तं प्रमाणम्, रूपरसगन्धस्पर्शप्रत्ययानामेकानेकनिमित्तत्वं प्रतिसन्धानादिति। कार्यस्याधारत्वेन वा कारणस्य कार्यकालानुभवनमिति। यद् यस्याधारो भवति, तत् तस्य सद्भावकालमनुभवति, यथा क्षीरस्य कुण्डम्। कारणं च कार्याधिकरणम्, अतस्तेनापि कार्यकालोऽनुभवनीय इति। अनाधारमेवेति चेत्, अथ मन्यसे प्रतीत्यकारणं कार्यमुत्पद्यत इति क्व किं वर्तत इति? तन्न, दृष्टान्ताभावात्। न हि कश्चिदुभयपक्षसम्प्रतिपन्नो दृष्टान्तोऽस्ति कार्यमनाधारमस्तीति। समानम्[१], कार्यमाधारवदित्यत्रापि न दृष्टान्तोऽस्ति[२]। समानमित्यनुत्तरमभ्युपगमात्। अभ्युपगतं तावद् भवता नास्मत्पक्षे दृष्टान्तोऽस्ति, किं तु भवत्पक्षेऽपि नास्तीति विरोध इति चेत् ? अथ मन्यसे, न मयाभ्युपगम्यते दृष्टान्ताभावः किं तु भवत्पक्षे विरोधः। चोद्यते कथमिति? योऽनुपपद्यमानदृष्टान्तः पक्षः, सोऽसाधीयानिति ब्रुवाणः स्वसिद्धान्तं बाधत इति। तन्न, अपरिज्ञानात्। न भवता अस्मत्पक्षो व्यज्ञायि न स्वपक्षः। अस्मत्पक्षे तावत् कार्यमाधारवदित्येतत् प्रसिद्धम्, भवत्पक्षेऽपि रूपादयः कार्याश्चाधारवन्तश्चेति अभ्युपगमविरोधो वा भूतभौतिकसमुदायो द्रव्यमिति, यदि रूपादीन्, आश्रितान् न प्रतिपद्यसे[३], कोऽस्य तद्धितस्यार्थो भौतिका रूपादय इति। यच्चोक्तम्,

मणिः प्रभाया आश्रयः, तद्गतिस्थितिविकारानुविधानात्। कुण्डं बदराणामाश्रयः, तद्वशेनापतनात्। तैलस्य तिल आश्रयः, तद्वशेनास्पन्दनाद्

इत्येवमादि तद् व्याहन्यते। अनाश्रिताश्च रूपादयः स्वतन्त्रा एकमुपनिबन्धनं वस्त्वन्तरमन्तरेण तिलमुद्गमाषादिवद् विभज्येरन्, न तु विभज्यन्ते, तस्मात् परतन्त्रा इति। तस्माद् व्यवस्थितमेतत् स्मृत्या सह पूर्वापरप्रत्ययैकविषयता वा स्थितिरिति।

---

१. समानं om C २. इति समानम् added C ३. अनाश्रितान् मन्यसे C

दर्शनेनाप्तुमिष्यमाणत्वाद् वृक्षः कर्म, कर्मणि कः कारकार्थः? क्रियाविषयत्वम्। यत् खलु क्रियाया विषयभावेन व्यवतिष्ठते तत् कर्म। अनेन कर्मलक्षणेन

तथायुक्तं चानीप्सितम् [पा. सू. २.४.५०]

इति संगृहीतम्।

आनन्तर्यप्रतिपत्तिः करणस्य साधकतमत्वार्थः। वृक्षेण चन्द्रमसं ज्ञापयतीति वृक्षं गृहीत्वा अथानन्तरं चन्द्रमसं प्रतिपद्यत इति वृक्षः करणकारकशब्दवाच्यः।

कर्मणा आप्तुमभीष्टं संप्रदानम्। यद् वस्तु कर्मणाभिप्रेप्सितं[1] भवति तत् संप्रदानसंज्ञकम्। वृक्षायोदकमासिञ्चतीत्यासिच्यमानमुदकं कर्म। तेन कर्मणोदकेन वृक्षं प्राप्नोतीति वृक्षः संप्रदानं भवति।

अपगच्छत्यवतिष्ठते यत् तदपादानम्। यथा वृक्षात् पतति। वृक्षोऽपादानसंज्ञकः। यत् पतति तदपगच्छति, तस्मिन्नपगच्छति अवतिष्ठते वृक्ष इति।

धृतिहेतुरधिकरणम्। यस्मिन् यदाधेयं तस्याधेयस्य यद् धृतिहेतुः तदधिकरणम्। यथा वृक्षे वयांसीति वृक्षसंबन्धो वयसां गुरुत्वप्रतिबन्धे कारणमिति वृक्षोऽधिकरणशब्दवाच्यः।

एवं च सति न द्रव्यमात्रं कारकं न क्रियामात्रम्। किमुक्तं भवति? नायं कारकशब्दः क्रियामात्रे प्रवर्तते, न द्रव्यमात्रे। न हि द्रव्यं शुद्धमुपलभमानः कारकशब्दं प्रयुङ्क्ते, नापि क्रियां केवलाम्, अपि तु यदा क्रिया द्रव्यसंबन्धमुपलभते तदा सामान्येन कारकशब्देनाभिधत्ते कारकमिति। सामान्यं च कारकाणां क्रियानिमित्तत्वम्। अविवक्षिते विशेषे क्रियानिमित्तत्वे केवले विवक्षिते कारकमिति शब्दः प्रवर्तते। यदा तु विशेषो विवक्ष्यते तदा त्वसाधारणेन कारकधर्मेणेतरव्यावृत्तेन स्वातन्त्र्यादिना विशेषेण विशिष्यमाणं वस्तु कर्ता कर्म करणमिति

---

१. प्राप्तुमभिप्रेतं C

च व्यपदिश्यते। सर्वस्य च कारकस्य स्वक्रियानिमित्तः कर्तृव्यपदेशः प्रधान-क्रियासव्यपेक्षस्तु कारकशब्दप्रयोगः। एवं च शास्त्रम्

कारके [पा. सू. १.४.२३]

जनके निवर्तके। कस्याः? क्रियाया इति तथा व्यपदेशः। तस्मात् नेदं स्वक्रिया-मात्रमपेक्ष्योक्तं किं तु प्रधानक्रियाम्। तस्यामेव प्रधानक्रियायां किंचिदा-रादुपकारकं किंचिदासन्नोपकारकमिति किंचित् कथंचिदुपकरोति, तदपेक्षाश्च कर्त्रादिशब्दा इति तदुक्तं पुरस्तात्।

यदि क्रियासंबन्धनिमित्तकः कारकशब्दप्रयोगः पचत्येव पाचकशब्दः प्रवर्तेत, नापाक्षीत् पाचकः, पक्ष्यतीति वा पाचक इति। न, शक्तेस्त्रैकाल्यावस्थानात्। शक्तिः त्रिष्वपि कालेषु अवतिष्ठते। शक्त्यपेक्षश्चातीतानागतयोः कारकशब्द-व्यपदेशः[१] पचत्यपाक्षीत् पक्ष्यतीति। शक्तेस्त्रैकाल्यावस्थानात्[२] त्रैकाल्यव्यक्तिर-युक्ता। यथैव हि द्रव्यं त्रिकालयोगि तथा शक्तिरपीति। यथा द्रव्ये त्रैकाल्यं न व्यज्यते, [३]एवं शक्तावपीति अपचत्यपि पचतीति स्यात्। पक्ष्यति पाचकोऽपाक्षीत् पाचक इत्येतन्न[४] स्यात्। नैष दोषः, क्रियासंबन्धस्य शक्तिव्यक्तिहेतुत्वात्। क्रिये-त्यनेन शब्देन धात्वर्थोऽभिधीयते, तस्य यत् प्रधानं साधनं स कर्ता। सोऽयं कर्ता यदा अनया क्रियया संबध्यते तदा शक्तिं व्यनक्ति। का पुनरियं शक्तिः? क्रियाकर्तृव्यतिरिक्तः कर्तृधर्मः। सामर्थ्यमुपायपरिज्ञानं च क्रियासंबन्धेन व्यज्यते[५]। यदोपायपरिज्ञानं सामर्थ्यं क्रियासंबन्धः, तदा मुख्यः शब्दः[६] प्रवर्तते पचति पाचक इति। यदा तु क्रियासंबन्धमन्तरेण उपायपरिज्ञानसामर्थ्यमात्रोपादाने अन्यत-मवैकल्यात् पाचकशब्दः प्रवर्तते तदा उपचारतः अपाक्षीत् पाचकः पक्ष्यति पाचक इति। कारकशब्दश्चायं प्रमाणं प्रमेयमिति। कुतः? क्रियाविशेषयोगात्।

---

१. °नागतव्यपदेशः J २. C suggests त्रिकालानवस्थानात् ३. तथा C ४. इति च न C ५. व्यवतिष्ठते C ६. मुख्यतः कारकशब्दः C

यथैवामी पाचकादिशब्दाः क्रियाविशेषयोगे सति प्रवर्तन्ते, तथा प्रमाणप्रमेयशब्दावपीति ॥१६॥

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥२।१।१७॥

अस्ति भोः कारकशब्दानां निमित्तसमावेशात् नियमः प्रत्यक्षादीनि प्रमाणानि संवेद्यमानानि च प्रमेयमुपलब्धिविषयत्वात्। तत्रेदं चिन्त्यते, किमेतानि प्रत्यक्षादीनि स्वोपलब्धौ प्रत्यक्षादिव्यतिरिक्तं प्रमाणान्तरं[1] प्रयोजयन्ति, अथ निःसाधनैव प्रमाणोपलब्धिरिति। किं चातः?

प्रमा...प्रसङ्गः। प्रमाणविषयायाः सिद्धेर्यदि प्रमाणं साधनम्, प्रमाणान्तरं प्राप्नोति। प्रत्यक्षादीनां साध्यत्वात् न साध्यं साधनं भवतीति॥१७॥

तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः ॥२।१।१८॥

अथ प्रमाणमन्तरेण निःसाधनैव प्रमाणेषूपलब्धिः?

तद्वि....सिद्धिः। यथा प्रमाणानि स्वोपलब्धौ निवर्तन्ते, एवं प्रमेयसिद्धावपीति॥१८॥

न, प्रदीपप्रकाशसिद्धिवत् तत्सिद्धेः ॥२।१।१९॥

अस्योत्तरम्–

न, ...तत्सिद्धेः इति। प्रदीपप्रकाशो घटाद्युपलब्धिसाधनस्याङ्गत्वात् प्रमाणम्।

---

१. प्रमाणं J

स च प्रत्यक्षादिभिरेवोपलभ्यते। नासावात्मोपलब्धौ प्रत्यक्षादिव्यतिरेकि प्रमाणं प्रयोजयति। तैरेवोपलभ्यते। तथा प्रमाणान्यपि प्रत्यक्षादिभिरेवोपलप्स्यन्त इति दृष्टान्तमात्रमेतत्। कोऽत्र न्याय इति? अयं न्याय उच्यते, प्रत्यक्षादीनि स्वोपलब्धौ प्रमाणान्तराप्रयोजकानि परिच्छेदसाधनत्वात् प्रदीपवत्। यथा प्रदीपः परिच्छेदसाधनं स्वोपलब्धौ न प्रमाणान्तरं प्रयोजयति, तथा प्रमाणानि। तस्मात् तान्यपि प्रमाणान्तराप्रयोजकानीति सिद्धम्। सामान्यविशेषवत्त्वाच्च। यत् सामान्यविशेषवत् तत् स्वोपलब्धौ न प्रत्यक्षादिव्यतिरेकि प्रमाणं प्रयोजयति। यथा प्रदीप इति। संवेद्यत्वाच्च। यत् संवेद्यं तत् [१]प्रत्यक्षाद्यतिरिक्तप्रमाणाप्रयोजकं यथा प्रदीप इति। आश्रितत्वात् कारणत्वाच्चेत्येवमादि[२] प्रदीपवदिन्द्रियादयोऽपि प्रत्यक्षाङ्गत्वात् प्रत्यक्षादिव्यतिरिक्तप्रमाणान्तराप्रयोजका इति समानम्।

तेनैव तस्याग्रहणमिति चेत्? अथ मनुषे प्रत्यक्षादिभिः प्रत्यक्षादीनामुपलब्धौ तेनैव तदेव गृह्यत इति प्राप्तम्। न चैतदस्ति, न हि साध्यं साधनं भवतीति। नैष दोषः अर्थभेदस्य लक्षणसामान्यात् प्रमाणलक्षणेनानेकोऽर्थः संगृहीतः। तत्र केनचित् कस्यचिद् ग्रहणमित्यदोषः। यथोद्धृतेनोदकेनाशयस्थस्य। यथोद्धृतमुदकं गृहीत्वा आशयस्थमप्येवंभूतमिति प्रतिपद्यत इति, न पुनरेवमभिधीयते तेनैव तस्य ग्रहणम्। अपि तु तथाभूतेन तथाभूतस्य। न चायमेकान्तः न तेनैव तस्य ग्रहणं भवतीति। भवत्यपि कदाचित्[३] स एव ज्ञाता ज्ञेयो भवति, यदा आत्मानं जानीत इति।

निमित्तभेदोऽत्रेति चेत्? अथ मन्यसे यदायमात्मा ज्ञाता तदान्यन्निमित्तम्? यदा ज्ञेयः, तदान्यदिति? समानम्। यथैव ज्ञाता सुखादिसंबन्धापेक्षः तद्विशेषणमात्मानं प्रतिपद्यते अहं सुखी अहं दुःखी चेति, तथा प्रमाणमपि प्रमाणविषयत्वेनावतिष्ठमानं प्रमेयमिति।

प्रत्यक्षादीनां चाविषयस्यानुपपत्तेः। यदि च कश्चिद् विषयः प्रत्यक्षाद्यविषयः स्यात् प्रतिपद्येमहि प्रत्यक्षादिव्यतिरिक्तं प्रमाणम्। स च न शक्यः केनचित्

---

१. °क्षादिव्यतिरेकिप्र° C २. करणाद्वेत्येव° C ३. °चिद्यथात्मनि C

प्रतिपादयितुम्। सर्वमिदं सच्चासच्च प्रत्यक्षादीनामेव विषयः। तस्मात् प्रत्यक्षादिभिरेवोपलभ्यत इति॥१९॥

क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः ॥२।१।२०॥

अपरे तु हेतुविशेषपरिग्रहमन्तरेण दृष्टान्तमात्रं प्रदीपप्रकाशसूत्रेणोपाददते। यथा किल प्रदीपप्रकाशः प्रदीपान्तरप्रकाशमन्तरेण गृह्यते, तथा प्रमाणान्यपि प्रमाणान्तरमन्तरेण ग्रहीष्यन्त इति तान् प्रतीदमुच्यते—

क्वचि...कान्तः। यथा प्रदीपप्रकाशस्तथा प्रमाणानि, न पुनर्यथा स्थाल्यादिरूपं तथा प्रमाणानीति कोऽत्र नियमहेतुः? स्थाल्यादिरूपप्रकाशने च प्रदीपप्रकाशो न निवर्तते। कस्मादेवं न प्रमाणानि? अयं च प्रदीपप्रकाशो दृष्टान्तः प्रमाणपक्षे भवतु मा भूत् प्रमेयपक्ष इति। तत्रापि नियमहेतुर्वक्तव्यः। प्रदीपप्रकाशो दृष्टान्तो भवतु मा भूत् स्थाल्यादिरूपं दृष्टान्त[१] इत्यत्रापि नियमहेतुर्वक्तव्य इति। सोऽयमुभयथानेकान्तो विशेषहेतुपरिग्रहमन्तरेण[२] दृष्टान्तः प्रसक्तः।

विशेषहेतुपरिग्रहे सत्युपसंहाराभ्यनुज्ञानादप्रतिषेधः। यदि पुनरयं प्रदीपप्रकाशदृष्टान्तो विशेषहेतुना प्रकाशकत्वादिना संगृहीतः, तत एकस्मिन् पक्षेऽभ्यनुज्ञायमानो न शक्यः प्रतिषेद्धुमित्यनेकान्त इत्ययं दोषो न भवतीति।

प्रत्यक्षादीनां प्रत्यक्षादिभिरुपलब्धावनवस्थेति[३] चेत्? यदि प्रत्यक्षादिभिः प्रत्यक्षादीन्युपलभ्यन्ते, तान्यप्यन्यैस्तान्यप्यन्यैरित्यनवस्था, अनवस्थायां चाद्यप्रमाणाधिगमो न स्यात्। अथ व्यवस्थास्ति, आद्यप्रमाणाधिगतिरप्रमाणा प्रसज्यते। नैष दोषः, संवित्तिविषयसंवित्तिनिमित्तानामुपलब्ध्या व्यवहारसिद्धेः। संवित्तिविषयं संवित्तिनिमित्तं चोपलभमानस्य संवित्तिविषयः प्रमेयम्। संवित्तिनिमित्तं

---

१. °ल्यादिदृष्टा° C २. °परिग्रह° om C ३. °स्था स्यादिति C

प्रमाणम्। प्रमाणप्रमेययोरुपलब्धौ सर्वो व्यवहारः सिध्यति धर्मार्थसुखापवर्ग-प्रयोजनः तत्प्रत्यनीकपरिवर्जनप्रयोजनश्च। न त्वनवस्थासाधनीयं किञ्चित् प्रयोजन-मस्ति, येनायं प्रयुक्तोऽनवस्थामुपाददीत। तस्मात् प्रत्यक्षादिभिः प्रत्यक्षादीनामुप-लब्धिः, न चानवस्थेति। एवं तावत् सामान्यतः समधिगतमेतत् सन्ति प्रमाणानि प्रमेयसाधनानीति ॥२०॥

॥सामान्येन प्रमाणपरीक्षाप्रकरणम्॥

[प्रत्यक्षलक्षणपरीक्षाप्रकरणम्]

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात्॥२।१।२१॥

अथेदानीं सामान्यतोऽधिगतानां विशेषपरीक्षा। तत्र प्रत्यक्षमादावुक्तम्। तत् परीक्ष्यत इति।

प्रत्यक्ष...नात्। यदिदं भवता प्रत्यक्षलक्षणमुच्यते

इन्द्रियार्थसन्निकर्षोत्पन्नम्

इति, तदसमग्रम्, कस्मात्? अन्यान्यपि प्रत्यक्षस्य कारणानि सन्ति। तानि नोक्तानि यथा आत्ममनःसंयोग इत्येवमादीनि। अथेन्द्रियार्थसन्निकर्षोत्पन्नमित्येतल्लक्षणमिति? लक्षणमप्येतन्न भवति। कस्मात्? उत्पत्तिकारणापदेशात्। इन्द्रियार्थसन्निकर्षोत्पन्न-मित्येतत् कारणमपदिश्यते। न च कारणापदेशो वस्तुनो लक्षणम्। न हि घटादेः कार्यस्य मृत्पिण्डादिक्रमोत्पत्तिस्तल्लक्षणमिति। न, उभयथाप्यदोषात्[१]। यदि कारणम्, तथापि न दोषः। अथ लक्षणं तथापि न दोषः। कथम्? कारणपक्षे तावदुक्तं भवति[२] नेदं कारणावधारणार्थं सूत्रमिति, अपि तु प्रत्यक्षस्य प्रमाणस्य यदसाधारण-मनुमानादिव्यवच्छेदकं तदुक्तमिति[३] नात्ममनःसंयोगादिषु प्रसङ्गः। इन्द्रियमनः-

१. °दोषः C २. भवति om J ३. तद्वक्तव्यमिति J

संयोगस्तर्हि उपसंख्येयः। यद्यसाधारणकारणत्वादिन्द्रियार्थसन्निकर्षस्य ग्रहणम्, नन्वेतस्मादेवेन्द्रियमनःसन्निकर्षोऽप्युपसंख्येय इति। न, उक्तत्वात्[१]। उक्तमत्रापि, न यावदसाधारणं कारणं तत्सर्वं वक्तव्यमिति। अपि त्वन्यतरग्रहणेनापि विशेषितमेतत्। लक्षणपक्षेऽपि न दोषः। असाधारणत्वादिन्द्रियार्थसन्निकर्षस्य इति। इन्द्रियार्थसन्निकर्षः प्रत्यक्षोत्पादकत्वात् कारणं च, समानासमानजातीयेभ्यो विशेषकत्वात् लक्षणं चेति॥२१॥

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥२।१।२२॥

अर्थतो वाभिधानमात्ममनःसंयोगस्य इन्द्रियमनःसंयोगस्य च। कथमिति? ज्ञानोत्पत्तिदर्शनात्। नासंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरिति। मनःसंयोगानपेक्षं चेदिन्द्रियं प्रवर्तत इति युगपदनेकोपलब्धिः स्यात्। न तु[२] भवति। अतो मनःसन्निकर्षोऽपि कारणमिति। तदिदं सूत्रमुक्तभाष्यम्।

नात्म...त्पत्तिः इति। आत्ममनसोः सन्निकर्षाभावे नोत्पद्यते बुद्धिः, इन्द्रियार्थसन्निकर्षाभाववदिति। न, उक्तोत्तरत्वात्। उक्तोत्तरमेतत्। नेदं कारणावधारणार्थं सूत्रम् अपि तु विशिष्टकारणवचनमिति॥२२॥

दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः॥२।१।२३॥

ये तु सति भावात् कारणभावं वर्णयन्ति, यस्मात् किलेन्द्रियार्थसन्निकर्षे सति ज्ञानं भवति असति च न भवति[३] तस्माद् इन्द्रियार्थसन्निकर्षः कारणमिति, तेषाम्

दिग्देश...प्रसङ्गः। दिग्देशकालाकाशेषु सत्स्वपि ज्ञानं भवति, सति भावात् तान्यपि कारणमिति प्राप्तम्। कतमेन पुनर्न्यायेन दिगाद्यकारणम्? सामर्थ्यानुप-

---

१. न उक्तत्वात् om C २. न च C ३. असति च न भवति om C

लब्धेः। न हि ज्ञानोत्पत्तौ दिगादेः सामर्थ्यमुपलभ्यते। तस्मादकारणम्। सन्निधिमात्रादिति चेत्? अथ मन्यसे दिगादिः सन्निधिमात्रेण ज्ञानोत्पत्तौ कारणं भवति[१]? तदयुक्तम्, सन्निधेरवर्जनीयत्वात्। नित्यं दिगादि व्यापकं चेति नित्यत्वाद् व्यापकत्वाच्च न शक्यः सन्निधिः परिवर्जयितुमिति तत्र कारणभावे हेतुर्वक्तव्यः। न हि सन्निधिमात्रं हेतुत्वे कारणम् । कथम्? रूपोपलब्धेस्तेजःस्पर्शसद्भाववदिति। यथा रूपोपलब्धौ तेजसो रूपविशेषो हेतुः, न पुनस्तेजसः स्पर्शः सन्निधिमात्रेण[२] सामर्थ्यादर्शनात्। रूपस्य पुनर्दृष्टं सामर्थ्यं तद्भावाभावानुविधानादुपलब्धेः। यस्माद् यत्र रूपं भवति तत्रोपलब्धिः, यत्र न भवति न तत्रोपलभ्यते। तस्माद् रूपमेवोपलब्धेः कारणं न स्पर्श इति। यथा चान्द्रमसं रूपं विना तेजःस्पर्शेनौष्ण्येन प्रकाशयति, अपवरकादिस्थितं चौष्ण्यं विना रूपेण न प्रकाशयति, एवमात्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो ज्ञानं भवन्न दिगादिभ्यो भवति सन्निधिमात्रत्वात्, इतरेषां च सामर्थ्यदर्शनादिति॥२३॥

ज्ञानलिङ्गत्वादात्मनो नानवरोधः॥२।१।२४॥

यद्येवम् आत्ममनःसंयोगस्तर्हि उपसंख्येयः। नोपसंख्येयः, गम्यमानत्वात्। केन गम्यमानत्वात्?

ज्ञान...रोधः। ज्ञानमात्मलिङ्गमित्युक्तम्। तेन आत्ममनःसंयोगोऽनुक्तोऽप्यनुमेयः। कथं पुनर्ज्ञानमात्मनो लिङ्गम्? तद्गुणत्वात्। गुणभावासिद्धिरिति चेत्? अथ मनुषे गुणाभाव एव तस्यासिद्धः, कुत आत्मगुणत्वं सेत्स्यतीति? न, आत्मसमवायात् सुखादिवदिति। न हि द्रव्यं कर्म वा आत्मनि समवैति। तस्मात् न द्रव्यं न कर्म। आत्मनि च समवायो ज्ञानस्य सुखादिवत्। तस्माद् आत्मगुणः। न पृथिव्यादिगुणः स्वसंवेद्यत्वात्। यत्[३] प्रत्यक्षं स्वसंवेद्यं न तत् पृथिव्यादिगुणो

---

१. ज्ञानोत्पत्तेः कारणमिति C २. सन्निधिमात्रेण om J ३. यच्च Pañjikā

भवति[१]। यच्च प्रत्यक्षं स्वपरसंवेद्यं तत् पृथिव्यादिगुणः, यथा रूपादि। न चैवं ज्ञानम्, तस्मादात्मगुण इति। उक्तं चात्र। किमुक्तम्? न यावत् प्रत्यक्षस्य कारणं सर्वं तद् वक्तव्यमिति[२]।।२४॥

तदयौगपद्यलिङ्गत्वाच्च न मनसः॥२।१।२५॥

अथेन्द्रियमनःसन्निकर्षः[३] कस्मात् नाभिधीयत इति।

तद...मनसः। युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गम् इत्युक्तम्। तेन मनसोऽप्यवरोध इति। न, युगपदनुत्पत्तिसूत्रस्यान्यार्थत्वात्। यदिदमुच्यते युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् इत्यत्र[४] ज्ञानकारणं मन इति, तदयुक्तम्, अन्यार्थत्वात्। अन्यार्थं [५]तत् सूत्रम्। न पुनस्तेन ज्ञानकारणत्वं मनसोऽभिधीयते[६]। अन्यार्थस्यापि तदर्थप्रकाशकत्वमुपपत्तिसामर्थ्यात्। यद्यपि तस्मिन् सूत्रे न मनसो ज्ञानकारणत्वं साक्षादुक्तम्, तथाप्युपपत्तिसामर्थ्यात् ज्ञानकारणता मनस[७] इति गम्यते। न हि ज्ञानं स्वतन्त्रं न च[८] चक्षुरादि स्वतन्त्रमिति॥२५॥

प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम्॥२।१।२६॥

अथ कस्मादिन्द्रियार्थसन्निकर्षोऽभिधीयते, कथं च[९] नात्ममनःसन्निकर्ष[१०] इन्द्रियमनःसन्निकर्षो वेति?

---

१. यथा सुखादि for भवति। C २. तावत् सर्वं वक्त॰ C ३. मनःसंयोगः J
४. इत्यनेन C ५. तत् om C ६. C adds गम्यते। न हि ज्ञानं स्वतन्त्रम्
७. ॰कारणं मनः C ८. च om C ९. कथं च om J १०. ॰र्षोऽभिधीयते C

प्रत्यक्ष...चनम्। इन्द्रियार्थसन्निकर्षः प्रत्यक्षस्यैव निमित्तम्, आत्ममनः-सन्निकर्षः[१] प्रत्यक्षस्यान्यस्य चेति। इन्द्रियार्थसन्निकर्षेण समानत्वाद् इन्द्रियमनः-संयोगो वक्तव्यः। यदि साधारणत्वाद् आत्ममनःसंयोगस्य नाभिधानम्[२], इन्द्रियमनः-संयोगोऽसाधारणत्वात् इन्द्रियार्थसन्निकर्षवद् वक्तव्यः नेदं कारणावधारणार्थ-मित्युक्तम्। न च यावदसाधारणं सर्वं तद् वक्तव्यम्। अपि तु साधारणं न वक्तव्य-मित्ययं सूत्रार्थः॥२६॥

सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्
॥२।१।२७॥

इन्द्रियार्थसन्निकर्षस्य प्राधान्यप्रदर्शनपरमिदं सूत्रम्। शेषं **भाष्ये**॥२७॥

तैश्चापदेशो ज्ञानविशेषाणाम्॥२।१।२८॥

प्राधान्ये च हेत्वन्तरम्—

तैश्चा...णाम्। यस्मादिदं प्रत्यक्षज्ञानमुत्पद्यमानं विषयेण वा कारणेन वेन्द्रियेण[३] व्यपदिश्यत इति। यच्चासाधारणं तेन व्यपदेशो दृष्टः, यथा यवाङ्कुर[४] इति॥२८॥

व्याहतत्वादहेतुः॥२।१।२९॥

व्याहतत्वादित्यनेन त्रिसूत्रीं प्रत्याचष्टे

प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य॥

---

१. °मनःसंयोगः J २. सन्निकर्षो नाभिधीयते C ३. इन्द्रियेण om C ४. शाल्य-ङ्कुरः C

सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्॥

तैश्चापदेशो ज्ञानविशेषाणाम्॥

इति। इयं किल त्रिसूत्री आत्ममनःसन्निकर्षस्य ज्ञानकारणत्वं प्रतिषेधतीति व्याहतमिदं[१] भवति

ज्ञानलिङ्गत्वादात्मनो नानवरोधः॥

तदयौगपद्यलिङ्गत्वाच्च न मनसः॥

इति। **मनःसंयोगानपेक्षायां च**[२] युगपज्ज्ञानोत्पत्तिप्रसङ्ग इति[३] दृष्टव्याघातः। **अथ मा भूद् व्याघात** इति। सर्वं ज्ञानमात्ममनःसंयोगादुत्पद्यते। चोद्यावस्थमेवैतत्। कस्मादात्ममनःसंयोगो नाभिधीयत इति? अत्रोक्तम्। किमुक्तम्? नेदं कारणावधारणार्थं सूत्रमिति। अपि तु विशिष्टकारणवचनमिति[४] ॥२९॥

नार्थविशेषप्राबल्यात्॥२।१।३०॥

यापीयं[५] त्रिसूत्री प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्येत्येवमादिः, इयमपि

नार्थ...ल्यात्। नानया त्रिसूत्र्या आत्ममनःसंयोगस्य कारणभावः प्रतिषिध्यते, अपि तु प्राधान्यमिन्द्रियार्थसन्निकर्षस्योपपाद्यते। प्राधान्यं चोपपादयन्त्या नात्ममनःसंयोगः प्रतिषिद्धो भवति। मनसि क्रियाकारणाभिधानं सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वादित्यभिदधानेनात्ममनःसंयोगोऽपि कारणमित्युक्तम्। तत्र मनसि क्रियाकारणं वाच्यमिति। अथ[६] सुखदुःखोपभोगस्यादृष्टनिमित्तत्वाददृष्टं कारणम्, यथैवात्मनि गुणान्तरमिच्छाजनितं प्रयत्नलक्षणं क्रियाहेतुः तथा आत्मनि संस्कारो धर्माधर्मसमाख्यातो वर्तते। तेन प्रेरितं मनः संयुज्यते विभज्यते

---

१. इदं om J २. च om C ३. प्रसङ्गे. J ४. द्रः न्यायभाष्यम् १.१.४
५. इयं om J ६. अथ om J

वा। तेन ह्यप्रेर्यमाणे मनसि ततोऽन्यस्य क्रियाहेतोरभावात् सर्वार्थता तस्य गुणस्य[१] निवर्तेत। न हि धर्माधर्मावन्तरेणाणौ मनसि च[२] कश्चिदन्यः क्रियाहेतुरादौ संभवतीत्यतोऽदृष्टं कारणमिति। एवं तावत् समधिगतं[३] प्रत्यक्षलक्षणम्॥३०॥

॥प्रत्यक्षलक्षणपरीक्षाप्रकरणम्॥

[प्रत्यक्षस्यानुमानत्वपरीक्षाप्रकरणम्]

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः॥२।१।३१॥

अतः परमिदानीं प्रत्यक्षस्यानुमानेऽन्तर्भावं कुर्वाण इदमाह—

प्रत्यक्ष.....लब्धेः।

यदिदमिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानम् अयं वृक्ष इति एतत् किल प्रत्यक्षं तत्त्वनुमानमेव[४]। कस्मात्? एकदेशग्रहणाद् वृक्षोपलब्धेः। एकदेशमयं गृहीत्वा वृक्षमुपलभते। न चैकदेशो वृक्षः। तत्र यथा अन्यस्य दर्शनादन्यस्मिन् प्रतिपत्तिरनुमानम्, एवमेकदेशग्रहणाद् वृक्षप्रतिपत्तिरनुमानमिति। तद् यथा धूमं गृहीत्वा अग्निप्रतिपत्तिः, एवमेकदेशं गृहीत्वा वृक्षप्रतिपत्तिरिति।

न यथासंभवं[५] विकल्पानुपपत्तेः। एकदेशग्रहणादर्थान्तरं प्रतिपद्यत इति, किं तदर्थान्तरं यदेकदेशग्रहणात् प्रतिपद्यते[६]? अवयवसमूहपक्षे तावदवयवान्तराणि, द्रव्यान्तरोत्पत्तिपक्षे तानि चावयवी चेति[७]। यदि तावदवयवसमूहमात्रं वृक्षमधिकृत्योच्यते, एतस्मिन् पक्षे गृह्यमाणावयवव्यतिरेकेण यान्यगृह्यमाणान्यवयवान्तराणि स वृक्षः। अथ द्रव्यान्तरोत्पत्तिपक्ष आश्रीयते, तथाप्यर्वाग्भागः व्यवहितान्यवयवान्तराणि, अर्थान्तरं च स[८] वृक्ष इति। किं पुनरत्रैकदेशग्रहणादयं प्रतिपद्यते?

---

१. गुणस्य om C २. अणौ and च om C ३. समाहितं C ४. तु om C
५. यथासंभवं om J ६. ॰पद्यत इति C ७. अवयवीति चेत् न C ८. स om J

किं तावदवयवान्तराणि, अथ[१] द्रव्यान्तरमिति। अवयवसमूहपक्षे तावद् वृक्ष-बुद्धेरभावः, परभागस्यावृक्षत्वाद् अर्वाग्भागवत्। यथैवायमर्वाग्भागो न वृक्षः, एवं मध्यपरभागावपि न वृक्षः। सेयमवयवसमूहपक्षेऽवृक्षे वृक्षबुद्धिरुत्पद्य-माना निर्विषया। अर्वाग्भागः परभागो मध्यभाग इत्येतच्च नास्ति। कथम्? भाग इत्यवयवस्यैतन्नाम। यः पुनरर्थान्तरमवयविनं न प्रतिपद्यते, तस्यावयव इति निरभिधेयं वाक्यम्। अवयवश्च परभागो मध्यमागोऽर्वाग्भागश्च[२]। स चावयवि-प्रत्याख्यानात्[३] न युक्त इति। अथैकदेशो भाग इत्युच्यते, कोऽयमेकदेशः? एकदेशो ह्यवयविन आधारः। अवयविनं च प्रत्याचक्षाणेन एकदेशोऽपि प्रत्या-ख्यातः।

अथाकार्यकारणभूतानां परस्परप्रत्यासत्त्युपग्रहेणैकदेशावस्थानमवय-वार्थः? अहो शब्दार्थकौशलम्। अकार्यकारणभूताश्च परस्परप्रत्यासत्त्युपग्रहेण च वर्तन्त इति। न च परस्परोपकारं कुर्वन्ति, अवयवाश्चाभिधीयन्त इति चित्रम्।

अपरे त्ववर्वाग्भागदर्शनेन परभागानुमानं कृत्वा प्रतिसन्धानप्रत्ययजामवृक्षे वृक्षबुद्धिमध्यवस्यन्ति। एतस्मिन्नपि[४] पक्षे वृक्षबुद्धेरभाव एव। कथम्? अर्वाग्भागस्य परभागस्य चावृक्षत्वात्। न चावृक्षप्रतिसन्धानजा वृक्षबुद्धिरुत्पत्तुमर्हतीति। न चैतस्मिन् पक्षेऽनुमानं भवतीति। अर्वाग्भागमयं गृहीत्वा परभागमनुमिमीत इति नानुमानस्य विषयः परिज्ञातः। कथमपरिज्ञातः? यदि तावदेवमनुमिमीते वृक्षोऽयम-र्वाग्भागवत्त्वात्, कतमोऽसौ वृक्षः, यस्यार्वाग्भागवत्त्वं धर्मः? अनभ्युपगतार्था-न्तरावयविनोऽर्वाग्भागमात्रं प्रत्यक्षम्। न च धर्मिण्यनुपलब्धेऽनुमानं प्रवर्तते। न चायं जात्वपि धर्मिणमुपलभते, अविद्यमानत्वेनाभ्युपगमात्। न चानुमानम् अनुमाने एवंविधस्य प्रतिसन्धानस्याभावात्। न ह्यनुमाने एवंविधं प्रतिसन्धानमस्ति। नाय-मनुमाता पूर्वमनुपलभ्याग्निं धूमविशेषणं प्रतिपद्य प्रतिसन्धत्ते अयं धूमोऽयं

---

१. उत C २. मध्यभागः and च om C ३. °ख्याने C ४. अपि om C

चाग्निरिति। न च प्रतिसन्धायानुमिमीते अग्निनात्र भवितव्यमिति। किं कारणम्? वैयर्थ्यात्। व्यर्थमनुमानमेतस्यामवस्थायामग्नेर्विशेषणभूतस्य प्रतीतत्वात्। तस्मान्नानुमाने प्रतिसन्धानमस्ति। प्रतिसन्धायापि च न समुदाये प्रतिसन्धानं न वृक्षे। न ह्ययमेकदेशदर्शनात् समुदायं प्रतिपद्यते, न वृक्षम्। किं तु शेषं समुदायिनमेव। किं कारणम्? समुदायिव्यतिरेकेण समुदायस्यासत्ताभ्युपगमात्। न हि भवन्तः समुदायिव्यतिरिक्तं समुदायं प्रतिपद्यन्ते। न चासन् समुदायोऽनुमातुं शक्यः।

किं च अर्वाग्भागमयं गृहीत्वा किमन्यदनुमिमीते[१]? अयमर्वाग्भागः परभागवानिति न युक्तमनुमातुम्, अर्वाग्भागस्य परभागवत्त्वासंभवात्। न ह्यर्वाग्भागः परभागवान्, भागस्य [२]भागासंभवात्। न हि भागस्यापरो भागो विद्यत इति। अथ भागं भागवन्तं प्रतिपद्यसे, नासौ भागो भागवान्, भाग्येवासौ। भागिविषयं चानुमानमिति न युक्तम्, उभयोः प्रत्यक्षत्वात्। उभयं ह्यस्य[३] प्रत्यक्षम्, अर्वाग्भागश्च भागी च। तत्रार्वाग्भागवत्त्वेन भागिनः परभागानुमानमस्मत्पक्षे युक्तम्, भवत्पक्षे तु भागमात्रदर्शनान्न युक्तमिति। यच्च तदर्वाग्भागदर्शनं न तस्य लिङ्गलिङ्गिसंबन्धस्मृत्यनुग्रहोऽस्ति। संबद्धयोरर्वाग्भागपरभागयोरदृष्टत्वात्। न ह्ययं द्रष्टा अर्वाग्भागपरभागयोः संबन्धं पश्यति। न[४] चार्वाग्भागपरभागौ संबद्धौ। न चानुभवमन्तरेण स्मृतिः। न च स्मृतिमन्तरेण लिङ्गदर्शनं केवलमनुमानम्। कथं पुनरयमर्वाग्भागपरभागौ संबद्धौ न पश्यति। नित्यमर्वाग्भागेन परभागस्य व्यवधानात्, नित्यमर्वाग्भागमेव केवलमुपलभते परभागं तु न कथञ्चन, अर्वाग्भागव्यवहितत्वात्। सत्यम्, नोभयोरुपलब्धिरस्ति। उभौ तु[५] संबद्धौ। सत्यं संबद्धौ, अनुमानं च न शक्यमुभयोरदर्शनात्। अर्वाग्भागपरभागयोश्च धर्मधर्मिभावानुपपत्तेर्नानुमानम्। यत्र खल्वनुमानं भवति तत्र धर्मिणो धर्मप्रसिद्धौ धर्मान्तरविषयमनुमानम्। न पुनरर्वाग्भागस्य परभागो धर्मः, परभागस्य चार्वाग्भागः। अतश्च नानुमानम्।

---

१. अन्यत् om J २. भागवत्त्वासं° C ३. ह्यत्र C ४. च om C ५. च C

यच्चेदमुच्यते, प्रतिसन्धानप्रत्ययजा वृक्षबुद्धिरिति, तदयुक्तम्। वृक्षस्यासिद्धत्वेनाभ्युपगमात्[१] न प्रतिसन्धानम्। प्रतिसन्धानं हि नाम पूर्ववस्त्वनुरञ्जितः[२] प्रत्ययः पिण्डान्तरे भवति। यथा रूपं च मयोपलब्धं रसश्चेति। भवत्पक्षे पुनरर्वाग्भागं गृहीत्वा परभागमनुमायार्वाग्भागपरभागावेतावित्येतावान्[३] प्रतिसन्धानप्रत्ययो युक्तः। वृक्षबुद्धिस्तु कुतः? न [४]तावदर्वाग्भागो वृक्षो न परभाग इति। अर्वाग्भागपरभागयोश्चावृक्षभूतयोर्या वृक्षबुद्धिः सा [५]अतस्मिंस्तदिति प्रत्ययः। अतस्मिंस्तदिति प्रत्ययो नानुमानाद् भवितुमर्हतीति, प्रमाणस्य यथाभूतार्थपरिच्छेदकत्वात्। यश्चायमतस्मिंस्तदिति प्रत्ययः स प्रधानानुकारेण भवतीति वृक्षबुद्धेः[६] प्रधानं वक्तव्यम्। न ह्यगृहीतसामान्यस्यानध्यारोपिततद्विपरीतधर्मणो वा अतस्मिंस्तदिति प्रत्ययो भवति। प्रधानं च नास्ति, वृक्षस्यानभ्युपगमात्। तस्मान्नानुमानप्रतिसन्धानाद् वृक्षबुद्धिः।

एतेनार्वाग्भागपरभागप्रत्यया अपि प्रत्युक्ताः। [७]अनभ्युपगतान्त्यावयविनश्चार्वाग्भागः परभाग इत्येतदपि नास्ति। कस्मात्? महतो द्रव्यस्योपलब्धिलक्षणप्राप्तस्य परभागव्यवधायकस्यैतन्नामार्वाग्भाग इति। तथाभूतस्यैव[८] व्यवहितस्य परभाग इति। न च भवता किञ्चिद् द्रव्यमवयविभूतं प्रतिपद्यते यदर्वाग्भागपरभागशब्दवाच्यं स्यादिति। परमाणुषु तथासन्निविष्टेषु अर्वाग्भागपरभागवृक्षादिप्रत्यया इति चेत्? अथ मनुषे नास्माभिरवयविद्रव्याणि कानिचित् प्रतिपद्यन्ते। किं तु तेष्वेव परमाणुषु परस्परप्रत्यासत्त्युपसंग्रहेण संस्थानविशेषावस्थितेषु एते शब्दाः प्रवर्तन्त अर्वाग्भाग इति परभाग इति च वृक्ष इति चेति। न, तथाशब्दस्यार्थानभिधानात्। [९]तथासन्निविष्टेष्वित्येतदभिधानं प्रवर्तते पूर्वप्रसिद्धौ सत्याम्। न च परमाणुषु पूर्वापरभागादिशब्दप्रवृत्तेर्बीजमस्ति। यथाप्रसिद्धे गवि गवयः तथारूप इति। एवं तावदवयवसमूहपक्षे वृक्षबुद्धेरभाव इत्युक्तम्।

---

१. स्यासत्त्वेन J २. पूर्वप्रत्ययानु॰ C ३. एतौ om C ४. च for तावत् J
५. अतस्मिंस्तदिति प्रत्ययः om C ६. ॰बुद्धिः C ७. ॰गतार्थान्तरावयविन॰ J
८. ॰भूतस्य च C ९. ॰विष्टेषु तथाभि॰ C

द्रव्यान्तरोत्पत्तिपक्षे तु नावयव्यनुमेयः प्रत्यक्षत्वादर्वाग्भागवत्। यथैवायमर्वाग्भागमिन्द्रियसंबद्धं प्रत्यक्षत उपलभते, तथा वृक्षमपीति नानुमेयो वृक्षः। अथेन्द्रियसंबद्धमपि वृक्षमनुमेयमेव प्रतिपद्यसे, वृक्षवदर्वाग्भागोऽप्यनुमेयः प्रसज्यते[१]। तथा च व्याहतं भवति। अर्वाग्भागमयं गृहीत्वा वृक्षं प्रतिपद्यत इति। सर्वमेवानुमानमित्येतस्मिन्नपि च पक्षेऽनुमानाभावः प्रत्यक्षतोऽनधिगतत्वाद् धर्मिणः। न हि धर्मिणि प्रत्यक्षतोऽनधिगतेऽनुमानं प्रवर्तते। यदप्यतीन्द्रियेष्वर्थेष्वनुमानमुक्तम्[२], तदपि नास्तीत्युक्तम्[३]। न हि अतीन्द्रियोऽर्थोऽनुमातुं शक्यः। कथमिति? धर्मिणोऽनधिगतत्वादित्युक्तम्। कः पुनः सामान्यतोदृष्टस्य प्रत्यक्षपूर्वकादनुमानाद् विशेषः, यदि, सर्वं प्रत्यक्षपूर्वकमेवानुमानमिति। अयं विशेषः। प्रत्यक्षपूर्वकं त्रिकप्रसिद्धौ प्रवर्तते साध्यसाधनधर्म्युपलब्धौ। यत्रायं साध्यं साधनं च धर्मिणं च पूर्वं गृहीत्वा पुनर्धर्मधर्मिदर्शनेन धर्मान्तरमनुमिमीते, तत्प्रत्यक्षपूर्वकम्। यत् पुनः साधनधर्मं धर्मिणं चोपलभ्यात्यन्तपरोक्षं धर्मान्तरमनुमिमीते तत् सामान्यतोदृष्टमिति। भवत्पक्षे तु न सामान्यतोदृष्टादनुमानाद् वृक्षबुद्धिर्न प्रत्यक्षपूर्वकात्, धर्मिणोऽनभ्युपगमात्, प्रत्यक्षप्रतिषेधाच्चेति ॥३१॥

न, प्रत्यक्षेण यावत् तावदप्युपलम्भात् ॥२।१।३२॥

विरुद्धश्चायं हेतुरेकदेशग्रहणाद् वृक्षोपलब्धेरिति। कथमिति?

न, ... लम्भात्।

प्रत्यक्षमनुमानमित्येवं ब्रुवता प्रत्यक्षमपह्नूयते। प्रत्यक्षापह्नवाच्च यदेकदेशग्रहणं प्रत्यक्षं तद् व्याहतं भवति। कथमिति? यत् तदेकदेशग्रहणं भवता आश्रीयते प्रत्यक्षं तत्[४]। तावतापि च प्रत्यक्षलक्षणं सिध्यतीति। न [५]चेदं प्रतिज्ञायते सर्वं

---

१. स्यात् C २. उक्तम् om J ३. अपि and इत्युक्तम् om C
४. तत् om J ५. चैवं C

प्रत्यक्षस्य विषयः। किं तु यावदिन्द्रियार्थसन्निकर्षादुपलभ्यते, तावत् प्रत्यक्षस्य विषय इति।

अथापि[१] न प्रत्यक्षमनुमानमप्रकारवत्त्वात्, प्रकारवदनुमानमप्रकारवत् प्रत्यक्षम्। तदुक्तमनुमानसूत्रं वर्णयद्भिरिति। त्रिकालविषयत्वाच्च नानुमानं प्रत्यक्षम्, त्रिकालविषयमनुमानम्, न चैवं प्रत्यक्षमिति। लिङ्गलिङ्गिसंबन्धस्मृत्यनपेक्षत्वाच्च[२] नानुमानं प्रत्यक्षम्। लिङ्गपरामर्शज्ञानस्य लिङ्गलिङ्गिसंबन्धस्मृत्यनुग्रहोऽस्ति। न चैवं प्रत्यक्षस्य। तस्मान्न प्रत्यक्षमनुमानम्। इतश्च न प्रत्यक्षस्यानुमानत्वप्रसङ्गः, तत्पूर्वकत्वात्। प्रत्यक्षपूर्वकमनुमानम्, न तु प्रत्यक्षम्। अयं चानयोर्विशेष इति। इन्द्रियसंबद्धाच्च, न चेन्द्रियस्यानुमेयेनार्थेन [३]सन्निकर्षादुत्पद्यते ज्ञानं यदनुमानमित्युच्यते। सोऽयं प्रमाणदृष्टः प्रत्यक्षानुमानयोरेकत्वमासञ्जयता भेदः प्रत्याख्यायत इति।

न चैकदेशोपलब्धिरवयविसद्भावात्। यदिदं भवताभिधीयत एकदेशग्रहणादयं वृक्षं प्रतिपद्यत इति तदनुपपन्नम्। यस्मादेकदेशोपलब्धिश्च तत्सहचरितावयव्युपलब्धिश्च। न हीन्द्रियेण सन्निकृष्यमाण एकदेशे तत्सहचरितोऽवयवी न सन्निकृष्टः। तेन यथैकदेशः स्वसन्निकर्षादुपलभ्यते, एवमवयव्यपि स्वसन्निकर्षादुपलभ्यते। कस्मात्? अवयविसद्भावात्। अस्ति ह्ययमेकदेशव्यतिरिक्तोऽवयवी, तस्यावयवस्थानस्योपलब्धिलक्षणप्राप्तस्यैकदेशोपलब्धावनुपलब्धिरनुपपन्ना। किं कारणम्? महदनेकद्रव्यरूपाण्युपलम्भकानि[४]। तान्येकदेशवदेकदेशिन्यपि वर्तन्ते[५]। तस्मादेकदेश उपलभ्यते नैकदेशीत्ययुक्तम्॥

नावयविन उपलब्धिर्युक्ता। कस्मात्? विकल्पानुपपत्तेः। अयं खल्ववयवी अवयवेषु वर्तमान एकस्मिन् कृत्स्नो वा वर्तते, एकदेशेन वा? किं चातः? यद्येकस्मिन् कृत्स्नो वर्तते शेषावयववैयर्थ्यम्। न हि शेषैरवयवैः किंचनावयविनः

---

१. अन्यथापि C २. °त्यनुग्रहापेक्ष° C ३. संबन्धादु° C ४. °लब्धिकारणानि C द्रः वै. सू. (च)४.१.६ ५. विद्यन्ते C

क्रियत इति। एकद्रव्यश्चासावयवी भवन् नोपलभ्येत। किं कारणम्? महदनेकद्रव्यवत्त्वस्योपलम्भकत्वात्[१]। न चास्य विनाशः प्राप्नोति, कारणद्रव्यविभागासंभवात्। न ह्येकस्य विभागः संभवति। न चैकेनारभ्यमाणस्य महत्त्वं युक्तम्, कारणबहुत्वमहत्त्वप्रचयासंभवात्। तस्मादेकस्मिन् न कृत्स्नो वर्तत इति। नाप्येकदेशेन वर्तते। न ह्यस्य कारणव्यतिरेकेणान्ये एकदेशाः सन्ति[२]। सोऽयमेकदेशोपलब्धावयवव्युपलभ्यमानो न कृत्स्न उपलभ्यते। सेयमेकदेशोपलब्धिरनिवृत्तेति[३]। अथोपलभ्यमानोऽवयवी कथमुपलभ्येत? यदि गृह्यमाणेष्ववयवेषु, कृत्स्नः परिसमाप्तः स्यात्। न चायं गृह्यमाणेषु परिसमाप्तः, शेषावयववैयर्थ्यादित्युक्तम्[४]। अशेषावयवोपलब्धिरपि नास्ति, मध्यपरभागयोरर्वाग्भागेन व्यवधानात्। तेनावयविनो न ग्रहणविकल्पो नापि वृत्तिविकल्पः।

एकस्मिन् कृत्स्नैकदेशशब्दासंभवादप्रश्नः। किमवयव्येकदेशेन वर्तते, अथ कृत्स्नो वर्तत इति न युक्तः प्रश्नः। नावयवी कृत्स्नो नैकदेशः। कृत्स्नमिति खल्वनेकस्याशेषस्याभिधानम्। एकदेश इति चानेकत्वे सति कस्यचिदभिधानम्। ताविमौ कृत्स्नैकदेशशब्दावेकस्मिन्नवयविन्यनुपपन्नौ। कथं तर्हि अवयवेष्ववयवी वर्तत इति? आश्रयाश्रयिभावेन। आश्रितोऽवयवी, आश्रया अवयवा इति। का पुनरियं वाचोयुक्तिः नैकदेशेन वर्तते। न च कात्स्न्र्येन वर्तते, अथ च वर्तत इति। यद् यथाभूतं वस्तु[५] तत् तथा निर्दिश्यत इत्येषा वाचोयुक्तिः। कृत्स्नैकदेशशब्दौ चावयविनि[६] न स्तः, तस्यैकत्वादित्युक्तम्। तस्मादाश्रयाश्रितधर्मिनिर्देशमात्रमवयव्यवयवेषु वर्तत इति। का पुनरियं वृत्तिः? एकस्यानेकत्राश्रयाश्रितभावलक्षणा प्राप्तिः।

अपि चैकमनेकत्र वर्तत इति प्रतिजानानो नानुयोक्तव्यः। कस्मात्? उभयेन व्याघातात्। एकमनेकत्र वर्तत इति ब्रूवाणः किमेकदेशेन वर्तते उत सर्वात्मना

---

१. द्रःवै. सू. (च) ४.१.६; °लब्धिकारणत्वात् C २. संभवन्ति C ३. °वृत्तैवेति C
४. °वैयर्थ्यप्रसङ्गादि° C ५. वस्तु om C ६. नावयविनि स्तः C

इति नानुयोक्तव्यः। कस्मात्? उभयेन व्याघातात्, यदि एकमनेकत्र वर्तमानं प्रत्यवयवं सर्वात्मना वर्तते, नैकमनेकत्र वर्तते, अनेकमनेकत्र वर्तत[१] इत्यापन्नम्। एवं चानुयोगेऽधिकरणव्याघातः। अथैकमनेकत्र वर्तमानं प्रत्यवयवमेकदेशेन वर्तते तथापि नैकमनेकत्र वर्तत इति प्राप्तम्, अनेकमनेकत्र वर्तत इत्यापन्नम्। ये च ते[२] एकदेशाः प्रत्येकमवयवेषु वर्तन्ते तेऽवयविन इति प्राप्तम्। एतस्मिन्नपि[३] पक्षे नैकमनेकत्र वर्तते। किं तर्हि? अनेकमनेकत्रेति। अथ प्रत्येकं परिसमाप्त्या वर्तत इति अयमर्थः। [४]अनेकमनेकत्र वर्तत इति। तथाप्यनुयोगाधिकरणं निवर्तत इति। य एव खल्वयमर्थोऽनेकमनेकत्र वर्तते स एवायमर्थः प्रत्येकं परिसमाप्त्या वर्तत इति। सर्वथानुयोगाधिकरणं निवर्तत इति। अनुयोगस्याधिकरणबाधकत्वात्। अयं खल्वनुयोगः क्रियमाणोऽधिकरणं बाधते। अतो धर्मविकल्पभावेन[५] न वर्तते। नायं विकल्पः क्वचिदप्याश्रयवान् इत्यतो नानुयोक्तव्य इति। एवं सर्वेष्वनेकद्रव्यवृत्तिषु [६]संख्यापृथक्त्वसंयोगविभागसामान्यादिष्वनुयोगाधिकरणव्यावृत्तिदोषो वक्तव्यः।

ग्रहणाग्रहणभेदाद् भेदोऽवयववदिति चेत्? यथा गृह्यमाणानामगृह्यमाणानां चावयवानां भेदः, तथावयविनोऽपि गृह्यमाणागृह्यमाणावयवाश्रितस्य भेदः प्राप्तः। ततश्च नैकोऽवयवी। न भेद एकस्मिन्नपि दर्शनात्। एकस्मिन्नपि गृह्यमाणे ग्रहणमग्रहणं च दृष्टं देवदत्तादिवत्। यथा देवदत्तादिः केनचित् सह गृह्यते, केनचित् सह न गृह्यते, न तावता तस्य भेदः, तथावयविनोऽपि इत्यदोषः। गृहीतत्वाच्च। यदिदं भवताभिधीयत एकदेशग्रहणादस्य ग्रहणम्, एकदेशाग्रहणाच्चाग्रहणमिति। अयमनास्पदो विकल्पः, अवयविनो गृहीतत्वात्। एकदेशसहचरितोऽवयवी गृहीत इति। किमस्यागृहीतं येन ग्रहणाग्रहणविकल्प आस्पदवान् स्यादिति? मध्यभागपरभागौ न गृहीताविति चेत्-न, तयोरवयविनोऽन्य-

---

१. वर्तते om J २. तत्र C ३. अपि om C ४. एकम् J ५. °भावे J
६. °विभागा° om J

त्वात्। अन्योऽवयवी, अन्यौ मध्यभागपरभागाविति, [१]अन्यत्वादवयविनो मध्यभागपरभागौ न गृह्येते इति। किं कारणम्? ग्रहणहेत्वभावात्। यथा अर्वाग्भागेन सहावयविन इन्द्रियप्राप्तिरुपलब्धिनिमित्तत्वमस्ति[२], नैवं मध्यभागपरभागाभ्यां सह। तस्मादर्वाग्भागेन सहोपलभ्यते न मध्यभागापरभागाभ्यामिति। अवयवसमूहपक्षे तु सर्वथा वृक्षबुद्धेरभावः। कथम्? मूलस्कन्धशाखापलाशानां समूहो वा वृक्षः स्यात्, प्राप्तिर्वा समुदायिनाम्। उभयथा च वृक्षबुद्धेरभावः। अवयवैरवयवान्तरव्यवधानादशेषग्रहणं नास्ति। प्राप्तिग्रहणमप्ययुक्तं प्राप्तिमतामग्रहणात्। न हि प्राप्तिमत्यगृह्यमाणे प्राप्तेर्ग्रहणमस्ति। भवति हि इदमनेन संयुक्तमिति। सेयमेकदेशग्रहणसहचरिता वृक्षबुद्धिर्द्रव्यान्तरोत्पत्तिपक्षे कल्पते न समुदायमात्र इति॥३२॥

॥प्रत्यक्षस्यानुमानत्वपरीक्षाप्रकरणम्॥

[अवयविपरीक्षाप्रकरणम्]

साध्यत्वादवयविनि सन्देहः॥२।१।३३॥

कारणेभ्यो द्रव्यान्तरमुत्पद्यत इति साध्यमेतत्। किं पुनरत्र साध्यम्? किमव्यतिरेकोऽथावयवीति। यद्यवयवी, न लिङ्गमस्ति धर्मिणि विप्रतिपत्तेः। न हि धर्मिणि विप्रतिपद्यमानः कुतश्चिदभ्यनुज्ञां लब्धुमर्हति। न च धर्मिणि विप्रतिपत्तेर्बीजमस्ति सादृश्याभावात्। न हि सादृश्यमन्तरेण विप्रतिपत्तिकारणं किञ्चिदस्ति[३]। किं कारणम्? विप्रतिपत्तिर्नाम विपरीता प्रतिपत्तिः। तस्याश्च कारणं समानधर्मोपलब्धावनवगतविशेषस्य तद्विपरीतधर्माध्यारोपः। न [४]चानभ्युपगतार्थान्तरावयविनोऽवयविनि [५]सामान्यं किञ्चिदस्ति। नापि तद्विपरीतधर्माध्या-

---

१. अवयविनोऽन्य° C २. °ब्धिहेतुरस्ति J ३. °पत्तेर्बीजमस्ति C ४. °र्थान्तरा° om C ५. सादृश्यं C

रोपः। तस्मान्न विप्रतिपत्तिः। अथाव्यतिरेकः साध्यः? तत्राव्यतिरेकप्रतिपादकं प्रमाणं वक्तव्यम्। न ह्यप्रामाणिकी काचित् प्रतिपत्तिरस्ति। इदं प्रमाणमर्थान्तरानवयवत्वम्। अर्थान्तरमर्थान्तरस्यावयवो न भवति। यथा न गौरश्वावयवः। अवयवाश्च तन्तवोऽवयवी च पटः। तस्मान्नासौ तेभ्योऽर्थान्तरमिति।

इदं तावद् यथाश्रुति वाक्यं हेतुहीनम्। न ह्यत्र हेतुरस्तीति। ननु चोपनयेन व्यज्यमानो हेतुरवयवत्वमस्ति। नार्थान्तरं पटात् तन्तवः तदवयवत्वादिति। न, व्याघातात्। अनर्थान्तरभावे नावयवत्वं तन्तूनां सिध्यति। किं कारणम्? अवयव्यपेक्षत्वात्। अवयव्यपेक्षो [१]ह्यवयवः। न चावयविप्रत्याख्यानेऽवयवत्वे किञ्चिद् बीजमस्ति। अर्थान्तरे [२]च दर्शनाद् विरुद्धः स्यात्[३]। दृष्टोऽवयवोऽर्थान्तरभावे नानर्थान्तर[४] इति। यथा तन्त्ववयवा[५] घटादर्थान्तरमिति। षष्ठीविशेषणादप्रसङ्ग इति चेत्? पटस्यावयवा इत्युक्ते घटादिषु कः प्रसङ्गः? नन्वत्रोक्तम्। किमुक्तम्? व्याघातादिति। न ह्यनर्थान्तरभावेऽवयवत्वं तन्तूनां सिध्यति[६]। न च षष्ठी। न तन्तुस्तन्तोरवयवः। नापि षष्ठ्यर्थो [७]न तन्तुस्तन्तोरवयव इति। [८]उपेत्यावयवत्वं तन्तूनां तस्य नान्वयो न व्यतिरेक इत्यसाधारणत्वादहेतुः। नार्थान्तरं पटात् तन्तव इति च तन्तून् पक्षीकृत्य तदवयवत्वादिति ब्रुवाणः तन्तूनां तन्त्ववयवत्वं ब्रवीति। एतच्च विरुद्धम्, न तन्तवस्तन्तूनामवयवा इति। अथ पटः पक्षीक्रियते, तथापि व्यधिकरणो हेतुः अवयवत्वस्य तन्तुधर्मत्वात्। तन्तुधर्मोऽवयवत्वं न पटधर्म इति। अवयवशब्दस्य च कारणविशेषवाचकत्वात् असत्यवयविनि व्याघातः। यद्यवयविनमर्थान्तरं न प्रतिपद्यसे कस्य तन्तवः कारणम्? न हि कारणमात्मानं निर्वर्त्तयतीति।

नैव हि नः किञ्चिन्निर्वर्त्यमस्ति। त एव हि तन्तवः संस्थानविशेषावस्थिताः पटाख्यां लभन्त इति। अपटास्तन्तवः पटशब्देनाभिधीयन्त इत्येतदुक्तं भवति। एतच्च विरुद्धं मुख्याभावात्। न हि तन्तूनामपटानां पटेन किञ्चित् सामान्यमस्ति,

१. हि om C २. च om J ३. स्यात् om J ४. ण्तरभावे C ५. तन्तवोऽवयवा: C ६. अवयवोऽस्ति for अवयवत्वं तन्तूनां सिध्यति C ७. न om C ८. उत्पत्त्याव° C

न चासति सामान्ये मिथ्याप्रत्ययस्य बीजमस्तीत्युक्तम्। यच्चेदमुच्यते संस्थानविशेषावस्थानमिति किं तदर्थान्तरमाहो नेति। यद्यर्थान्तरभूतं किं तदिति वक्तव्यम्। अथ [१]नार्थान्तरम्, शून्यं तर्हीदं वाक्यम्–संस्थानविशेषावस्थानमिति। अस्माकं तु संस्थानविशेषः संयोगः स चार्थान्तरम्।

न, अनभ्युपगमात्। न मयार्थान्तरं संयोगः [२]प्रतिपद्यते, अन्यासंयोगादिति। अन्यदन्यस्य संयोगो न भवति, यथा न गौरश्वस्य संयोगः, अङ्गुल्योस्तु संयोगः। तस्मात् नार्थान्तरमिति। न, उक्तोत्तरत्वात्। उक्तोत्तरमेतत्। किमिति? अर्थान्तरानर्थान्तरयोर्व्यावृत्तत्वात् संयोगोऽसाधारणः, प्रतिज्ञैकदेशश्च नार्थान्तरं संयोगः संयोगत्वादिति। विशेषणभावाच्चार्थान्तरं संयोगः। संयुक्ते द्रव्ये आहरेत्युक्ते ययोर्द्रव्ययोः संयोगं पश्यति, ते इतेरेभ्यो विशिष्य संयुक्ते आहरति। न, विशेषणस्यान्यथासिद्धत्वात्। यदिदं भवताभिधीयते संयुक्ते द्रव्ये आहरेति विशेषणभावादर्थान्तरं संयोग इति, तदन्यथा संभवति। कथम् [३]अन्यथा? प्रत्यासत्तौ प्रतीघातावसानायां संयोगव्यवहारः। तावद् द्रव्याणि प्रत्यासीदन्ति यावत् प्रहतानि भवन्ति। तस्मिन् प्रतीघाते संयोगव्यवहारो नार्थान्तर इति। अनभ्युपगतार्थान्तरसंयोगेन प्रत्यासत्तिप्रतीघातौ वक्तव्यौ। तत्र संयुक्तसंयोगाल्पीयस्त्वं प्रत्यासत्तिः, मूर्तस्पर्शवद्द्रव्यसंयोगः प्रतीघातः। यः पुनः संयोगं न प्रतिपद्यते, तेन प्रत्यासत्तेः प्रतीघातस्य चार्थो वचनीय इति। यदि चार्थान्तरं संयोगो न स्यात्, क्षेत्रोदकबीजाग्नीन्धनानि सर्वत्रावस्थितानि सर्वदाङ्कुरपाकजादिकार्यं कुर्युः तान्येव तानीति। तस्माद् यस्तैरपेक्ष्यते सोऽर्थोऽन्यः। तस्मिन् संयोग इति संज्ञेति। क्षेत्रोदकबीजाग्नीन्धनादीन्यङ्कुरपाकजादिकार्योत्पत्तौ सापेक्षाणि सर्वदा तत्कार्यानारम्भकत्वात् दण्डादिवत्। यथा दण्डाद्यनेकं [४]कारकं संयोगादिनिमित्तान्तरापेक्षं न सदा [५]घटादिकार्यं करोति, तथा बीजाद्यपि। तस्मात् तदपि सापेक्षमिति।

---

१. नोच्यते C २. °पाद्यते C ३. अन्यथा om C ४. कारणं C ५. घटपटादि C

यत् त्वत्र **परेणो**च्यते

कार्योत्पत्तिर्विना तेन शब्दायस्कान्तकर्मवत्॥

इति। अस्यार्थः। यथा किल शब्दः शब्दान्तरमारभमाणो विना संयोगेनारभते, यथा चायस्कान्तोऽयः समाकर्षति विना संयोगेन, यथा च कर्म [१]संयोगं संयोगेन विना करोति, तथान्यापि कार्योत्पत्तिर्विना संयोगेन भविष्यतीति।

न, हेत्वर्थापरिज्ञानात्। न ब्रूमोऽस्ति संयोगः कार्योत्पत्तेः। अपि तु क्षेत्रोदक-बीजाग्नीन्धनानि सापेक्षाणीति। यदि च निरपेक्षं किञ्चित् कारणं[२] सर्वदारम्भकं स्यात्, भवेदनैकान्तिकत्वं हेतोः[३]। तत्तु न केनचित् शक्यं प्रतिपादयितुम्। शब्दः शब्दान्तरमारभमाणः [४]स्वपरिच्छिन्नाकाशदेशप्रत्यासत्त्यपेक्ष आरभते शब्दस्याकाशा-व्यापकत्वात्। अयस्कान्तोऽप्ययः समाकर्षति स्वाश्रयप्रत्यासत्त्यपेक्ष एव। यदि च निरपेक्ष आकर्षेत्, न क्वचिदयांस्यवतिष्ठेरन्। तस्मात् न निरपेक्षः। [५]कर्माप्याश्रयप्रत्या-सत्त्याभिमुख्यापेक्षं संयोगं करोति। न निरपेक्षं कर्म न प्रतिलोममिति। यद्यनपेक्षं कर्म संयोगं कुर्यात् पाण्ड्यमथुरासंबन्धिनि देवदत्ते उत्पन्नं कर्म तक्षशिलासंबन्धिनि यज्ञदत्ते संयोगं कुर्यात्। न त्विदमस्ति। न चैवं[६] प्रतिज्ञायते सर्वस्य कारणं संयोग इति, अपि तु सापेक्षमारभत इति।

सूत्रव्याघात इति चेत्? अथ मनुषे यदि कर्मापि सापेक्षं संयोगं करोति ननु पारमर्षं सूत्रं व्याहन्येत,

एकद्रव्यमगुणं संयोगविभागयोरनपेक्षकारणं [७]कर्म।

इति व्याघातः। न [८]व्याघातः सूत्रार्थापरिज्ञानात्। न भवता सूत्रार्थो व्यज्ञायि। नायं सूत्रार्थो निरपेक्षं कर्म [९]संयोगकारणमाश्रयाद्यपि नापेक्षत इति। अपि तु चरमभा-विनिमित्तान्तरं नापेक्षत इति सूत्रार्थः। यथा द्रव्यजातमुत्पन्नं चरमभाविनं संयोगम-

---

१. संयोगविभागौ C २. कारणं om C ३. °न्तिको हेतुः C ४. स्वकारण-परि° C ५. स्वाश्रय° C ६. चेदं C ७. कर्म om J ८. व्याघातः om J ९. संयोगविभागका° C

पेक्षमाणं पश्चादारभते, यथा वा संयोगो गुणकर्मस्वारब्धव्येषु पश्चाद्भाविसंस्कार-प्रयत्नादृष्टाख्यं निमित्तमपेक्षते, यथा वा कारणेषु वर्तमाना रूपादयः कार्यरूपादि-ष्वारब्धव्येषु द्रव्योत्पत्तिमपेक्षन्ते, उत्पाद्यस्याधारभावात्। यदुत्पाद्यं द्रव्यं तत् तेषामाधार इति। न च[१] कर्म पश्चाद्भाविनिमित्तमपेक्षत इत्यनपेक्षत्वं कर्मणः शास्त्रे उक्तम्। न पुनः कर्माश्रयाद्यपि नापेक्षत इति। संयोगे सापेक्षत्वप्रसङ्ग इति चेत्? यदि पश्चाद्भाविनिमित्तान्तरानपेक्षत्वं कर्मणो निरपेक्षत्वार्थः, अपि तर्हि संयोगे कर्तव्ये कर्म सापेक्षं प्राप्नोति, विभागापेक्षित्वात्। न ह्यसति विभागे[२] कर्म संयोगं करोति, तस्माद् विभागापेक्षित्वं कर्मणः प्रसक्तम्। ततश्च तदवस्थः सूत्रव्याघात-दोषः।

न, सन्देहात्। किं विभागापेक्षेण कर्मणा संयोगो जन्यते, उत प्रतिबन्धको विभागेन निवर्त्यत इति सन्दिह्यते।

वयं तु ब्रूमः। विभाग उत्पन्नः पूर्वसंयोगनिवृत्तिं करोति। निवृत्ते च संयोगे प्रतिबन्धापगमात् कर्म संयोगं करोति। यथा गुरुत्वं निरपेक्षं कर्मकारणमित्युद्दिष्टं शास्त्रे[३]। अथ च वृन्तफलविभागात् निवृत्ते वृन्तफलसंयोगे गुरुत्वं लब्धवृत्ति पतनकर्म करोति। तथा कर्मापीत्यदोषः। यथा वा संयोगः साधारणकार्यद्रव्य-संयोगविनाशोत्तरकालं द्रव्यान्तरारम्भे निरपेक्षः कारणमिति न विभागापेक्षो द्रव्यमारभते, तथा कर्म संयोगमारभमाणं न विभागमपेक्षिष्यत[४] इति। अतोऽपि[५] न सूत्रव्याघातः।

यदप्युक्तम्, कर्म विना संयोगेन संयोगं करोति, तदपि न, व्याघातात्, न च संयोगोऽस्ति कर्म च संयोगं करोतीति व्याहतम्। न ह्यसति संयोगे वाक्यमे-तदर्थवत्तायां व्यवतिष्ठते। अथवा अनेन व्याघातः गतिविभागसंयोगसंयोगाश्च[६] प्रतिषिध्यन्ते, अथ च कर्म संयोगं करोतीति व्याहतम्[७]। अथ मनुषे परमत-

---

१. न तु C २. हि विभागमन्तरेण C ३. द्रः वै. सू. (च) ५.१.७. ४. °मपेक्षते C
५. अपि om J ६. °विभागसंयोगाश्च C ७. व्याहतम् om J

व्यपेक्षोऽयं[१] संयोगविभागकर्मणां प्रतिषेधः, नास्माभिः संयोगविभागकर्माण्य-भ्युपगम्यन्त इति, एवमप्यनिवृत्तो व्याघातः। यानि तानि [२]परपक्षाभ्युपगतानि संयोगविभागकर्माणि, तानि भवता कथं प्रतिपद्यन्ते? यदि प्रमाणतः, कथं परपक्षाभ्युपगतानि? अथ प्रमाणमन्तरेण, कथं प्रतिपद्यसे? न हि प्रमाणमन्तरेण काचित् प्रतिपत्तिर्युक्तेति। अथ नैव प्रतिपद्यसे, व्याहतं तर्ह्येतद् भवति परपक्ष-प्रसिद्धानि संयोगविभागकर्माणीति। अथ ब्रूषे[३] यानि भवताभ्युपगम्यन्ते संयोग-विभागकर्माणि, तानि न सन्ति, न पुनः संयोगविभागकर्मणां प्रतिषेधः। कथम्? देशान्तरे [४]अविरलद्रव्योत्पादे गतिव्यवहारः। यः सन्तानोऽविरलो[५] देशान्तरेषूत्पद्यते तत्र गतिव्यवहारः। निरन्तरोत्पादे संयोगव्यवहारः। ये वस्तुनी निरन्तरमुत्पद्येते तयोर्यो निरन्तरमुत्पादः स संयोगः। [६]विपर्ययाद् विभाग इति। अत्र तावदुक्तं वृक्षस्थितिं भावयद्भिः, न प्रमाणाभावादिति। न हि क्षणिकत्वे प्रमाणमस्तीति।

सान्तरनिरन्तरबुद्ध्योश्च निमित्तं वक्तव्यम्। यदि संयोगं विभागं वा नार्थान्तरं प्रतिपद्यसे, सान्तरमिति च बुद्धेर्निरन्तरमिति च बुद्धेर्भेदे निमित्तं वक्तव्यम्[७]। न हि निमित्तभेदमन्तरेण बुद्धीनां भेदो दृष्टो रूपादिवदिति। या चेयमचलति चलतीति बुद्धिः, या असंयुक्ते संयुक्तमिति, या अविभक्ते विभक्तमिति च, सा च प्रधानम-न्तरेण न भवति[८]। सर्वा एता मिथ्याबुद्धयः। मिथ्याबुद्धयश्च प्रधानानुकारेण भवन्तीति प्रधानं वक्तव्यम्। न हि निष्प्रधानं भाक्तं दृष्टम्, स्थाणुपुरुषवत्। यथा स्थाणौ सति पुरुषे स्थाणुबुद्धिः, पुरुषे च सति स्थाणौ पुरुषबुद्धिरिति। यदि चार्थान्तरं संयोगो न स्यात् कुण्डलीत्येतस्या बुद्धेः [९]किं निमित्तम्? अवश्यं विधीयमानं प्रतिषिध्यमानं वा निमित्तमुपादेयम्। न तावदियं कुण्डलनिमित्ता बुद्धिः, न देवदत्तनिमित्ता। न च भवता निमित्तान्तरं प्रतिपद्यते। निमित्तान्तरं

---

१. क्षयोक्तम् C २. परमताभ्यु° C ३. मनुषे C ४. विरल° C
५. विरलो C ६. संयोगविप° C ७. °र्भेदहेतुर्वक्तव्यः C ८. सा च.....न भवति om J ९. किंचिन्निमित्तम्। C

चान्तरेण यथाकथञ्चिद्व्यवस्थिताभ्यां देवदत्तकुण्डलाभ्यां कुण्डलीति बुद्ध्या भवितव्यम्। तस्मादवश्यं विधीयमानं प्रतिषिध्यमानं वा निमित्तान्तरमभ्युपगन्तव्यम्। यदि प्रतिषिध्यमानम्, यदन्यत्र भवति तदन्यत्र प्रतिषिध्यत इति प्रतिषिध्यमानस्य विषयो वक्तव्यः। तस्मात् न कथञ्चन संयोगः प्रतिषेद्धुं शक्यते। इहबुद्धिनिमित्तत्वाच्च। इयमिहबुद्धिः प्रवर्तमाना नर्ते संबन्धात् प्रवर्तते। यथेह कुण्डेवदराणीति। नेयं वदरमात्रनिमित्ता, न कुण्डमात्रनिमित्तेति यदस्या निमित्तं स संयोग इति। इहेति बुद्धिर्यदि संयोगादनियमो न प्राप्नोति। यदि संयोगादिहबुद्धिर्भवति, असति संयोगे इहबुद्धिर्न स्यात्। यथा सन्तीह वने तिलकाः सन्तीह वने किंशुका इति। दूराच्चान्तरमपश्यतां किंकृतेहबुद्धिः? न हि तत्रास्ति संयोग इति। न, इहबुद्धेरुभयनिमित्तत्वात्। उभयमिहबुद्धेर्निमित्तं संयोगो विभागादर्शनं च। तत्रैका मुख्या, एका भाक्ता। या संयोगात् सा तत्त्वबुद्धिः। या विभागादर्शनात् सा भाक्तेति। या चेयं भाक्ता, सा प्रधानसामान्यदर्शनादुपजायते। न सा प्रधानं प्रत्याचष्टे। न हि प्रधानप्रत्याख्यानेन भाक्ता बुद्धिर्भवितुमर्हतीति। सर्वा एव भाक्ता भविष्यन्तीति न युक्तम्, प्रधानापेक्षितत्वादित्युक्तम्, यदपीदमुच्यते विना संयोगेनेहबुद्धिर्दृष्टा, यथा सन्तीह वने तिलकाः सन्ति किंशुका इति, तदत्र संधार्यं किं तत्र संबन्धो नास्ति उत संयोगो नास्तीति। वयं तु ब्रूमः, संयोगो नास्ति न संबन्धः। संबद्धं हि वनं तिलकादिभिरपीति।

किं पुनरिदं वनं नाम? नेदं दुर्वचम्। उक्तमेतद् बहुत्वसंख्या सविशेषणेति, ऊर्ध्वावस्थयोर्द्रव्ययोः[१] संयुक्तबुद्धौ सत्यामिहबुद्धिः कस्मात् न भवति? तयोरेव द्रव्ययोस्तस्मिन्नेव संयोगे सति न भवतीति। [२]किंकृतोऽनियमः? न, अपरिज्ञानात् संबन्धमन्तरेण[३] निर्निमित्तेहबुद्धिर्न भवतीति ब्रूमः। न पुनर्भवत्येवेहबुद्धिः सति संयोग इति। न चोत्तराधरतानपेक्षेण संयोगेनेहबुद्धिर्न क्रियत इति तत्पूर्विका न

---

१. °वस्थिते च द्रव्ये C २. किम्भूतो° C ३. संयोगम° C

भवति। यत् पुनरेतदसति संबन्धे अस्य द्रव्यस्येह समवाय इतीहबुद्धिर्न प्राप्नोति, यथेह तन्तुषु पट इति बुद्धेः समवायो निमित्तम् । न पुनः समवायस्य समवायोऽस्तीति इह समवाय इति न स्यात्। अत्रोक्तम्। किमुक्तम् ? मिथ्याप्रत्यय एवैष इति। किं पुनः समवायवद्भिर्द्रव्यैः समवायस्य सामान्यम्, यदपेक्षया स मिथ्याप्रत्ययः प्रवर्तते? भेदादर्शनम्, यानि समवायवन्ति,न तेषां भेदो दृश्यते। समवाये चैतदस्तीति युक्तो मिथ्याप्रत्ययः। वाक्यधर्मभेदाच्चानियमः। न च य एकस्मिन् वाक्ये धर्मः स वाक्यान्तरेऽपि भवति। यथा राज्ञः पुरुषो गच्छतीति त्रीणि पदानि, त्रीण्यपि स्वेन स्वेनार्थेनार्थवन्ति भवन्तीति उदकस्य भावो भवतीति नैतद्वाक्यसामान्याद् एतस्मिन्नपि वाक्ये त्रीण्यपि पदानि पृथगर्थानि भवितुमर्हन्ति। कः पुनरस्य वाक्यस्यार्थः उदकस्य भावो भवतीति? यावदुक्तं भवति उदकं भवतीति, तावदुक्तं भवति उदकस्य भावो भवतीति। एवमन्यान्यपि वाक्यानि यथा कुण्डे वदराणां वृत्तिरिति वृत्तौ चोदितायां[1] वृत्तिमत्सु वदरेषु संप्रत्ययः। एतदुक्तं भवति कुण्डे वदराणि वर्तन्त इति, तथेह द्रव्ये द्रव्यस्य समवाय इति ब्रुवाणेनोक्तं भवति द्रव्यं द्रव्ये वर्तत इति। तस्माद् अज्ञात्वा वाक्यार्थविभागमिदमुच्यते, अस्य द्रव्यस्येह समवायोऽसति निमित्त इति। तस्माद् उपपन्नमर्थान्तरं संयोग इति। तदुपपत्तौ च न संस्थानविशेषेणावस्थितास्तन्तवः पटबुद्धेः कारणं भवन्तीति।

अपरे पुनरन्यथा अर्थान्तरानवयवत्वादित्येतद्वाक्यं वर्णयन्ति, अवयवावयविभावादिति। एतत् तु तैः कुतो लभ्यते? न ह्ययमर्थोऽर्थान्तरानवयवत्वादित्येतस्मिन् वाक्ये श्रूयते। उपनयेन लभ्यत इत्याह, यस्मादयमुपनयः अवयवाश्च तन्तवोऽवयवी च पट इत्युपनयेनावयवावयवित्वादिति हेतुर्लभ्यते। सत्यं लभ्यते, विरुद्धस्तु भवति। न हि तन्तवः स्वात्मनोऽवयवाश्चावयवी च। न पटः स्वात्मनोऽवयवोऽवयवी चेति। किं कारणम्? अवयवावयविशब्दयोः संबन्धिशब्दत्वात्। संबन्धिशब्दावेतौ

---

१. दर्शितायां C

अवयवोऽवयवी चेति। न चान्यतरप्रत्याख्याने संबन्धिशब्दप्रवृत्तिरस्ति। तस्माद् अयमपि न सूत्रार्थः।

दृष्टोऽनर्थान्तरेऽपि प्रदेशप्रदेशिव्यवहारः, यथा आकाशस्य प्रदेशा इति। न, उक्तोत्तरत्वात्। उक्तोत्तरमेतत्। अन्योऽवयवार्थोऽन्यश्च प्रदेशार्थ इति कोऽवयवार्थः? कारणविशेषाभिधानमवयव इति। आधाराभिधानं प्रदेशः प्रदिश्यतेऽस्मिन्निति। न चाकाशं क्वचित् प्रदिश्यते। न चाकाशस्य किञ्चित् कारणमस्ति। तस्मात् न कारणार्थो नाधारार्थ इति। सोऽयमाकाशे प्रदेशशब्दः प्रदेशवद्द्रव्यसामान्याद् द्रष्टव्यः। किं पुनः प्रदेशवता द्रव्येण सामान्यम् ? संयोगस्याव्याप्यवृत्तित्वम्। एतं चार्थमुपरिष्टाद् वक्ष्याम इति[1]।

तत्प्रदेशात्मकत्वादिति चेत्? अथ मनुषे अयमन्यो हेतुरवयविनोऽनर्थान्तरत्वप्रसाधकः तत्प्रदेशात्मकत्वम्, कोऽस्यार्थः? अनर्थान्तरं पटात् तन्तवः तत्प्रदेशव्यपदेशविषयत्वात्। इह[2] ये यस्य प्रदेशत्वेन व्यपदिश्यन्ते, ते तस्यात्मानो भवन्ति। यथा आकाशस्य प्रदेशाः। पटस्य च प्रदेशत्वेन व्यपदिश्यन्ते तन्तवः, तस्मात् पटात्मान इति। इदं तावद् यथाश्रुति वाक्यं पूर्ववत् हेतुहीनम्। प्रदेशात्मकत्वस्यार्थान्तरानर्थान्तरयोरदर्शनादसाधारणः। प्रदेशशब्दस्य कारणपर्यायत्वाद् विरुद्धः। तत्प्रदेशव्यपदेशविषयत्वस्य तन्तुभिरसंबन्धादसिद्धः। योऽप्ययं दृष्टान्त आकाशस्य प्रदेश इति, सोऽप्यसिद्धः। कथमिति? आकाशस्य प्रदेश इति संयोगस्याव्याप्यवृत्तित्वमुच्यते। न च संयोगस्याव्याप्यवृत्तित्वमात्रमाकाशम्। तस्मादसिद्धो दृष्टान्तः।

द्रव्यान्तरेभ्यो द्रव्यान्तरानिष्पत्तेर्नान्योऽवयव्यवयवेभ्यः। न किल द्रव्यान्तरेभ्यो द्रव्यान्तरमुत्पद्यमानं दृष्टम्, न च गोहस्त्यश्वेभ्यः पुरुष उत्पद्यते। तन्तुभ्यस्तूत्पद्यते पटः। तस्मात् नासौ तेभ्योऽर्थान्तरमिति। अस्यापि पूर्ववत् हेतुन्यूनता। उपनयेन व्यज्यमानस्तेभ्यस्तूत्पत्तेरिति हेतुः। अयमप्यर्थान्तरानर्थान्तरयोर्व्यावृत्तेरसाधारणः।

---

१. द्रः पृ. २८१.१७ २. त्वादिति C

अर्थान्तराच्च तुर्यादेरर्थान्तरस्य पटस्योत्पत्तिदर्शनाद् विरुद्धः। पटपक्षीकरणे असंबद्धार्थः, न पटः पटादुत्पद्यत इति। अथ तच्छब्देन तन्तवः संबध्यन्ते, तन्तुभ्यः पट उत्पद्यत इति, तथापि विरुद्धः। न तन्तुस्तन्तुभ्यो भवति, पटस्तु भवति।

नान्योऽवयवी अवयवेभ्यः, अवयव्यन्तरावयवानामवयव्यन्तरार्थान्तरभावात्। इह ये अवयविनोऽर्थान्तरं भवन्ति, ते अवयव्यन्तरावयवा भवन्ति। यथा चक्रादयो रथावयवा इति तेऽर्थान्तरं पटात्। यदि च तन्तवोऽपि पटादर्थान्तरं स्युः, तेऽपि पटव्यतिरेकेणावयव्यन्तरावयवाः स्युः। न तु ते तद्व्यतिरेकेणावयव्यन्तरावयवाः, तस्मात् नार्थान्तरमिति। वाक्यमात्रे हेतुन्यूनता असाधारणता च दोषः। हेतुस्तु तद्व्यतिरेकेणान्यानवयवत्वात् न तन्तवस्तन्तूनामवयवा इति विरुद्धः।

अर्थान्तरप्रत्याख्यानाच्चावयवोऽवयवीत्येतन्न स्यात्। यदपीदमुच्यते [१]येऽवयवा अवयविनोऽर्थान्तरं भवन्ति ते तद्व्यतिरेकेणान्यावयवा भवन्ति यथा चक्रादय इति। [२]तदपि न, उभयेन व्याघातात्। चक्रादयोऽवयवा इति ब्रुवताभ्युपगतमर्थान्तरं भवति। अनभ्युपगमे वा कोऽस्य वाक्यस्यार्थः चक्रादयो रथावयवा इति? येऽपि[३] चक्रादयो रथस्यावयवत्वेनाभ्युपगम्यन्ते तेऽप्यर्थान्तरप्रतिषेधान्न रथस्य नाप्यन्यस्यावयवा इत्युच्छिन्नोऽवयवावयविशब्दस्य विषयः। तस्मादहेतुरयम्।

नान्योऽवयवी अवयवेभ्यः द्रव्यान्तरोत्पत्तिदेशव्युच्छेदात्[४]। यदुभयपक्षसंप्रतिपन्नमर्थान्तरत्वेन तत् तस्माद् भिन्नदेशमुत्पद्यमानं दृष्टम्। यथा गौरश्वात्। न तु तन्तुभ्यो भिन्नदेशः पट उत्पद्यते। तस्मात् नासौ तेभ्योऽर्थान्तरमिति। अत्रापि हेतुन्यूनता चासाधारणता च पूर्ववत्। तद्देशोत्पत्तेरिति हेतुः। न तन्तुस्तन्तुदेश उत्पद्यत इति विरुद्धः। उत्पत्तिप्रत्याख्यानं वा पटप्रतिषेधात्। यदि तन्तुभ्यः पटो नोत्पद्यते, कः पुनरुत्पत्तिशब्दार्थः। न तन्तुरुत्पद्यते न पट इति उत्पत्तिदेश-

---

१. अवयवा om J २. तदपि om C ३. ये च C ४. व्यवच्छेदात् C

व्युच्छेदात्[१] उत्पत्तिशब्दस्यार्थो वक्तव्यः। स च निरूप्यमाणो व्यक्त्यादि-धर्मभेदेनापूर्वं जन्माहेति विरुद्धः।

नान्योऽवयवी अवयवेभ्यः, अवयवान्तरावयविनोऽवयवान्तरार्थान्तर-भावात्। इह योऽवयवान्तराणामवयवी भवति, सोऽवयवान्तरेभ्योऽर्थान्तरं भवति। यथा चक्रादिभ्यो घटः। चक्रादिभ्योऽवयवेभ्योऽर्थान्तरं घट इति चक्राद्यवयव-व्यतिरेकेणावयवान्तराणामवयवी भवति। न तु पटस्तन्तुव्यतिरेकेणावयवान्तराणा-मवयवी। तस्मात् नासौ तन्तुभ्योऽर्थान्तरम्। अत्राप्यसाधारणता हेतुन्यूनता च पूर्ववत्। अवयवान्तराणामवयवीति ब्रुवता अवयव्यर्थान्तरभूतोऽभ्युपगतो[२] भवति। शून्यं वा वाक्यम्। अथ नाभ्यनुज्ञायते, कोऽस्य वाक्यस्यार्थः अवयवान्तराणाम-वयवीति? न ह्यवयविप्रत्याख्याने एतद्वाक्यमर्थवत्तायां शक्यं व्यवस्थापयितुम्। तद्व्यतिरेकेणान्यानवयवित्वं हेत्वर्थः[३]। अस्यापि प्रसङ्गः पूर्ववदिति।

नान्योऽवयवी अवयवेभ्यः सत्यन्यकर्तुरर्थान्तरभावात्। इह ये यस्मिन् सत्यन्यत् कुर्वन्ति, ते तस्मादर्थान्तरं भवन्ति। यथा कटात् तन्तवः। सति कटे अर्थान्तरं पटं कुर्वन्ति[४], कटादर्थान्तरं भवन्ति। न पुनस्तन्तवः सति पटे द्रव्यान्तरं कुर्वन्ति। तस्मात् न तेऽर्थान्तरमिति। अस्यापि हेत्वर्थः सत्यन्याकरणात्। अस्याप्य-साधारणता न्यूनता च पूर्ववत्। सति कटे तन्तवः पटं कुर्वन्तीति ब्रूषे। पटं च कुर्वन्ति[५], न चार्थान्तरमिति व्याहतम्। न हि तन्तवः आत्मानं कुर्वन्ति। पटमप्यर्था-न्तरभावात्[६] न कुर्वन्तीति चेत्-न[७], क्रियाविषयोच्छेदप्रसङ्गः[८]। न तन्तव आत्मानं कुर्वन्ति, न चार्थान्तरं कुर्वन्तीति क्रियाविषय उच्छिन्नो भवति।

नान्योऽवयवी अवयवेभ्यः, स्वात्मसंयोगव्यतिरेकभाव्यवयव्यन्यत्वात्। इह ये यस्मादर्थान्तरं भवन्ति, ते स्वात्मसंयोगव्यतिरेकेण भवन्ति। तद्यथा, तन्तुसंयोग-व्यतिरेकेण कटो भवति, न च तन्तुसंयोगव्यतिरेकेण पटो भवति। तस्मात् नासौ

---

१. व्यवच्छेदात् C २. अभ्यनुज्ञातो C ३. हेतुः C ४. कुर्वन्तीति C ५. पटं च कुर्वन्ति om C ६. ०न्तराभावात् C ७. न om C ८. ०च्छेदः C

तेभ्योऽर्थान्तरम्। अस्यापि हेत्वर्थस्तन्तुसंयोगेभ्यस्तदुत्पत्तेरिति। अस्याप्यसाधारणता हेतुन्यूनता च पूर्ववदेव। तन्तुसंयोगेभ्यस्तदुत्पत्तेरिति ब्रुवता तन्तुव्यतिरिक्तः संयोगश्चावयवी च [१]तन्तुव्यतिरिक्तोऽभ्युपगतो भवति। [२]अनभ्युपगमे च तन्तुसंयोगेभ्यस्तदुत्पत्तेरिति वाक्यार्थो हीयते।

नान्योऽवयवी अवयवेभ्यः, द्रव्यान्तरगुणानां द्रव्यान्तरगुणाकारणत्वेऽगुणत्वप्रसङ्गात्[३]। न किल द्रव्यान्तरगुणेभ्यो द्रव्यान्तरगुणानामुत्पादो दृष्टः। यथा न गोगुणेभ्योऽश्वगुणानाम्। तन्तुगुणेभ्यश्च पटगुणानामुत्पत्तिः। तस्मात् नासौ तेभ्योऽर्थान्तरमिति। सोऽयमपन्यायो वर्तते। कोऽत्रापन्यायः[४]? तन्तुगुणेभ्यश्च पटगुणानामुत्पत्तिं प्रतिपद्यसे न चार्थान्तरं पट इति। न च तन्तुगुणेभ्यस्तन्तुगुणानामुत्पत्तिरिति तन्तुगुणेभ्यस्तद्गुणोत्पत्तेरिति हेतुर्विरुद्धः।

नान्योऽवयवी अवयवेभ्यः, अप्रत्यक्षत्वप्रसङ्गात्। प्रत्यक्षाप्रत्यक्षद्रव्यवृत्तिरवयवी अप्रत्यक्षः स्यात् [५]यद्यवयव्यर्थान्तरं स्यात्। यथा गर्भमातृशरीरसंयोगः प्रत्यक्षाप्रत्यक्षवृत्तिरप्रत्यक्षः, प्रत्यक्षस्त्ववयवी। तस्मात् नासौ तेभ्योऽर्थान्तरम्। प्रत्यक्षत्वादेवार्थान्तरमिति[६] विरुद्धो हेतुः। गर्भमातृशरीरसंयोगश्चाप्रत्यक्ष इति किमयं प्रत्यक्षाप्रत्यक्षाभ्यामारम्भादप्रत्यक्षः[७], उत प्रत्यक्षाप्रत्यक्षवृत्तित्वादप्रत्यक्ष इति? यदि प्रत्यक्षाप्रत्यक्षाभ्यामारम्भादप्रत्यक्ष इति हिमवत्परमाणुकमप्रत्यक्षं प्राप्नोति। तस्य ह्येकोऽवयवः प्रत्यक्षः, एकोऽप्रत्यक्ष इति। अथ प्रत्यक्षाप्रत्यक्षवृत्तित्वादप्रत्यक्षः, भावोऽप्रत्यक्षः [८]प्राप्नोति, स हि प्रत्यक्षाप्रत्यक्षवृत्तिरिति। न चायं पक्षोऽस्ति अवयवानां [९]प्रत्यक्षत्वादवयवी प्रत्यक्ष इति। उक्तं चात्र। किमुक्तम्? येषामिन्द्रियेण सन्निकर्षोऽस्त्यवयवानां तैः सहावयवी गृह्यते। येषां नास्ति तैः सह न गृह्यते। न चैतत्कृतोऽस्ति भेदः। अवयवानामप्रत्यक्षत्वादवयविनोऽप्रत्यक्षत्वं ब्रुवतः

---

१. तन्तुव्यतिरिक्तः om C २. अनभ्युपगमे च.....हीयते। om C ३. °गुणाकारणत्वात् J ४. अन्या° J ५. अवयवी om J ६. °देव नार्था° C ७. द्रः वै. सू. (च) ४.२.१ ८. स्यात् C ९. अप्रत्यक्षत्वे अवयवी न प्रत्यक्ष इति C

सर्वमतीन्द्रियं प्राप्नोति। न हि कस्यचिद् मध्यभागापरभागावुपलभ्येते इति। सोऽयं प्रत्यक्षस्य विषय उच्छिन्नो भवति।

प्रत्यक्षत्वादिति ब्रुवाणेनावयवव्यतिरिक्तोऽवयवी अभ्युपगतो भवति, परमाणूनामतीन्द्रियत्वात्। न हि परमाणवः कदाचित् केनचिदुपलभ्यन्त इति। न परमाणवोऽतीन्द्रिया रूपादिमतामतीन्द्रियत्वनिवृत्तेः। न हि रूपादिमत् किञ्चिदतीन्द्रियं दृष्टमिति। दृष्टं तु रूपादिमदैन्द्रियकं घटादि। ऐन्द्रियकाः परमाणव इति कोऽर्थः? किं तावद् इन्द्रियकरणप्रत्यक्षाः उत इन्द्रियसंबद्धा इति? किं चातः? यदीन्द्रियकरणप्रत्यक्षा ऐन्द्रियका इति तन्न युक्तम्। न हीन्द्रियमन्यस्यान्यथार्थं प्रकाशयति, अन्यथान्यस्येति इन्द्रियवृत्तीनामविकल्पकत्वात्। भवतां च[१] परमाणव ऐन्द्रियकाः, अस्मदादीनामप्यैन्द्रियकाः स्युः। अथेन्द्रियसंबद्धा ऐन्द्रियका इति, तस्मिन् न विरोधः। न हि परमाणव इन्द्रियेण न संबध्यन्त इति। तस्मादिन्द्रियसन्निकर्षे सत्यपि महत्त्वाभावात् न परमाणव उपलभ्यन्त इति।

कथं पुनरवगम्यते महत्त्वमप्युपलम्भे [२]रूपवत्कारणमिति? भावाभावयोः तद्वत्त्वात्। यस्मात् सति महत्त्वे रूपे चोपलब्धिर्भवति असति च न भवति तस्माद् उभयं कारणमिति। यत् त्वत्रोक्तं तेजःस्पर्शवदिति, सति तेजःस्पर्शे उपलब्धिर्भवति, असति च न भवति। न च तेजःस्पर्शोऽपि रूपवद् द्रव्योपलब्धेः कारणमिति। तन्न, व्यभिचारात्। व्यभिचारी स्पर्श उपलब्धेर्न कारणम्। न पुना रूपमहत्त्वे क्वचिद् व्यभिचरतः। तस्माद् रूपमहत्त्वे एवोपलब्धेः कारणमिति। अयं चार्थः **सूत्रकारेण** सूत्रद्वयेनोक्तः,

अद्रव्यत्वात् परमाणावनुपलब्धिः।

रूपसंस्काराभावात् [३]वायावनुपलब्धिः[४]।

इति। रूपसंस्कारो रूपसमवाय इति सूत्रार्थः। अथ पुनः स्पर्शस्यापि रूपमहत्त्ववदव्यभिचारः, कस्मात् स्पर्शो न कारणमिति वक्तव्यम्। समवधार्य चैतद्

---

१. चेत् C २. रूपवतः का॰ Pañjikā ३. वायोः C ४. द्रः वै.सू. (च) ४.१.७-८

भवताभिधीयते स्पर्शवदेतत् स्यादिति। येन च प्रमाणेनावधृतमेतत् स्पर्शो न कारणमिति, मयापि तत एवाकारणत्वम्। अथाकारणत्वप्रतिपादकं न प्रमाणमस्ति, को ह्यस्य वाक्यस्यार्थः स्पर्शवदेतत् स्यादिति? तद्भावभावित्वं च व्यभिचारयता कार्यकारणधर्म उच्छिन्नो भवति। इदमस्य कार्यमिदमस्य कारणमिति परेण पर्यनुयुक्तः तद्भावभावित्वव्यतिरेकेण केनान्येन प्रतिपादयसि[१]? अतो विरोधादनुत्तरमेतत्।

यत् पुनरेतत्, अतीन्द्रियसंयोगातीन्द्रियत्वादिति— अतीन्द्रिययोः किलात्ममनसोर्यः संयोगः सोऽप्यतीन्द्रियो दृष्ट इति। यदि च परमाणवोऽतीन्द्रियाः स्युः, तत्कार्यमप्यतीन्द्रियं स्यात्। ऐन्द्रियकं तु दृष्टम्। तस्माद् ऐन्द्रियका इति। सोऽयं दृष्टान्तप्रयोगः। अतीन्द्रियसंयोगातीन्द्रियत्वादिति। दृष्टान्तप्रयोगमात्रे च हेतुन्यूनता। योऽप्यत्र कथञ्चित् हेतुर्लभ्यते, नातीन्द्रियकार्यं महाभूतादि व्यक्तमैन्द्रियकत्वात् घटादिवदिति। घटाद्यैन्द्रियकमैन्द्रियककार्यं दृष्टम्। तथा च महाभूतादि व्यक्तमैन्द्रियकम्। तस्मात् तदप्यैन्द्रियककार्यमिति। अयमपि प्रत्यक्षविरोधाद् विरुद्धः, अनुष्णोऽग्निः कृतकत्वादिति यथा।

एके[२] तु वातायनच्छिद्रदृश्यं त्रुटिं परमाणुं वर्णयन्ति। तन्न युक्तम् तस्य भेद्यत्वात्। अभेद्यः परमाणुर्भिद्यते च त्रुटिरिति। कथमवगम्यते भिद्यत इति? द्रव्यत्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वात्, घटादिवत्। कथं चान्यथाभेद्यः सन् परमाणुरित्युच्यते? अनित्यत्वाच्च न परमाणुः सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वाच्च। तस्मात् नैन्द्रियकाः परमाणवः, तेषामतीन्द्रियत्वात्। यत् प्रत्यक्षं तदन्यदिति विरुद्धो हेतुः।

संहतानामुत्पत्तिनिरोधात् नासंहतः परमाणुरस्तीत्यपरे[३]। अपरे च संहतं परमाणुं वर्णयन्ति। संहता एवोत्पद्यन्ते निरुध्यन्ते च। असंहतास्तु परमाणवो न सन्त्येवेति। तदयुक्तम्, संहतार्थस्यानुक्तत्वात्। असंहताः परमाणवो न सन्तीति

---

१. °व्यतिरेकेणान्येन न प्रति° C २. मीमांसकाः J f.n. ३. बौद्धैकदेशिनः J f.n.

ब्रुवता संहतशब्दस्यार्थो वक्तव्यः। संघातो हि नाम बहूनामकार्यकारणभूतानां संयुक्तानामवस्थानम्। न चासंहतप्रतिषेधे संघातस्य निमित्तमस्ति संहन्यमानतन्त्रत्वात्। नित्यमयं संघातः संहन्यमानतन्त्रो भवति। न चासंहतप्रतिषेधे संहन्यमानमस्ति। तस्मात् न संघातोऽस्तीति व्याघातात्[१] न किञ्चिदेतत्। एकप्रतिषेधादनेकाभ्युपगमवत्। यथा नाम कश्चिन्मुग्ध एकप्रतिषेधादनेकमभ्युपेयात् तस्य चैकप्रतिषेधादनेकं निवर्तते, एकसमुदायत्वादनेकस्य तथाविधमिदं भवतीति।

इतश्च नान्योऽवयवी अवयवेभ्यः, संयोगाप्राप्त्यभावात्। यत् खलु यस्मादर्थान्तरं भवति तस्य तेन संयोगो भवति। अप्राप्तिर्वा यथा गवाश्वस्य। न पुनस्तन्तुभिः पटस्य संयोगो नाप्यप्राप्तिः। तस्मात् नासौ तेभ्योऽर्थान्तरमिति। अवयविनः पक्षीकरणे संयोगविभागाभावस्य संयोगविभागविषयत्वादसंबद्धम्। अथासंयोगित्वाविभागित्वे हेतू[२], ते अप्यसिद्धे। संयुज्यते चायं विभज्यते चायमिति। अथ स्वावयवेनासंयोगित्वात् सोऽप्यनुपसंहार्यः नास्यान्वयो न व्यतिरेक इति। अथापि सर्पकुण्डलकाद्युदाहरणं स्यात्, यथा सर्पकुण्डलकादि किल स्वकारणेनासंयोगि न चार्थान्तरमिति, तदसिद्धम्। यथा चार्थान्तरं सर्पकुण्डलकादि तथोक्तं पुरस्तादिति। यदपि स्वकारणेनासंयोगीति, तदत्र चिन्त्यम्। किं गुणत्वात् स्वकारणेनासंयोगि अथानर्थान्तरभावात्? वयं तु ब्रूमो गुणत्वात् नानर्थान्तरभावादिति। गुणश्च सर्पकुण्डलकसंयोगः। स चार्थान्तरमिति प्रतिपादितमेतत्। अर्थान्तरभावे च दर्शनाद् विरुद्धः। सत्त्वरजस्तमांसि भवतां पक्षे मिथोऽर्थान्तरभूतानि। तेषां च न संयोगो नाप्राप्तिरिति। प्रधानपुरुषयोश्च न संयोगो नाप्राप्तिरुभयोर्व्यापकत्वादिति विरुद्ध इति।

नान्योऽवयवी अवयवेभ्यः, गुरुत्वान्तरकार्याग्रहणादिति। गुरुत्वान्तरकार्याग्रहणादित्येतन्न कथञ्चिदपि पक्षेण संबध्यते। क्व च नान्योऽवयवी अवयवेभ्यः। क्व च गुरुत्वान्तरकार्याग्रहणम्? गुरुत्वान्तरकार्याग्रहणाच्च गुरुत्वान्तरकार्यं

---

१. नासंहतोऽस्तीति विरोधात् C २. हेतुभूते C

न स्यात्। न गुरुत्वं न गुरुत्वान्तरं नावयवी। नोदकप्रतिषेधात् कमण्डलोः कपालानां वा प्रतिषेधो युक्तः।

एके तु गुरुत्वान्तरकार्याग्रहणादित्यनेन गुणान्तरारम्भं प्रतिषेधन्ति। उदाहरणमात्रार्थत्वात् गुरुत्वान्तरारम्भप्रतिषेधस्य। कथमिति? न कार्यं कारणरूपादिपूर्वकरूपादिमत् गुरुत्वान्तरवत्त्वप्रसङ्गात्। यदि कारणगता रूपादयः कार्ये रूपादीन् आरभेरन् अपि तर्हि कारणगतान्यपि गुरुत्वानि कार्ये गुरुत्वान्तरमारभेरन्। ततश्च गुरुत्वान्तरवत् कार्यमुपलभ्येत। न तूपलभ्यते। तस्मात् न कारणरूपादिपूर्वकरूपादिमंत् कार्यमिति। सत्यमुपपादितः पक्षधर्मः। स तु प्रत्यक्षविरोधात् न किञ्चित्। कथमिति। अभ्युपेत्य कार्यं रूपादयः कार्ये प्रतिषिध्यन्ते। कार्याभ्युपगमाच्च प्रतिषेध्यमनुज्ञातं भवति। कारणरूपादयश्च कार्ये रूपादीन् नारभन्त इति ब्रुवतः कार्यमगुणं स्यात्। न त्विदमगुणं दृश्यते। ततश्च विरोधादयमहेतुः। अथ कार्यं नैवास्ति, न कार्यं कारणरूपादिपूर्वकरूपादिमदित्यनर्थकम्। न हि कमण्डलोरभावे अनुदकः कमण्डलुरिति युक्तं वक्तुम्। एतेन कार्ये रूपादिप्रतिपत्तिः प्रत्युक्ता। यश्चायं हेतुर्गुरुत्वान्तरवत्त्वप्रसङ्गादिति, अयमप्यभ्युपगमात् न किञ्चित्। नाभ्युपगमा एव दोषत्वेन नोद्यन्ते[1]। यदि तर्हि गुरुत्वान्तरवत् कार्यद्रव्यं रूपाद्यन्तरवच्च ततो गुरुत्वान्तरकार्यमुपलभ्येत यथा रूपाद्यन्तरकार्यम्। न तूपलभ्यते। न हि तुलायां विभक्तपिण्डद्वयोपन्यासवत् संबद्धयोरपि कार्यभेदं पश्यामः, तस्माद् विभक्तयोरिव तयोः संयुक्तयोरपि नास्ति द्रव्यान्तरारम्भः।

केचित् तु न गुरुत्वान्तरवत्कार्यद्रव्यवती तुलेति पक्षयित्वा अवनमनविशेषाभावादिति हेतुं ब्रुवते। सोऽयं व्यधिकरणः, अवनमनविशेषाभावस्यातुलाधर्मत्वात्। न ह्यवनमनविशेषाभावस्तुलाधर्म इति। एवं तु युक्तमुत्पश्यामः। अवनमनविशेषानाधारत्वात् न गुरुत्वान्तरवत् कार्यद्रव्यवती तुलेति। असिद्धस्तावदयं हेतुः, अवनमनविशेषानाधारत्वस्यातुलावृत्तित्वात् न तद्वत्तानुपलब्धेः। अयमप्य-

---

१. °गम एव....देश्यते C

नैकान्तादहेतुः गुरुत्वान्तरवद्द्रव्यसन्निपाते सत्यवनमनविशेषानाधारत्वस्य दृष्टत्वात्। यथा गुरुत्ववति द्रव्ये उन्मीयमाने त्रुटिभूते रजसि गुरुत्ववति सन्निपतित इति। महागुरुत्वे चोन्मीयमाने गुरुत्वमात्रोपहितानामप्यवनतिविशेषं न करोति। समहीनाधिकप्रसङ्ग इति चेत्? यदि तावत् कारणगुरुत्वैः समं कार्यगुरुत्वं यावद् द्विपलाभ्यामसंबन्धेऽवनमनं द्विस्तावत् संबन्धे सति स्यात्। अथ कारणगुरुत्वादधिकं कार्यगुरुत्वम्, तथाप्यधिकतरं प्रसज्येत। अथ कारणगुरुत्वात् हीनं कार्यगुरुत्वम्, तथापि विशेषो गृह्येत। न त्विदमस्ति। तस्मात् न कार्ये गुरुत्वमस्ति। न, कार्यकारणगुरुत्वेयत्तानवधारणात् यद्येतदवधारितं स्यात्, एतावत् कारणेषु गुरुत्वम्, इयत् कार्य इति[१], तत एतद् युज्येत वक्तुं समहीनाधिकप्रसङ्ग इति। तत् तु नावधारितम्, इयत् कारणे गुरुत्वमियत् कार्य इति। यदि कार्यकारणगुरुत्वे नावधार्येते, योऽयं प्रत्ययस्तुलयोन्मीयमाने द्रव्ये द्विपलं पञ्चपलमिति स न प्राप्नोति। न न प्राप्नोति, द्रव्यसमाहारगुरुत्वावधारणात्। यदिदं भवान् मन्यते द्विपलं पञ्चपलमिति नात्र कार्यकारणगुरुत्वे अवधार्येते। किं त्वा चरमात् आ च परमाणोर्द्रव्यसमाहार उन्मीयते। तन्मनुष्यधर्मणो न युक्तं वक्तुम् इयत् कारणगुरुत्वमियत् कार्यगुरुत्वमिति। न च समाहारः कारणमपि त्वनारब्धकार्यं चरमद्रव्यं कारणमिति।

केचित् त्वारभ्यारभन्त इति प्रतिपद्यन्ते। तान् प्रतीदमुच्यते। न पूर्वोत्तरकार्यद्रव्ये समानदेशे मूर्तिमत्त्वात् घटादिवदिति। शेषस्त्वारभ्यारम्भकविचारो नाप्रस्तुतत्वात् निराक्रियते[२]। निरनुमानं तर्हि कार्यगुरुत्वम्। यदि गुरुत्वान्तरवद् द्रव्योपचये सति कार्ये भेदो न गृह्यते। निरनुमानं तर्हि कार्यगुरुत्वं कथं प्रतिपत्तव्यमिति[३] क एवमाह, कार्यगुरुत्वं न गृह्यत इति। यदि गृह्यते, किं तत्? पतनम्। न हि कार्यगुरुत्वमन्तरेण कार्यपातेऽन्यो हेतुरस्ति। तस्मात् गुरुत्वान्तरवत् कार्यमिति। एतेन तुलावनतिविशेषस्याग्रहणात् कार्ये न गौरवमिति प्रत्युक्तम्। अथ मन्यसे

---

१. कारणगुरुत्वमेतावत् कार्यगुरुत्वमिति C २. अप्रस्तुतत्वात् न क्रियते J ३. गृह्यते कथं प्रतिपद्येत इति? C

कारणगुरुत्वैरेव कार्यं पात्यते न कार्ये गुरुत्वमस्ति। अतः कार्यपातस्यान्यनिमित्तत्वात् न सिध्यति गुरुत्वान्तरवत् कार्यमिति। न, कार्यकारणयोरसंयोगात्। यत्र गुरुत्वमाश्रयान्तरे पातहेतुर्भवति तत्र संयोग उपकरणम्। यथा तुलापटलके गुरुत्ववद्द्रव्यसंयोग इति। न तु कार्यकारणयोः संयोगोऽस्ति, अयुतसिद्धत्वात्। युतसिद्धिरसंबद्धस्य विद्यमानता। न पुनः कार्यं कारणासंबद्धं विद्यते। [१]जातं संबद्धं चेत्येकः कालः। तस्मात् न कार्यकारणे संयुक्ते। समवायोपकरणं गुरुत्वं पातयिष्यतीति चेत्— न, असंकीर्तनाद् विरोधाच्च। अथ मन्यसे सत्यं न कार्यकारणयोः संयोगोऽस्ति, अपि तु[२] समवायः। समवायो गुरुत्वापेक्षः कार्यं पातयिष्यतीति न सिध्यति कार्यगुरुत्वम्। न, असंकीर्तनात्। न समवायः क्वचिदपि क्रियाहेतुत्वेन संकीर्तितः **सूत्रकारेण** यथा संयोगः।

नोदनाभिघातात्संयुक्तसंयोगाच्च पृथिव्यां कर्म[३]

इति। न केवलमसंकीर्तनादेव, विरोधाच्च। यदि च समवायः क्रियाहेतुः स्यात् कारणरूपादयोऽपि कार्येणैकार्थसमवायात् पतेयुः। पतन्तु रूपादयोऽपि, किं नो बाध्यत इति चेत्— न, गुरुत्वस्यापि पातप्रसङ्गात्। यथा रूपादयः कार्यद्रव्यं पतदनुपतन्ति, तथा गुरुत्वमप्यनुपतेत्। गुरुत्वं चानुपतत् कुतः पततीति वक्तव्यम्। न गुरुत्वस्य गुरुत्वान्तरं पातहेतुरस्ति। तस्मात् न गुरुत्वं पतति न रूपादयः पतन्तीति। यदि रूपादयो न पतन्ति द्रव्ये पतति तिष्ठेयुरित्यद्रव्या रूपादयः स्युः। द्रव्यं च रूपादिहीनमुपलभ्येत। अथ द्रव्ये पतति पतन्ति। क्रियावन्तो रूपादयः प्राप्नुवन्ति। अथ न तिष्ठन्ति न पतन्ति, सोऽयं युक्तिविरोधः। अवश्यं भवताभ्युपगन्तव्यम् पतति पतन्ति, पतति वा तिष्ठन्तीति। वेद पुनर्भवान् युक्तायुक्तयोर्नाना कारणम्। वेद्मीति परः, युक्तं प्रमितमयुक्तमप्रमितम्। अयुक्तं तर्हीदं पतति पतन्ति पतति वा तिष्ठन्तीति। तच्चोक्तम्, गुरुत्वस्य गुरुत्वान्तरप्रसङ्गात्, रूपादिशून्यस्य च द्रव्यस्यादर्शनात्, अद्रव्याणां च रूपादीनामदर्शनादिति। यच्च

---

१. जातः संबद्धश्चेᳬ C २. अस्ति च C ३. वै.सू. (च) ५.२.९

पतति गच्छति वा तत्प्राप्तं जहाति अप्राप्तं च प्राप्नोति। न पुना रूपादयः प्राप्तं जहति अप्राप्तं च प्राप्नुवन्ति। रूपादयोऽप्राप्तं न प्राप्नुवन्तीति न युक्तम्, भवति हीदं द्रव्ययोः प्राप्तयो रूपे अपि प्राप्ते इति। न, सन्देहात्। किमयं प्राप्तिप्रत्ययः प्राप्तिनिमित्त आहो अप्राप्तेरदर्शननिमित्त इति सन्दिह्यते। वयं तु ब्रूमोऽप्राप्तेरदर्शननिमित्त इति। न हि द्रव्ययोः प्राप्तयो रूपयोरयमप्राप्तिं पश्यति। द्रव्ययोरप्येवमेवेति चेत्-अथ मन्यसे यथा रूपयोः प्राप्तिप्रत्ययोऽप्राप्तेरदर्शननिमित्तः, एवं द्रव्ययोरप्राप्त्यदर्शननिमित्तो भविष्यति न प्राप्तिनिमित्त इति। नैष दोषः। प्रत्ययद्वैतस्यानेकनिमित्तत्वात्। इह खलु प्रत्ययद्वैतमेकनिमित्तं दृष्टम्। तद् यथा चित्रगतासु प्रतिकृतिषु क्रोधभयपरिहारेऽपि[1] क्रुद्धभीतप्रत्यया भवन्तीति न तावता पुरुषेष्वपि क्रोधभयाभावे क्रुद्धभीतप्रत्ययाः प्रादुर्भवितुमर्हन्तीति। एवमयं प्राप्तिप्रत्ययः क्वचित् संयोगनिमित्तः क्वचिदप्राप्तेरदर्शननिमित्त इति। तस्माद् व्यवस्थितं न गुरुत्वं पतति, न रूपादयः पतन्तीति।

अपरे तु कार्यगुरुत्वेन [2]कारणगुरुत्वप्रतिबन्धं ब्रुवते। कार्यगुरुत्वेन किल कारणगुरुत्वानि प्रतिबद्धानि। अतोऽवनतिविशेषो न भवतीति। एतत् तु न युक्तमिति पश्यामः। कुतः? कार्यकारणयोः पातदर्शनात्। यदि कार्ये पतति कारणमवतिष्ठेत, प्रतिपद्येमहि कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धमिति। न त्विदमस्ति। अतो न युक्तमेतत्। अनाधारत्वप्रसङ्गाच्च। यदि कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धं न कारणे क्रियामारभेत। कार्ये पतति न कारणं पतेदिति कार्यमनाधारं स्यात्। एतेन कार्यगुरुत्वेन कारणगुरुत्वविनाशोऽपि व्याख्यातः। विभक्तानां च पातो न स्यादित्यधिकम्। यदि च कार्यगुरुत्वेन कारणगुरुत्वं विनाश्येत, कार्यद्रव्यविनाशे कारणानां विभक्तानां पातो न स्यात्। गुरुत्वमेव च न स्यात्, यदि कार्यगुरुत्वेन कारणगुरुत्वं विनाश्येत। अपि तर्हि न क्वचिद् गुरुत्वं स्यात्। न हि कस्यचित् परमाणोरतीतं कार्यं नास्तीति, अतोऽगुरवः परमाणवः स्युः। परमाणुषु च

---

१. °परिहाराय J २. °गुरुत्वं प्रतिबद्धं C

गुरुत्वाभावात् कार्ये गुरुत्वं कुत उत्पद्येत। तस्मादप्रतिषेधोऽयं कार्यगुरुत्वैः कारणगुरुत्वानां [१]विनाशप्रतिबन्धाविति। अतः पूर्व एव प्रतिषेधो नानैकान्तादिति कार्यकारणगुरुत्वानवधारणाच्च। तदेवमवयविनोऽसत्त्वाव्यतिरेकप्रतिपादकं न प्रमाणमस्तीति। अतः

साध्यत्वादवयविनि सन्देहः

इत्ययुक्तम्।

इतश्च साध्यत्वादवयविनि सन्देहो न युक्तः, असंकीर्तनात्। न हि साध्यत्वं संशयहेतुरिति संकीर्तितं क्वचिदपि। अतो न संभवति साध्यत्वात् संशयः। क एवमाह साध्यत्वात् संशयः? अपि तु साध्यत्वाद् विप्रतिपत्तिः, विप्रतिपत्तेः संशय इति। साध्यत्वकार्यायां विप्रतिपत्तौ साध्यत्वमध्यारोप्योक्तं

साध्यत्वादवयविनि सन्देहः

इति॥३३॥

सर्वाग्रहणमवयव्यसिद्धेः॥२।१।३४॥

संशयापाकरणार्थं सूत्रम्

सर्वाग्रहणमवयव्यसिद्धेः

इति। सर्वेषामर्थानामग्रहणं प्रसज्येत यद्यवयवी अर्थान्तरभूतोऽवयवेभ्यो नास्तीति। कथमिति? परमाणवस्तावद् दर्शनविषयभावं न प्रतिपद्यन्ते, अतीन्द्रियत्वादित्युक्तम्। अवयविद्रव्याणि च भवद्भिर्न प्रतिपद्यन्ते, तदनभ्युपगमे च योऽयं द्रव्यप्रत्ययः कुम्भ इति, गुणप्रत्ययः श्याम इति, क्रियाप्रत्ययश्चलतीति, सामान्यप्रत्ययोऽस्तीति, विशेषप्रत्ययः कलश इति, समवायप्रत्यय इह घटे रूपादय इति, तथा अन्येऽपि प्रत्यया एको महान् संयुक्तो विभक्तः पृथक् परोऽपर इति च न स्युः। अस्ति च

१. विनाशः प्रति॰ J

सर्वस्य ग्रहणं द्रव्यगुणकर्मादिप्रपञ्चस्य। तेन सर्वस्य ग्रहणात् पश्यामोऽवयवातिरिक्तोऽस्त्यवयवीति।

अथ वा सर्वाग्रहणमिति सर्वैः प्रमाणैरग्रहणम्। कथम्? प्रत्यक्षस्य वर्तमानमहद्विषयत्वात्। यद् वर्तमानं महच्च, तद् बाह्यकरणप्रत्यक्षम्। घटाद्यवयविप्रत्याख्याने च न बाह्यकरणप्रत्यक्षविषयोऽस्ति। तस्याभावादनुमानादेरप्यभावः। सेयं सर्वप्रमाणनिवृत्तिः। उपलभ्यन्ते चार्थाः प्रत्यक्षादिभिः प्रमाणैः। तैः सर्वैर्ग्रहणात् पश्यामोऽस्त्यवयवीति। तदिदं सूत्रमवयव्यनभ्युपगमे विरोधप्रदर्शनपरम्। सोऽयं सर्वाकारो विरोधो लोकपरिदृष्टप्रत्ययोच्छेद इति॥३४॥

धारणाकर्षणोपपत्तेश्च॥२।१।३५॥

अवयव्यर्थान्तरभूत इति चार्थः। किमिदं धारणं नाम? एकदेशग्रहणसाहचर्ये सत्यवयविनो देशान्तरप्राप्तिप्रतिषेधो धारणम्। यदायमवयविन एकदेशं गृह्णाति, तदैकदेशग्रहणेन सहावयविनमपि गृह्णाति। तेन च ग्रहणेन यदवयविनो देशान्तरप्राप्तिनिवारणं[१] तद् धारणम्। आकर्षणं नामैकदेशग्रहणसाहचर्येण यदवयविनो[२] देशान्तरप्रापणं पूर्ववत्। कुत एतत्? लोकतः। लोकः खलु धारणाकर्षणे एवं प्रयुङ्क्ते इति। ते एते धारणाकर्षणे अवयविनं साधयतः। कथमिति? निरवयवेऽवयवे चादर्शनात्। न हि धारणाकर्षणे निरवयवे अवयवे च दृष्टे। दृष्टे च धारणाकर्षणे। तस्मादवयविधर्माविति।

यत् त्वत्रोक्तम्, संग्रहकारिते वै धारणाकर्षणे नावयविकारिते, पांशुराशिप्रभृतिष्वभावात्। तृणोपलकाष्ठादिषु जतुसंगृहीतेषु दर्शनादिति। तन्न, अनवधारणात्। न ब्रूमः सर्वस्मिन्नवयविनि धारणाकर्षणे भवतः, अपि त्वन्यत्र न भवतः। न च विरोधोऽवयविष्वेव दर्शनात्। यानि तानि तृणोपलकाष्ठानि जतुसंगृहीतान्या-

---

१. °निराकरणं C २. °चर्येऽवयविनः J

कृष्यन्ते, धार्यन्ते चेति मन्यसे[१], अवयविन एव ते। यदि तु निरवयवे अवयवे वा धारणाकर्षणे स्यातां स्याद् विरोधः। यत् त्विदमुच्यते, संग्रहकारिते ते इति। न, विशेषहेत्वभावात्। संग्रहकारिते धारणाकर्षणे नावयविकारिते इति न भवता विशेषहेतुरपदिश्यते। पांशुराशिप्रभृतिषु च कस्मात् संग्रहो नास्तीति वाच्यम्। य एवात्र संग्रहाभावे भवतो हेतुः, स एवावयविनो विद्यमानस्य धारणाकर्षणयोरभाव इति। कः पुनरसौ? उक्तोऽसावेकदेशगृहीतस्य तत्सहचरितस्य संबन्धविशेष इति। स च पांशुराशिप्रभृतिषु नास्ति। तस्मात् न तत्र धारणाकर्षणे इति सोऽयं व्यतिरेकी हेतुः।

अथेदानीमन्वयिनो हेतोः प्रयोगमुपन्यसिष्यन्निदमाह–अथावयविनं प्रत्याचक्षाणको मा भूत्, प्रत्यक्षलोप इत्यणुसञ्चयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्य इति। एकबुद्धेर्विषयं पर्यनुयोज्यः। येयं बुद्धिरेकमिदं द्रव्यमिति किमियं नानाविषया उताभिन्नविषयेति। यदि नानाविषया, बहुष्वदर्शनादयुक्ता। न हि बहुष्वेकमिदमिति युक्तः प्रत्ययः। अथाभिन्नार्थविषया, योऽसावेकबुद्धेर्विषयः सोऽवयवीति। एकानेकबुद्धी भिन्नविषये विशेषवत्त्वात् रूपादिविषयबुद्धिवदिति। अथ वाप्येकानेकबुद्धी भिन्नविषये समुच्चितासमुच्चितविषयत्वाद् इदमिति, इदं चेदं चेति यथा॥३५॥

सेनावनवद् ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम्॥२।१।३६॥

सेना...नाम् इति। सेनावनवद् ग्रहणमिति चेत्, अथ मन्यसे असत्यर्थान्तरभावेऽसति चैकानेकविभेदे दृष्टो बुद्धिविशेषो यथा[२] अन्या सेनाबुद्धिरन्या गजादिबुद्धय इति, तथा अन्या धवादिबुद्धयोऽन्या च वनबुद्धिरिति। न च तावता सेना वनं चार्थान्तरम्। तस्मादनैकान्तिकत्वादहेतुरिति।

---

१. इति मन्यसे om C २. यथा om C

इदं तावत् सूत्रं साधनपक्षे दृष्टान्तमात्रत्वाद्[१] असंबद्धम्,अनैकान्तिकीकरण-पक्षे तु न, [२]असिद्धत्वात् केन सेनावनयोरनर्थान्तरभावोऽभ्युपगम्यते? यथा च सेनावनान्यर्थान्तरभूतानि तथोक्तम्। अभेदप्रत्ययस्य चानेकनिमित्तत्वात् न युक्तम्। अस्त्ययमभेदप्रत्ययोऽभिन्न एव। अस्ति च भिन्ने उपलभ्यमाने भेदस्यादर्शनात्। अभिन्ने तावदेकप्रत्ययः यदेकमुभयपक्षसंप्रतिपत्त्या व्यवस्थितम्। एकं नास्ती-त्यनेकप्रत्ययो व्याहतः। एकसमुच्चयो ह्यनेकमिति। अनेकस्मिन्नुपलभ्यमानेऽपि भेदस्यादर्शनादभेदप्रत्ययो भवति। भेदस्य चादर्शनमारान्निमित्तात्। यथा सेनादिषु। यानि तानि सेनाङ्गानि हस्त्यादीनि तान्येकश उपलभ्यमानपृथक्त्वानि आरान्निमित्ताद् भेदं नोपलम्भयन्ति। भेदानुपलब्धेर्भिन्ने वस्तुन्यभिन्नप्रत्ययः। न तु परमाणवः केनचिदुपलभ्यन्ते, कस्मात्? अतीन्द्रियत्वादणूनामिति।

अतीन्द्रियाः परमाणव इति प्रतिपादितमेतत्। यश्चैन्द्रियकः पदार्थः स उपलब्ध-पृथक्त्वः सन् आरात् पृथक्त्वस्याग्रहणे अभेदप्रत्ययनिमित्तं भवति। यथोपलभ्य-मानजातीयानामारात् न जातिग्रहणम्, उपलभ्यमानप्रस्पन्दानां च नारात् प्रस्पन्द-ग्रहणमिति। गृह्यमाणाग्रहणस्य चान्यनिमित्तत्वात्, यच्चेदं गृह्यमाणस्य पदार्थस्याग्रहणं तदन्यनिमित्तं दृष्टम्, यथा तेषामेव सेनावनाङ्गानाम्। न तु परमाणवो गृह्यन्ते, अतीन्द्रियत्वात्। तस्मात् न तेषामन्यनिमित्तमग्रहणमिति।

अनुपजातविशेषाणां च बुद्धिभेदाहेतुत्वात् विरोधः। यस्य परमाणवो घटादि-बुद्धिहेतवो भवन्ति, स इदं प्रष्टव्यः किं परमाणव उपजातविशेषा बुद्धिविशेषं[३] कुर्वन्ति? उतानुपजातविशेषा इति? किं चातः? यद्युपजातविशेषाः, योऽसौ विशेषः सोऽवयवीति प्राप्तम्। अथानुपजातविशेषाः, त एवातीन्द्रिया ऐन्द्रियकाश्चे-त्यतिमहान् विरोधः। विशेषः संयोगः परमाणूनाम्। ते परस्परप्रत्यासत्तौ सत्यां संयोगोपकरणा उपलप्स्यन्त इति। न, अतीन्द्रियत्वाद् अणूनाम्। नातीन्द्रियाणां

---

१. °मात्रार्थत्वाद् C २. द्रः पृ. ६८ ff., पृ. १४५.९ ३. बुद्धिभेदं C

संयोगः प्रत्यक्षो भवितुमर्हति। भवति हीदमनेन संयुक्तमिति। तस्मान्न संयोगो विशेषः।

यश्चायमनेकस्मिन्नेकप्रत्ययः स मिथ्याप्रत्ययः। मिथ्याप्रत्ययनिमित्तं च सामान्यदर्शनं विशेषानुपलब्धिरविद्यमानविशेषदर्शनद्वारेणाध्यारोपिततद्विपरीतधर्मता। न चातीन्द्रियत्वादणूनां सामान्यदर्शनमस्ति। तदभावे कुतो विशेषादर्शनम्? सामान्यदर्शने[१] विशेषादर्शने वासति न तद्विपरीतधर्माध्यारोपः। न च निमित्तमन्तरेण नैमित्तिकस्य मिथ्याप्रत्ययस्य प्रादुर्भावो युक्त इति।

एतेन भाक्त औपमिकश्च प्रत्ययो व्याख्यातः। भक्तिर्नाम अतथाभूतस्य तथाभाविभिः सामान्यम्। उभयेन भज्यत इति भक्तिः। यथा वाहीकस्य मन्दां [२]संज्ञामुपादाय वाहीको गौरिति। न [३]त्वतीन्द्रियत्वात् परमाणूनामेतदस्ति। [४]उपमाप्रत्ययोऽपि न युक्तः, अतद्भाविनस्तद्भाविभिरसामान्यात्। यस्यातथाभूतस्य तथाभाविभिः सामान्यं तत्रोपमाप्रत्ययो युक्तः। यथ सिंहो माणवक इति। सिंह इव सिंहः। किं पुनरत्रोपमीयते? शौर्यम्। न तु परमाणूनामतीन्द्रियत्वान्मिथ्याप्रत्ययानां निमित्तमस्तीति। मिथ्याप्रत्यया अप्येते न भवन्ति, प्रधानाभावात्।

इन्द्रियान्तरविषयेष्वभेदप्रत्ययः प्रधानमिति चेत्? अथ मन्यसे इन्द्रियान्तरविषयेषु शब्दादिष्वेकादिप्रत्ययाः प्रधानं भवन्ति, तदभावे तु मिथ्याप्रत्यया इति। विशेषहेत्वभावाद् दृष्टान्ताव्यवस्था। एवं सति दृष्टान्तोपादानं न व्यवतिष्ठते। तस्मिंश्च तदिति प्रत्ययः अतस्मिंश्च तदिति प्रत्ययः। अस्ति चायं परमाणुषु सञ्चितेषु तदिति प्रत्ययः। किमयं तस्मिंस्तदिति आहोस्विदतस्मिंस्तदिति सन्दिह्यते। शब्दादिष्वेकप्रत्ययः प्रधानम्, घटादिषु त्वेकप्रत्ययो मिथ्याप्रत्यय इति ब्रुवाणो घटादीनभ्युपैति। न ह्यनभ्युपगतेषु घटादिषु शब्दादिसामान्यमेकप्रत्ययबीजं घटादिष्वस्ति। अथ मन्यसे नास्माभिर्घटादयोऽभ्युपगम्यन्ते, किं तु परमाणूनां सञ्चितानां

---

१. सामान्यदर्शने om J २. अन्तः संज्ञा॰ C ३. तदतीन्द्रिय॰ ॰णूनामस्ति C
४. उपमानप्र॰ C

शब्देन सामान्यादेकप्रत्ययोत्पत्तिनिमित्तत्वमिति। अत्रोक्तम्, नातीन्द्रियत्वादणूनामिति। यांश्च शब्दादीन्, प्रधानप्रत्ययनिमित्तत्वेन भवान् प्रतिपद्यते, तेऽपि सञ्चिता एव। सञ्चितत्वात् तेष्वप्ययमेकप्रत्ययो न युक्तः। शब्दादिषु चैकप्रत्ययः समुच्चयनिवृत्तिनिमित्त एकत्ववद्द्रव्यसामान्याद् भाक्तः। यान्येकत्ववन्ति द्रव्याणि तेषां समुच्चयनिवृत्तिर्धर्मः। अस्ति च शब्दादिषु समुच्चयनिवृत्तिः, तेनैकत्ववद्द्रव्यसामान्यात् शब्दादिष्वेकप्रत्ययो भाक्त इति। सर्वत्र समुच्चयनिवृत्तिनिमित्त एवेति चेत्, न द्वे इत्यत्रैकानेकगतौ सन्देहो न स्यात्। यदि सर्वत्रायं समुच्चयनिवृत्तिनिमित्त एवैकप्रत्ययो भवति, न द्वे इत्यत्र किमेकमनेकमिति द्विप्रतिषेधसामान्यात् सन्देहो न स्यात्। सति च सन्देह एकमिति नियमार्थम्। यतो नियमस्तदेकत्वम्, यतस्त्र्यादिप्रत्ययास्ते त्रित्वादय इति। एवं द्वित्वादिप्रत्यया अपि शब्दादिषु समुच्चयनिमित्ता द्रष्टव्याः। कस्मात्? द्वित्वादिमद्द्रव्यसामान्यात्। द्वित्वादिमता द्रव्येण शब्दादीनां समुच्चयः सामान्यम्[१]। सर्वत्र समुच्चयादेवेति चेत्–न, एकमित्यत्र सामान्यगतौ न संशयः स्यात्। यदि च सर्वत्र समुच्चयतन्त्रा[२] द्व्यादिप्रत्यया भवन्ति, नैकमिति प्रतिषेधे द्वे त्रीणि वेति सामान्यगतौ न संशयः स्यात्। तस्माद् यतो व्यवस्था ते द्वित्वादय इति।

यः पुनरेकत्वं द्वित्वादींश्च न प्रतिपद्यते, तस्य न समुच्चयो न समुच्चयनिवृत्तिः। अनभ्युपगतैकत्वस्य कस्य समुच्चयः, अनभ्युपगतद्वित्वस्य च कस्य प्रतिषेधः? एकत्वद्वित्वादींश्चार्थान्तरभूताननभ्युपगच्छत एकं शतम् एकं द्वित्वमित्येकप्रत्ययो न स्यात्। भेदस्याग्रहणाच्च शब्दादिष्वेकप्रत्ययः। यस्मात् शब्दादिषु भेदो न गृह्यते उपलभ्यमानेष्वतस्तेष्वेकप्रत्ययः, न पुनः परमाणुष्वभेदग्रहणस्य निमित्तमस्ति, अतीन्द्रियत्वादणूनामित्युक्तम्। उदाहरणमात्रत्वात् चैकप्रत्ययपर्यनुयोगस्य, एकप्रत्ययवत् अनेकप्रत्ययमप्यनुयोक्तव्यः। योऽवयविनमर्थान्तरं न प्रतिपद्यते तस्य यथैकप्रत्ययोऽनुपपन्नः, तथानेकादिप्रत्यया अपि नाप्नुवन्ति। यथा

---

१. समानः C २. यदि समुच्चयनिमित्तत्वाद् C

चैकानेकप्रत्ययान् एवं सर्वानेव[१] घटादिप्रत्ययान् पर्यनुयोज्यः। एवं परिमाणसंयोग-प्रस्पन्दजातिविशेषप्रत्ययानप्यनुयोक्तव्यः[२]। तेषु चैवं प्रसङ्गः। यद्यवयविनमर्थान्तरं न प्रतिपद्यसे, महदिति संयुक्त इति चलत्यश्वो[३] गौर्गच्छतीति प्रत्यया न प्राप्नुवन्ति। न ह्यतीन्द्रियेषु परमाणुषु एते प्रत्यया युज्यन्त इति।

किमेते एकादिप्रत्यया अणुसञ्चयमात्रे आहोस्विदर्थान्तरभाव इति[४] सन्दिह्यते। सन्देहे सति विशेषहेतुर्वक्तव्य इति। अयं विशेषहेतुः, महत्प्रत्ययसामानाधिकरण्या-देकप्रत्ययस्यैकप्रत्ययो[५] महति। यः खलु यत्समानाधिकरणः प्रत्ययो दृष्टः, स तद्धर्मयुक्तो भवति। यथा नीलमुत्पलमिति उभयधर्मयोगिनि नीलोत्पलप्रत्ययः प्रवर्तते। अस्ति च महत्प्रत्ययसामानाधिकरण्यमेकप्रत्ययस्य। तस्मात् महत्येकप्रत्यय इति। अणुसमूहेऽतिशयग्रहणं महत्प्रत्यय इति चेत्? अथ मन्यसे नास्माभिरवय-व्यर्थान्तरभूतोऽभ्युपगम्यते। अपि त्वणुसमूहमुपलभ्याणुसमूहान्तरेऽतिशयं गृह्णतो महत्प्रत्ययो भवति। सोऽयमतस्मिंस्तदिति प्रत्यय इति पूर्ववत् प्रसङ्गः। अमह-त्स्वणुषु अमहत्सु वाणुसमूहेषु योऽयं महत्प्रत्ययः, सोऽतस्मिंस्तदिति मिथ्या-प्रत्ययः। मिथ्याप्रत्ययाश्च प्रधानमन्तरेण न भवन्तीति पूर्ववदेव प्रसङ्गः।

अणुः शब्दो महानिति च व्यवसायात् प्रधानसिद्धिरिति चेत्–अथ मन्यसे महान् शब्दोऽणुश्च शब्द इति शब्दे दृष्टो महदणुप्रत्ययः प्रधानमन्यत्र महदणुप्रत्यय-स्येति? न च मन्दतीव्रताग्रहणमियत्तानवधारणात्। न शब्दे महत्त्वं न चाणुत्वं गुणत्वात्। अणुमहत्प्रत्ययस्तर्हि शब्दे न प्राप्नोति? न न प्राप्नोति, अन्यनिमित्तत्वात्। किं निमित्तम्? मन्दता तीव्रता च। कस्मात्? इयत्तानवधारणात्। न ह्ययं महान् शब्द इति व्यवस्यन् इयानित्यवधारयति, यथा कुवलामलकविल्वानीयन्तीत्य-धारयति। कुवलादामलकं महत्। आमलकाच्च विल्वम्। तानि चेयत्तया परिच्छिनत्ति इयत्परिमाणमेतदिति। न पुनः शब्देषु एतदस्ति। शब्देष्वपि [६]पूर्वानुभूतशब्दमुपल-

---

१. सर्वानेव om C २. पर्यनुयोज्यः C ३. इति वाश्वो C ४. सन्दिह्यते। om J ५. ॰प्रत्ययस्यैक om C ६. पूर्वावधृत॰ C

भ्य तस्मात् शब्दादयं शब्दो महान् अणुर्वेति [१]अवधार्यते नावधारणं प्रतिषिध्यत इति।

इदं तु चिन्त्यते। योऽयं शब्देऽणुमहत्प्रत्ययः, किमयं परिमाणयोगादुतान्यस्मात् निमित्तादिति। अन्यस्मात् निमित्तादिति युक्तम्, गुणस्य गुणान्तरसंबन्धानुपलब्धेः। न हि गुणस्य गुणान्तरसंबन्धो दृष्टः, यतः परिमाणसंबन्धोऽपि गम्येत। महत्प्रत्ययादेव गुणवान् शब्दो द्रव्यवदिति चेत्-यथायं महत्प्रत्ययो द्रव्येषु भवन् महत्परिमाणयोगाद् भवति, शब्देऽपि चायं महत्प्रत्ययोऽस्ति। अतो महत्प्रत्ययविषयत्वात् महत्परिमाणयुक्तः शब्द इति। न, अनैकान्तात्, महत्प्रत्ययविषयत्वे तुल्येऽपि महत्परिमाणयोगो न दृष्टः, यथा महत्परिमाण इति। द्रव्ये तर्हि महत्प्रत्ययः कथम्-यदि तावत् महत्प्रत्ययविषयत्वे सत्यपि महत्परिमाणयोगं न प्रतिपद्यसे, महत्परिमाणयुक्तं द्रव्यमित्येतत् कथम्? न महत्प्रत्ययविषयत्वात् महत्परिमाणयुक्तं द्रव्यम्, अपि तु महत्परिमाणयोगे सति महत्प्रत्ययो द्रव्ये इति। महत्परिमाणयोगस्तु द्रव्यस्य विशेषप्रत्ययानामनाकस्मिकत्वेन। यदि विशेषप्रत्ययानामनाकस्मिकत्वेन महत्परिमाणयोगो द्रव्ये, शब्देऽप्येवम्। [२]शब्देऽप्यणुमहत्प्रत्ययोऽस्ति, तेनापि नाकस्माद् भवितव्यम्। कश्चैवमाह [३]शब्देऽयमाकस्मिक इति। किंनिमित्तः? मन्दतीव्रतानिमित्तः। मन्दतीव्रता च शब्दधर्मः। ततोऽणुमहत्प्रत्ययः शब्दे इति। का पुनरियं मन्दता तीव्रता च? अणुद्रव्यसामान्यात् सामान्यप्रत्ययविषयत्वं मन्दता, महद्द्रव्यसामान्याच्च सामान्यविशेषबुद्धिविषयत्वं तीव्रता पाटवमिति।

संयुक्ते इति च द्वित्वसमानाश्रयं प्राप्तिग्रहणमवयविन प्रतिपादकम्। कथमिति? संयुक्तमहत्प्रत्ययावेकविषयौ प्रतिसन्धानात् नीलोत्पलप्रत्ययवत्। यथा नीलं च तदुत्पलं चेति प्रतिसन्धीयमानौ प्रत्ययावेकविषयौ भवतः, तथा संयुक्ते महती इति च प्रतिसन्धानमस्ति। तस्मात् प्रतिसन्धानादेकविषयाविति। एतेनैकं महच्चलं महत् खदिरं महदिति महदादिप्रत्ययया[४] व्याख्याताः।

१. अवधार्यते om J २. शब्दस्य महत् प्र॰ C ३. शब्देऽपि C ४. महच्चलति खदिरमिति प्रत्ययाः C

समुदायद्वयापेक्ष इति चेत्? अथ मन्यसे द्वौ समुदायावाश्रित्य संयुक्तमहत्प्रत्ययौ भवतः। तथैकादिमहत्प्रत्यया अप्येकसमुदायापेक्षा[१] इति चेत्-न, विकल्पानुपपत्तेः। समुदायापेक्षाः संयुक्तमहदादिप्रत्यया इति कोऽयं समुदायः? किमनेकः समुदायी उत अनेकस्य प्राप्तिरिति। अनेकस्य प्राप्तिः समुदाय इति चेत्, प्राप्ती प्राप्ते इति प्रत्ययः स्यात्। किं कारणम्? समुदायस्य प्राप्तित्वेनाभ्युपगमात्। संयुक्ते इमे वस्तुनी इति च न स्यात्। प्राप्ती प्राप्ते इति च स्यात्[२]। समुदायश्च समुदायान्तरप्राप्तौ एकीभूत इति प्राप्तिप्रत्ययो न स्यात् समुदायस्यैकत्वात्। अथानेकः समुदायी समुदाय इति, द्वित्वेन सामानाधिकरण्यं न स्यात्। संयुक्ते इमे वस्तुनी इति द्वित्वसमानाधिकरणः प्रत्ययो न स्यात्। तस्मात् महती द्वित्वाश्रयभूते द्रव्ये संयोगस्य स्थानमिति। न संयोगोऽस्तीति चेत्? उक्तमत्र यथा अर्थान्तरं संयोग इति।

इदं तावदवयवसमूहवादी[३] प्रष्टव्यः, योऽयं गौरश्वः पुरुष इति जातिनिमित्तः प्रत्ययः स क्व भवतीति। नैव जातिरस्ति, कुतो जातिनिमित्तः प्रत्ययो भविष्यतीति। जातिविशेषस्य प्रत्ययानुवृत्तिलिङ्गस्याप्रत्याख्यानम्। न जातिविशेषमन्तरेण प्रत्ययानुवृत्तेर्निमित्तमस्ति। न च निर्निमित्तः प्रत्ययो [४]व्यवस्थातुमर्हति। अस्ति चायमनुवृत्तः प्रत्यय इमानि [५]कुण्डलानीति। अस्ति च व्यावृत्तः प्रत्ययो नेमानि [६]कुण्डलानीति। तस्मात् जातिविशेषो न प्रत्याख्येयः। व्यधिकरणस्यानभिव्यक्तेरधिकरणवचनम्। नायं जातिविशेषोऽनधिकरणो व्यज्यत इत्यधिकरणमवश्यं वक्तव्यम्। अणुसमवस्थानमधिकरणमिति चेत्-अथ मन्यसे परमाणव एव केनचित् समवस्थानेनावतिष्ठमानास्तां तां जातिं व्यञ्जयन्ति। अतो नावयवी सिध्यतीति। अत्र तावदुक्तम्-समवस्थानं संयोगोऽर्थान्तरमिति। यच्च समवस्थानं जातिविशेषं व्यनक्तीति मन्यसे, किं तच्चक्षुषा प्राप्तं व्यनक्ति, आहोस्विदप्राप्तमिति? प्राप्तं व्यनक्तीति चेत्? मध्यपरभागयोरप्राप्तत्वादनभिव्यक्तिः। स यदि प्राप्ते समवस्थाने जातिविशेषो व्यज्यते

---

१. अप्येकसमुदायापेक्षा om J २. प्राप्ती प्राप्ते इति च स्यात् om J ३. जातिसमुदायवादी C ४. नामास्थातुं C ५. कुण्डानि J ६. कुण्डानीति C

मध्यपरभागयोरवाग्भागव्यवधानादप्राप्तावनभिव्यक्तिः। यावत्प्राप्तं तावति अभिव्यक्तिरिति चेत्— न, तावतोऽधिकरणत्वम्। अथ मन्यसे यावच्चक्षुषा समवस्थानं प्राप्तं तावति जातिव्यक्तिः, तावदेव तर्ह्यधिकरणं जातेः प्राप्तम्। एवं सति प्रतीयमानभेदः। योऽयं वृक्ष इति समुदायः प्रतीयते तस्य वृक्षस्य भेदः प्राप्नोति। किं कारणम्? यावति जातिर्व्यज्यते, स वृक्ष इति प्राप्नोति। ततश्च एको वृक्षोऽनेक इति प्रतीयेत इत्येकप्रत्ययो न स्यात्। अवाग्भागस्य चावृक्षत्वात् न क्वचिद् वृक्ष इति वृक्षबुद्धेर्विषयो वक्तव्यः। तस्मात् समुदिताणुस्थानस्यात्मान्तरस्य[१] जातिविशेषव्यक्तिहेतुत्वात् अवयव्यर्थान्तरभूत इति। समुदिता अणवः स्थानं यस्य सोऽयं समुदिताणुस्थानः। समुदिताणुस्थानश्चासावात्मान्तरं[२] च तस्य जातिविशेषव्यक्तिहेतुत्वं नाणूनामिति सिध्यत्यवयव्यर्थान्तरभूतः।

अनभ्युपगतार्थान्तरावयविना च परमाणुशब्दस्यार्थो वक्तव्यः। परमाणुशब्दस्य परमापकर्षवाचित्वात्, न ह्यसति महति न चासत्यणौ परमाणुरिति विशेषणं युक्तम्। परिमाणप्रकर्षयोगे सति परमाणुरिति विशेषणमर्थवत्। असत्यनर्थकमिति। स चायं परिमाणप्रकर्षयोगः सत्यवयविनि सिध्यतीति।

सत्त्वरजस्तमसां सर्वापकृष्टः संघातः परमाणुरिति कस्यचिद् दर्शनम्। तन्न युक्तमिति पश्यामः, व्याघातात्। सर्वापकृष्टश्च संघातश्चेति व्याहतम्। न हि संहन्यमानमन्तरेण संघातः [३]सिध्यतीति।

अर्थान्तरं पटात् तन्तवः तत्कारणत्वात् तुर्यादिवदिति। तुर्यादि पटस्य कारणमित्यर्थान्तरं[४] दृष्टम्। तथा च तन्तवः। तस्मादर्थान्तरमिति। सामर्थ्यभेदाद् विषागदवत्। भिन्नप्रत्ययविषयत्वाद् रूपस्पर्शवत्। तन्तुपटरूपे भिन्नकारणे विशेषवत्त्वाद् रूपस्पर्शवत्।

---

१. °स्यार्थान्तरस्य C २. °सावर्थान्तरं C ३. संभवतीति C ४. तुर्यादिपटकारणमर्थान्तरमिति C

एके तु भिन्नरूपत्वादित्येवं हेतुं कृत्वा परमाणुना प्रत्यवतिष्ठन्ते। एकस्मिन्नपि परमाणौ रूपभेदो दृष्टः, रक्तः श्याम इति च। स त्वेवं प्रत्यवस्थेयः, न, हेत्वर्थापरिज्ञानादिति। न ब्रूमो भिन्नरूपत्वादन्योऽवयव्यवयवेभ्यः, अपि तु तन्तुपटरूपे भिन्नकारणे इति पक्षयित्वा विशेषवत्त्वादिति हेतुं ब्रूमः। तथा चायमप्रतिषेध इति। अतिबहुग्रन्थविसारिणी त्वेषा कथेत्युपरम्यते॥३६॥

॥अवयविपरीक्षाप्रकरणम्॥

[अनुमानपरीक्षाप्रकरणम्]

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥२।१।३७॥

प्रसंगतः परीक्षितं प्रत्यक्षम्। अथेदानीमवसरप्राप्तमनुमानं परीक्ष्यते। किं [१]पुनरिदमनुमानम्? उक्तं तत्पूर्वकमनुमानमिति। [२]तत्र पूर्ववदादेरुदाहरणानि, नदीपूरः पिपीलिकाण्डसंचारणं मयूरवासितमिति एतदुदाहरणव्यभिचारद्वारकं सूत्रम्—**रोधो...णम्** इति। तत्र रोधो नाम अपां स्यन्दमानानां द्रवत्वप्रतिबन्धहेतुः। उपघातो नाम पिपीलिकागृहाणामुपमर्दः। सादृश्यं नाम मयूरपुरुषशब्दयोः समानप्रत्ययकर्तृत्वम्। एभ्यो व्यभिचारादनुमानमप्रमाणमिति। शेषं **भाष्ये**।

यत् तावदुक्तमनुमानमप्रमाणमिति तदयुक्तम्, प्रतिज्ञापदयोर्व्याघातात्। अनुमानमिति संबद्धस्यातीन्द्रियार्थसाधकस्यैतन्नाम, अप्रमाणमिति तस्य प्रतिषेधः। सोऽयं प्रतिज्ञापदयोर्व्याघातः, अनुज्ञातप्रतिषिद्धयोरेकत्वानुपपत्तेः। प्रतिज्ञाहेत्वोश्च विरोधः। अनुमानमप्रमाणमिति प्रतिज्ञा। रोधोपघातसादृश्येभ्यो व्यभि-

---

१. पुनः in Pañjikā only २. अत्र च C

चारादिति हेतुः। यद् व्यभिचारि तदप्रमाणम्, यथा गोसिद्धौ विषाणित्वम्। सोऽयं हेतुः प्रतिज्ञां व्याहन्ति। प्रतिज्ञा च हेतुमिति।

यच्चेदमुच्यते अनुमानमप्रमाणमिति, तत् किमनुमानमात्रस्याप्रमाणत्वमुतानुमानविशेषस्य? किं चातः? यद्यनुमानमात्रमप्रमाणमिति पक्षः, हेतोरेकदेशवृत्तित्वादव्यापकत्वम्। समस्तमनुमानं पक्षीकृत्य[१] न सर्वस्मिन्ननुमाने व्यभिचारोऽस्ति। न हि व्यभिचारस्याप्रमाणत्वसाधनस्य व्यभिचारः शक्यः प्रदर्शयितुम्। न हि व्यभिचारस्य व्यभिचारे किञ्चित् प्रमाणमस्तीत्यव्यापकत्वादहेतुः। अथ यद् व्यभिचारि तदप्रमाणमिति ब्रूषे प्रतिज्ञाविशेषणत्वात् हेतोर्हेत्वन्तरं वचनीयम्। सिद्धसाधनं चैतत्। यद् व्यभिचारि तत् प्रमाणं न भवति॥३७॥

नैकदेशत्रासमसादृश्येभ्योऽर्थान्तरभावात्॥२।१।३८॥

यान्यप्येतान्युदाहरणानि व्यभिचारीणीत्युच्यन्ते तेष्वपि व्यभिचारो नास्तीत्यसिद्धतोद्भावनद्वारकं सूत्रम्—

नैकदेशत्रासमसादृश्येभ्योऽर्थान्तरभावात्।

यत् तावद् रोधादपि नदीपूरो भवतीति, नात्र नदीपूरमात्रेण उपरिवृष्टिमद्देशसंबन्धित्वं नद्याः साध्यते, अपि तु पूरविशेषेण, तस्य च व्यभिचारोऽसिद्धः। उपघातात् पिपीलिकाण्डसंचारणमात्रस्य व्यभिचारो न संचारणविशेषस्य। कः पुनरसौ विशेषः? अवित्रस्तानां भूयसीनां भूयःसु स्थानेषु पिपीलिकाण्डभूयस्त्वेनोर्ध्वसंचारणं यत् तदनागतवृष्ट्यविनाभावि। शब्दव्यभिचारोऽपि नास्ति। यस्मात् न शब्दमात्रमनुमानं मयूरास्तित्वे, न चात्र मयूरः साध्यते, अपि तु शब्दगताद् विशेषात् षड्जादिशब्द एव मयूरगुणविशिष्टोऽनुमीयत इति। एवं च व्यभिचारो नास्तीति असिद्धो हेतुः॥३८॥

।।अनुमानपरीक्षाप्रकरणम्।।

---

१. °कृतम् C

[वर्तमानकालपरीक्षाप्रकरणम्]

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥२।१।३९॥

त्रिकालविषयमनुमानं त्रैकाल्यग्रहणादित्युक्तम्। तत्र तावत् काल एव नास्तीति **केचित्**। तच्च न, प्रमाणाभावात्। न हि कालासत्त्वे प्रमाणमस्ति। ननु चानुपलब्धिः कालासत्त्वं प्रतिपादयति। न प्रतिपादयति व्यभिचारात्। त्रिकारणेयमनुपलब्धिः। तत्रानुपलब्ध्या कारणवैकल्यं गम्येत। न तूपलभ्यमेव नास्तीत्येतत्[१]। अथोपलभ्यमानस्याभावादनुपलब्धिरित्ययं प्रतिज्ञार्थः। तथापि[२] हेतुर्नास्ति, प्रतिज्ञार्थेनाक्षिप्तत्वात्। आक्षिप्तो हेतुः प्रतिज्ञार्थेनेति। न चासति धर्मिणि धर्मः संभवति, आश्रयाभावात्। अथ धर्मोऽपि नास्ति, साधनार्थो हीयते। न ह्यसतः साधनार्थं पश्याम इति।

परापरादिप्रत्ययानां च सनिमित्तत्वात् कालप्रतिषेधो न युक्तः। यश्च कालं न प्रतिपद्यते तेन परापरादिप्रत्ययानां निमित्तं वक्तव्यम्। न ह्यसति निमित्ते नैमित्तिकान् विशेषवतः प्रत्ययान् पश्यामो रूपादिप्रत्ययवत्। कालैकत्वात् प्रत्ययभेदानुपपत्तिरिति चेत्? अथ मन्यसे कालस्यैकत्वे सति न युक्तः परापरादिप्रत्ययभेदः, नाभिन्नं निमित्तं भिन्नं कार्यं करोतीति। न, सापेक्षत्वात् पित्रादिप्रत्ययभेदवत्। यथैकस्मिन् पुरुषे अनेकसंबन्धभेदानुविधायिन्यभिन्नेऽपि[३] पिता पुत्रो भ्रातेति प्रत्यया भवन्ति, तथैकः कालः कार्यकारणविशेषापेक्षः परापरादिप्रत्यये हेतुरिति।

एवमुपपादितः कालः। तस्योपपन्नस्य वर्तमानकालप्रतिषेधार्थं सूत्रम्—

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः।

वृन्तात् प्रच्युतस्य फलस्य भूमिं प्रत्यासीदतो यदूर्ध्वं फलमवधिं कृत्वा यावद्वृन्तमिति स पतितोऽध्वा। यदधस्तात् फलमेवावधिं कृत्वा यावद्भूमिरिति

---

१. न तु om C °देव कुतः C २. च for अपि C ३. अपि om C

स पतितव्योऽध्वा। नेदानीं तृतीयोऽध्वा विद्यते यत्र पततीति स्यात्। न चाध्वानमन्तरेण कालव्यक्तिरस्ति[१]। तस्मात् न वर्तमानकालोऽस्तीति॥३९॥

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात्॥२।१।४०॥

न, विरोधात्। वर्तमानः कालो नास्तीति ब्रुवन् अभ्युपगतौ कालौ बाधते। एतदर्थज्ञापनार्थं च सूत्रम्—

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात्।

वर्तमानकालापेक्षौ इतरौ कालौ। यस्य वर्तमानो नास्ति, तस्य वर्तमानानभ्युपगमेऽभ्युपगतयोः कालयोरभाव इति। न चायं कालोऽध्वव्यङ्ग्यः। किं तर्हि? क्रियाव्यङ्ग्यः पततीति। यदा द्रव्यं क्रियासंबद्धमुपलभते सोऽयं संबन्धविशिष्टः कालो वर्तमान इत्युच्यते। क्रियासंबन्धातिक्रमाच्चातीतः। यदा तु क्रियाकारणान्याभिमुख्येनावस्थितान्यप्रतिबद्धशक्तिकानि, तदा भविष्यति क्रियेत्यनागतः काल इति। यदि चायं वर्तमानां क्रियां न प्रतिपद्यते, [२]कस्मादतीततामनागततां च प्रतिपद्यते? न कालोऽतीतो न फलमतीतम्, कालस्य सर्वदा वर्तमानत्वात् फलस्य चापतत् पतति पतिष्यतीति क्रियाविशेषणत्वेन प्रत्ययविशेषविषयत्वात्[३] क्रियायां संभवो न फल इति। तस्मात् क्रियाकालाभिव्यक्तिनिमित्तं नाध्वा गन्तव्यस्य तादवस्थ्यात्, योऽसौ गन्तव्यो देशः, स यथाभूत एवानुत्पन्नक्रिये फले तथाभूत एवोत्पन्नक्रिय इत्यभेदात् नाध्वा कालभेदव्यक्तिहेतुः[४]॥४०॥

नातीतानागतयोरितरेतरापेक्षा सिद्धिः॥२।१।४१॥

अथ मन्यसे वर्तमानकालानभ्युपगमेऽप्यतीतानागताविवरेतरापेक्षौ सेत्स्यतः, एतत्प्रतिषेधार्थं सूत्रम्—

---

१. °क्तिहेतुरस्ति C २. कस्यातीं J ३. °विशेषं om J ४. °भेद° om C

नातीतानागतयोरितरेतरापेक्षा सिद्धिः।

इति। न ह्यतीतानागतावितरेतरापेक्षौ सिध्यतः। कथमिति? वर्तमानाभावे किमतीतं कथं च किमनागतं कथं चेति न शक्यं निर्वक्तुम्। अव्याकरणीयमेतद् वर्तमानलोप इति। विशेषप्रतिषेधाच्च वर्तमानोऽभ्युपगतः, यस्मादयं विशेषप्रतिषेधः पततः पतितपतितव्यकालोपपत्तेरिति। न च वर्तमानकालानभ्युपगमे पतत इति पदस्यार्थोऽस्तीति। न चैतत्पदार्थानभ्युपगमे पतत इति युक्तं वक्तुम्। सोऽयं व्याघातः। वर्तमानश्च नास्ति, पतत इति च प्रयोगः। न चेतरेतरापेक्षा[१] कस्यचित् सिद्धिरस्ति, यस्मादेकाभावेऽन्यतराभावादुभयाभावः यदीतरेतरापेक्षा सिद्धिः स्यात्, यावदितरन्नास्ति तावदितरन्नास्तीत्युभयोरभावः॥४१॥

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः॥२।१।४२॥

अर्थसद्भावव्यङ्ग्यश्च वर्तमानः कालो विद्यते द्रव्यम्, विद्यते गुणः, विद्यते कर्मेति। यस्य चायं नास्ति, तस्य

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः।

सूत्रार्थो विरोधः। कथं पुनर्वर्तमानाभावे प्रत्यक्षानुपपत्तिः? यस्मादिदं प्रत्यक्षं वर्तमानाधारं कार्यत्वात् क्षीरवदिति। यत् कार्यं तद् वर्तमानाधारं दृष्टं यथा क्षीरम्। कार्यं च प्रत्यक्षम्। तस्मात् [२]तदपि वर्तमानाधारमिति। वर्तमानकालानभ्युपगमादनाधारं प्रत्यक्षं प्राप्नोति। अनाधारं च कार्यं नास्तीति प्रत्यक्षानुपपत्तिः। प्रत्यक्षानुपपत्तेश्च सर्वप्रमाणलोपः। सर्वप्रमाणलोपे च सर्वस्य ग्रहणं न स्यात्। अस्ति च सर्वस्य ग्रहणम्। ते वयं सर्वस्य ग्रहणात् पश्यामोऽस्ति वर्तमानः प्रत्यक्षनिमित्तं प्रत्यक्षविषयः प्रत्यक्षं चेति। सोऽयं वर्तमानः काल उपपन्नः॥४२॥

---

१. °पेक्षया C २. तदपि om C

कृततताकर्तव्यतोपपत्तेस्तूभयथा ग्रहणम्॥२।१।४३॥

उपपन्नश्च सन् द्विधा भिद्यते, क्वचित् क्रियामात्रव्यङ्ग्यः क्वचित् क्रियासंतानव्यङ्ग्यः। क्रियामात्रव्यङ्ग्यो विद्यते द्रव्यमिति। क्रियासंतानव्यङ्ग्यः पचति छिनत्तीति। क्रियासंतानोऽपि द्विधा भवति, एकाकारक्रियो नानाकारक्रियश्चेति। एकाकारक्रियश्छिनत्तीति यथा। तत्र ह्युद्यम्योद्यम्य निपातनक्रियैकाकारा। नानाकारक्रियश्च संतानः पचतीति। तत्र ह्यनेका क्रिया अनेकाकारा च। यथा एधोपादानमग्न्यभिज्वालनं स्थाल्यधिश्रयणमुदकासेचनं तण्डुलावपनं दर्वीघट्टनमवश्रावणमवतारणमिति[1]। एष ह्येवंभूतः क्रियासंतानः पचतीत्यनेनैकेन शब्देनाभिधीयते। क्रियासंतानस्य ह्यत्राविच्छेदो विवक्षितो नानारम्भो नोपरम इति। संतानारम्भविवक्षायां पक्ष्यतीति। उपरमविवक्षायामपाक्षीदिति।

यच्चेदं छिद्यमानं तत् क्रियमाणम्। तस्मिन् क्रियमाणे

कृततताकर्तव्यतोपपत्तेस्तूभयथाग्रहणम्।

कस्य? वर्तमानस्य। कथम्? उभयथा। केवलस्य व्यपवृक्तस्यातीतानागताभ्यां संपृक्तस्य च ताभ्यामिति। क्व पुनर्व्यपवृक्तस्य? विद्यते द्रव्यमित्यत्र हि केवलः शुद्धो वर्तमानोऽभिधीयते। पचति छिनत्तीत्यत्र संपृक्तः। कथं संपृक्तः? काश्चित् तत्र क्रिया व्यतीताः, काश्चिदनागताः, एका च वर्तमानेति। अन्यश्च लोके प्रत्यासत्तिप्रभृतेरर्थस्य विवक्षायामनेकप्रकारो वर्तमानस्य प्रयोगः। कदाचिदयं वर्तमानमतीते प्रयुङ्क्ते। आगतः सन् ब्रवीति एष आगच्छामीति। कदाचिदनागते प्रयुङ्क्ते। यथा स्थितः सन् ब्रवीत्येष गच्छामीति। एवमन्येषु प्रयोगेषूत्प्रेक्षितव्यः॥४३॥

॥वर्तमानकालपरीक्षाप्रकरणम्॥

---

१. मण्डस्रावणम् C

[उपमानपरीक्षाप्रकरणम्]

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥२ ।१ ।४४ ॥

अथेदानीमुपमानमवसरप्राप्तं परीक्ष्यते। किं पुनरुपमानम्? **प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्** [१.१.६.] इत्युक्तम्, तस्याक्षेपः—

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः।

इति। नात्यन्तसाधर्म्यादुपमानं भवति यथा गौरेवं गौरिति। भूयःसाधर्म्यादपि नोपमानं सिध्यति। न हि भवति यथा गौरेवं महिष इति। एकदेशसाधर्म्यादपि न भवति। न हि भवति यथा मेरुस्तथा सर्षप इति। न चान्या गतिरस्ति। तस्मात् नोपमानं सिध्यति॥

अत्यन्तादिसाधर्म्यादुपमानप्रतिषेधे नोपमानप्रतिषेध इति। यदत्यन्तप्रायैकदेश-साधर्म्यादुपमानं तत् प्रतिषिध्यते। तेन सूत्रेण न पुनरुपमानमात्रस्य प्रतिषेधः। तथा[१] सति यदन्यथोपमानं तस्य स्वरूपं वक्तव्यम्। अथ नैवान्यथोपमानमस्तीति प्रतिपद्यसे[२], व्यर्थं तर्हीदं वाक्यम्— अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिरिति। अनभ्युपगच्छता ह्युपमानमेवं वक्तव्यम्, उपमानमप्रमाणमर्थाप्रतिपादकत्वादिति॥४४॥

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥२ ।१ ।४५ ॥[३]

प्रसिद्धसाधर्म्यस्य वैधर्म्यस्य चोपमानहेतुत्वादप्रतिषेधः। योऽयं भवता प्रतिषेधः क्रियते, अत्यन्तादिसाधर्म्यादुपमानं न सिध्यतीति, अयमनुपपन्नः, अनभ्युपगमात्। कः खल्वेवमाह, अत्यन्तादिसाधर्म्यादुपमानमिति? अपि तु प्रसिद्ध-

१. एवं C २. °मानस्य स्वरूपमस्तीति मन्यसे कथं C ३. J omits it

साधर्म्यादुपमानं साध्यसाधनभावमाश्रित्य प्रवर्तते[१]। तथा चायमप्रतिषेधः। सर्वथा-संभवाच्च। अत्यन्तसाधर्म्यादुपमानं सिध्यति, यदा तत्क्रिययैव तत्क्रियोपमीयते। यथा

रामरावणयोर्युद्धं रामरावणयोरिव

इति। प्रायः साधर्म्येणापि। यदा गोर्बलप्रकर्षजिज्ञासा भवति तदा भूयःसाधर्म्ये-णोपमानम्। यथा महिषस्तथा गौरिति। एकदेशसाधर्म्यादपि भवति[२]। यदा तु सन्मात्रं जिज्ञापयिषितव्यं[३] भवति, मेरोः सत्ता किंरूपेति तदा। यथा सर्षपस्य तथा मेरोः। तस्मादप्रतिषेधोऽयमिति॥४५॥

प्रत्यक्षेणाप्रत्यक्षसिद्धेः॥२।१।४६॥

अस्तु तर्ह्युपमानमनुमानम्।

प्रत्यक्षेणाप्रत्यक्षसिद्धेः।

यथा प्रत्यक्षेण धूमधर्मेणोर्ध्वगत्यादिना अप्रत्यक्षो धूमधर्मोऽग्निरनुमीयते तथा प्रत्यक्षेण गवा अप्रत्यक्षस्य गवयस्य प्रतिपत्तिरित्यप्रत्यक्षार्थप्रतिपादक-त्वादुपमानमनुमानं भवति॥४६॥

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः[४]॥२।१।४७॥

न, अपरिज्ञानात्, न भवतोपमानलक्षणं व्यज्ञायि। न चाप्रत्यक्षे गवये उप-मानार्थं पश्यामः।

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः।

---

१. प्रवर्तते om C २. एक.....भवति om J ३. जिज्ञासानिमित्तं C ४. सूत्रं न गृहीतम् J

अथ प्रत्यक्षे गवये क उपमानार्थः, यासौ संज्ञासंज्ञिसंबन्धप्रतिपत्तिः स उपमानार्थः। एवं च नोपमानमागमो न प्रत्यक्षम्। न ह्ययमागमात् प्रत्यक्षाद् वा अयं गवय इति प्रतिपद्यत इति।।४७॥

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः[1] ॥२।१।४८॥

परार्थत्वाच्च। परार्थं चोपमानं भवति। न हि यथा गौरेवं गवय इत्येतदागममन्तरेण सारूप्यमात्रपरिज्ञानमुपमानमुक्तम्। न ह्यागममात्रं सारूप्यपरिज्ञानमन्तरेण उपमानं भवितुमर्हति। न चैवमनुमानम्। तस्माद् यथा लिङ्गलिङ्गिसंबन्धस्मृत्यनुग्रहे सति लिङ्गपरामर्शोऽनुमानम्, तच्च प्रत्यक्षम् तथागमाहितसंस्कारस्मृत्यपेक्षं सारूप्यप्रत्यक्षमुपमानमिति।

प्रतिपत्तिभेदाच्च। नानुमानमेवं भवति यथा धूमस्तथाग्निरिति, अस्ति तूपमाने यथा गौरेवं गवय इति। यत्र च प्रतिपत्तिभेदः तत् प्रमाणान्तरम्, यथा प्रत्यक्षादनुमानम्। अपूर्वानधिगमादुपमानं न भवतीत्यनेन प्रत्युक्तम्॥४८॥

॥उपमानपरीक्षाप्रकरणम्॥

[शब्दसामान्यपरीक्षाप्रकरणम्]

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात्॥२।१।४९॥

अथावसरप्राप्तः शब्दः परीक्ष्यते। कः पुनरयं शब्दः? **आप्तोपदेशः शब्द** इत्युक्तम्। तस्याक्षेपः— न शब्दः प्रमाणम्, सत्यप्यप्रमितेः। यस्माद् विद्यमानोऽप्ययं शब्दोऽश्रूयमाणो न प्रतिपत्तिहेतुः, प्रतिपत्तिहेतुश्च प्रमाणमिति। विषयाभावाच्च। न

---

१ सूत्रं न गृहीतम् J

च प्रत्यक्षानुमानविषयव्यतिरेकी विषयः शब्दस्यास्ति। न चाविषयं प्रमाणमिति। अविज्ञानात्मकत्वाच्च न प्रमाणम्। यत् प्रमाणं तत् सर्वं विज्ञानात्मकं प्रत्यक्षादि। अविज्ञानात्मकं च न प्रमाणं घटादि[१]। बाह्यकरणप्रत्यक्षत्वाच्च घटादिवदेव न प्रमाणम्। आत्मन्यसमवायात् न घटादिवदेव प्रमाणम्। आकाशगुणत्वात् तत् संख्यादिवत् न प्रमाणम्।

यत् तावत् सत्यप्यप्रमितेरिति, तन्नासिद्धत्वात्। न हि कदाचित् शब्द उपलभ्यमाने न प्रमा भवति। अनुपलभ्यमाने न भवतीति नासौ प्रमाणम्। तदा प्रमाणं हि नाम येन प्रमीयते। कदा च तेन प्रमीयते, यदोपलभ्यते। यत् पुनरेतत्, विषयाभावादिति। क एवमाह प्रत्यक्षानुमानविषयव्यतिरेकी विषयो नास्तीति। अयमप्यसिद्धो हेतुः। यथा च प्रत्यक्षादिभ्यो विषयभेदस्तथोक्तम्। यत् पुनरेतद् अविज्ञानात्मकत्वाद् बाह्यकरणग्राह्यत्वाद् आत्मन्यसमवायाच्चेति, न, अनेकान्तात् प्रदीपवत्। प्रदीपे एतत् सर्वमस्ति। प्रमाणं च प्रदीपः प्रत्यक्षाङ्गत्वादित्युक्तम्। तस्मादनैकान्तिकत्वादहेतव एवेति। यत् पुनरेतदाकाशगुणत्वादिति, अयमप्यनैकान्तिक एव। यथा आकाशे यत् परिमाणं तत् महत्प्रत्ययकर्तृत्वात् प्रमाणं भवति। तस्मादाकाशगुणत्वादित्ययमप्यहेतुः।

अनुमानं शब्दः स्मृत्यपेक्षित्वात्। यस्य स्मृत्यपेक्षित्वं तदनुमानम्। स्मृत्यपेक्षश्च शब्दोऽर्थप्रत्यायने। तस्मादनुमानम्। त्रिकालविषयत्वाच्च। त्रिकालविषयमनुमानम्। तथा च शब्दः। तस्मादनुमानम्। अन्वयव्यतिरेकोपपत्तेश्च। यदन्वयव्यतिरेकि तदनुमानं दृष्टम्। यथा धूमविशेषदर्शनमग्निमद्धूमविशेषप्रतिपत्तौ[२]। तथा च शब्दोऽन्वयव्यतिरेकाभ्यामेवार्थं प्रतिपादयति। तस्मादनुमानम्।

इतश्च शब्दोऽनुमानम्

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात्।

प्रत्यक्षेणानुपलभ्यमानार्थविषयत्वादिति सूत्रार्थः॥४९॥

---

१. घटादिवदेव। C २. अग्निमत्प्रतीतै C

उपलब्धेरद्विप्रवृत्तित्वात्॥२।१।५०॥

इतश्चानुमानम्

उपलब्धेरद्विप्रवृत्तित्वात्।

प्रमाणान्तरभावे उपलब्धिभेदो दृष्टः यथा प्रत्यक्षेऽनुमाने च। अन्यथा हि प्रत्यक्षे उपलब्धिरन्यथा अनुमाने। न त्वेवं शब्द इति। तस्मात् न प्रमाणान्तरम्॥५०॥

संबन्धाच्च॥२।१।५१॥

संबद्धार्थप्रतिपादकत्वाच्चेति सूत्रार्थः। संबद्धार्थप्रतिपादकमनुमानं तथा च शब्द इति॥५१॥

आप्तोपदेशसामर्थ्यात् शब्दादर्थसंप्रत्ययः[1]॥२।१।५२॥

यत् तावत् स्मृत्यपेक्षत्वादनुमानं शब्द इति, तत् न, अनैकान्तिकत्वात्। अनुमानेऽपि स्मृत्यपेक्षित्वमस्ति यथा संशये यथा तर्के यथोपमाने इति। एतेन त्रिकालविषयत्वं प्रत्युक्तम्। यत् पुनरेतदन्वयव्यतिरेकोपपत्तेरिति, अन्वयव्यतिरेकोपपत्तिः प्रत्यक्षेऽपि। यथा यत्र घटस्तत्र घटज्ञानम्। यत्र नास्ति तत्र तदभाव इति। यत् पुनरेतदनुपलभ्यमानार्थविषयत्वादिति, सत्यम्। अनुपलभ्यमानार्थविषयमनुमानं न पुनः स्वर्गापूर्वदेवताद्यर्थेषु लौकिकस्य प्रत्यक्षमनुमानं वा। अपि तु

आप्तोपदेशसामर्थ्यात् शब्दादर्थसंप्रत्ययः।

न ह्ययं शब्दमात्रात् स्वर्गादीन् प्रतिपद्यते, किं तु पुरुषविशेषाभिहितत्वेन प्रमाणत्वं प्रतिपद्यते। तथाभूतात् शब्दात् स्वर्गादीन् प्रतिपद्यते। न चैवमनुमाने।

---

१. अर्थे संप्र॰ J

तस्मात् नानुमानं शब्द इति। [१]शब्दं चोल्लिखन्ती प्रतिपत्तिः शब्दात् नानुमानादिति, एतेनाद्विप्रवृत्तित्वं व्याख्यातम्॥

यत् पुनरेतत् संबन्धाच्चेति। अस्ति शब्दार्थयोः संबन्धोऽनुज्ञातः, अस्ति च प्रतिषिद्धः। वाच्यवाचकभावलक्षणः संबन्धोऽनुज्ञातः, अस्य शब्दस्यायमर्थो वाच्य इति। यः पुनरयं स्वाभाविकः शब्दार्थयोः संबन्ध इति **कैश्चिद**भ्युपगम्यते स प्रतिषिद्धः। न स्वाभाविकः शब्दार्थयोः संबन्धोऽस्ति। कथं नास्ति? प्रमाणतोऽनुपलब्धेः। तत्र प्रत्यक्षेण [२]तावच्छब्दार्थसंबन्धस्यानुपलब्धिरतीन्द्रियविषयत्वात्। यस्मात् शब्दस्यातीन्द्रियोऽप्यर्थो विषयः, तस्मात् न प्रत्यक्षेणोपलब्धिरिति॥५२॥

पूरणप्रदाहपाटनानुपलब्धेश्च संबन्धाभावः॥२।१।५३॥

अनुमानेनोपलप्स्यत इति चेत्? नानुमानेनापि विकल्पानुपपत्तेः। शब्दो वार्थदेशमुपसंपद्यते, अर्थो वा शब्ददेशम्। उभयं वा। [३]न तावदर्थः शब्ददेशमुपसंपद्यते, पूरणप्रदाहपाटनानुपलब्धेः।

पूरणप्रदाहपाटनानुपलब्धेश्च संबन्धाभावः।

आस्यैकदेशस्थानकरणोच्चारणीयः शब्द इति अन्नाग्न्यसिशब्दोच्चारणे पूरणप्रदाहपाटनानि गृह्येरन्। मूर्तिमांश्च महान् पदार्थो मोदकादिर्गवादिवदागच्छन्नुपलभ्येत। ततश्च [४]शब्देन लोकव्यवहार उच्छिद्येत। अथ शब्दोऽर्थान्तिकमुपसंपद्यते, तस्याप्यनुपपत्तिर्व्याघातात्। नित्यश्च शब्दः सन्तानवृत्त्या चागच्छतीति व्याहतम्, अथ नागच्छत्यर्थदेश एव भवतीति, नित्यश्च भवति चेत्यनिवृत्तो व्याघातः। स्थानकरणप्रयत्नासंभवाच्चार्थदेशे न भवति। अथ न गच्छति न भवति तत्र व्यज्यते एको वितत्यावस्थित इति चेत्? न, सर्वार्थोपलब्धिप्रसङ्गात्। यदि सर्वशब्दा एव

---

१. चोल्लिखिता प्रति॰ C २. °शब्दार्थस्या॰ C ३. न....संपद्यते om C ४. शब्देन om C

वितत्यावस्थिताः स्थानकरणादिनिमित्तसन्निधाने सति व्यज्यन्त इति मन्यसे[१], सर्वार्थानामुपलब्धिः प्राप्ता। यदेकस्य शब्दस्य व्यञ्जकं तच्छब्दान्तराणामपीति वितत्यावस्थितस्य[२] शब्दो व्यज्यत इति स्वविषयव्याप्त्यवस्थाने सति यत्र क्वचनावस्थितानां गोशब्दाभिव्यक्तौ ककुदादिमदर्थप्रत्यायनं स्यात्।

अथ सामान्यवदेतत् स्यात्? यथा सामान्यं स्वविषयं व्याप्यावस्थितं न च सर्वत्रोपलभ्यते, तथा शब्देऽपि स्वविषयं व्याप्यावस्थिते नियमो भविष्यतीति? न युक्तमेवं भवितुम्। सामान्यस्याश्रयोपलब्धिर्व्यक्तिहेतुः। न पुनः शब्दस्याश्रयोपलब्धिरस्ति। न च वाच्ये वृत्तिः। तस्मादसमो दृष्टान्तः। यदि च वाच्यार्थवृत्तिः शब्दः स्यात् वाच्योपलब्धावकृतसमयेनापि प्रतिपद्येत, यथा सामान्यम् अकृतसमयोऽपि प्रतिपद्यत इति। तस्मान्नानुमानादपि प्रतिपद्यते।

इतश्च स्वाश्रयादन्येन न संबन्धी शब्दो गुणत्वात्। अन्येन गवादिना। शब्दं प्रति समवायो नास्ति, शब्दस्याकाशवृत्तित्वात्। नापि शब्दार्थयोरेकार्थसमवायः, [३]स्वात्मन्येकस्यानारम्भात्। उपमानात् प्रतिपत्स्यत इति न। उपमानस्यायं न विषयः। आगमात् प्रतिपत्स्यत इति चेत्? स एवात्र विचार्यते किं शब्दार्थौ संबद्धौ, आहोस्विदसंबद्धाविति।

यत्त्विदं भवताभिधीयते स्मृत्याद्यपेक्षत्वादनुमानसाधर्म्यादनुमानं शब्द इति, तस्मादेव नानुमानम्। न हि तेनैव तस्य साधर्म्यमिति। अथ स्मृत्यादिसाधर्म्यात् शब्दानुमानयोरेकत्वमेव? तर्ह्येकं प्रमाणं प्राप्नोति। अस्ति ह्यर्थपरिच्छेदकत्वं सर्वप्रमाणानां साधर्म्यमिति। भवत्वेकं प्रमाणं किं नो बाध्यत इति? कथं न बाध्यते? यदभीष्टं तन्निवर्तते। किं चाभीष्टम्? प्रत्यक्षानुमाने भिन्ने इति। अथ सामान्यमाश्रित्याभेदो देश्यते, तदोपेक्षया वर्तितव्यम्। सामान्यमाश्रित्याभेदो विशेषमाश्रित्य भेद इति न किञ्चिद् बाधितम्। न चानुमानं शब्दः, स्वपरात्मप्रत्यायकत्वात्। यत् स्वपरात्मप्रत्यायकं तदनुमानं न भवति। यथा प्रदीपः। प्रदीपो

---

१. मन्यसे om J २. °स्थितश्च शब्दो व्यक्त इति। C ३. ताभ्यामेकस्या° C

येन क्रियते, तस्याप्युपलब्धिसाधनं भवति, इतरस्यापि। शब्दोऽप्येवम्। तस्मात् नानुमानमिति॥५३॥

शब्दार्थव्यवस्थानादप्रतिषेधः॥२।१।५४॥

यदि शब्दार्थावसंबद्धौ स्याताम्, शब्दादर्थप्रत्ययव्यवस्थानं न स्यात्। शब्दः संबद्धोऽर्थं प्रतिपादयति, प्रत्ययनियमहेतुत्वात् प्रदीपवत्। यः प्रत्ययनियमहेतुः स संबद्धोऽर्थप्रतिपादको दृष्टः। यथा प्रदीपः। शब्दश्चैवंधर्मा तस्मात् शब्दोऽपि संबद्धार्थप्रतिपादक इति। प्रत्ययो वा पक्षीकर्तव्यः संबद्धाभ्यां शब्दार्थाभ्यां वस्तुप्रत्ययो भवति नियमात्, कुण्डलीति प्रत्ययवदिति॥५४॥

न, सामयिकत्वाच्छब्दार्थसंप्रत्ययस्य॥२।१।५५॥

न संबन्धकारितं शब्दार्थव्यवस्थानम्। किं तर्हि? समयकारितम्। कः पुनरयं समयः? अभिधानाभिधेयनियमनियोगः। तस्मिन्नुपयुक्ते[१] शब्दार्थव्यवस्था भवति। कश्चिच्च संबन्धोऽनुज्ञात इति यदवोचाम समयं तदवोचाम इति। सेयं शब्दार्थव्यवस्था अन्यथापि भवतीत्यहेतुः। अयं च वाच्यवाचकभावलक्षणः संबन्धः स्वाभाविकशब्दार्थसंबन्धवादिनाभ्यनुज्ञेयः। न हि स्वाभाविकसंबन्धवादिनोऽनुपयुक्तशब्दार्थसंबन्धस्य शब्दश्रवणात्[२] विशेषप्रत्ययो भवति। स पुनः समयः कुतः प्रत्येतव्यः? पदज्ञानात् लोकतश्चेति। [३]तद्धि शास्त्रं समयस्याविलोपार्थं प्रणीतम्। लोकतश्च समयो बोद्धव्यः। मात्रादींस्तेषु तेष्वर्थेषु तांस्तान् शब्दान् प्रयुञ्जानानुपलभ्य सोऽपि तथैव शिक्षितस्तानेव शब्दांस्तेषु तेष्वर्थेषु प्रयुङ्क्ते, न पुनरेनं कश्चिल्लिपिमिव शिक्षयतीति॥५५॥

---

१. समययुक्ते C २. ग्रहणात् C ३. तदिदं समयशास्त्रं शब्दस्या° C

जातिविशेषे चानियमात्॥२।१।५६॥

न स्वाभाविकः शब्दार्थसंबन्धः। यदि स्वाभाविकः शब्दार्थयोः संबन्धोऽभविष्यत्, न जातिविशेषे शब्दार्थव्यवस्थाभविष्यत्। अस्ति तु यथाकामं प्रयोगः। जातिविशेषे यथाकामं प्रयोगो दृष्टः। न पुनः स्वाभाविकेन संबन्धेन संबद्धानां जातिविशेषे व्यभिचारो[1] दृष्टः। न हि प्रदीपोऽस्माकमन्यथा प्रकाशयति, अन्यथा जातिविशेष इति। जातिविशेषशब्देन पुनर्देशोऽभिधीयत इति॥५६॥

॥शब्दसामान्यपरीक्षाप्रकरणम्॥

[शब्दविशेषपरीक्षाप्रकरणम्]

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः॥२।१।५७॥

तद .... भ्यः इति सूत्रम्। तदित्यधिकृतशब्दाभिधानात् शब्दविशेषाधिकारः। यस्मात् प्राप्तमपि प्रकरणेन शब्दं तच्छब्देन पुनरभिधत्ते, तेन[2] ज्ञापयति, शब्दविशेषं प्रतीयं चिन्ता, न तु शब्दमात्रं प्रति। अन्यथैवं वक्तव्यम्, अप्रमाणं शब्दोऽनृतव्याघातपुनरुक्तदोषेभ्य इति। अप्रामाण्यमर्थस्याप्रत्यायकत्वम्। अनृतत्वमयथार्थाभिधानम्। व्याघातः पदयोर्वाक्ययोर्वा सहासंभवः। पुनरुक्तं पूर्वाभिहितार्थाभिधानम्। उदाहरणानि **भाष्ये**।

तत्रानृतत्वे हेतुः फलादर्शनम्। अग्निहोत्रं जुहुयादिति विधिवाक्यम्। अस्य व्याघातः कालासंभवेन उदितानुदितसमयाध्युषितप्रतिषेधात्। न चान्यः कालो विद्यते यत्राग्निहोत्रहवनं स्यात्। उदितानुदितसमयाध्युषितवाक्यानां वा परस्परविरोधः। प्रथमोत्तमयोः सामिधेन्योस्त्रिरभिधानं पुनरुक्तम्। उदाहरणं च **भाष्ये**।

---

१. जातिव्यभि J २. तत्र C

दृष्टान्तत्वेनैतानि वाक्यान्युपन्यस्य एकवक्तृकत्वेन[१] शेषवाक्यानामप्रमाणत्वमिति[२]। अग्निहोत्रादिवाक्यानां वा प्रमाणत्वप्रतिषेधो वेदैकदेशत्वेन तदन्यवाक्यवत्। पुनरुक्तायां पूर्वमुत्तरं वा न वाच्यमेकेन प्रतीयमानत्वात्॥५७॥

न कर्मकर्तृसाधनवैगुण्यात्॥२।१।५८॥

यत् तावदनृतत्वादप्रमाणं वेदवाक्यानि फलादर्शनादिति तदत्र संप्रधार्यम्। किं फलादर्शनं वेदवाक्यानामप्रमाणत्वात्, आहो कर्मकर्तृसाधनवैगुण्यादिति। वयं तु ब्रूमः, कर्मकर्तृसाधनवैगुण्यादिति। फलादर्शनाच्च कारणानामसामग्र्यं गम्यते। इष्टेः करणसाधनत्वेनाभ्युपगमाच्चादोषः[३]। न चेयमिष्टिर्मया साक्षात् पुत्रकारणत्वेनाभ्युपगम्यते, अपि तु पितराविष्ट्या संप्रयुज्यमानौ पुत्रं जनयतः। तत्र न ज्ञायते किं पित्रोरसाद्गुण्यात् पुत्रजन्म न भवति, आहोस्वित् इष्टेरसाद्गुण्यादिति। मन्त्राश्चेष्टिसाधनत्वेन प्रयुज्यमाना इष्ट्यङ्गं भवन्ति। तत्रापि न ज्ञायते किमिष्टिर्मन्त्राणां वैगुण्यात् न सम्पन्ना, आहोस्वित् दर्भेध्मादेः[४] कारणस्य वैगुण्यादिति। यथैव मन्त्राणां न्यूनाधिकभावेन प्रयुज्यमानानामिष्टिर्न निर्वर्तते, तथा दर्भेध्मादेरपि साधनस्य वैगुण्यादिति।

न केवलं [५]साधनवैकल्यादेवेष्टेरनभिनिर्वृत्तिः, तथेष्टेः साधयितुः कर्मणश्चासाद्गुण्यादिति। उपेत्येष्टिसम्पदं न केवलैवेष्टिः कारणमित्युक्तम्। तत्र पुत्रजन्मादर्शने न युक्तं वक्तुं मनुष्यधर्मणा मन्त्राणामसामर्थ्यात्[६] पुत्रानुत्पत्तिरिति। उभयथा दृष्टत्वात् सन्देह इति चेत्-न, अभ्युपेतहानेः। अथ मन्यसे त्रिकारणं पुत्रजन्म, तत्रान्यतरकारणवैकल्यात् पुत्रो न भवतीति कारणवैकल्यं गम्यते। तत्र यथैव पित्र्योर्वैगुण्यात् पुत्रानुत्पत्तिः, तथा मन्त्राणामप्यप्रमाणत्वादिति सन्दिह्यते। नाभ्युपेतहानेः। पूर्वं

---

१. °कर्तृकत्वेन C २. °वाक्यानुमानमप्रमाणत्व इति J ३. °नाविरोधः C ४. दर्भेन्धनादेः C ५. °वैगुण्यादे° C ६. मन्त्राणाम् om J

भवताभ्यधायि वेदोऽप्रमाणमिति, अधुना त्वभिधीयते सन्दिग्धं प्रमाणत्वमिति। एवं च ब्रुवता पूर्वो वादस्त्यक्तो भवति। समानमिति चेत्? अथ मन्यसे समानमेतद् भवतोऽपि किं पित्रोर्वैगुण्यात् पुत्राजन्म उताहो वेदवाक्यानामप्रमाणत्वादिति सन्दिह्यते। नासाधनात्। न मयैतत् साध्यते वेदवाक्यानि प्रमाणमप्रमाणं वेति। भवता तु साध्यते। तत्र मया भवतः साधनान्यतरवैगुण्यात् पुत्रजन्म न भवतीति सन्दिग्धो हेतुरपदिश्यते। तत्सहकारित्वाच्चोपदेशो दारुमथनवदिति। नेयमिष्टिः साक्षात् कारणत्वेन पुत्रजन्मन उपदिश्यते। अपि तु पुत्रकाम इष्टिं कुर्वीत इति। यथाग्निकामो दारुणी मथ्नीयादित्युपदेशः। तत्र च कर्तृकर्मणोर्वैगुण्यादग्निर्न भवतीति नोपदेशवैयर्थ्यम्। तथेहापीत्यदोषः। सामस्त्ये फलनिष्पत्तिदर्शनाच्च। यत्र च समस्तानि कारणानि तत्र फलाभिनिर्वृत्तिः[1] दृष्टेत्यदोषः। यच्चदं वाक्यम्

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः

इति, तदपि वेदवाक्यस्य पक्षीकृतत्वादव्यापकम्। अथ यान्येवंधर्मकाणि वाक्यानि तानि पक्षीक्रियन्ते, तेष्वप्येषां धर्माणां विशेषणत्वेनोपयुक्तत्वादप्रामाण्यप्रतिपादको हेतुर्वक्तव्यः। अनृतत्वादप्रमाणमिति चेत्? किमिदमनृतत्वं नाम? यद्ययथार्थाभिधानम्, नन्वयमेव प्रतिज्ञार्थोऽप्रमाणमिति। अनृतत्वं चासिद्धमित्युक्तमेतत्॥५८॥

अभ्युपेत्य कालभेदे दोषवचनात्॥२।१।५९॥

यत् पुनरेतत्, व्याघातदोषादिति

अभ्यु...नात्। न व्याघातः। अग्न्याधानकाले एवायं नियमपरिग्रहः, उदिते होतव्यम् अनुदिते होतव्यम्, समयाध्युषिते होतव्यमिति। सोऽयमभ्युपेत्य कालं यदातिक्रामति, तदाभ्युपेतकालातिक्रमात् निन्द्यते। निन्दावचने च न व्याघातः।

---

१. फलनिष्पत्तिः J

उभयप्रतिषेधानभिधानात्। नेदमन्यथा। यदि पुनरेतदुभयप्रतिषेधाभिधानं स्यात् भवेदयं प्रसङ्गो व्याघात इति। न पुनरेतानि प्रतिषेधवाक्यान्युदिते होतव्यमित्येवमादीनि। तस्मादप्रसङ्गोऽयमिति। अथ पुनरेतानि वाक्यानि होमविधिप्रतिषेधकानि स्युः, तदोदितादिग्रहणं व्यर्थम्। एवमेव वक्तव्यमित्यग्निहोत्रं जुहुयादिति यद्वाक्यं तन्न कर्तव्यमिति। एवं च संगतार्थता यथैतद् व्याख्यातम्। एवं पूर्वोत्तरे च वाक्ये संगते भवतः, हवनमनूद्य कालविशेषविधानादिति। एवमेतत्, न पुनर्यथास्माभिर्व्याघातोऽभिधीयत इति नियमहेतुर्वक्तव्यः। इदमेवोदितादिवाक्यं नियमहेतुः। कथमिति? इदमेवोदितादिवाक्यं कामतो वा विकल्प्येत[१] अभिहितं वानूद्येत इति। अभिहितानुवादो न्याय्यः। तत्र हि प्रमाणानामविसंवादः। इतरत्र[२] व्याघात इति ॥५९॥

अनुवादोपपत्तेश्च ॥२।१।६०॥

यत् पुनरेतत् पुनरुक्तदोषादिति। न पुनरुक्तदोषः, अनुवादोपपत्तेः। पुनरुक्तं नाम तस्यैवार्थस्यानङ्गीकृतविशेषस्य यत्[३] पुनर्वचनम्। अनुवादस्तु पुनः श्रुतिसामान्यादङ्गीकृतविशेषस्यार्थस्य वादः। एवं च सति यथोक्तो न दोषः। उदाहरणं **भाष्ये**। पुत्रकामेष्ट्यादिवाक्यानि प्रमा, वेदैकदेशत्वात्

भूमिरावपनं महत्

इति[४] वाक्यवत्।

इतश्च पदादिनियमात्।

द्वादश मासाः संवत्सरः

इति वाक्यवत्।

इतश्च [५]वक्तृविशेषाभिहितत्वात्

---

१. इदं पुनर्वाक्यं....प्रकल्प्येत C २. °वादादितरत्र C ३. सतः C ४. भूमेरावपनवाक्यवत् J ५. कर्तृवि° C

अग्निर्हिमस्य भेषजम्

इत्यादि वाक्यवत् ॥६०॥

वाक्यविभागस्य चार्थग्रहणात् ॥२।१।६१॥

समस्तानि वा वेदवाक्यानि पक्षीकृत्याभिधीयन्ते, प्रमाणं वेदवाक्यानि अर्थविभागवत्त्वात्, **मन्वा**दिवाक्यवत्। यथा मन्वादिवाक्यानि अर्थविभागवन्ति अर्थविभागवत्त्वे सति प्रामाण्यम्[१], तथा च वेदवाक्यान्यर्थविभागवन्ति। तस्मात् प्रमाणमिति ॥६१॥

विध्यर्थवादानुवादवचनविनियोगात् ॥२।१।६२॥

विभागश्च त्रिविधो भवति

विध्यर्थवादानुवादवचनविनियोगात्।

त्रिधा खलु ब्राह्मणवाक्यानि भवन्ति, विधिवचनानि, अर्थवादवचनानि अनुवादवचनानि च ॥६२॥

विधिर्विधायकः ॥२।१।६३॥

तत्र

विधिर्विधायकः।

यद् वाक्यं विधायकं देशकं स विधिः। विधिस्तु नियोगोऽनुज्ञा वा। यद्वाक्यं विधत्ते इदं कुर्यादिति स नियोगः[२]। अनुज्ञा तु यत् कुर्वाणकमनुजानाति

१. °वाक्यान्यर्थविभागवत्त्वे सति प्रमाणम् C २. विधिः for नियोगः J

तदनुज्ञावाक्यम्। यथाग्निहोत्रादिवाक्यमेव तत्साधनावाप्तिप्रवृत्तिपूर्वकत्वमनुजानाति[१] ॥६३॥

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥२।१।६४॥

एषामुदाहरणानि **भाष्ये** ॥६४॥

विधिविहितस्यानुवचनमनुवादः॥२।१।६५॥

विध्यनुवचनं चानुवादो [२]विहितानुवचनं च। पूर्वः शब्दानुवादः। परोऽर्थानुवादः। यथा पुनरुक्तं द्विविधम्, शब्दपुनरुक्तमर्थपुनरुक्तं च। शब्दपुनरुक्तम्, अनित्योऽनित्य इति। अर्थपुनरुक्तम्, अनित्यो निरोधधर्मक इति॥६५॥

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥२।१।६६॥

कोऽस्य सूत्रस्यार्थः? प्रतीतार्थशब्दाभ्यासोऽनुवादपुनरुक्तयोः सामान्यम्। पुनरुक्तेऽपि प्रतीतार्थः शब्दोऽभ्यस्यते, अनुवादेऽप्येवम्। अतः प्रतीतार्थशब्दाभ्यासादुभयमसाध्विति॥६६॥

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥२।१।६७॥

शीघ्र ....षः इति। यथा शीघ्रं गम्यताम्, शीघ्रतरं गम्यतामिति च तरपा क्रियातिशयोऽभिधीयते तथानुवादलक्षणेनाभ्यासेन क्रियातिशयोऽभिधीयत इति।

---

१. प्रवृत्तमनु॰? प्रवृत्तिमनु॰ J २. विधिविहि॰ C

अस्य प्रयोगः। अर्थवाननुवादलक्षणोऽभ्यासः प्रत्ययविशेषहेतुत्वात्, शीघ्रतरगमनोपदेशवत्। यथा शीघ्रशब्दात् शीघ्रतरशब्दः प्रयुज्यमानः प्रत्ययविशेषहेतुत्वात् न पुनरुक्तदोषं लभते, तथानुवादलक्षणोऽभ्यासः प्रत्ययविशेषहेतुत्वात् न पुनरुक्तदोषं लप्स्यत इति। कः पुनरसौ विशेषो भवतीति वक्तव्यम्। तदुच्यते। आद्ये पचेति शब्दप्रयोगे पाको निर्वर्तनीय इति पक्तुः प्रत्ययो भवति। द्वितीयात् तु पचेति शब्दादवधारणप्रत्ययो भवति, मयैव पक्तव्यमिति। सातत्यप्रत्ययो वा भवति, सततं मया पक्तव्यमिति। अध्येषणप्रत्ययो वा भवति, मामेवायमधिकुरुत इति। आशुप्रत्ययो वा भवति, आशु मया पक्तव्यमिति। एवं श्रोतुः। यथा च श्रोतुः, तथा च वक्तुरप्येते एव प्रत्यया भवन्तीति। पुनरुक्ते तु न कश्चिद् विशेषो गम्यत इत्यस्ति महान् विशेषः पुनरुक्तानुवादयोः। एवमन्योऽप्यनुवादस्य प्रयोगो लोके[१] बोद्धव्य इति ॥६७॥

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥२।१।६८॥

किं पुनः प्रतिषेधहेतूद्धारादेव प्रमाणता वेदवाक्यानां सिद्धा? न। किं कारणम्? न साधनमन्तरेण सिद्धिरस्तीति। कुतस्तर्हि? प्रमाणतः। किं तत् प्रमाणम्? अर्थविभागवत्त्वम्।

मन्त्रा...ण्यात्। च शब्दः पूर्वहेत्वनुकर्षणार्थः। यथा मन्त्रायुर्वेदवाक्यानि पुरुषविशेषाभिहितत्वात् प्रमाणम्, तथा वेदवाक्यानीति पुरुषविशेषाभिहितत्वं हेतुः। किमायुर्वेदस्य प्रामाण्यम्, यत् तदायुर्वेदेनोपदिश्यते इदं कृत्वेष्टमधिगच्छति, इदं कृत्वानिष्टं जहाति। तस्यानुष्ठीयमानस्य तथाभावोऽविपर्ययः एतत् प्रामाण्यम्। किंकृतमेतत्? आप्तप्रामाण्यकृतम्। किं पुनराप्तानां प्रमाणत्वम्? साक्षात्कृतधर्मता। यं ते पदार्थमुपदिशन्ति, स तैः साक्षात्कृतो भवतीति। भूतदया च। यस्मै चोपदिशन्ति तं प्रत्येषामनुकम्पा भवति। यथा परिज्ञातार्थचिख्यापयिषा

---

१. वाक्ये for लोके C

चास्य भवति। एतेन त्रिविधेन विशेषणेन विशिष्टो वक्ता आप्तः। तेन यः उपदेशः क्रियते, स प्रमाणमिति।

दृष्टार्थवाक्याविसंवादेन वा शेषानुमानम्। यद् वाक्यं दृष्टार्थं यथा

ग्रामकामो यजेत

इत्येवमादि, तेन[१] शेषानुमानं प्रमाणमिति[२]।

लौकिकमपि वाक्यमनेनैव त्रिप्रकारेण विशेषणेन विशिष्टस्य वक्तुः प्रमाणं भवति। अस्य प्रयोगः। प्रमाणं वेदवाक्यानि वक्तृविशेषाभिहितत्वात्, मन्त्रायुर्वेद-वाक्यवदिति।

एककर्तृकत्वेन वा मन्त्रायुर्वेदवाक्यानि पक्षीकृत्यालौकिकविषयप्रतिपादकत्वेन वैधर्म्यहेतुर्वक्तव्यः।

पौरुषेयत्वमसिद्धं नित्यत्वादिति चेत्? अथ मन्यसे नित्यानि वेदवाक्यानि। नित्यत्वाच्चैषां प्रामाण्यम्। तस्मात् पौरुषेयत्वमसिद्धम्। न, असिद्धत्वात्। सिद्धे नित्यत्वे एतद् युक्तं वक्तुम्। तत्तु न सिद्धमित्यतो न युक्तमेतत्। यदि न नित्यानि, कथं प्रमाणम्? प्रतिपादकत्वात् प्रमाणं न नित्यत्वात्।

केचित् तु ब्रुवते न किञ्चित् नित्यं प्रमाणमस्तीति प्रमाणत्वादेवानित्यानीति, तत्तु न सम्यगिति पश्यामः। नित्यमपि प्रमाणं यथा मनः आत्मा च। प्रमाणशब्दस्य समुदायवाचित्वात्। अयं खलु प्रमाणशब्दः समुदाये वर्तते। तत्र च नित्यमनित्यं चानेकं समुदायि प्रमाणस्याङ्गत्वात् प्रमाणमित्युच्यते। यथा प्रदीपः। एवं च नित्यमपि प्रमाणमस्तीति। यदा च परमाण्वादि नित्यमितरवस्तुसाधकत्वेनोपादीयते, तदा परमाण्वादेर्नित्यस्य प्रमाणभावात् प्रमाणत्वादनित्य इत्यनेकान्तो[३] भवति इत्यनुत्तरमेतत्।

तस्माद् युक्तमर्थविभागवत्त्वादनित्यत्वं लौकिकवाक्यवदिति। यथा अर्थ-विभागवन्ति लौकिकवाक्यानि तथा च वेदवाक्यानि, तस्मादनित्यानि इति।

---

१. तेन वा C २. प्रमाणत्व इति J ३. इत्ययं नैका° C

लौकिकवाक्यान्यपि नित्यानीति चेत्? अथ मन्यसे यान्येतानि लौकिकवाक्यन्यर्थविभागवन्ति, तान्यपि नित्यानीति? अर्थविसंवादो[१] न स्यात्। योऽयमर्थविसंवादो [२]लौकिके वाक्ये स न स्यात्। दृष्टस्तु। तान्यनित्यानीति चेत्? विशेषहेतुर्वक्तव्यः। तुल्येऽर्थविभागवत्त्वे तुल्ये चार्थप्रतिपादकत्वे लौकिकान्यनित्यानि वैदिकानि नित्यानीति विशेषहेतुर्वक्तव्यः। तुल्यम्, भवतोऽपि अनित्यत्वे विशेषहेतुर्वक्तव्य इति।

उक्तोऽर्थविभागवत्त्वं हेतुः। इतश्च वर्णवत्त्वात् वर्णवन्ति लौकिकानि वाक्यानि, अनित्यानि च। तथा च वेदवाक्यानि। तस्मात् तान्यप्यनित्यानि। इतश्च, सामान्यविशेषवत्त्वे सति श्रोत्रग्राह्यत्वात् लौकिकवाक्यवदेव। इतश्च पदादिनियमात्[३] लौकिकवाक्यवत्।

दर्शनस्य परार्थत्वादिति चेत्? अथ मन्यसे दर्शनं परार्थं दृष्टम्। दर्शनशब्द उच्चारणार्थः। तच्चोच्चारणं परप्रतिपादनार्थम्। न हि कश्चिदात्मप्रतिपत्तये शब्दमुच्चारयति। यदि चायं नित्यो भवति ततः शब्दादर्थप्रत्ययो युक्तः। अथानित्य उत्पन्नप्रध्वंसी ततोऽस्य श्रोतुर्नित्यमपूर्वः शब्दः श्रोत्रविषयमेति, न चापूर्वशब्दश्रवणात् संप्रतिपत्तिर्युक्ता। न हि नारिकेलद्वीपवासिनोऽप्रसिद्धगोशब्दस्य[४] गोशब्दश्रवणात् ककुदादिमदर्थप्रतिपत्तिर्भवति। तथा चानित्यवादिनः सर्वे शब्दाः। तस्मादस्यापि शब्दात् प्रत्ययनियमो न प्राप्त इति। न, अनेकान्तात्, क्षणध्वंसिष्वपि प्रदीपेषु परप्रत्यायनं[५] दृष्टमिति। न, उदाहरणवैधर्म्यात्, प्रदीपोऽनाख्यातः प्रकाशनीयार्थसंबन्धात् प्रकाशनीयार्थसंप्रतिपत्तिं करोति न पुनरनाख्यातः शब्द इति। क एवमाह अनाख्यातः शब्दः प्रतिपादयतीति? संबन्धस्यादर्शनादाख्यानमनुपपन्नम्। उक्तमेतद्, यथा न शब्दार्थयोः प्राप्तिलक्षणः संबन्धोऽस्तीति। वाच्यवाचकभावलक्षणस्तु पौरुषेयः संबन्धः, स च कृतक इति,

---

१, २. विभाग C ३. पदवत्त्वात् C ४. नालिकेर J; °गोशब्दस्य om C
५. °ध्वंसिषु प्रदीपादिषु अपूर्वस्य प्रत्यायनं C

स च संसारानादित्वात् लोकतोऽवगम्यते। ये तु संसारमादिमन्तं वर्णयन्ति, त एवमुपालभ्याः।

अथ योऽयमभिलापो नित्या वेदा[१] इति, स कथम्? संप्रदायस्याविच्छेदात् तान्येव वेदवाक्यानि मन्वन्तरचतुर्युगान्तरेषु सम्प्रदायाभ्यासाविच्छेदेन प्रवर्तन्ते। तदपेक्षया लौकिकाः शब्दान् प्रयुञ्जते नित्या वेदा इति, यथा नित्याः सरितः, नित्याः पर्वता इति। एतच्च **मन्वा**दिवाक्येषु समानम्। कुत एतत् सम्प्रदायाभ्यासाविच्छेदात् नित्यत्वं न पुनर्नित्यत्वादेव? अनित्यत्वे प्रमाणाविघातात्[२]। यानि मया अनित्यत्वे प्रमाणान्युपदिष्टानि[३] तानि न विहन्यन्ते। तेषामविघातादनित्यत्वे सति सम्प्रदायाभ्यासाविच्छेदात् नित्यत्वोपचार इति॥६८॥

॥शब्दविशेषपरीक्षाप्रकरणम्॥

॥इति औद्द्योतकरे न्यायवार्त्तिके द्वितीयाध्यायस्य प्रथमाह्निकम्॥

---

१. वर्णाः for वेदाः C २. अनित्यत्वोक्तप्र° C ३. °न्युपन्यस्तानि C

द्वितीयाध्याये द्वितीयाह्निकम्

[प्रमाणचतुष्ट्वपरीक्षाप्रकरणम्]

न चतुष्ट्वमैतिह्यार्थापत्तिसंभवाभावप्रामाण्यात् ॥२।२।१॥

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि [१.१.३] इति सूत्रम्। तस्याक्षेपः, **न चतुष्ट्वमैतिह्यार्थापत्तिसंभवाभावप्रामाण्यात्।**

अस्यार्थः। अयथार्थोऽयं प्रमाणोद्देश इति। न चत्वार्येव प्रमाणाणि, ऐतिह्यार्थापत्तिसंभवाभावा अपि प्रमाणानीति।

संशयव्युदासार्थं वा ऐतिह्यादय उपक्षिप्य[१] प्रतिषिध्यन्ते। प्रत्यक्षादीनि च प्रमाणानीति। ऐतिह्यादीनि चेति **केचित्** मन्यन्ते। तत्र श्रोतुः संशयः स्यात् किं विद्यमाना ऐतिह्यादयो नाभिहिताः, उताविद्यमाना इति।

विधिन्यूनतापरिहारार्थं वा प्रकरणम्। विद्यमानान्यैतिह्यादीनि नाभिहितानीति विधिहीनं[२] शास्त्रं स्यात्। दोषवतां दोषानभिधानाद् दोषहीनं वा शास्त्रं स्यादिति अत उद्दिश्य निवर्त्यन्ते। दोषवन्त ऐतिह्यादय इत्यतो नाभिधीयन्त इति। दोषस्तर्हि वक्तव्यः। अथ दोषो नाभिधीयते दोषहीनं शास्त्रमिति तत्परिहारार्थं प्रकरणमुपदिश्यते।

प्रत्यक्षादिष्वन्तर्भावप्रदर्शनार्थं वा। ऐतिह्यादीनि प्रत्यक्षादिष्वन्तर्भावयितुं[३] ये यत्रान्तर्भवन्ति तत्र तेषां प्रदर्शनार्थं प्रकरणमिति। सिद्धत्वादनारम्भः। नन्वयमर्थश्चत्वार्येव प्रमाणानीत्येतस्मिन्नेव विभागोद्देशसूत्रे सिद्ध इति सिद्धत्वात् पुनरनारम्भ इति। न, अवधारणप्रयोजनस्य इतः सिद्धेः। येन न्यायेन चत्वार्येव प्रमाणानीत्येतदवस्थाप्यते स न्याय इह प्रकरणे वर्ण्यते। तस्मादारभ्यमेवेति।

---

१. उपदिश्य C २. विधिवाक्यहीनं C ३. °र्भावयता J

किमिदमैतिह्यं नाम? अनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यम् इति होचुर्वृद्धाः कथयन्तीति।

अर्थादापत्तिरर्थापत्तिः। आपत्तिः प्राप्तिः प्रसङ्गः। यस्मिन् वाक्येऽभिधीयमानादर्थादन्योऽर्थ आपद्यते सार्थापत्तिः। यथासत्सु मेघेषु वृष्टिर्न भवतीति किमत्रार्थादापद्यते? सत्सु भवतीति।

संभवो नामाविनाभाववर्तिनः पदार्थस्य ग्रहणादन्यस्य सत्ताविज्ञानम्। यथा द्रोणस्य सत्ताग्रहणादाढकस्य सत्तेति।

अभावः प्रत्यनीकस्य ग्रहणात् तद्विरोधिनो ग्रहणम्। यथा विधारके वाय्वभ्रसंयोगे सति गुरुत्वप्रतिबन्धाद् अपामपातः प्रसिद्धः[१]। तदपामपातेन विरोधिनं वाय्वभ्रसंयोगं प्रतिपद्यत इति॥१॥

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसंभवाभावानर्थान्तरभावाच्चाप्रतिषेधः ॥२।२।२॥

तान्येतान्यैतिह्यादीनि एवंभूतानि लक्षणभेदादेतेष्वेवान्तर्भवन्ति इति न पृथगुच्यन्ते। विषयाभावाच्च। न हि प्रत्यक्षादिप्रमाणव्यतिरेकी विषय ऐतिह्यादीनां संभवति[२]। अतश्च न प्रमाणान्तराणि। अथ प्रयोजनभेदात् भेदं प्रतिपद्यसे[३]? एवं तर्हि अष्टत्वं निवर्तते। यदभ्युगतं प्रमाणाष्टत्वं तन्निवर्तते प्रयोजनभेदात् प्रमाणभेदमभ्युपगच्छत इति। एककरणनिमित्तश्च प्रयोजनभेदो दृष्ट इत्यनेकान्तः। यथैकं चक्षुरनेकनीलादिभिन्नरूपग्रहणप्रयोजनमिति। इन्द्रियानेकत्वं वा। अथ प्रयोजनभेदाद् भेदं मन्यसे? एकमिन्द्रियमनेकं प्राप्नोति। अथ विषयसामान्याव्यतिरेकादेकमिन्द्रियम्? न युक्तस्तर्हि प्रतिषेधः,

---

१. पातः प्रतिषिद्धः C २. ऱेकेण विषयाः...न्ति C ३. भिद्यन्त इति मन्यसे C

न चतुष्टमैतिह्यार्थापत्तिसंभवाभावप्रामाण्यात्

इति।

यद्येतानि प्रमाणानि न प्रमाणान्तराणि, तर्हि क्व अन्तर्भवन्तीति वक्तव्यम्। अन्तर्भावप्रदर्शनार्थं सूत्रम्, **शब्द...षेधः।**

शब्द ऐतिह्यमन्तर्भवति, समानलक्षणत्वात्। न शब्दलक्षणमैतिह्यात् निवर्तते। सोऽयं भेदः सामान्येन संगृहीतः। अनुमानेऽर्थापत्तिसंभवाभावानामन्तर्भावः, समानलक्षणत्वात्। अनुमाने अर्थापत्तिसंभवाभावा अन्तर्भवन्ति[१]। कथमर्थापत्तिरनुमानेन संगृह्यते? द्वयोरेकतरप्रतिषेधस्य द्वितीयाभ्यनुज्ञाविषयत्वात्। यत्र यत्र द्वयोर्वस्तुनोरेकतरद् वस्तु प्रतिषिध्यते तत्र तत्र द्वितीयाभ्यनुज्ञा दृष्टा। यथा दिवा न भुङ्क्ष इत्यभिधानाद् रात्रौ भुङ्क्ष इति गम्यते।

एके तु ब्रुवते, नेयमर्थापत्तिर्दिवा न भुङ्क्ष इति। अत्र किलावधारणद्वयम् दिवा न भुङ्क्ष एव, दिवैव न भुङ्क्ष इति च। उभयप्राप्तौ न वक्तव्यं रात्रौ भुङ्क्ष इति। एतत् तु न सम्यग्, असंभवात्। दिवा न भुङ्क्ष एवेत्ययमर्थोऽसंभवेन निराकृतः। न हि कश्चिद् दिवा भुङ्क्ष एव। भुञ्जानोऽपि तावत् न भुङ्क्ष एव, किं पुनरभुञ्जान इति? तस्माद् असंभवेनास्यार्थस्य निराकृतत्वात् कालप्रतिषेधोऽनेन वाक्येन दिवा न भुङ्क्ष इति। अन्यथा अनर्थकं स्यात्। [२]क्रियान्तरनिवृत्तेरसंभवेन निराकृतत्वात् कालप्रतिषेधस्य चानभ्युपगमात् अनर्थकं वाक्यम्। भवत्वनर्थकं वाक्यम्, किं नो बाध्यते। कथं न बाध्यते[३]? यदभ्युपेतं तन्निवर्तते। किं चाभ्युपेतम्? क्रियान्तरप्रतिषेधोऽयं न कालप्रतिषेध इति। न चेदमनर्थकम्। तस्मादुभयोः सामर्थ्यप्राप्तयोः[४] एकतरप्रतिषेधे द्वितीयाभ्यनुज्ञानादनुमानमेवार्थापत्तिः। कतमदनुमानम्? सामान्यतोदृष्टम्।

एतेन संभवाभावौ व्याख्यातौ। संभवोऽनुमानम्। अभावोऽप्येवमेव[५]। तच्च वर्णितम्। अनयोरपि सामान्यतोदृष्ट एवान्तर्भाव इति। तदेवमन्तर्भावात् पृथगनपदेश इति ॥२॥

---

१. अनुमाने...भवन्ति om C २. क्रियान्तरप्रतिषेधनिवृत्तेः C ३. कथं न बाध्यते om C ४. द्वयोः for उभयोः सामर्थ्यप्राप्तयोः C ५. ष्यनुमानमेव C

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥२।२।३॥

सत्यमेतानि प्रमाणानि, न तु प्रमाणान्तराणीत्युक्तम्। तत्रार्थापत्तेः प्रमाणभावाभ्यनुज्ञा नोपपद्यते। तथा हि इयम्,

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात्।

येयं भवतार्थापत्तिः प्रमाणत्वेन प्रतिपाद्यते सा न प्रमाणम्। अप्रमाणमिति नार्थस्यैकदापि प्रतिपादिका। यथा मेघेष्वसत्सु वृष्टिर्न भवति सत्सु भवतीत्यर्थादापन्नं सत्स्वप्येकदा न भवतीत्यनैकान्तिकी अर्थापत्तिः। अर्थापत्तिमात्रस्य पक्षीकरणेऽनैकान्तिकत्वमव्यापकम्। यदि तावदर्थापत्तिमात्रं पक्षयसि, ततोऽर्थापत्तेरनैकान्तिकत्वमशक्यं दर्शयितुम्। अथानैकान्तिकी या सा पक्षीक्रियते तदाभ्युपगमः। वयमपि ब्रूमोऽनैकान्तिक्यप्रमाणमिति। हेतुश्च नास्ति, हेतोः प्रतिज्ञाविशेषणत्वात्। यानैकान्तिकी सा अप्रमाणमिति प्रतिज्ञा। तत्र हेतुर्नास्ति। न चायमर्थः साध्य इति हेत्वभावः। व्याघातश्चाभ्युपगमात्, अनैकान्तिकी यार्थापत्तिः सा प्रमाणं न भवतीति ब्रूवता यैकान्तिकी सा प्रमाणमित्यभ्युपगतं भवति। अनर्थकं चेदमभिधानम्। यानैकान्तिक्यर्थापत्तिः सा न प्रमाणमिति॥३॥

अनर्थापत्तावर्थापत्त्यभिमानात् ॥२।२।४॥

यामपि भवाननैकान्तिकीमर्थापत्तिं मन्यते सापि नानैकान्तिकी,

अनर्थापत्तावर्थापत्त्यभिमानात्।

नेयमर्थापत्तिरनैकान्तिकी अर्थापत्तिश्च[१] सत्सु मेघेषु वृष्टिर्भवतीति। सेयमनैकान्तिकी कथम्? न सत्सु भवत्येव, अपि तु सत्स्वेव भवतीति। यत् तु सत्सु मेघेषु वृष्टिर्न भवतीति कारणप्रतिबन्धोऽसौ। न तदर्थापत्तेः प्रमेयम्। किं पुनरस्याः

---

१. अर्थापत्तिश्च om J

प्रमेयम्? कारणे सति कार्यं भवतीति। सेयमनैकान्तिकी कथं स्यात्? यद्यसत्यपि कारणे कार्यमुत्पद्यते, तत्तु न दृष्टमिति न कदाचिदनैकान्तिकत्वम्॥४॥

प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् ॥२।२।५॥

योऽयं भवता प्रतिषेधः क्रियते, अर्थापत्तिर्न प्रमाणम् अनैकान्तिकत्वादिति, अयमप्यनैकान्तिकः सत्ताप्रतिषेधात्। नानेन प्रतिषेधेनार्थापत्तेः सत्ता प्रतिषिध्यते। कथं न सत्ता प्रतिषिध्यते? यस्मादर्थापत्तेर्विशेषः प्रतिषिध्यते, नार्थापत्तिमात्रं तेन सत्ताऽप्रतिषेधादनैकान्तिको भवतीति॥५॥

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥२।२।६॥

अथ मन्यसे न प्रतिषेधस्य सत्त्वं विषयः किं तु प्रमाणत्वम्, सोऽयं प्रतिषेधः स्वविषये प्रवर्तमानो नानैकान्तिको भवितुमर्हतीति, अनैकान्तिको हि नाम स ज्ञेयो यः स्वविषयतज्जातीयान्यवृत्तिः। न चानैकान्तिकत्वं [१]प्रामाण्यप्रतिषेधेऽस्ति। तस्मात् नानैकान्तिकः प्रतिषेध इति।

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम्।

यदि स्वविषयतज्जातीयान्यवृत्तिमनैकान्तिकं मन्यसे, अर्थापत्तिरपि तर्हि अनैकान्तिकी न भवति, न ह्यसति कारणे [२]क्वचिदपि कार्यमुत्पद्यमानं दृष्टमिति। तदिदं सूत्रं व्याघातदेशनार्थम्। यदुक्तं भवता स्वविषयादन्यत्रावर्तमानमनैकान्तिकं न भवति[३], अर्थापत्तिश्चानैकान्तिकीति तद् व्याहतम्। अज्ञानं वा। [४]अथाबुद्ध्वा ऐकान्तिकानैकान्तिकव्यवहारमिदमुच्यते, अर्थापत्तिरप्रमाणमनैकान्तिकत्वादिति, तदोपेक्षया वर्तितव्यम्। नोन्मत्तवाक्यानि [५]प्रतिसमाधेयानीति॥६॥

---

१. प्रामाण्ये for प्रामाण्यप्रतिषेधे J २. क्वचिदपि om J ३. °दन्यत्र वर्तमानम-नैकान्तिकं भवति C ४. अथाबुद्ध्वैवानैका° C ५. प्रतिसन्धे° C

नाभावप्रामाण्यं प्रमेयासिद्धेः ॥२।२।७॥

नाभावः प्रमाणं विषयाभावात्। यदविषयं तदप्रमाणम्। यथा गोशब्दोऽश्व-प्रतिपादने। तथा चाभावः। तस्मादप्रमाणम्।

कश्चैवमाह, अभावः प्रमाणमिति? अपि त्वभावविषया प्रतिपत्तिः प्रमाणम्। तया प्रमीयत इति। कः पुनरस्या विषयः? [१]अभाव इत्युक्तम्॥७॥

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः ॥२।२।८॥

तत्रानेकधाभिन्नस्याभावप्रपञ्चस्योदाहरणार्थं सूत्रम्,

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः।

अलक्षितानि वासांस्यानयेति प्रयुक्तः उभयसन्निधौ येषु वासःसु लक्षणानि न पश्यति, तानि लक्षणाभावेनैव प्रतिपद्यते, प्रैषसंप्रतिपत्त्योरेकविषयत्वात्। प्रतिपद्य चानयति। प्रतिपत्तिहेतुश्च प्रमाणम्। तस्मात् सिध्यत्यभावस्य प्रमाणत्वम्[२] ॥८॥

असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः ॥२।२।९॥

असत्यर्थे नाभाव इति चेत्? अथ मन्यसे यत्र यद् भवति, तत् तत्र न भवति[३]। न चालक्षितेषु वासःसु लक्षणानि भवन्ति। तस्मात् न तत्र न भवन्तीति। न, अपरिज्ञानात्। न भवता अस्मदभिप्रायोऽबोधि। न ब्रूमो यद् यत्र भवति, तत्र तत् न भवतीति। अपि तु लक्षितानि वासांस्युपलभमान इतराणि लक्षणाभाव-विशिष्टानि प्रतिपद्यत इति। अयथार्थोऽयमुपालम्भ इत्युक्तार्थं सूत्रं नान्यलक्षणोप-पत्तेरिति ॥९॥

---

१. भावः C २. प्रमेयत्वम् C ३. तत्र तस्याभावः C

तत्सिद्धेरलक्षितेष्वहेतुः ॥२।२।१०॥

यानि तानि लक्षितेषु वासःसु लक्षणानि, तानि न कस्यचित् न सन्तीति। यानि च सन्ति, तेषामभावो व्याहतः। अत्रोक्तं नापरिज्ञानादिति ॥१०॥

न लक्षणावस्थितापेक्षसिद्धेः ॥२।२।११॥

अस्य चार्थस्य ज्ञापनार्थं सूत्रम्, 5

न लक्षणावस्थितापेक्षसिद्धेः।

न ब्रूमो यानि भवन्ति तेषां तत्रैवाभाव इति। अपि तु केषुचिल्लक्षणान्यवस्थितान्यपेक्ष्य येषु तानि न भवन्ति तानि लक्षणाभावेन प्रतिपद्यत इति ॥११॥

प्रागुत्पत्तेरभावोपपत्तेश्च ॥२।२।१२॥

अभावद्वैतं खलु भवतीति प्राक्कोत्पत्तेरविद्यमानता, ऊर्ध्वं च विनाशादविद्यमानतेति। तत्र योऽयं विनाशादभावो लक्षणानाम्, अलक्षितेषु वासःसु सोऽनुपपन्नः, नेतर इति। 10

असत्यर्थे नाभावः

तत्सिद्धेरलक्षितेष्वहेतुः

इति चोभे अप्येते छलसूत्रे। छलस्योक्तमुत्तरं ज्ञात्वा अज्ञात्वा वा [१]असंबद्धमज्ञानं वा। तस्मादप्रयोज्यं छलमिति॥१२॥ 15

॥प्रमाणचतुष्टपरीक्षाप्रकरणम्॥

---

१. असंबन्धत्वमज्ञानं C

[शब्दानित्यत्वप्रकरणम्]

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च ॥२।२।१३॥

आप्तोपदेशः शब्द इति प्रमाणभावे विशेषणं ब्रुवता नानाप्रकारः शब्द इति ज्ञाप्यते। कथं नासति भेदे विशेषणमर्थवत्? न चानर्थकं विशेषणं युक्तमिति। युक्तं नानाभूतः शब्दो विशेषणसामर्थ्यादिति। तस्मिन् सामान्येन विचारः, नित्योऽनित्यो वा। विचारः परीक्षा।

विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः। विप्रतिपत्तिशब्दस्योक्तोऽर्थः। तत्राकाशगुणः शब्दो महत्त्ववदभिव्यक्तिधर्मा इत्**येके**। एके तावद् ब्रुवते नित्यः शब्द इति, अविनश्यदाधारैकद्रव्याकाशगुणत्वात्। यदविनश्यदाधारमेकद्रव्यमाकाशगुणश्च तन्नित्यं दृष्टम्। यथा आकाशमहत्त्वम्। तथा च शब्दस्तस्मात् नित्य इति। सोऽयं नित्यः सन्नभिव्यक्तिधर्मा। तस्याभिव्यञ्जकाः संयोगविभागनादा इति।

गन्धादिसहवृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिवदवस्थितोऽभिव्यक्तिधर्मेत्**यपरे**। अपरे पुनर्ब्रुवते गन्धादिभिः सह सन्निविष्टः शब्दो गन्धादिवदेवाभिव्यज्यते। तस्याभिव्यञ्जका भूतविशेषाभिघाता इति।

आकाशगुणः शब्द उत्पत्तिनिरोधधर्मक इति **चान्ये**। अन्ये पुनर्वर्णयन्ति अनित्यः शब्द आकाशगुण उत्पत्तिनिरोधधर्मक इति।

महाभूतसंक्षोभजः शब्दोऽनाश्रित उत्पत्तिनिरोधधर्मक इति **चापरे**।

अतः संशयः किमत्र तत्त्वमिति।

अनित्य इत्येतत् तत्त्वम्। किमिदमनित्यत्वं नाम यतोऽनित्य इति भवति? किं पुनस्तत्? प्राक्प्रध्वंसाभावावि**त्येके**। एके तावद् वर्णयन्ति यस्य प्राक्प्रध्वंसाभावौ स्तः, तदनित्यमिति। न, असंबन्धात्। न हि प्राक्प्रध्वंसाभावाभ्यां भावः संबध्यत

इति। अनुत्पन्नविनष्टयोश्च प्रसङ्गात्। यदि च प्राक्प्रध्वंसाभावावनित्यतेति मन्यसे, अनुत्पन्ने वस्तुनि प्रागभावोऽस्ति ऊर्ध्वं च वस्तुनः प्रध्वंसाभावोऽस्तीति घटादावसति प्राक्प्रध्वंसाभावनिमित्तोऽनित्यप्रत्ययः[१] स्यात्। अनित्यस्य भावोऽनित्यतेति प्राक्प्रध्वंसयोरभावत्वात् भावशब्देनानभिधानम्। अनित्यं नाम यस्य नास्त्यत्यन्तं भावः। तस्यानित्यस्य यो भावः सा अनित्यता। प्राक्प्रध्वंसाभावौ च भावप्रतिषेधौ। न चाभावो भावाभिधानेन वक्तुं[२] युक्तः। तस्मात् न प्राक्प्रध्वंसाभावावनित्यतेति।

षष्ठ्यर्थश्च नास्तीति।

तस्य भावस्त्वतलौ [पा. सू. ५.१.११९]

इति। तस्येति धर्म्यपदिश्यते। भाव इति धर्मिणो धर्मः। न चाभावो धर्मः। न च धर्मकाले तच्छब्दवाच्यो धर्मी विद्यते। न चाविद्यमानस्य षष्ठ्या योग इति। अथ यद् भवति तत् प्राङ् न भवति, ऊर्ध्वं च न भवतीति मन्यसे, एवमपि न किञ्चित् प्रतिषिद्धम्। वयमपि ब्रूमो यत् प्राङ् न भवति तदूर्ध्वं न भवतीति षष्ठ्यर्थस्तु पूर्ववत् नास्ति। घटस्य प्रागभावः, घटस्य प्रध्वंसाभाव इत्येतत् कथम्? नात्र षष्ठ्या संबन्धोऽभिधीयते, अपि तु प्रागिदं वस्तु नास्ति[३] पश्चात् जातमित्यर्थः। ऊर्ध्वं च विनाशादिदं वस्तु न भविष्यतीति अनित्यमित्युच्यते। तस्य च भावोऽनित्यतेति।

वर्तमाने चासंभवात्। यदि च प्राक्प्रध्वंसाभावावनित्यतेति मन्यसे वर्तमाने वस्तुनि न प्रागभावो न प्रध्वंसाभाव इति अनित्याभिलापो न स्यात्। पाचकादिशब्दवदिति चेत्? अथ मन्यसे यथामी पाचकादिशब्दाः त्रिकालविषयाः तथायमनित्यशब्दः त्रिकालविषयो भविष्यतीति, न, ण्वुलस्त्रिकालविषयत्वात्। ण्वुलः प्रयोगस्त्रिकालविषयो दृष्टः। पाचको भवति, पाचको भविष्यति, पाचकोऽभूदिति। [४]त्यपोऽपि त्रिकालविषयत्वमिति चेत्? अथ मन्यसे त्यपोऽपि त्रिकालविषयत्व-

---

१. भावेऽनिमित्ततोऽनि॰ C २. शब्देनाभिधातुं J ३. नासीत् C ४. पा. वा. ४.२.१०४

मिति? तच्च न, अदर्शनात्। न ह्यसति[१] अनित्य इति प्रयोगं पश्यामः। तस्मात् त्यपस्त्रिकालविषयत्वमयुक्तमिति। अतो न प्राक्प्रध्वंसाभावावनित्यतेति।

विनाशहेतुभाव इत्**यन्ये**। अपरे पुनर्ब्रुवते विनाशहेतोरस्तित्वमनित्यतेति। एतत् तु न युक्तम्, असति भावात्। प्राग् विनाशहेतुभावादनित्य इति प्रत्ययो दृष्टः अनुपजातकपालविभागेषु घटादिषु। यदि पुनर्विनाशहेतुभावोऽनित्यता स्यात्, वर्तमानेषु घटादिषु न स्यात्। न ह्यसति ज्वरे ज्वरित इति प्रत्ययो दृष्टः। विनाशहेतुभावाच्च विनाशस्य हेतुरस्तीति प्रत्ययो युक्तः, नानित्य इति। न हि गोत्वादश्वप्रत्ययो भवतीति।

अथ मन्यसे, यस्य विनाशहेतुरस्ति तद्विनाशवत्। यच्च विनाशवत् तदनित्यमिति। एतदपि न बुध्यामहे यस्य विनाशहेतुरस्ति तद्विनाशवदिति। किं तु यस्य विनाशहेतुरस्ति तद्विनाशहेतुमदिति वक्तुं युक्तम्। न चान्येन योगादन्यनिमित्तः प्रत्ययो युक्तः। न हि दण्डयोगात् कुण्डलीति भवति।

विनाशवत् शरीरमिति प्रयोगदर्शनाद् युक्तमिति चेत्? अथ मन्यसे विनाशवत् शरीरमिति दृष्टः प्रयोगः। न चासति संबन्धे प्रयोगो भवितुमर्हतीति। न, मतुपोऽसत्स्वदर्शनात्। नायं मतुप् क्वचिदप्यसत्सु दृष्टः। न ह्यसता कुण्डलेन कुण्डलीति भवति। न च [२]भावस्य विनाशेन योगोऽस्ति। तस्माद् विनाशवत् शरीरमित्ययुक्तः प्रयोगः।

दृष्ट इति चेत्? अथ मन्यसे दृष्टोऽयं प्रयोगः। विनाश्येतत् शरीरकम्, अध्रुवा एते विषया इति। न, उपचारात्। विनाशीत्युपचारेण प्रयोगः, विनाशोऽस्यावश्यन्तया भविष्यतीति। अध्रुवा इत्यनित्यतैव उच्यते। तस्मात् न विनाशहेतुभावोऽनित्यता।

उपलब्धिलक्षणप्राप्तस्यात्यन्ततिरोभावोऽनित्यतेत्**यन्ये**। अन्ये पुनरनित्यताशब्दस्यार्थमन्यथा वर्णयन्ति। यदुपलब्धिलक्षणप्राप्तं वस्तु तेनैवात्मनात्यन्तं तिरोभूतं नोपलभ्यते तदनित्यमित्युच्यते। एतत् तु शून्यमभिधानम्, उपलब्धिलक्षण-

---

१. असत्यनित्ये C २. असता for भावस्य C

प्राप्तमत्यन्ततिरोभूतं नोपलभ्यत इति ब्रुवाणः सिद्धान्तं बाधते। न हि किञ्चिद् वस्त्वत्यन्तं नोपलभ्यत इति सिद्धान्तः। अनुपजातविशेषस्य च वस्तुनस्तिरोभावो न युक्त इत्यनेकधा वर्णितम्। तस्मादियमनित्यता न युक्ता।

ये पुनर्वर्णयन्ति स एव च भावोऽभूत्वा भवन् भूत्वा चाभवन् अनित्य इत्युच्यते। सा चावस्था भावप्रत्ययेनानित्यतेत्यभिधीयते। एतत् तु न युक्तम्, स्वार्थे भावप्रत्ययस्यादर्शनात्। न हि कश्चित् स्वार्थे भावप्रत्ययो दृष्टः। विनयादिपाठादिति चेत्? ननु च

विनयादिभ्यष्ठक् [पा. सू. ५.४.३४]

इति स्वार्थे प्रत्ययो दृष्टः, विनय एव वैनयिकमिति। न, अनभ्युपगमात्। नायं स्वार्थे प्रत्ययः। [१]किं तर्हि? विनयेन योगो वैनयिकमित्युच्यते। एवं सर्वत्र द्रष्टव्यम्। अनुपलभ्यमानभेदानामप्यनुमानतो भेदोऽनुमेयः। यांश्चापि भवाननुपलभ्यमानभेदान् प्रत्ययान् स्वार्थे मन्यते तेष्वप्यनुमानतो भेदोऽनुमेयः। किमनुमानम्? षष्ठ्या भेदविषयत्वम्। सर्वा षष्ठी भेदे दृष्टेति। यथा चानर्थान्तरे षष्ठी नास्ति तथोक्तं **गुणगुणिवाद**[२] इति।

तत् किमिदानीमनित्यतेत्ययं शब्दोऽनभिधेय एव? नानभिधेयः, अवध्यपेक्षानपेक्षाभेदात् सत्तैवोभयथा। योभयान्तपरिच्छिन्नवस्तुसत्ता सा अनित्यतेति। या अपरिच्छिन्नवस्तुसत्ता सा नित्यतेति। यथा समवाय एकः सन्। स च कार्येण विशिष्यमाणः कारणत्वमित्यभिधीयते। कारणेन विशिष्यमाणः कार्यत्वमित्यभिधीयते। कथमिति? कारणमित्ययं प्रत्ययो नानिमित्तः कदाचिद् भावात्। न वस्तुनिमित्तोऽवस्तुप्रत्ययो[३] व्यतिरेकित्वात्। न सत्तातो वैलक्षण्यात्। सत्तातः सदिति स्यात्। अयं तु सत्ताप्रत्ययाद् विलक्षणः तस्मात् न सत्तातः।

इहविशेषणनिमित्तत्वाच्च संबन्धनिमित्तः। इह तन्तुषु पट इत्याधारविशिष्टः प्रत्यय उपजायते। न चासति संबन्धे इहप्रत्ययेन शक्यं भवितुम्। यतोऽयमिह-

---

१. अपि तु for किं तर्हि C २. द्रः पृ. ६८ ff. ३. वस्तु° J

प्रत्ययः स समवायः। कार्यसमवाये सति कारणं कारणमित्यभिधीयते। यस्य गुणस्य योगात् यस्मिन्नर्थे शब्दनिवेशः तदभिधाने त्वतलाविति। कार्यसमवायस्य च भावात् एतद् भवतीति कार्यसमवायः कारणत्वम्।

एतेन कार्यत्वं व्याख्यातम्। कार्यात्मलाभहेतुः समवायः कारणविशिष्टः कार्यत्वम्। यथा समवाय एवं सत्ताप्येका सती उभयान्तपरिच्छिन्नवस्तुसंबन्धित्वे सति अनित्यतेत्युच्यते। विपर्ययात् नित्यतेति। एतया अनित्यतया योगादनित्यः शब्द इति।

आदि....च्च॥ आदिमत्त्वात्। आदिर्योनिः कारणमिति। कारणवत्त्वादनित्य इति सूत्रार्थः। किं पुनरिदं कारणवत्त्वं नाम? निमित्तकारणभेदानुविधानम् उत्पत्तिधर्मकत्वमिति। तदभिव्यङ्ग्येषु नास्ति। न हि किञ्चिदभिव्यज्यमानं निमित्तकारणभेदानुविधायि दृष्टमिति। संयोगविभागानन्तरमुपलब्धेः[१] सन्देह इति चेत्? अथ मन्यसे संयोगविभागानन्तरमुपलभ्यते शब्दः, सा च तदनन्तरोपलब्धिर्व्यज्यमानस्यापि युक्ता। अतः सन्देहः किमयं संयोगविभागाभ्यां व्यज्यत अथ क्रियत इति?

न व्यज्यते ऐन्द्रियकत्वात्। किमिदमैन्द्रियकत्वम्? इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियक इति। ततः किम्? यदीन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियकः, ततो न व्यज्यते। न हि व्यज्यमानस्येन्द्रियेण प्राप्तिर्युक्ता। कथमिति? श्रोत्रं तावत् शब्ददेशं न गच्छति, अमूर्तत्वात्। यदमूर्तं तन्निष्क्रियं दृष्टं यथा रूपादि। अमूर्तं चाकाशम्, तस्मात् निष्क्रियमिति।

क्रियाकारणगुणसमवायात् क्रियावत्त्वमिति चेत्? अथ मन्यसे यस्मिन् क्रियाकारणं गुणो वर्तते तत् क्रियावद् दृष्टं यथा लोष्टादि। तथा चाकाशम्। तस्मात् तदपि क्रियावदिति? न, अनेकान्तात्। क्रियाकारणं च गुण आत्मनि न च क्रियावानात्मा इत्यनेकान्तः। विद्यमानस्यापि न क्रियाहेतुत्वं महापरिमाणप्रतिबन्धात्।

---

१. °लब्धिः J

विद्यमानोऽप्याकाशेऽभिघातो न क्रियाहेतुः, महत्परिमाणप्रतिबन्धात्। यदाकाशे वर्तते महत्त्वं तेनैकार्थसमवेतेन तद्वृत्तिरभिघातः प्रतिबध्यत इति। यथा लोष्टगुरुत्वं तदेकार्थवृत्तिना संयोगेनेति।

संयोगप्रतिबन्धाद् गुरुत्वस्य सापेक्षत्वप्रसङ्ग इति चेत्? अथ मन्यसे यदि संयोगेन प्रतिबध्यमानं गुरुत्वं क्रियां नारभते, तत्प्रतिबन्धापगमापेक्षमारभत इति? नन्वेवं गुरुत्वं सापेक्षं क्रियाकारणमिति प्राप्तम्। एवं च शास्त्रव्याघातः,

निरपेक्षं गुरुत्वं कर्मकारणम् [वै. सू. ?]

इति हि शास्त्रम्। न, निरपेक्षस्यान्यथा व्याख्यानात्। नायं निरपेक्षार्थो गुरुत्वं न किञ्चिदपेक्षत इति। अपि तु चरमभावि निमित्तान्तरं नापेक्षत इति निरपेक्षं गुरुत्वं कर्मकारणमिति नास्ति व्याघातः। तथा च शास्त्रम्,

संयोगाभावे गुरुत्वात् पतनमिति [वै. सू. ५.१.७]।

विषयाभावाच्च। न क्रियाकारणगुणसमवायमात्रं क्रियावत्त्वे हेतुः। अपि तु क्रियाकारणगुणसमवाये सति यदि क्रियाविषयो मूर्तिर्भवति, क्रियाकारणं च गुणोऽप्रतिबद्धो भवति तदा क्रियोत्पद्यते। तस्मात् निष्क्रियत्वादाकाशं तावत् न गच्छति। शब्दोऽपि नागच्छति निष्क्रियत्वादेव। न चाप्राप्तस्य ग्रहणमस्ति, सर्वशब्दोपलब्धिप्रसङ्गात्। परिशेषात् सन्तानसिद्धिः।

तत्राद्यः शब्दः संयोगविभागहेतुकः। तस्मात् शब्दान्तराणि कदम्बगोलकन्यायेन सर्वदिक्कानि। तेभ्योऽपि प्रत्येकमेकैकः शब्दो मन्दतरतमादिन्यायेनाश्रयाप्रतिबन्धमनुविधीयमानः प्रादुरस्ति। ततोऽन्त्यस्यातिमान्द्यात् शब्दान्तरोत्पत्तिशक्तिव्याघातो येन केनचित् प्रतिबन्धाद् भवतीत्यतः शब्दसन्तानोच्छेदः। तत्र यः कर्णशष्कुलीमन्तमाकाशदेशं प्राप्नोति स उपलभ्यते नेतर इति। तस्माद् ऐन्द्रियकत्वम्, तच्चान्यथा न युक्तमित्यतोऽनित्य इति।

एक एवेति चेत्? अथ मन्यसे नैव शब्दान्तराणि मयाभ्युपगम्यन्ते, अपि त्वेक एवायं शब्दो वितत्याकाशमवतिष्ठते। संयोगविभागाभ्यां व्यक्तः सन् उपलभ्यते।

यथा घटाद्यपवरकादिष्ववस्थितं प्रदीपसंयोगेनेति। तच्च न सर्वैरुपलब्धिप्रसङ्गात्। यद्येकः शब्दो वितत्यावस्थितः संयोगेन व्यक्तः श्रोत्रवतोऽर्थप्रत्ययं करोतीति मन्यसे तदा येन केनचित् यत्र तत्रावस्थितेन शब्दो व्यक्त इति सर्वैः श्रोत्रवद्भिरुपलभ्येत। न चोपलभ्यते। तस्मादकल्पनेयम्।

एकदेशाभिव्यक्तिरिति चेत्? अथ मन्यसे सत्यं वितत्यावस्थितः शब्दः। तस्य त्ववस्थितस्यैकदेशो निमित्तेन व्यज्यत इति। न, किमस्तादात्म्यानुपपत्तेः। यांस्तानेकदेशान् शब्दस्य मन्यसे, ते किं शब्दात्मका आहो नेति? किं चातः? यदि शब्दात्मकाः ततोऽनेकः शब्द इति व्याघातः। अथाशब्दात्मकाः, न शब्दादर्थप्रत्यय इति प्राप्तम्। तेषां च स्वभावो वक्तव्यः।

[१]एकदेशार्थानभिधानाच्च। एकदेश इति समासपदमेतत्। एकश्चासौ देशश्चेति। तत्र देश आधारार्थः, कारणार्थो वा स्यात्? तत्राधारार्थस्तावत् न युक्तः शब्दस्याकाशवृत्तित्वात्। आकाशवृत्तिः शब्दः, तद्गुणत्वात्। तस्मादाकाशव्यतिरिक्तो नाधार इति। कारणार्थोऽपि नास्ति, अकृतकत्वाभ्युपगमात्। अकृतकः शब्द इति स्वयं प्रतिपद्यमाना भवन्तो नार्हन्ति वक्तुं कारणमेकदेश इति। न चान्य एकदेशार्थः संभवतीति शून्यमभिधानम् एकदेशः शब्दस्य व्यज्यत इति। एकदेशाभिव्यक्तौ चार्थप्रत्ययो न स्याद् वर्णवत्। वर्णाः सर्व एव व्यापका भवन्तीति एतस्मिन् पक्षे वर्णैकदेशव्यक्तिः। न च वर्णैकदेशः शक्यो निरूपयितुम्। न च निरूपितादपि तस्मादर्थप्रतिपत्तिः संभवति, वर्णानामप्यर्थप्रत्यायकत्वानभ्युपगमात्। वर्णा एव तावदेकैकशोऽर्थप्रत्यायका न भवन्ति कुत एव तदेकदेशा इति?

एतेन बहुत्वं प्रत्युक्तम्। यथैकस्य शब्दस्य व्यक्तौ दोषः, एवमनेकशब्दस्यापि व्यापित्वे दोष इति। कोलाहलं च स्यात्। यदि चानेकशब्दा आकाशे युगपद् वर्तन्त इति प्रतिपद्यसे, एकशब्दाभिव्यञ्जकोपादाने समानदेशानां शब्दानां व्यक्तिरिति कोलाहलं स्यात्। यथा मल्लनटरंगसमाजेषु [२]प्रयोगकरणातिशयावर्जितेषु नदत्सु न

---

१. शब्दस्याकाशवृत्तित्वादेक° C २. प्रयोगझङ्कारादि C

तु भवति तस्मात् नानेको व्यापक इति। नियमश्च न स्यात् [१]यदि चानेके शब्दा युगपदाकाशे वर्तन्त इति। एवं च यत्किञ्चिद् व्यञ्जकमुपात्तं समानदेशान् सर्वशब्दान-भिव्यनक्तीति। यदा वीणा वाद्यते तदा रासभध्वनिरपि श्रूयते। न हि समानेन्द्रिय-ग्राह्याणां समानदेशानां व्यञ्जकेषु नियमो दृष्टः।

यद् यस्य व्यञ्जकं तेन तस्य व्यक्तिरिति चेत्? तन्नादृष्टत्वात्। अथ मन्यसेऽ- 5
नेकशब्दसन्निपातेऽपि व्यञ्जकानि भिद्यन्ते, व्यञ्जकभेदानुविधायिन्यो व्यक्तयः प्रतिशब्दमुपजायन्त इति। तन्न, अदृष्टत्वात्। न हि समानदेशानामेकेन्द्रियग्राह्याणां व्यञ्जकेषु नियमो दृष्ट इति। न हि प्रदीप एकेन्द्रियग्राह्यमनेकमर्थं युगपत्सन्निपतितं न प्रकाशयतीति।

सामान्यवदेतत् स्यादिति चेत्? नानभ्युपगमात्। अथ मन्यसे अनेकार्थसन्नि- 10
पाते सति सर्वाभिव्यक्तिभिः सामान्यानि संबध्यन्ते, अनेकार्थसंबन्धे सत्यपि सामान्यस्य केनचिदेवार्थेन किञ्चित् सामान्यं व्यज्यते। एवमनेकशब्दसन्निपाते सति किञ्चिद् व्यञ्जकं कञ्चित् शब्दं व्यनक्तीति, न, अनभ्युपगमात्। सामान्यमनेकेन भिन्नजातीयेनार्थेन संबध्यत इति नाभ्युपगम्यते। अपि तु स्वविषयसर्वगतं सामान्यम्, गोत्वं गोष्वेव नाश्वादिषु, अश्वत्वमश्वेष्वेव न गवादिष्विति। तस्मादसमोऽयं 15
दृष्टान्तः।

व्यञ्जकाभावे चोपलब्धेर्न व्यज्यते शब्दः। यदि च संयोगविभागाभ्यां व्यक्तः शब्द उपलभ्यत इति मन्यसे, सोऽपि संयोगाभावे नोपलभ्येत उपलभ्यते च दारुव्रश्चने दारुपरशुसंयोगनिवृत्ताविति।

अभिघाताद् वायुरिति चेत्? अथ मन्यसे दारुपरश्वोरभिघाताद् वायुर्जायते, 20
स वायुः सन्तानवृत्त्या वर्तते। सन्तानवृत्त्या च वर्तमानः कर्णशष्कुलीमन्तमाकाशदेशं प्राप्नोति। तत्प्राप्तौ तत्रस्थः शब्दो व्यज्यत इति। अत्रोक्तं यथैकः शब्दः कर्णशष्कुलीम-त्याकाशदेशे वर्तते, तथा सर्व एव शब्दा वर्तन्त इति। यत्किञ्चिद् व्यञ्जकमुपात्तं

---

१. यदि ..... एवं च om J

यस्य कस्यचित् शब्दस्य व्यञ्जकं स्यादिति सर्वशब्दोपलब्धिप्रसङ्गः, नियमश्च न स्यादिति।

निमित्तसन्निधाने च सर्वत्रोपलब्धेर्न व्यज्यते। यत् खलु व्यज्यते तत् निमित्तसन्निधाने सत्यपि न सर्वत्र व्यज्यमानं दृष्टम्। यथा घटार्थिनो विभ्राणाः प्रदीपं घटादिरहितानपवरकादीन् प्रविश्य न घटादीनुपलभन्त इति अभिव्यक्तिं घटादीनां प्रतिपद्यन्ते, न पुनस्ताल्वाद्यभिघातभूतसन्निधाने सति क्वचिदपि शब्दान् न पश्यामः। तस्मात् न व्यज्यत इति।

सर्वत्र सन्तीति चेत्? न, उक्तोत्तरत्वात्। अथ मन्यसे, यस्यैकदेशवृत्तयः शब्दाः, तं प्रत्ययमुपालम्भः। अस्माकं तु सर्व एव व्यापकाः। तस्मात् नैष दोष इति। न, उक्तोत्तरत्वात्। उक्तोत्तरमेतद् वाक्यम्, न पुनः प्रतिसमाधानं प्रयोजयतीति। तस्मात् न व्यज्यत इति। नादोपलब्धौ च विप्रकृष्टदेशावस्थितेन नादसमानदेशस्य शब्दस्यानुपलब्धेर्न व्यञ्जको नादः। एतेन वायवीयाः संयोगविभागाः शब्दव्यञ्जका इति प्रत्युक्तम्।

कृतकवदुपचाराच्च। तीव्रं मन्दमिति कृतकमुपचर्यते। तीव्रं सुखं दुःखम्, मन्दं सुखं दुःखमिति। उपचर्यते तीव्रः शब्दो मन्दः शब्द इति। अस्य प्रयोगः। अनित्यः शब्दः, तीव्रमन्दविषयत्वात् सुखदुःखवदिति। **कृतकवदुपचारादि**त्यनेन सूत्रेण सर्वानित्यत्वधर्मसाधनसंग्रहः। कृतकवद्ग्रहणस्योदाहरणार्थत्वात्। यथा सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात् उपलभ्यस्यानुपलब्धिकारणाभावे सत्यनुपलब्धिः गुणस्य सतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वमित्येवमादि।

तीव्रशब्दस्य तीव्रार्थविषयत्वात्[१] न शब्दविषयत्वमिति चेत्? अथ मन्यसे तीव्रशब्देन तीव्रार्थोऽभिधीयते न शब्दः, न चान्यविषयः शब्दोऽन्यस्यार्थस्य प्रतिपादक इति। न, शब्दशब्दसमानाधिकरणस्य तीव्रशब्दस्याभिधानात्। सत्यम्, अयं तीव्रशब्दः केवल उच्चरन्[२] द्रव्यगुणकर्मणां समानं धर्मं प्रतिपादयति।

---

१. °त्वम् C २. उच्चारितः C

शब्दशब्दोऽप्युच्चरन् [१]अनेकधर्मयोगिनं शब्दमभिधत्ते। यदा पुनरेतौ तीव्रशब्द-शब्दौ विशेषणविशेष्यभावापन्नावभिधीयेते, तदा तीव्रशब्देन धर्मान्तराणि व्यवच्छिद्यन्ते। शब्दशब्देन च धर्म्यन्तराणीत्युभयशब्दप्रयोगात् शब्दो गम्यते। तस्मादुपपन्नं तीव्रमन्दशब्दविषयत्वादनित्यः शब्द इति।

व्यञ्जकस्य तथाभावाद् ग्रहणस्य तीव्रमन्दता रूपवदिति चेत्? नाभिभवोपपत्तेः। शेषं **भाष्ये**।

ग्रहणं निमित्तभेदानुविधायीति चेत्? न, ग्रहणभेदस्यैकत्रादृष्टत्वात्। अथ मन्यसे न शब्दो भिद्यते, शब्दे त्वभिन्ने ग्रहणं निमित्तभेदानुविधायि भवति, ग्रहणभेदाच्चाभिभव इति। न, ग्रहणभेदस्यैकत्रादृष्टत्वात्। यद्यभिन्नः शब्दो ग्रहणभेदो न प्राप्नोति, न ह्यभिन्ने विषये भेदग्रहणं पश्यामः।

अथाभिन्ने विषये ग्रहणानि भिद्यन्त इति मन्यसे, नित्यं ग्रहणभेदः स्यात्। ततश्च भिन्नोऽभिन्न इति भिन्नाभिन्नप्रत्ययौ न स्याताम्। अभिभवानुपपत्तिश्च ग्रहणयोर्युगपदसंभवात्। न हि ग्रहणे युगपद् भवतः। न चैकं ग्रहणमात्मन एवाभिभावकम्। न चायमभिभवो नास्ति। तस्माद् भिद्यते शब्दः।

अभिभवानुपपत्तिश्च व्यञ्जकसमानदेशस्याभिव्यक्तौ। प्राप्त्यभावात्। व्यञ्जकेन समानदेशोऽयं व्यज्यत इति एतस्मिन् पक्षे नोपपद्यतेऽभिभवः। कस्मात्? व्यञ्जकसमानदेशत्वात्। न हि व्यञ्जकसमानदेशेन शब्देनाप्राप्तः शब्दोऽभिभवितुं शक्यः, अप्राप्तत्वात्। न ह्यप्राप्तमभिभावकं भवति।

अथाप्राप्तमभिभवतीति मन्यसे, वीणादिशब्दानामग्रहणप्रसङ्गः। अप्राप्ताः शङ्खरासभादिशब्दा अभिभावका इति न कदाचित् वीणादिशब्दाः श्रूयेरन्।

सर्वत्र सन्तीति चेत्? न, पूर्वदोषानुवृत्तेः। अथ मन्यसे यो व्यञ्जकसमानदेशं शब्दमभ्युपैति तस्यैष दोषः। अस्माकं तु सर्व एव शब्दाः समानदेशाः। तस्माददोषोऽयमिति। न, पूर्वदोषानतिवृत्तेः। समानदेशत्वे शब्दानां व्यञ्जकेषु नियमो

---

१. एकधः C

नास्तीति यत्किञ्चिद् व्यञ्जकमुपात्तं सर्वशब्दव्यक्तिहेतुरिति पूर्वदोषानिवृत्तिः। समानदेशत्वे च वीणावेणुशङ्खशब्दानां नित्यं शङ्खशब्देन वीणावेणुशब्दयोरभिभव इति वीणादिशब्दाश्रवणप्रसङ्गस्तदवस्थः। तस्मात् शब्दा एव भिद्यन्त इति। तेषां तु भिन्नानां सन्तानवृत्तित्वे सति ये कर्णशष्कुलीमत्याकाशदेशे युगपत् समवयन्ति तत्र यः पटुः शब्दः स इतरस्याभिभावक इति। अभिभवश्च नाम मन्दस्य पटीयसोर्ग्रहणादग्रहणमिति।

यदि सन्तानवृत्तिः शब्दः कर्णशष्कुलीमदाकाशदेशं प्राप्तश्च गृह्यते, दिग्देश-प्रत्ययो न प्राप्नोतीति पूर्वेण शब्द उत्तरेण शब्द इति। न हि विषयेषु प्रत्यासीदत्सु दिग्देशप्रत्ययो दृष्टो गन्धादिवदिति। न, उपादाननिमित्तत्वात् दिग्देशव्यपदेशस्य। योऽयं शब्देषु दिग्देशव्यपदेशः, नायं शब्दनिमित्तः पूर्वापरादिभिन्नेभ्यो निमित्तेभ्य उपजायमानानामेकदेशग्रहणात् तुल्यो दिग्देशव्यपदेशः स्यात्। तस्मात् न शब्द-निमित्तः।

कुतस्तर्ह्ययं भवतीति वाच्यम्, निमित्तभेदात्। यानि तानि शब्दनिमित्तानि शब्दकारणस्य संयोगस्यानुग्राहकाणि तानि दिग्देशवन्ति तेषां निमित्तानां भेदात् दिग्देशप्रत्यया इति। निमित्तदेशग्रहणात् य उपलभ्यमाननिमित्ताः शब्दाः, तेष्वेतद् युक्तं वक्तुम्। येषां तु शब्दानां निमित्तानि नोपलभ्यन्ते तेषु दिग्देशप्रत्ययो न युक्तः। न न युक्तः। शब्दसन्तानस्य निमित्तभेदाभिमुख्येनादौ प्राप्तेः। यः शब्दसन्तानो यस्मात् निमित्तादुपजायते, स समन्तात् शब्दान्तराणि संतनोति। तत्र यः शब्दविशेष आदौ कर्णशष्कुलीमत आकाशदेशस्य तदभिमुखेन भागेन संबध्यते, तन्निमित्तः पूर्वा-परादिशब्दव्यपदेश इति। यदा पुनराद्यशब्दपरिच्छेदो नास्ति तदा विपर्यय इति।

एके तु ब्रुवते, नैव शब्देषु दिग्देशप्रत्ययाः सन्ति। कुतः? चक्षुर्विषयप्रसिद्धौ दिग्देशव्यवसायादिति[१]। तथा हि जात्यन्धानां पूर्वापरादिप्रत्ययाः शब्देषु न सन्तीति।

---

१. °शाध्यवसायः C

अपरे तु दिग्देशव्यपदेशेन चक्षुःश्रोत्रे अप्राप्यकारिणीति ब्रुवते। तेषामुक्तमुत्तरं प्रत्यक्षसूत्रं वर्णयद्भिरिति॥१३॥

न घटाभावसामान्यनित्यत्वात् नित्येष्वप्यनित्यवदुपचाराच्च ॥२।२।१४॥

सूत्रस्य पूर्वहेतूनामनैकान्तिकत्वज्ञापनमर्थः। शेषं **भाष्ये**॥१४॥ 5

तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः॥२।२।१५॥

नित्यत्वमित्यत्र किं तावत् तत्त्वम्? उभयान्तापरिच्छिन्नसत्तासंबन्ध इति। विपर्ययादनित्यत्वम्। एतच्चाभावे नास्ति। [१]भाक्तं तु तद्भवति नित्य इव नित्यो घटाभावः। न पुनर्नित्य एव कालद्वयानवस्थानात्[२]। प्रध्वंसाभावो न प्रागस्ति, न घटकालेऽस्ति। प्रागभावो न प्रध्वंसकाले न घटकाल इति। कथं तर्हि नित्य इति? 10 नित्य इव नित्य इत्युच्यते भक्त्या। का पुनरियं भक्तिः? प्रागभावस्य कारणाभावः, प्रध्वंसाभावस्याविनाशः। उभयं चैतत् नित्यविषयमिति। एतत्सामान्यात् नित्य इव नित्यो न पुनर्नित्य एवेति॥१५॥

सन्तानानुमानविशेषणात्॥२।२।१६॥

इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियक इति **सन्ता...णात्**। अव्यभिचारः। न 15 वयमैन्द्रियकत्वादित्यनेन शब्दानित्यतां साधयामः। अपि तु ऐन्द्रियकत्वादित्यनेन शब्दस्य व्यक्तिं प्रतिषेधामः। न हि व्यज्यमानस्यैन्द्रियकत्वं युक्तमिति पुरस्तादुक्तम्॥१६॥

---

१. भक्त्या Alaṃkāra २. °ननुभवात् C

कारणद्रव्यस्य प्रदेशशब्देनाभिधानात्॥२।२।१७॥

नित्येष्वप्यव्यभिचारः। न हि नित्यानां द्रव्याणां प्रदेशशब्देन कारणमुच्यते। आकाशस्य प्रदेश आत्मनः प्रदेश इति नात्राकाशात्मनोः कारणद्रव्यमभिधीयते, यथा कृतकस्य। किमिति नाभिधीयते? अविद्यमानत्वात्। न हि विद्यन्त आकाशादेः प्रदेशा इति। कथं न विद्यन्ते? प्रमाणतोऽनुपलब्धेः। यद्याकाशादेः प्रदेशाः स्युः प्रमाणत उपलभ्येरन्निति। कथं प्रमाणतोऽनुपलब्धिः? विकल्पानुपपत्तेः। प्रदेशशब्देन कारणं वाभिधीयते, आधारो वा? न कारणम्, अकृतकत्वात्। यस्मादकृतकमाकाशम् अतो न कारणार्थः प्रदेशशब्देनोच्यते। नाधारोऽनाश्रितत्वात्। अनाश्रितमाकाशम् तस्याधारार्थोऽपि न शक्यो वक्तुमिति।

लोकविरोध इति चेत्? न, अन्यथा तदुपपत्तेः। यद्याकाशं निष्प्रदेशं प्रतिपद्यसे, ननु लोको विरुध्यते पूर्वभागेन नभस आदित्यो मध्यभागे नभस आदित्य इति, न, अन्यथा तदुपपत्तेः। संयोगस्याव्याप्यवृत्तित्वे प्रदेशशब्देनाभिधीयमाने न लोकविरोधः। यस्मात् यत्तत् संयोगस्याव्याप्यवृत्तित्वं तत् प्रदेशशब्देनाभिधीयते। एतच्च प्रदेशवता द्रव्येणाकाशसामान्यम्। ये खलु परिच्छिन्ने द्रव्ये आमलकादिके भवतः, तयोर्यः संयोगो वर्तते स ते न व्याप्नोति। प्रदेशवती च ते। आकाशसंयोगोऽपि नाकाशं व्याप्नोतीति प्रदेशवद्द्रव्यसामान्यात् प्रदेशवदाकाशमिति भाक्तः [१]प्रत्ययः।

का पुनरियं भक्तिः? अतथाभूतस्य तथाभाविभिः सामान्यम्। उभयेन भज्यत इति भक्तिः। एतत्सामान्यादध्यारोपितप्रदेशवृत्तिः प्रदेशशब्दः। यस्मात् आकाशस्य प्रदेशवद्भिर्द्रव्यैः सामान्यं संयोगस्याव्याप्यवृत्तित्वमस्ति, अतः प्रदेशशब्द आकाशे प्रयुज्यते।

एवमेतत्, न तत्त्वत इति न प्रमाणमस्तीति चेत्? न, प्रमाणतोऽनुपलब्धेः। अथ मन्यसे आकाशप्रदेशाः प्रदेशवद्द्रव्यसामान्यादाकाश उपचर्यन्ते, न पुनस्तत्त्वतः

---

१. प्रयोगः C

सन्तीति न प्रमाणमस्ति। न, प्रदेशस्य प्रमाणतोऽनुपलब्धेः। न ह्याकाशादिप्रदेश-प्रतिपादकं प्रत्यक्षादिप्रमाणं संभवतीति॥

स्वरूपेणानभिधानाच्च। यदि चाकाशस्य प्रदेशाः स्युः, ते स्वरूपेण व्यपदिश्येरन्, यथा पटस्य प्रदेशाः। के? तन्तव इति। न पुनराकाशस्य प्रदेशाः के इत्युक्ते स्वरूपेण व्यपदेष्टुं शक्या इति।

किमोऽनुपपत्तेश्च पूर्ववत्। यांश्चाकाशप्रदेशान् भवान् मन्यते, ते किमाकाशात्मका उत नेति? किं चातः? यद्याकाशात्मकाः, अनेकमाकाशमिति प्राप्तम्। अथ न, तेषां स्वभावो वक्तव्यः। कथं च ते तस्य प्रदेशा इति वक्तव्यम्। अनाकाशात्मकाः सन्तः आकाशस्य प्रदेशा इति केनार्थेनाभिधीयन्ते? तद्यथा तन्तवः पटप्रदेशा इत्युक्ते कारणार्थं आधारार्थश्च गम्यते। न पुनराकाशस्य प्रदेशेषु एतदस्ति।

प्रदेशाभावादनाधारः संयोग इति चेत्? न अनाधारः, आकाशवृत्तित्वात्। अथ मनुषे यद्याकाशस्य प्रदेशा न सन्ति, आकाशदेशाश्रयः संयोगोऽनाधारः प्राप्नोति। न अनाधारः, आकाशवृत्तित्वादस्य। यस्मात् त्वयैवोच्यते आकाशाश्रय इति, तस्मात् न अनाधार इति।

समानदेशा इति चेत्? न, अबाधनात्। अथ मन्यसे मूर्तिमद्द्रव्यसंयोगा ये आकाशे, ननु ते प्रदेशाभावात् सर्व एव समानदेशाः प्राप्नुवन्ति। एवं समानदेशत्वे सति न किञ्चिद् बाध्यते। तदेवं प्रदेशवद्द्रव्यसामान्यादाकाशस्य प्रदेशा इति भाक्तः प्रत्ययः।

निष्प्रदेशत्वात् सर्वशब्दोपलब्धिप्रसङ्ग इति चेत्? न, उक्तोत्तरत्वात्। अथ मन्यसे, यदि निष्प्रदेशमाकाशम्, तेन च तर्हि सर्व एव शब्दाः समानदेशा इति सर्वैः सर्वः शब्द उपलभ्येत। न तूपलभ्यते। तस्माद् अन्योन्यवृत्तयः शब्दाः सर्वैरग्रहणादङ्गुलिरूपादिवदिति। न, उक्तोत्तरत्वात्। उक्तोत्तरमेतत् यथा संयोगस्याव्याप्यवृत्तित्वम्, तथा शब्दस्यापीति।

गुणत्वाद् व्यापकमित्येके। एके तु गुणत्वाद् हेतोः शब्दसंयोगादि अङ्गुलिरूपवद् व्यापकं प्रतिपद्यन्ते। त इदं प्रष्टव्याः, व्यापकमिति कोऽर्थः? यद्याश्रयवृत्तित्वं व्याप्तिर्न किञ्चिद् बाध्यते। अथान्यत्, तन्न विद्मः[1]। वयं तु व्याप्तिमङ्गुलिरूपस्य आश्रयोपलब्धावुपलभ्यत्वं[2] ब्रूमः। न पुनः शब्दादय आश्रयोपलब्धावुपलभ्यन्त इति। तस्मादङ्गुलिरूपवत् न व्यापका इति।

समुदितस्थानानामेकसमुदाय्युपलब्धावुपलब्ध्यनुपलब्धी[3] व्याप्त्यव्याप्ती एकाश्रयाणामाश्रयोपलब्धाविति। अथ य आकाशे मूर्तिमतां संयोगाः, तेषां कांश्चित् केचित् कृतकान् प्रतिपद्यन्ते, कांश्चिदकृतकानिति। तत्र कार्यद्रव्यसंयोगः कृतकः संयोगजत्वात्। उत्पद्यमानस्य कारणसंबन्धिभिः कार्यस्य संयोगजः संयोग इति। क्रियाजं तु **केचित्** नेच्छन्ति, यावद्द्रव्यभावित्वात् संयोगस्य। अविभक्तस्य च संयोगो नास्तीति, नास्त्याकाशे क्रियाजः संयोगः। अण्वाकाशसंयोगं त्वकृतकमिच्छन्ति। तन्न, अण्वाकाशसंयोगस्य तावत् कृतकत्वेऽनुमानम्। आकाशेन कृतकसंबन्धसंबन्धी परमाणुः मूर्तिमत्त्वादिभ्यो घटवदिति कार्याकाशसंयोगोऽपि विप्रतिपत्तिविषयो न यावद्द्रव्यभावी, अविनश्यदाधारत्वे क्रियावद्द्रव्यवृत्तित्वे चाप्राप्तिप्रतिद्वन्द्वित्वात् मूर्तिमदितरद्रव्यसंयोगवत्। तस्मात् कार्यद्रव्येणाकाशस्य संयोगजश्च संयोगः, कियाजश्च। परमाणोस्तु क्रियाज इति।

[4]विप्रतिपत्तिविषयाविभागिन आकाशादयः क्रियावद्द्रव्यसंयोगित्वात् परमाणुवत्। यथा परमाणोः क्रियावद्द्रव्यसंयोगा अयावद्द्रव्यभाविनः, संयोगवत् शब्दबुद्ध्यादयश्चात्मन्यव्यापकाः संयोगस्य चाव्याप्यवृत्तित्वमात्मनः प्रदेशार्थ इति व्याख्यातम्।

एकस्य चानेकमूर्तप्रदेशवद्द्रव्यसंबन्धित्वं प्रदेशार्थः। यद् वा यदाकाशस्यैकस्य सतः प्रदेशवता अनेकेन संबन्धित्वं तत् प्रदेशवद्द्रव्यसामान्यम्, यथा घटस्येति।

---

१. तन्नास्ति C २. पलब्ध्योपलब्धिं C ३. °पलब्ध्यनुप° C ४. विप्रतिपत्ति.... संयोगवत् om C

कस्मात् पुनः सूत्रकारस्यास्मिन्नर्थे सूत्रं न श्रूयत इति? कतमस्मिन् अर्थे? निष्प्रदेशमाकाशं निष्प्रदेश आत्मेत्येतस्मिन्। अर्थतोऽधिगतेर्न सूत्रम्। यस्मादयमर्थोऽर्थतोऽधिगम्यते, अतो न सूत्रित इति। शब्दसन्तानप्रतिपादने वा न सूत्रमर्थतोऽधिगतेः।

शास्त्रसिद्धान्ताद् वा तदधिगतिः[१]। शास्त्रसिद्धान्तस्तु न्यायसमाख्यातं बहुशाखमनुमानम्। तेनानुक्तमपि गम्यत इति न सूत्र्यते॥१७॥

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च॥२।२।१८॥

अथापि खल्विदमस्ति इदं नास्तीति **भाष्यम्**। योऽयं पर्यनुयोगः तस्य को विषय इति अनुपलभ्यमानशब्दास्तित्वम्। ये शब्दं नित्यं कल्पयन्ति त इदं पर्यनुयोज्याः इदमस्तीदं नास्तीत्येतद् भवन्तः कथं प्रतिपद्यन्त इति। एवमनुयुक्ताः सन्तः प्रतिब्रुवते प्रमाणत उपलब्धेरनुपलब्धेश्चेति।

अविद्यमानस्तर्हि शब्दः?

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च।

यच्चोभयपक्षसंप्रतिपन्नं घटाद्यनित्यत्वेन, तेन चानुयोज्या इति। यदिदमनित्यं घटादि भवद्भिः प्रतिपद्यते, तत् कथमनित्यमिति? स एवमनुयुक्तो[२] यदि घटाद्यनित्यत्वे न्यायं ब्रवीति[३] स शब्देऽप्यस्तीति सूत्रम्। सतोऽनुपलब्धिकारणाभावे [४]कदाचिदुपलब्धेरनित्यः शब्द इति सूत्रार्थः। शेषं **भाष्ये**।

व्यञ्जकाभावादग्रहणमिति चेत्? न, उक्तोत्तरत्वात्। अथ मन्यसे शब्दस्योच्चारणं व्यञ्जकम्, व्यञ्जकाभावात् नोपलभ्यत इति असिद्धं विशेषणमनुपलब्धिकारणाभाव इति। किमिदमुच्चारणं नाम? विवक्षाजनितेन प्रयत्नेन कौष्ठ्यस्य वायोः

---

१. शास्त्र....गतिः om J २. अनुयुक्ता C ३. प्रतिपद्यन्ते for ब्रवीति C
४. °दनुपलब्धे° C

प्रेरितस्य कण्ठादिस्थानेषु प्रतिघातः। तन्न, उक्तोत्तरत्वात्। वायुगतवेगापेक्षो वायुना ताल्वादिसंयोगोऽभिघातः। संयोगस्य च व्यञ्जकत्वं प्राक् प्रतिषिद्धमिति॥१८॥

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः॥२।२।१९॥

एवं च सति तत्त्वं पांशुभिरिवावकिरन्नाह कोऽस्यार्थः? तत्त्वे उक्ते जात्या प्रत्यवतिष्ठत इति। सा च जातिः।

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः।

कोऽस्य वाक्यस्यार्थः? आवरणानुपलब्ध्या[१] अनेकान्त इत्ययमर्थः। [२]यथावरणानुपलब्धिरनुपलभ्यमानाप्यस्ति तथावरणमित्यनेकान्तः। अथानुपलब्धिरनुपलभ्यमाना नास्ति, तदभावादुपलब्धिरस्ति। न चाविद्यमानस्योपलब्धिरिति सिद्धमावरणम्। कथं पुनर्भवान् जानीते नावरणानुपलब्धिरुपलभ्यत इति? किमत्र ज्ञेयं प्रत्यात्मवेदनीयत्वात्। प्रत्यात्ममेवायमावरणोपलब्धिवदावरणानुपलब्धिं च वेदयते। एवं च सत्यपहृतविषयमुत्तरं वाक्यमिति। अपहृतविषयमिति। नास्योत्थानमस्तीति॥१९॥

अनुपलम्भादप्यनुपलब्धिसद्भावान्नावरणानुपपत्तिरनुपलम्भात्॥२।२।२०॥

अभ्यनुज्ञावादेन तूच्यते

अनुपलम्भादप्यनुपलब्धिसद्भावान्नावरणानुपपत्तिरनुपलम्भादिति।

अस्य सूत्रस्य[१] अनुपलब्धेरनैकान्तिकत्वमर्थः॥२०॥

---

१. °णाद्यनुप° C २. आवरणानुपलब्धिमावरणोप° C ३. अस्य सूत्रस्य om J

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥२।२।२१॥

अतथाजातीयेन प्रत्यवस्थानादनुत्तरमिति सूत्रार्थः। यथाजातीयः शब्दोऽनित्यः, तथाजातीयं किञ्चित् नित्यं न दृष्टमिति। उक्तं चात्र। किमुक्तम्? उभयान्तापरिच्छिन्नसत्तासंबन्धो नित्यतेति। तस्मादयथार्थप्रत्यवस्थानात् न किञ्चिदेतत्।

अनित्यः शब्दो गुणत्वे सत्यस्मदादिप्रत्यक्षत्वात् बुद्धिवदिति। अव्यापकस्य व्यापकद्रव्यसमवायित्वे सति प्रत्यक्षत्वात् सुखवत्। आकाशनिष्प्रदेशत्वे हेतुः निष्प्रदेशमाकाशं व्यापकत्वात् आत्मवत्, द्रव्यस्य सतः सर्वदा अमूर्तत्वात् आत्मवदेव। व्यापकत्वादेवाकृतकम्। व्यापकत्वं च द्रव्यस्य[१] सतः सर्वदा अमूर्तत्वात्। एतेन दिक्कालौ व्याख्यातौ। एवं तावत् स्वसाधनस्थित्या व्यवस्थितमनित्यः शब्द इति॥२१॥

अस्पर्शत्वात्॥२।२।२२॥

अथ शब्दस्य नित्यत्वं प्रतिजानाना इति **भाष्यम्**। विप्रतिपत्तेः प्रमाणमूलत्वात् हेतौ परिप्रश्नः। विप्रतिपत्तिर्नाम द्वयोरेकधर्मिविषया विरुद्धधर्मसंप्रतिपत्तिः। न च संप्रतिपत्तिः प्रमाणान्तरमन्तरेण युक्तेति नित्यत्वे प्रमाणं वक्तव्यमिति[२], नित्यः शब्दः

अस्पर्शत्वात्।

अनुपलब्धविपक्षैकदेशस्य प्रयोगः आकाशवदिति॥२२॥

न कर्मानित्यत्वात्॥२।२।२३॥

तस्य व्यभिचारदर्शनार्थं सूत्रम्

---

१. °कत्वे च द्रव्यव्यापकस्य C २. °मित्यत आह C

न कर्मानित्यत्वात्।

इति। शेषमस्य **भाष्ये** ॥२३॥

नाणुनित्यत्वात्॥२।२।२४॥

नाणु...त्वात्॥२४॥

सम्प्रदानात्॥२।२।२५॥

अयमन्यो हेतुः शब्दनित्यत्वे

सम्प्रदानात्।

न हि किञ्चित् नित्यं संप्रदीयमानं दृष्टमित्यन्वयिनो दृष्टान्तस्याभावाद् विरुद्धः॥२५॥

तदन्तरालानुपलब्धेरहेतुः॥२।२।२६॥

अथायं प्रतिज्ञार्थोऽवतिष्ठते शब्दः सम्प्रदानाद् घटादिवदिति, एवमपि नित्यत्वं न सिध्यति।

तदन्तरालानुपलब्धेरहेतुः।

अवतिष्ठमानो हि दातृप्रतिग्रहीत्रोरन्तराले उपलभ्येतेति विरोधः सूत्रार्थः॥२६॥

अध्यापनादप्रतिषेधः॥२।२।२७॥

न विरोधोऽनुमानत उपलब्धेः। न हि प्रत्यक्षतोऽनुपलभ्यमानस्यानुमाने-

नोपलब्धिः[१] सत्तां बाधते। किमनुमानम्? अध्यापनम्। किमिदमध्यापनं नाम? दीयमानस्य संप्रदानप्राप्तिः। दातृप्रतिग्रहीत्रोरन्तराले शब्दोऽस्ति अधापनात्[२] शरादिवदिति ॥२७॥

उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः ॥२।२।२८॥

न शब्दस्याध्यापनं प्रतिषिध्यते। अपि तु नृत्योपदेशवदनित्यस्यैवाध्यापनमिति। यत् पुनरेतद् दातृप्रतिग्रहीत्रोरन्तराले शब्दोऽस्तीति सिद्धसाधनमेतत्। वयमपि ब्रूमो दात्रोच्चरितः शब्दः सन्तानवृत्त्या सम्प्रदानं प्राप्नोति। तस्मात् सम्प्रदानमवस्थाने न हेतुः ॥२८॥

अभ्यासात् ॥२।२।२९॥

अयं तर्हि हेतुः

अभ्यासात्।

वीणादिवदिति। अनित्येष्वेव लङ्घनप्लवनादिष्वभ्यास इति विरुद्धः। अथावस्थानमभ्यासात् साध्येत तथाप्यनवस्थितेषु तेष्वेवाभ्यास इत्यनेकान्तः, अभ्यासस्वरूपानवधारणादसिद्धश्च। अभ्यासो हि नामैकविषयोऽनेकविज्ञानोत्पाद एकाकारविषयो वा। तत्रायमभ्यास एकविषय एकाकारविषयो वेति सन्दिग्धासिद्धः ॥२९॥

नान्यत्वेऽप्यभ्यासस्योपचारात् ॥२।२।३०॥

अभ्यासासिद्धावभ्यासोपचारविषयत्वेन साधनं तस्यानैकान्तिकत्वज्ञापनार्थम्। नान्यत्वेऽप्यभ्यासोपचारोऽन्यत्वप्रतिषेधार्थम्[३] ॥३०॥

---

१. °नुपलब्धिरनुमाननेनोपलब्धस्य C २. गवादि J ३. °पचारादिति ॥ C एतत्सूत्रमन्यत्वप्रतिषेधार्थमिति परसूत्रवार्त्तिकेऽन्तर्भूतम् C

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताऽभावः ॥२ ।२ ।३१ ॥

यदिदमन्यदिति मन्यसे इदमन्यस्माद् अन्यद् वा स्याद्, अनन्यद् वा। यद्यन्यत्, [१]अन्यत् न भवति। यथा ब्राह्मणादन्यो न ब्राह्मण इति। अथानन्यत्, तथाप्यन्यत् न भवति, अनन्यत्वात्। यदनन्यत् तत् कथमन्यद् भवतीति ॥३१ ॥

तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः ॥२ ।२ ।३२ ॥

सूत्रस्यार्थो विरोधः। अनन्यत्वमभ्युपगतं निवर्तत इति। कथं निवर्तते? प्रतिषेधस्यान्यविषयत्वात्। अन्याभावेऽनन्यन्नास्ति। न हि ब्राह्मणाभावेऽब्राह्मणः सिध्यतीति।

अयं तर्हि हेतुः प्रत्यभिज्ञानात्। तद्भावे प्रत्यभिज्ञानं दृष्टं मण्यादिषु। अस्ति च प्रत्यभिज्ञानं शब्दे। तस्मात् प्रत्यभिज्ञानादवतिष्ठते शब्द इति। किमिदं प्रत्यभिज्ञानम्? तत्प्रत्ययविषयत्वम्। तत्प्रत्ययविषयत्वमन्यत्वेऽपीत्यनेकान्तः। अथ प्रत्यभिज्ञानं तत्प्रत्ययविषयस्याव्यभिचारः, न हि कदाचित् तत्प्रत्ययविषयव्यभिचारोऽस्ति। यः पुनः सदृशे तत्प्रत्ययविषयः सविशेषदर्शनात् निवर्तते। अतो यासौ तत्प्रत्ययस्य शब्देऽव्यावृत्तिः, तत्प्रत्यभिज्ञानमिति। न, तत्प्रत्ययस्याव्या-वृत्तिर-सिद्धा। अयं तावत् तत्प्रत्ययः पुरुषान्तरे निवर्तमानो दृष्टः। यत्पुनरेतत् विशेषदर्शनात् तत्सदृशे तद्भावप्रत्ययो निवर्तत इति, सत्यमेव तत्[२]। शब्दे तु किं विशेषस्यादर्शनात् तत्सदृशे तत्प्रत्ययः, उत तद्भावादेव तत्प्रत्यय इति सन्दिह्यते। अथ प्रत्यभिज्ञानं तद्भावाद् भवतीति पक्षः, तथाप्यन्यो हेतुर्वक्तव्यः, किं कारणम्? प्रत्यभिज्ञानस्य पक्षविशेषणत्वेनोपयुक्तत्वात्। यत् पुनरेतत् गोशब्देन[३] गोशब्द इति प्रत्यय-स्याव्यावृत्तिरस्तीति[४], न च गोशब्दस्य गोप्रत्ययकर्तृत्वव्यभिचार इति, एतदपि

१. अनन्यत् C २. मन्यसे एवमेतत् C ३. पुनर्गोशब्दो C ४. ॰यव्या॰ J

सन्दिह्यते। किं कारणसामान्याद् गोशब्दे [१]गोशब्दप्रत्ययस्याव्यावृत्तिराहोस्वित् तद्भावादिति? एतेन तत्प्रत्ययकर्तृत्वं व्याख्यातम्। युक्ता तु कारणसामान्यात् [२]तत्प्रत्ययस्याव्यावृत्तिः। कथमिति? गोबुद्धौ गोबुद्धिप्रत्ययो न व्यावर्तते न चास्या गोशब्दबुद्धेः[३] तत्प्रत्ययकर्तृत्वं निवर्तते। तस्मात् [४]तत्प्रत्ययहेतुत्वे प्रत्यभिज्ञानम-हेतुः।

यश्चानुपलब्धविशेष एव निवर्तते तं प्रति तस्य वस्तुनः किं विशेषोऽस्ति नास्तीति भवन्त एव प्रष्टव्याः। यद्यस्ति विशेषः, तत्प्रत्ययाव्यावृत्तिरहेतुः, अनेकान्तात्। अथ नास्ति विशेषः, एकं वस्तु द्व्यात्मकमिति प्राप्तम्। विरोधादहेतुः प्रत्ययाव्यावृत्तिश्चाशेषपुरुषविषयतया असिद्धा पुरुषविशेषविषयतया अनैकान्ति-कीति ॥३२॥

विनाशकारणानुपलब्धेः ॥२।२।३३॥

अयं तर्हि हेतुः

विनाशकारणानुपलब्धेः।

यदनित्यं तस्य विनाशकारणमुपलभ्यते, यथा लोष्टस्य कारणद्रव्यविभागः। न तु शब्दस्य, तस्मात् नित्यः शब्द इति ॥३३॥

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥२।२।३४॥

अश्रवणकारणानुपपत्तेः सततं श्रवणप्रसङ्गः। शेषं **भाष्ये** ॥३४॥

---

१. गोप्रत्ययस्यानि॰ C २. गोशब्दे गोशब्दप्रत्य॰ C ३. गोबुद्धिः J ४. तत्प्रत्यय-हेतुत्वे om J

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ॥२।२।३५॥

अनुमानेन शब्दस्य विनाशकारणमुपलभ्यते। यच्चानुमानेनोपलभ्यते न तन्नास्ति। किमनुमानम्? सन्तानोपपत्तेरिति वर्णितम्। तस्मादनपदेशोऽयं विनाशकारणानुपलब्धेरिति। यथा

विषाणी तस्मादश्वः [वै. सू. च. ३.१.१२]

इति। किं पुनरत्रासत्, किं विषाणम्, आहोस्विदश्वविषाणसंबन्ध इति? उभयमित्याह। ननु यदा विषाणिनमश्वत्वेन साधयति, तदा विषाणमस्त्येव न विषाणं प्रतिषिध्यते। अश्वविषाणसंबन्धस्याभावादनुमानमसदिति युक्तं वक्तुम्[1] असत्त्वादनपदेश इति।

कर्मवदिति चेत्? न, आश्रयानित्यत्वात्। अथ मन्यसे नित्यस्याप्युपलभ्यमानस्यात्यन्तमग्रहणं दृष्टम्, यथा कर्मत्वस्येति। तत् न, आश्रयस्यानित्यत्वात्। आश्रयस्य नित्यत्वादश्रवणकारणानुपपत्तेरिति ब्रूमः। कर्मत्वस्य पुनरग्रहणकारणमाश्रयानित्यत्वमस्ति। तस्मादप्रसङ्ग इति।

घण्टायामभिहन्यमानायां तारस्तारतरो मन्दो मन्दतर इति श्रुतिभेदात् नानाशब्दसन्तानो ह्यविच्छेदेन श्रूयते, तत्रेदं चिन्त्यते। शब्दस्य व्यज्यमानस्य यद् व्यक्तिकारणं तत् किं घण्टास्थम्, आहोस्विदन्यवृत्तीति? यदि घण्टास्थम्, किमवस्थितमुत सन्तानवृत्तीति? अन्यवृत्तित्वेऽपि किमवस्थितमुत सन्तानवृत्ति? यदि घण्टास्थमवस्थितं च श्रुतिभेदो न प्राप्नोतीति। अथ घण्टास्थं सन्तानवृत्ति च युगपदनेकशब्दव्यक्तिप्रसङ्गः। यावान् शब्दो घण्टास्थेनावस्थितेन सन्तानवृत्तिना वा व्यङ्ग्यः, स सर्व एकस्मिन् काले उपलभ्येत। घण्टास्थं चाभिव्यक्तिकारणं कथमन्यत्र वर्तमानं शब्दं व्यनक्तीति वाच्यम्। अथान्यगतमवस्थितं सन्तानवृत्ति वा शब्दाभिव्यक्तिकारणं मन्यसे, तदैकस्यां घण्टायामभिहतायां शब्दान् व्यनक्ति

---

१. उक्तं for वक्तुम् C

न प्रत्यासन्नदेशवर्तिषु घण्टान्तरेष्विति नियमहेतुर्वक्तव्यः। असति च शब्दभेदे श्रुतीनां भेद उपपादयितव्यः।

तारो मन्द इति नादो भिद्यते, न शब्दस्तारो मन्द इति चेत्? न, शब्दसमानाधिकरणस्य ग्रहणात्। शब्दशब्दसमानाधिकरणोऽयं तारमन्दादिशब्दः प्रवर्तते। न चासति शब्दविषयत्वे शब्दसमानाधिकरणत्वं युक्तम्, नीलोत्पलवदिति।

व्यामोहप्रत्ययः स इति चेत्? न, निमित्तानभिधानात्। अथ मन्यसे तारो मन्द इति शब्दसमानाधिकरणो व्यामोहप्रत्ययो भवति, यथा दीर्घः शब्दो महान् शब्द इति। न, विशेषहेत्वभावात्। व्यामोहप्रत्ययोऽयमिति न विशेषहेतुरस्ति। यदि चायं व्यामोहप्रत्ययो भवति, व्यामोहप्रत्ययस्य निमित्तं वाच्यम्। यथा दीर्घः शब्द इत्यविरतशब्दसन्तानश्रुतौ शब्दे दीर्घप्रत्ययो भवति। यानि खलु दीर्घाणि द्रव्याणि भवन्ति तेषामवयवोपचये सति ग्रहणसन्ततिविषयत्वम्। तत्सामान्यात् शब्दे दीर्घप्रत्ययः। न तु नित्यशब्दवादिनो व्यामोहप्रत्ययबीजमस्तीत्ययुक्तमेतत्।

तुल्यमिति चेत्? न, तन्निमित्तस्य कदाचिद् भावात्। अथ मन्यसे यस्याप्यनित्यः शब्दः, तेनापि घण्टास्थमवस्थितं सन्तानवृत्ति वा, अन्यस्थमवस्थितं सन्तानवृत्ति वोत्पत्तिकारणं वाच्यम्। घण्टास्थमुत्पत्तिकारणं कदाचित् शब्दानुत्पादयति कदाचित् नेति नित्यवत् प्रसङ्गः। न प्रसङ्गो निमित्तस्य कदाचिद् भावात्। यत्तु तत् शब्दोत्पत्तिकारणं घण्टावृत्ति तत् कदाचिद् भवति। कदाचिद् भावेऽपि सति सन्तानवृत्ति। तस्मात् निमित्तभेदानुविधायिनः शब्दाः कदाचिद् भवन्ति। सन्तानवृत्तित्वाच्च मन्दतरतमादिभिन्नरूपानुविधायिनं शब्दमुत्पादयन्तीति। तच्च कारणं संस्कार इति।

कुतस्तदुत्पत्तिः? पाणिसंश्लेषमपेक्षमाणात् कर्मणः। पाणिघण्टासंश्लेषात् पाणिगतवेगापेक्षात् घण्टायां कर्म। तत् कर्म पाण्यभिघातमपेक्षमाणं विभागसमकालं संस्कारं करोति। सा चलन्त्याध्यात्मिकं वायुमुपगृह्णाति। सा वायुनाभिहता पुनः कर्म करोति। ततः संस्कारः संस्कारेण पुनः कर्म। पुनर्वायूपग्रहणमित्येवं

मन्दतरतमादिन्यायेन[१] संस्कार उपपद्यत इति। तत्रान्त्यस्यातिमान्द्यात् घण्टायां महाभूतसंक्षोभणशक्तेरभावः। ततो वायूपग्रहोच्छेदः। ततः संस्कारक्षय इति ॥३५॥

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥२।२।३६॥

न संस्कारोऽस्त्यनुपलब्धेरिति चेत्? अथ मन्यसे, नैव संस्कारोऽस्त्यनुपलब्धेरिति। तच्चासत्

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः।

उक्तार्थं सूत्रम्। यदि संस्कारं शब्दोत्पत्तिनिमित्तं न प्रतिपद्यसे पाणिघण्टासंश्लेषात् शब्दसन्तानोच्छेदो न प्राप्नोति। अथ घण्टास्थः संस्कारः पाणिसंश्लेषात् निवर्तते, तथापि कथं शब्दसन्तानोच्छेद इति। न ब्रूमः पाणिघण्टासंश्लेषः शब्दमुच्छिनत्तीति, अपि तु पाणिघण्टासंश्लेषात् तद्वृत्तिः संस्कारः स्पर्शवद्द्रव्यसंयोगविरोधित्वात् निवर्तते। निवृत्ते च तस्मिन्

कारणाभावात् कार्याभावः[२]

इति शब्दसन्तानोच्छेदः ॥३६॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥२।२।३७॥

यदिदमुच्यते

विनाशकारणानुपलब्धेः

नित्यः शब्द इति, यदि यस्य विनाशकारणं नोपलभ्यते तन्नित्यम्, यानीमानि शब्दग्रहणानि तेषां न भवता विनाशकारणमुपपाद्यते। अनुपपादनादवस्थानात् नित्यत्वमिति। अथानुपलब्धविनाशकारणान्यपि शब्दग्रहणानि अनित्यानि,

---

१. इत्येवमादिन्यायेन C २. वै. सू. (च) १.२.१

शब्दोऽप्येवमित्यनेकान्तः। अथानुमानतः शब्दग्रहणानां विनाशकारणं गम्यते[१], तत्समानं शब्द इति न किञ्चिद् बाधितं भवति॥३७॥

अस्पर्शत्वादप्रतिषेधः॥२।२।३८॥

व्यधिकरणत्वादयुक्तमिति चेत्, अथ मन्यसे व्यधिकरणः शब्दः, कथमन्यवृत्तिना संश्लेषेण निवर्त्यते[२]? अथ व्यधिकरणमपि निवर्तयति, सर्वघण्टाशब्दोच्छेदप्रसङ्गः। तस्मात् पाणिघण्टासंश्लेषसमानाधिकरणः शब्द इति।

अस्पर्शत्वादप्रतिषेधः।

अस्पर्शव्यापिद्रव्याश्रयः[३] शब्द इति सूत्रार्थः। कथमन्यत्र वर्तमानस्य पाणिघण्टासंश्लेषो निवर्तक इति? न, उक्तोत्तरत्वात्। उक्तोत्तरमेतत्, कारणाभावादन्यशब्दानुत्पादः। यस्तूत्पन्नः शब्दः, स मन्दतरतमादिन्यायेन अन्त्यस्यातिमान्द्यात् येन केनचिद् विरोधित्वात् क्षीयते। योऽयं संस्कारः शब्दकारणत्वेन समधिगतः स किमेकोऽनेको वेति **संदिह्यते**, अनेकः संस्कार इत्येतत् तत्त्वम्, शब्दभेदात्। कारणभेदे सति कार्यभेदो **दृष्ट इति**। यस्य चैकः संस्कारः, तस्यैषोः पातः प्राप्नोति, अगत्वैव यावद् **गन्तव्यमिति**। अथाप्रतिबध्यमाने संस्कारे द्रव्यं गच्छति, न कदाचित् पातः **प्राप्नोति**। दृष्टश्च पातः[४]। तस्माद् अनेकः संस्कार इति॥३८॥

विभक्त्यन्तरोपपत्तेश्च समासे॥२।२।३९॥

तस्मात् नायं शब्दो गन्धादिभिः सह सन्निविष्टो व्यज्यते विभक्त्यन्तरोपपत्तेः। विभागश्च विभागान्तरं चेति विभक्त्यन्तरम्। विधर्माणः शब्दा नाना-

---

१. °कारणानि गम्यन्ते C २. निवर्तन्ते J ३. °व्यापि° om C ४. दृष्टश्च पातः om C

रूपाः, सरूपाश्चैकद्रव्याः श्रूयन्ते। समासः समुदायः। एतच्च स्पर्शवद्द्रव्यवृत्तिषु शब्देषु न प्राप्नोति गन्धादिवत्। यथा प्रतिद्रव्यमेको गन्धः, एवं प्रतिद्रव्यमेकः शब्द इति। सन्तानोपपत्तेश्चेति चार्थः। यद्ययं गन्धादिभिः सह सन्निविष्टः स्यात्, नान्यत्र वर्तमानः श्रोत्र उपलभ्येत। तस्मात् सन्तानवृत्तित्वाद् आकाशाश्रयः शब्द इति॥३९॥

॥शब्दानित्यत्वप्रकरणम्॥

[शब्दपरिणामप्रकरणम्]

विकारादेशोपदेशात् संशयः॥२।२।४०॥

इति संशयज्ञापनार्थं सूत्रम्॥४०॥

प्रकृतिविवृद्धौ विकारविवृद्धेः॥२।२।४१॥

इति सूत्रम्। प्रकृत्यनुविधानादिति सूत्रार्थः, विकारे प्रकृत्यनुविधानं दृष्टमिति॥४१॥

न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः॥२।२।४२॥

इति साधनपक्षे दृष्टान्तमात्रत्वादहेतुः॥४२॥

द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः॥२।२।४३॥

द्वि...न्तः॥४३॥

नातुल्यप्रकृतीनां विकारविकल्पात्॥२।२।४४॥

दूषणपक्षे

नातुल्यप्रकृतीनां विकारविकल्पात्।

इत्यसंबद्धम्। अतुल्यायाः प्रकृतेर्विकल्प्यन्ते विकाराः, ह्रस्वदीर्घानुविधानं तु यकारे नास्तीति॥४४॥

द्रव्यविकारवैषम्यवद् वर्णविकारविकल्पः॥२।२।४५॥

यथा द्रव्यभावेन तुल्यायाः प्रकृतेर्विकारविकल्पो भवति[१], एवं वर्णभावेन तुल्यायाः प्रकृतेर्विकारविकल्पः स्यादिति॥४५॥

न विकारधर्मानुपपत्तेः॥२।२।४६॥

इति परिहारः॥४६॥

विकारप्राप्तानामपुनरापत्तेः॥२।२।४७॥

इति। यदि विक्रियन्ते वर्णाः, पुनरापत्तिर्न प्राप्नोति॥४७॥

सुवर्णादीनां पुनरापत्तेरहेतुः॥२।२।४८॥

विकारप्राप्तानां पुनरापत्तिदर्शनादनेकान्त इति सूत्रार्थः॥४८॥

---

१. °र्विकारो विकल्प्यते C

न तद्विकाराणां सुवर्णभावाव्यतिरेकात्॥२।२।४९॥

सर्वावस्थं सुवर्णदर्शनम्, न पुनरिकारयकारयोः कश्चिद् वर्णात्मा व्यवस्थितोऽस्ति य इत्वं हित्वा यत्वमापद्यत इति।

वर्णत्वाव्यतिरेकाद् वर्णविकाराणामप्रतिषेधः। वर्णविकारा अपि वर्णत्वात् न व्यतिरिच्यन्त[१] इति। अस्ति वर्णत्वं सामान्यमिति। सामान्यवतो धर्मयोगो न सामान्यस्येति परिहारः॥४९॥

नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात्॥२।२।५०॥

वर्णविकारानुपपत्तिः

नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात्।

नित्या वर्णा इति। न युक्तो विकारो व्याघातात्। अनित्या वर्णा इति न युक्तो विकारः, अनवस्थितानां विकारादर्शनादिति॥५०॥

नित्यानामतीन्द्रियत्वात् तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः॥२।२।५१॥

नित्यानामप्यतीन्द्रियत्वदर्शनात् तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेध इति विकल्पसमा जातिः॥५१॥

अनवस्थायित्वे च वर्णोपलब्धिवत् तद्विकारोपपत्तिः॥२।२।५२॥

इति साधर्म्यसमा जातिः॥५२॥

---

१. न वर्णत्वं व्यभिचरन्ति C

विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥२।२।५३॥

उभयोरप्युत्तरम्,

विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः।

नित्या वर्णा विक्रियन्त इति व्याघातो दोषः। उपलभ्यमानस्य चेकारस्य यत्वानुपपत्तेर्वर्णोपलब्धिवदिति असंबद्धम् ॥५३॥

प्रकृत्यनियमात् ॥२।२।५४॥

इतश्च वर्णविकारानुपपत्तिः,

प्रकृत्यनियमात्।

विकारे प्रकृतीनां नियमो दृष्टः। इकारयकारयोस्त्वनियमः। तस्मादनियमात् न विक्रियन्त इति ॥५४॥

अनियमे नियमान्नानियमः ॥२।२।५५॥

सूत्रार्थोऽनियमो नास्तीति ॥५५॥

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥२।२।५६॥

अनुज्ञातप्रतिषिद्धयोरेकत्वानुपपत्तेरिति विरोधः सूत्रार्थः। तस्मादनुपलभ्यमान-पृथग्धर्मिविशेषाणामादेश इति। यद्येते वर्णा विक्रियेरन्, ततः पृथग्विकारलक्षणेभ्यो धर्मेभ्यो धर्म्युपलभ्येत, न तूपलभ्यते। तस्मात् न वर्णा विक्रियन्त इति ॥५६॥

गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्ण-विकाराः ॥२।२।५७॥

अथ विक्रियन्त इत्येवं विकारो भवति

गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकाराः।

सूत्रार्थो गुणान्तरापत्त्यादिनादेश[1] इति। अयं च विकारादेशोपदेशविचारो **भाष्यकारेण**ैव सम्यक् निरूपित इति सूत्रार्थमात्रं वर्णितमिति॥५७॥

॥शब्दपरिणामप्रकरणम्॥

[शब्दशक्तिपरीक्षाप्रकरणम्]

ते विभक्त्यन्ताः पदम्॥२।२।५८॥

ते वर्णा यथादर्शनं विकृता विभक्त्यन्ताः पदसंज्ञका भवन्ति। अर्थप्रत्ययस्तर्हि न प्राप्नोति? न न प्राप्नोति। अन्त्यवर्णप्रत्ययात् पूर्ववर्णप्रतिसन्धानप्रत्ययापेक्षात् अर्थप्रत्यय इति। विभक्तिर्द्वयी, नामिकी चाख्यातिकी च। नामिकी स्वादयः, आख्यातिकी तिबादयः। तया विशिष्यमाणं पदं द्वेधा भवति, नाम चाख्यातं च। अभिधेयस्य क्रियान्तरयोगाद् विशिष्यमाणरूपः शब्दो नाम, यथा ब्राह्मण इति क्रियाकारकसमुदायः कारकसंख्याविशिष्टः। क्रियाकालयोगाभिधायि क्रिया-प्रधानमाख्यातं पचतीति यथा। यदि द्वयी विभक्तिः, उपसर्गनिपातास्तर्हि न पद-संज्ञकाः? न, नाम्नि अन्तर्भावात्। उपसर्गनिपाता नाम्ना संगृहीताः, यस्मादाह

अव्ययाल्लोपः[2]

इति, तेन सुबन्तत्वात् तेनैव संगृहीता इति॥५८॥

---

१. °पत्त्यादेरादेशः C २. द्रः पा. सू. २.४.८२

व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ॥२।२।५९॥

पदेन व्यवहार इति पदार्थश्चिन्त्यते। नामपदं चाधिकृत्य व्यवहार इति नामपदं चिन्त्यते। नाम्नश्चाधिकारो व्यापकत्वात्। यस्मात् नाम्ना सर्वपदं व्याप्यते, तस्मात् गौरित्यस्य पदस्यार्थश्चिन्त्यते।

न पदादर्थाधिगतिर्विशेषेऽनवस्थानात्। न हि पदे उच्चरिते कश्चिद् विशेषो गम्यते। तस्मात् पदमवाचकमिति? न, पदस्य विशेषाविषयत्वात्। क एवमाह पदेन विशेषो गम्यत इति? अपि तु सामान्यवर्ति पदम्, विशेषवर्ति च वाक्यम्। न च सामान्याभिधानादनर्थकं भवितुमर्हतीति। न सामान्यस्य व्यवहाराविषयत्वात्[१]। सर्व उपदेष्टा विशेषप्रतिपत्त्यर्थं पदमुच्चारयति। न च सामान्ये प्रैषो न संप्रतिपत्तिः। तस्मात् पदमवाचकमेवेति? न, सामान्यविषयत्वे सति विशेषश्रुतेर्नियामकत्वात्। यदि पदान्यवाचकानि स्युः, न च पदश्रवणात् सामान्यं गम्येत। यदवाचकं न तस्मात् सामान्यं विशेषो वा गम्यते, यथा अर्थात्। गम्यते च पदात् [२]सामान्यम्। सामान्यश्रुतेश्च विशेषश्रुतिर्नियामिका भवति। यथा गौरिति सामान्याधिगतौ तिष्ठति गच्छतीति विशेषश्रुत्या विशेषो गम्यत इति। कथं पुनरियं विशेषश्रुतिर्गच्छति तिष्ठतीति? नैवेयं केवला विशेषश्रुतिः, किं तु पूर्वपदापेक्षया विशेषप्रत्ययहेतुत्वात् विशेषश्रुतिरित्युच्यते। भवतु वा पदादेवोभयम्। एतस्मादेव वा गोशब्दादुभयं गम्यते क्रिया च तत्साधनं च। प्रधानोपसर्जनभावस्यानियमेन यदायं गोशब्दो गोत्वनिमित्तो गोत्वयोगाद् गौरिति, तदा गोशब्दात् प्रधानं साधनं गौर्गम्यते, क्रिया त्वङ्गभूता विशेषकत्वात्। यदा पुनः क्रियाप्रधानं पदं गोर्भावो गोत्वमिति, तदापि गौरङ्गभूतो विशेषकत्वाद् गम्यते प्रधानं गोत्वमिति। तदेवं प्रधानोपसर्जनभावस्यानियमेन गोत्वमिति च पदे गौरिति चोभयं गम्यत इति। तत्र प्रधानोपसर्जनभावमाश्रित्य तदर्थे

---

१. व्यवहारविशेषावि॰ C २. तत्सामा॰ C

व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः।

यस्मादयं गोशब्दो व्यक्त्याकृतिजातिष्वविनाभावेन वर्तमानासु प्रयुज्यते, अविनाभाववृत्तिश्च सन्निधिः, अतो न ज्ञायते किं व्यक्तिः पदार्थः, उत आकृतिः, उत जातिरिति॥५९॥

याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद् व्यक्तिः॥२।२।६०॥

शब्दस्य प्रयोगसामर्थ्यात् पदार्थावधारणमिति प्रयोगप्रदर्शनार्थं याशब्दादिसूत्रम्। नामी याशब्दादयो जातौ प्रयुज्यन्ते। कस्मात्? अभेदात्। एका जातिः। तस्या विशेषणमनर्थकम्। या गौस्तिष्ठतीति या गौर्निषण्णेति। एवं शेषेषु। आकृतेरप्यभिधायकमेतत् न भवति, निष्क्रियत्वादाकृतेः। न हि निष्क्रिया गच्छति तिष्ठति वेति। एवं सर्वत्र। यस्य चानेन विशेषणेन तिष्ठत्यादिना योगः, तं गोशब्दोऽभिधातुमर्हतीति। कुतः? विशेषणविशेष्यभावस्यैकविषयत्वात्। यदि च गोशब्दस्य तिष्ठतिशब्दस्य चैकमभिधेयं भवति, ततो गोशब्देन धर्म्यन्तराणि निराक्रियन्ते, तिष्ठतिशब्देन च क्रियान्तराणीति विशेषणविशेष्यभावापन्नयोस्तिष्ठतिगोशब्दयोः सामानाधिकरण्यं युज्यते, अन्यथा नेति। द्रव्यं व्यक्तिरिति नार्थान्तरम्। तिष्ठतिशब्दसन्निहितेन गोशब्देन व्यक्तिरभिधीयत इति॥६०॥

न, तदनवस्थानात्॥२।२।६१॥

तत्प्रतिषेधार्थं सूत्रम्

न, तदनवस्थानात्।

इति। नानेन गोशब्देन व्यक्तिमात्रं शुद्धमुच्यते। यद्ययं व्यक्तिमात्राभिधायकोऽभविष्यत्, तेन यस्यां कस्याञ्चिद् व्यक्तौ प्रत्ययोऽभविष्यदिति सूत्रार्थः॥६१॥

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः ॥२।२।६२॥

यदि व्यक्तिर्न पदार्थः, कथं व्यक्तौ प्रयोगो या गौस्तिष्ठतीत्येवमादिः? निमित्तादतद्भावेऽपि तद्वदुपचारः। क्व पुनर्निमित्तादतद्भावेऽपि तद्वदुपचारो दृष्ट इति तस्योपदर्शनार्थं[१] सूत्रम्,

सह...चारः। इति। अतद्भावेऽपि तदुपचार इति। अतच्छब्दस्य तच्छब्देनाभिधानमुपचारः। यथा यष्टिकाशब्देन द्रव्यविशेषोऽभिधीयते। यष्टियोगात् पुनः साहचर्याद् [२]ब्राह्मणोऽभिधीयते यष्टिकां प्रवेशयेति[३]। एवं सर्वत्र। किं पुनरत्रोपचारबीजं यष्टिका ब्राह्मण इति? न ह्युपचारबीजमन्तरेणोपचारो लभ्यते। ननूक्तं साहचर्यमिति। साहचर्यं नाम यष्टिकया नित्यसंबन्धः। यष्टिकासंबन्धाच्च यष्टिकावानिति स्यात् न तु यष्टिकेति। यष्टिकावानिति चायं शब्दो मुख्य एव। तस्मादुपचारबीजमन्यद् वक्तव्यमिति। यष्टिकायां तावदयं यष्टिकाशब्दो जातिनिमित्तः। यष्टिकात्वं जातिः। सा यष्टिकायां वर्तत इति तया यष्टिकात्वयुक्तया यष्टिकया ब्राह्मणस्य योगः। साहचर्यात् संयुक्तसमवेतां जातिमध्यारोप्य ब्राह्मणं यष्टिकेत्याह। एवं शेषाण्युपचारबीजानि स्वयमुत्प्रेक्षणीयानीति॥६२॥

आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ॥२।२।६३॥

यदि तर्हि गौरिति पदस्य न व्यक्तिरर्थः, अस्तु तर्हि

आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः।

---

१. °पादनार्थं C २. ब्राह्मणविशेषः C ३. यथा यष्टिकाः प्रवेशयेति C; प्रवेशयेदिति J

आकृतिः पदार्थः। कस्मात्? तदपेक्षत्वात् सत्त्वव्यवस्थानस्य। गौरश्वः पुरुष इत्येवमादिसत्त्वव्यवस्थानमाकृत्यपेक्षं सिध्यति। यदपेक्षा च सत्त्वव्यवस्थानसिद्धिः, स गोशब्दस्य विषय इति। अत्रापि तदेवोपस्थितम्, न तदनवस्थानादिति। यस्य च जात्या योगः, स गोशब्दस्य विषयः, नाकृतिर्जात्ययोगात्। कस्य पुनर्जातियोगः? नियतावयवव्यूहस्यावयविनः। नियतोऽवयवव्यूहो यस्य स भवति नियतावयवव्यूहः। अन्यपदार्थेन बहुव्रीहिणा अवयव्यभिधीयत इति॥६३॥

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्वके जातिः ॥२।२।६४॥

अस्तु तर्हि जातिः पदार्थः

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्वके जातिः।

यस्मात् मृद्वके व्यक्त्याकृती स्तः, न च तत्र प्रोक्षणादीनि प्रयुज्यन्ते। न हि गामानय, गां प्रोक्षय, गां देहीति मृद्वके प्रैषसंप्रतिपत्ती भवतः, यदभावात् तत्र न संप्रत्ययः स गोशब्दस्यार्थः। कस्य चाभावात् न तत्र संप्रत्ययः? जातेः।

अथ मृद्वके कस्माद् गोत्वं न जातिः? यस्मात् मृद्वको गौर्न भवति। यश्च गौर्न भवति, न तत्र गोत्वं वर्तते। यथा अश्व इति। अथ मृद्वकः कस्मात् गौर्न भवति? अत एव न भवति यस्मात् मृद्वक इति। न चायं युक्तः प्रश्नः मृद्वकः कस्माद् गौर्न भवतीति। किं कारणम्? प्रतिपत्तिबाधितत्वात्। भवानप्येतमर्थं प्रतिपद्यते नायं गौरिति। प्रतिपत्त्या च प्रश्नो बाध्यत इति।

अथ मृद्वके गोशब्दः कुतः? आकृतिसामान्यात् चित्रादिवदिति। सर्वगतेति चेत्? अथ मन्यसे सर्वगता जातिः। सोत्पद्यमानेन यथा गवा संबध्यते, तथा मृद्वकेनापीति अस्ति मृद्वके गोत्वम्? तन्न, अनभ्युपगमात्। [१]केन सर्वगतत्वं

---

१. केन (in all sources) seems to be a mistake for न

जातेरभ्युपगम्यते, अपि तु स्वविषये सर्वत्र वर्तत इति सर्वगतेत्युच्यते[१]। कः पुनर्गोत्वस्य स्वो विषयः? यत्र गोत्वं वर्तते। क्व पुनर्गोत्वं वर्तते? यत्र गोत्वनिमित्तोऽनुवृत्तिप्रत्ययो भवति। क्व पुनरनुवृत्तिप्रत्ययं गोत्वं[२] करोति? यत् तस्य साधनम्। कः पुनर्नित्वे गोत्वे गोः साधनार्थः? यत् तेन व्यज्यते। न हि ककुदादिमदर्थव्यतिरेकेण गोत्वस्य व्यक्तिरिति[३]।

न हि पिण्डेभ्योऽर्थान्तरं गोत्वम्, पिण्डान्तरालेष्वग्रहणादिति **केचित्**। तन्न, विकल्पानुपपत्तेः। पिण्डान्तरालेष्वदर्शनादिति ब्रूवाणः पिण्डान्तरालं पर्यनुयोज्यः। किमिदं पिण्डान्तरालम्? किमाकाशम्, आहोस्विदभावः, उत द्रव्यान्तरमिति? यद्याकाशम्, न तत्र गोत्वम्। न ह्याकाशं गौरिति। एतेनाभावो द्रव्यान्तरं च व्याख्यातम्।

विशेषप्रत्ययानामनाकस्मिकत्वाच्च। अयं च पिण्डप्रत्ययव्यतिरेकभाक् प्रत्यय उपजायमानो निमित्तान्तराद् भवति। दृष्टा खलु पिण्डप्रत्ययव्यतिरेकभाजां प्रत्ययानां निमित्तान्तरादुत्पत्तिः। यथा वस्त्रचर्मकम्बलेषु नीलप्रत्यय इति। आकृतिसामान्यादिति चेत्? अथ मन्यसे सत्यम्, अयं [४]पिण्डव्यतिरिक्तात् निमित्तान्तरादनुवृत्तिप्रत्ययो भवति, न पुनरत्र जातिर्निमित्तम्। अपि तु यच्छिरःपाणिपादाकृतिसामान्यम्, तस्मादनुवृत्तिप्रत्यय इति? न, पिण्डवदसाधारणत्वाद् आकृतेः। यथैव पिण्डाः पिण्डान्तरवृत्तयो न भवन्ति, तथा आकृतिरपि एकपिण्डवर्तित्वात् पिण्डान्तरवर्तिनी न भवति।

अथ आकृतेः पिण्डान्तरवर्तित्वमभ्युपगम्यते, नाम्नि विवादो नार्थ इति। अथ पिण्डव्यतिरिक्तं सामान्यं नाभ्युपगम्यते, तथाप्येकसामान्यनिराकरणात् समानप्रत्ययबीजमन्यद् वक्तव्यं स्यात्। न ह्यसति सामान्ये समानप्रत्ययं पश्याम इति। असत्यपि सामान्ये दृष्टः समानप्रत्यय इति चेत्? अथ मन्यसे यथा सामान्येष्वसति

---

१. cf. स्वविषयसर्वगतम्-पदार्थधर्मसंग्रहः, Sam. 1951, p.311. २. गोत्वं om J ३. अभिव्यक्तिरस्ति C ४. °व्यतिरेकनिमि° C

सामान्यान्तरे अनुवृत्तिप्रत्ययो दृष्टः गोत्वाश्वत्वघटत्वेषु इदं सामान्यमिदं सामान्यमिति, तस्मादनैकान्तिकत्वादनुवृत्तिप्रत्ययोऽसाधनम् अर्थान्तरनिमित्तप्रतिपादने इति? नानभ्युपगमात्। न मया गोत्वाश्वत्वघटत्वेषु निर्निमित्तः समानप्रत्ययोऽभ्युपगम्यते। तस्मादनुत्तरमेतत्।

सूत्रव्याघात इति चेत्? अथ[१] मन्यसे सामान्येष्वपि सामान्यमस्तीति, ननु सूत्रव्याघातः

सामान्यविशेषेषु सामान्यविशेषाभावात् तत एव ज्ञानम् [वै. सू. (च) ८.५] इति। न, सूत्रार्थापरिज्ञानात्। अयं सूत्रार्थः, यथा द्रव्यमिति प्रत्ययो द्रव्यत्वविशेषणे द्रव्ये भवति, न पुनः सामान्यविशेषेष्वेवमिति। न पुनरयं सूत्रार्थः, निर्निमित्तोऽनुवृत्तिप्रत्यय इति। किं निमित्तमिति चेत्? अथ मन्यसे गोत्वादिष्वनुवृत्तिप्रत्ययस्य किं निमित्तं यतः सामान्यमिति भवति? कुतश्च सामान्यमिति भवति? अनेकार्थसमावायात्। यथा गोत्वमनेकार्थसमवायि, तथा अश्वत्वादीत्यनेकार्थैः तत्समवायस्य[२] समानत्वाद् गोत्वादिष्वनुवृत्तिप्रत्यय इति। पाचकादिशब्दवदिति चेत्? अथ मन्यसे यथा पाचकादिशब्दा अनुवृत्तप्रत्ययाश्च[३] भवन्ति न च पाचकत्वं नाम [४]सामान्यमस्ति, तथा गवादिषु अनुवृत्तिप्रत्यया इति? न, हेत्वर्थापरिज्ञानात्। विशेषप्रत्ययानामनाकस्मिकत्वादित्यस्य हेतोः पिण्डप्रत्ययव्यतिरिक्तस्य प्रत्ययस्य निमित्तान्तरादुत्पाद इत्ययमर्थः। न पुनः सर्वोऽनुवृत्तिप्रत्ययः सामान्यादेव भवतीति। एवं च सति पचनक्रियायाः यत् प्रधानं साधनं तत्पाचकशब्देनोच्यते। तच्च प्राधान्यं पाचकान्तरेष्वप्यस्तीति न दोषः।

यद्यनेकार्थवृत्ति[५] गोत्वं तत् किं प्रतिपिण्डं परिसमाप्त्या[६] वर्तते, अथैकदेशेनेति? किं चातः? यदि प्रतिपिण्डं परिसमाप्त्या वर्तते, पिण्डवदसाधारणत्वात् न सामान्यं भवितुमर्हति। अथैकदेशेन वर्तते, तथापि नैकमनेकत्र वर्तते, किं

---

१. यदि for अथ C २. °त्यनेकार्थसम° J ३. अनुवृत्ताश्च J ४. सामान्यविशेषम् C ५. अनेकानुवृ° C ६. किं पिण्डपरि° J

त्वनेकमनेकत्रेति। यस्मात् प्रदेशाः सामान्यस्य वर्तन्त इति। ये च ते एकदेशाः सामान्यस्य प्रत्येकं पिण्डेषु वर्तन्ते ते किं सामान्यात्मका उत नेति? यदि सामान्यात्मकाः, [१]नैकमनेकत्र प्रवर्तत इति प्राप्तम्। न चानेकमनेकत्र प्रवर्तमानं सामान्यमिति युक्तं वक्तुम्। अथ न सामान्यात्मकाः, शून्यमभिधानं सामान्यस्यैकदेशाः प्रत्येकं वर्तन्त इति। तैरपि त्वेकदेशैः सामान्यं [२]वर्तत इति पूर्ववत् प्रसङ्गः। न चान्या गतिरस्ति। तस्मात् नानेकवृत्ति सामान्यमिति। न, विकल्पानभ्युपगमात्। नायं विकल्पोऽस्ति गोत्वं प्रत्येकं पिण्डेषु परिसमाप्त्या वर्तते, अथैकदेशेन वर्तत इति। तस्माद् विकल्पानभ्युपगमात् अप्रश्नोऽयम्।

कस्मात्? गोत्वस्यावयविसमुदायत्वानभ्युपगमात्। न गोत्वमवयवी न समुदायः, [३]समुदायस्य भाग एकदेशशब्दः, अवयविनश्चावयवे। यदा न किञ्चित्परिहाण्या[४]शेषमभिधीयते, तदा अवयविनोऽवयवानपेक्ष्य कृत्स्नशब्दः, समुदाये च समुदायिनोऽपेक्ष्य। न च गोत्वमवयवी, न समुदायः। तस्मात् न तत्र कृत्स्नैकदेशशब्दौ स्तः। न चेत् तत्रैतौ शब्दौ स्तः तस्माद् गोत्वं किं कात्स्न्र्येन वर्तत उत एकदेशेनेति न युक्तः प्रश्नः।

उक्तं चात्र[५] एकमनेकत्र वर्तत इति प्रतिजानानो नानुयोक्तव्यः। कस्मात्? उभयेन व्याघातादिति। कथं तर्हि गोत्वं गोषु वर्तते? आश्रयाश्रयिभावेन। कः पुनराश्रयाश्रयिभावः? समवायः। तत्र वृत्तिमद् गोत्वम्, वृत्तिः समवाय इति इहप्रत्ययहेतुत्वादित्युक्तम्। गव्यगवि वृत्त्यभावादिति चेत्? अथ मन्यसे यदिदं गोत्वं गोष्वनुवृत्तिप्रत्ययकारणं तत् किं गवि वर्तते, आहोस्विदगवि? यदि तावद् गवि? प्राक् गोत्वयोगाद् गौरेवासाविति व्यर्थं गोत्वम्। अथागवि? तेनाश्वाद्यपि गोत्वयोगाद् गौः प्राप्नोति। न चान्या गतिरस्ति। तस्मात् न गोत्वादनुवृत्तिप्रत्यय इति? न, विकल्पानभ्युपगमात्। न गवि गोत्वम्, नागवि प्राक् गोत्वात् नासौ गौर्नाप्यगौरिति। किं कारणम्? उभावेतौ विशेष्यप्रत्ययौ। न च विशेष्यप्रत्ययौ[६]

---

१. एकमेकत्र C २. पूर्ववद्वर्तते C ३. समुदायसमु॰ J ४. परिहाया॰ C
५. वा. २.१.३२ ६. च विशेष्यप्रत्ययौ om C

विशेषणसंबन्धमन्तरेण भवतः। न च प्राग् गोत्वयोगाद् वस्तु विद्यते। न चाविद्यमानं गौरित्यगौरिति वा शक्यं व्यपदेष्टुम्। यदैव वस्तु तदैव गोत्वेनाभिसंबध्यत इत्यनास्पदो विकल्पः।

एतेन सत्तासंबन्धस्य सदसद्विकल्पो[1] व्याख्यातः। न सतः सत्तासंबन्धः, नासतः। यदैव वस्तु तदैव सत्तया संबध्यत[2] इति सदसदाश्रयदोषोऽनुपपन्नः। तस्मादुपपन्ना जातिः। न चासौ मृद्वक इति यदभावात् तत्रासंप्रत्ययः स पदार्थ इति॥६४॥

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः॥२।२।६५॥

जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षते। व्यक्त्याकृती इति प्राप्ते प्राधान्यादाकृतेः पूर्वनिपातः। किं पुनः प्राधान्यम्? आकृतिविशेषणत्वं व्यक्तेः। यस्माद् व्यक्त्या आकृतिर्विशेष्यमाणा जातेर्लिङ्गं भवति, तस्मात् प्रधानमाकृतिः। न चागृह्यमाणायामाकृतौ व्यक्तौ च जातिमात्रं शुद्धं शब्दाद् गम्यते, तस्मात् न जातिरेव[3] पदार्थः॥६५॥

व्यक्त्याकृतिजातयस्तु पदार्थः॥२।२।६६॥

न च वै पदार्थेन न शक्यं भवितुम्। कस्तर्हि पदार्थः?

व्यक्त्याकृतिजातयस्तु पदार्थः।

तुशब्दो विशेषणार्थः। किं विशिष्यते? प्रधानोपसर्जनभावस्यानियमेन पदार्थत्वम्। यदा भेदविवक्षा विशेषगतिश्च गौस्तिष्ठति, गौर्निषण्णेति तदा व्यक्तिः पदार्थः, अङ्गं जात्याकृती। जातावाकृतौ च स्थानगमनासंभवात् यत्र संभवः स

---

१. सदसत्संबन्धो J २. संबद्धमिति C ३. जातिरपि J

पदार्थ इति। यदा पुनर्भेदो न विवक्षितः, सामान्यगतिश्च तदा जातिः पदार्थः। यथा गौर्न पदा स्प्रष्टव्येति। आकृतेस्तु प्रधानभाव उत्प्रेक्षितव्य इति स्वयमुत्प्रेक्ष्य इत्ययमर्थः। क्व पुनराकृतेः प्राधान्यं दृष्टम्? यथा पिष्टकमय्यो गावः क्रियन्तामिति। तदेवं बहुलं प्रयोगेषु प्रधानोपसर्जनभावः स्वयमुत्प्रेक्ष्य इति।

न व्यक्त्याकृतिजातयः पदार्थ इति **केचित्**। कुतः? विकल्पानुपपत्तेः। सदित्येतदेव पदं व्यापकत्वादुपादाय चिन्त्यते, सदित्यनेन पदेन जातिर्वाभिधीयते, पिण्डो वा, संबन्धो वा जातिमान् वार्थः[१]? तत्र न तावत् जातिरभिधीयते भेदार्थैर-भिन्नविभक्तिकत्वात्। यद्ययं जातिवाचकः सच्छब्दो भवति सद्द्रव्यमिति भेद-वाचिना द्रव्यशब्देन सामानाधिकरण्यं न प्राप्नोति। न हि भिन्नार्थवाचकानां शब्दानां सामानाधिकरण्यं पश्यामः। न हि गवाश्वमिति सामानाधिकरण्यं दृष्टमिति।

अथ द्रव्यादिवृत्तित्वात् सत्ताया द्रव्यादिशब्दैः सह सामानाधिकरण्यम्, तथापि पारतन्त्र्यात् सत्ता गुणः[२]। गुण्यभिधायिनोश्च शब्दयोः सामानाधिकरण्यम्, यथा शङ्खस्य शौक्ल्यमिति। एतेन संबन्धो व्याख्यातः। सच्छब्दः पिण्डानां वाचको भवतीति न युक्तम्, पिण्डानामानन्त्यात्। न ह्येकस्य सच्छब्दस्य अनेकेन द्रव्यगुणकर्मप्रपञ्चेन संबन्ध आख्यातुं शक्यः। न चानाख्याते शब्दार्थसंबन्धे शब्दादर्थप्रतिपत्तिर्युक्ता स्वरूपमात्रप्रतीतेर्व्यभिचाराच्च। सच्छब्दश्रवणात् द्रव्य-गुणकर्माणीति परिप्लवते बुद्धिः[३]। न च यस्मादभिधानात् परिप्लवते बुद्धिः, तदभिधानमिति युक्तं वक्तुम्। तस्मात् न सच्छब्दो भेदानां वाचकः। जातिमन्मात्रा-भिधायकोऽपि सच्छब्दो न भवति। कस्मात्? अस्वतन्त्रत्वात्। न हि सच्छब्दात् तद्भेदा घटादयो गम्यन्त इति तद्गतघटादिभेदानाक्षेपात् सामानाधिकरण्याभावः।

अथ वा अस्वतन्त्रत्वादिति सच्छब्दः प्राधान्येन सत्तायां वर्तते, तत्र वर्तमानः तद्वत्युपचर्यते। यच्च यत्र वर्तमानमन्यत्रोपचर्यते, न तत् तस्याभिधायकं युक्तं मञ्चशब्दवदिति। उक्तं चात्र। किमुक्तम्? तद्वतामानन्त्यात् न सच्छब्देनाभिधानं

---

१. पदार्थः C २. सत्ताया गुणत्वम् C ३. परिप्लवमाना बुद्धिरवतिष्ठते C

युक्तमिति। तद्वति च न गुणसारूप्यात् प्रत्ययसंक्रान्तिः, यथा स्वामिशब्दस्य भृत्ये। न गुणोपरागात्। यथा नीलः स्फटिक इति। क्रमवृत्त्यभावाच्च। युगपदसंभवाच्च। अयथार्थज्ञानोत्पत्तिप्रसङ्गाच्च। तस्मात् न जातिमन्मात्राभिधायकोऽपि। असाधारण-विशेषाभिधायको भविष्यतीति न युक्तम्, अन्यत्र प्रत्ययाभावप्रसङ्गात्। न चान्या गतिरस्ति। तस्मादन्यार्थापोहकृतश्रुतिरिति। अन्यशब्दार्थान्तरापोहं स्वार्थे कुर्वती श्रुतिरभिधत्त इति[१]।

अत्रास्माभिर्व्यक्त्याकृतिजातयः पदार्थ इति प्रधानोपसर्जनभावस्यानियमेन व्यवस्थापितम्। एकान्तवादिनश्चैते दोषा इति। न चैते दोषाः। कथमिति? यत् तावत्सत्ताशब्दः सत्ताया न वाचक इति, तन्न व्याघातात्। सत्ताशब्दो न सत्ताया वाचक इति व्याहतमुच्यते। कथं च तदवाचकत्वे सति सत्ताशब्द इत्यभिधीयते? भवदभिप्रायेणाभिधीयत इति चेत्? अथ मन्यसे नैव नः कृतान्ते[२] सत्तादिशब्दाः सन्ति, किं तु भवद्भिः सत्ताशब्दो द्रव्यगुणकर्मशब्दा इति च परिकल्प्य व्यवहारः क्रियते, ततोऽस्माभिरपि युष्मदभिप्रायानुविधानेन सत्तादिशब्दा इति वाच उच्चार्यन्त इति। न, व्याघातानिवृत्तेः। सदित्येवमादीनि पदानि लोकप्रसिद्धानि तानि केषु अर्थेषु वर्तन्त इत्युभयोर्विचारः। वयं तु ब्रूमः सत्ताशब्दः सत्तायां वर्तते। त्वं पुनर्ब्रवीषि सत्ताशब्दो न सत्तायामिति। एवं ब्रुवाणो मया विरोधेन प्रत्यवस्थीयसे। विरोधोद्धारं चानुक्त्वा त्वन्मत्या[३] मयाभिधीयत इति ब्रूवाणो न व्याघातमतिवर्तसे।

यच्चेदमुच्यते त्वया परिकल्पिताः सत्तादिशब्दा इति, तदपि न, परिकल्प्य-विषयानभिधानात्। [४]परिकल्प्यस्य विषयोऽतथाभूतस्य तथाभाविभिः सामान्ये सत्यध्यारोपिततद्धर्मणः प्रधानार्थप्रतिपत्तिः, यथा स्थाणौ पुरुष इति। यदि चामी सत्तादिशब्दाः परिकल्पिता भवन्ति, प्रधानमेषां वाच्यम्। न हि निष्प्रधानं [५]परिकल्प्यं पश्याम इति।

---

१. इत्युच्यत इति C २. सिद्धान्ते C ३. चाकृत्वा त्वन्नयो C ४. परिकल्प्यस्य च C ५. पश्याम इति om C

यत्पुनरेतत् भेदार्थैरभिन्नविभक्तिकत्वादिति, तन्न, समानार्थापरिज्ञानात्। न ब्रूमः सत्तादिशब्देन द्रव्यशब्दस्य सामानाधिकरण्यम्, अपि तु सत्तायाः प्रधान-साधनवाचिना सच्छब्देन द्रव्यगुणकर्माण्यभिधीयन्ते [१]द्रव्यगुणकर्मशब्दैरपीतरेतर-विशेषणविशेष्यभावापन्नैस्तान्येव। एवं सति युक्तं सामानाधिकरण्यम्, उभयोः सद्द्रव्यशब्दयोरेकविषयत्वात्। यदा पुनरयं सत्ताशब्दः सत्ताप्रधान एवाङ्गभूतं साधनमभिधत्ते, न तदा सामानाधिकरण्यम्, द्रव्यस्य सत्तेति भवति। तस्मात् सामानाधिकरण्यानुपपत्तिरदोषः। विभक्तिभेदनियमाद् गुणगुण्यभिधायिनोः सामाना-धिकरण्यस्यासिद्धिः सद्द्रव्यशब्दयोरित्येतदनेन प्रत्युक्तम्।

एतेन संबन्धो व्याख्यातः। कथमिति? न सच्छब्देन संबन्धोऽभिधीयते, अपि तु संबन्धशब्देनैव, संबन्धश्च गुणः। [२]तच्छब्दो गुणशब्दः। न च गुणशब्देन द्रव्यवाचिनः शब्दस्य सामानाधिकरण्यमस्तीति। यत् पुनरेतत्, आनन्त्यात् न जातिशब्दो भेदानां वाचक इति स्वयंप्रक्लृप्तां वाचोयुक्तिं भवान् प्रतिषेधति। कश्चैवमाह जातिशब्दो भेदानां वाचक इति? यदि तर्हि जातिशब्दो न भेदानां वाचकः कथं सच्छब्देन द्रव्यगुणकर्माण्यभिधीयन्ते? नायं भोः सच्छब्दो जाति-शब्दः, अपि तु भेदशब्द एवायम्। भेदशब्देन च भेदा अभिधीयन्त इति न किञ्चिद् बाध्यते। कथं न बाध्यते? यदा सच्छब्द एको भेदानामानन्त्यं तदवस्थमेव। न चैकस्यानेकेन संबन्धः शक्य आख्यातुम्। न चानाख्याते शब्दार्थसंबन्धे शब्दादर्थ-प्रतिपत्तिर्युक्तेति। न, केवलानामनभिधानात्। यो हि सच्छब्देन निर्विशेषणानि द्रव्यगुणकर्माण्यभिधीयन्त इत्यभिधत्ते, तं प्रत्येष दोषः। अस्माकं तु द्रव्यगुणकर्माणि सत्ताविशेषणान्यभिधीयन्ते। यत्र यत्र सत्तां पश्यति तत्र तत्र सच्छब्दं प्रयङ्क्ते। एका च सत्ता। तत्प्रत्ययस्यानुवृत्तेः[३]। तस्माद् भेदानामानन्त्यं न दोषः। कश्चायमेवंभूतः साध्यसाधनभावः, शब्दं पक्षयसि आनन्त्यादिति वस्तुधर्मं हेतुत्वेनाभिधत्स इति।

---

१. द्रव्य॰ om C २. न सच्छब्दो C ३. ॰स्याव्यावृत्तेः C

अथ भेदा एव जातिधर्मवाच्यत्वेन पक्षीक्रियन्ते, तथापि नान्वयी न व्यतिरेकी दृष्टान्तोऽस्तीत्यहेतुरानन्त्यादिति। अथाप्येकदेशान् पक्षीकृत्यानन्त्यादिति हेतुः शेष एकदेशो दृष्टान्त इति। अयमपि न, विरोधात्। एवं च सति न कश्चित् पदार्थो वाच्यः, न कश्चित् शब्दो वाचक इति वाच्यवाचकभावनिवृत्तौ विशेषणमनर्थकम्, एते न वाच्याः, एते न वाचका इति।

यत् पुनरेतद् व्यभिचारादिति। न, व्यभिचारविषयापरिज्ञानात्। व्यभिचारी हि नाम स ज्ञेयो यः स्वविषयतज्जातीयवृत्तित्वे सत्यन्यत्र वर्तते। न पुनरयं सच्छब्दः स्वविषयव्यतिरेकेणासति वर्तते। तस्मादस्थान इयं व्यभिचारचोदनेति। हेतुभावानभ्युपगमाच्च। केन चात्र हेतुरभिधीयते द्रव्यं गुणः कर्म वा सत्त्वादिति। तस्मादयुक्तमेतदपि। भेदवाचकत्वप्रतिषेधात् सद्द्रव्यशब्दयोः सामानाधिकरण्यमिति न वक्तव्यं व्याघातात्। न च कश्चित् शब्दो द्रव्यवाचकः द्रव्यसच्छब्दयोश्च सामानाधिकरण्यमिति व्याहतम्।

यत् पुनरेतत् न तद्वतोऽस्वतन्त्रत्वादिति। न किल सच्छब्देन तद्भेदा घटादयो गम्यन्ते, [१]तद्वतघटादिभेदानाक्षेपात् सामानाधिकरण्याभाव इति? तन्न, उक्तोत्तरत्वात्। उक्तोत्तरमेतत्, सद्द्रव्यशब्दयोरेकविषयत्वात् सामानाधिकरण्यमिति, तद्वतघटादिभेदानाक्षेप इति च न युक्तं सच्छब्देन सत्तासाधनानां द्रव्यगुणकर्मणामाक्षेपात्। सत्ताशब्देन द्रव्यगुणकर्माणि नाक्षिप्यन्ते न पुनः [२]सच्छब्देन शक्यं वक्तुं सत्ताशब्देनापि गुणभूतानि गम्यन्त इति। सदिति चायमभिधानशब्दः[३], कस्तस्याभिधेयः? योऽस्मात्[४] प्रतीयते, स तस्यार्थ इति। कोऽस्यार्थः? स **विभज्यते**। सत्ता तद्योगोऽर्थान्तरमिति त्रयोऽर्थाः। तत् प्रधानोपसर्जनभावस्यानियमेन[५] विवक्षायां प्रधानं साधनं गम्यते, अङ्गं सत्ता तद्योगश्च। किंकृतः प्रधानाङ्गभावः? अर्थकृतः। [६]यदा सत्ता किञ्चित् कुर्वति, तदा सत्ताविशेषणं पदार्थमुपादाय किञ्चित् करोति, येन

---

१. तद्वद्° C २. सत् om C ३. अभिधान° om J ४. यस्मात् C ५. अनियमेन om C ६. यदा सत्ता किञ्चित् कुरुते C

करोति[१] तत्प्रधानम्,[२]अङ्गमप्रधानं प्रत्ययहेतुत्वात्। यस्मात् सत्तया पदार्थो विशिष्यते, अङ्गहीने प्रत्ययनिवृत्तेः यत्र तदङ्गं सत्तादिकं नास्ति, तत्र न सदिति प्रत्ययः। तदेवं [३]तद्गतघटादिभेदानाक्षेपादित्ययुक्तम्।

यत् पुनरेतत् सच्छब्दः सत्तायां प्राधान्येन वर्तते, तत्र वर्तमानस्तद्वत्युपचर्यत इति। तन्न, सच्छब्दविषयापरिज्ञानात्। न भवता सच्छब्दस्य विषयो व्यज्ञायि। क एवमाह सच्छब्दः सत्तायां प्राधान्येन वर्तत इति? यथा च सच्छब्दस्य द्रव्यगुणकर्माणि सत्तासाधनभावात् विषय इति तथोक्तम्। एतेन भेदानामानन्त्यं प्रत्युक्तम्। सच्छब्दस्य विषयः [४]सत्तासाधनम्। विषयश्च सत्तासाधनभूत एक एवेति।

यत् पुनरेतत् तद्वति च न गुणसारूप्यात् प्रत्ययसंक्रान्तिः यथा स्वामिशब्दस्य भृत्य इति। अस्यार्थः स्वाम्यर्थकारित्वात् भृत्ये स्वामिशब्द इति। एतत् तु न बुध्यामहे प्रत्ययानां संक्रान्तिरिति। यदि स्वामिप्रत्ययविषयत्वम्, तन्न प्रत्यय-संक्रान्तिः। न हि स्वामिप्रत्ययो भृत्यस्य भवति। केवलं गुरुतां वा प्रियतां वा पश्यन् स्वामिशब्दं गुणभूतं तत्र प्रयुङ्क्ते। यथा च भृत्यः स्वाम्यर्थकारित्वात् [५]स्वामीत्युच्यते, न पुनरेवं सत्ताशब्दः कदाचिदपि द्रव्यादिषु वर्तत इति। यदा तु सतां भावः सत्तेति तदा सतां सत्ताविशेषकत्वात् गुणभूतानां सत्ताशब्देनाभिधानम्, विशेषकत्वमुपचारः[६]। एतेनैव गुणोपरागात् यथा नीलः स्फटिक इति प्रत्युक्तम्।

यत् पुनरेतत् क्रमवृत्त्यभावाद् युगपदसंभवाच्चेति। अस्यार्थः सत्ताशब्दः किल सत्तायां वर्तित्वात् तद्वति वर्तत इति। न चैवं पश्यामः। युगपदपि न संभवति। सत्ताप्रत्ययश्च द्रव्यप्रत्ययश्च न युगपद् भवतः। एतदपि न, उक्तोत्तरत्वात्। उक्तोत्तरमेतत्। नात्र क्रमो न युगपत्प्रत्ययः। सत्प्रत्ययस्य साधनविषयत्वात्। एतेनायथार्थज्ञानोत्पत्तिप्रसङ्गादिति प्रत्युक्तम्। एवं हि कुहेतुप्रताननिरासाद् व्यव-स्थितं[७] व्यक्त्याकृतिजातयः पदार्थ इति।

---

१. येन करोति om C २. अङ्गं॰ सत्ताप्रधानप्र॰ C ३. तद्वद्घटा॰ C ४. सत्ता-साधनम्। विषयश्च om J ५. भृत्यः स्वामीत्युपचर्यते C ६. उपकारः J ७. एवं स्थितं कुहेतुदोषनिरासात् J

न जातिशब्दो भेदानां वाचक इति विशेषणानर्थक्यम्। न हि कश्चित् शब्दो भवता भेदानां वाचकत्वेनाभ्युपगम्यते। विशेषणं हि नाम विशेष्ये सति, सामान्यप्रतिपत्तौ च। न चास्य किञ्चिद् विशेष्यमस्ति। न च जातिशब्दस्य कश्चित् पदार्थो वाच्योऽभ्युपगम्यते। तस्मात् विशेषणानर्थक्यम्।

विरोधाच्च। यदि चायं जातिशब्दो भेदानां वाचकोऽभविष्यत्, अपि तर्हि जातिशब्द एव नाभविष्यत्। न ह्यन्यपदार्थवाचकानां शब्दानां तच्छब्दत्वं संभवति। कथं च भेदवाचकत्वे सति जातिशब्द इत्युच्यते? यच्चोच्यते न जातिशब्दो भेदानां वाचक इति तथा तत्। को हि स्वस्थात्मा जातिशब्दवाच्यान् भेदानभ्युपैति? यदि च जातिशब्दवाच्या भेदा न भवन्ति, अन्यशब्दवाच्यास्तर्हि भेदाः प्राप्नुवन्ति। अथान्यशब्दवाच्या अपि भेदा न भवन्ति, तेन न जातिशब्दवाच्या नान्यशब्दवाच्या इत्युभयथा अवाच्यत्वे किमस्य विशेषणस्य सामर्थ्यं न जातिशब्दो भेदानां वाचक इति? अत एवं वक्तव्यम्, अवाच्या भेदा अवाचकाः शब्दा इति।

अथ मन्यसे परमतव्यपेक्षयैतदुच्यते, न जातिशब्दो भेदानां वाचक इति। न, अनभ्युपगमात्। न हि नः कश्चित् तान्त्रिकोऽस्ति यो जातिशब्दवाच्यान् भेदान् प्रतिपद्यते। जातेरप्यवाचकत्वे व्याघातो जातिशब्द इति। न हि यो यस्यावाचकः स तच्छब्द इति शक्यं वक्तुम् न जातिशब्दो भेदानां वाचक इति। कस्य तर्हि वाचकः? भेदवाचकत्वप्रतिषेधादन्यवाचकत्वमायातम्। अथान्यवाचकत्वमपि नेष्यते, व्यर्थं विशेषणं जातिशब्दो भेदानां न वाचक इति। सर्व एव च शब्दा अर्थानामवाचका इति युक्तं वक्तुम्।

अथावाचकाः शब्दा अवाच्याः पदार्था इति। अयुक्तं चैतत्, व्याघातात्। अवाचकाः शब्दा भवन्ति। अवाचकत्वं च शब्दानां शब्दैरेव प्रतिपाद्यत इति। अवाचकत्वे च शब्दानां प्रतिज्ञाहेत्वोर्व्याघातात्। न जातिशब्दो भेदानां वाचक इति प्रतिज्ञा, हेतुरानन्त्यादिति। उभयं च वचनात्मकमिति। उभयस्यावाचकत्वाद् व्याघातः। शब्दांश्चावाचकान् प्रतिपद्यमानेन लौकिकप्रतिपादनोपायोऽन्यो वक्तव्यः।

अन्यथाभ्युपगम्यत इति चेत्? अथ मन्यसे, न मया अवाचकाः शब्दा अभ्युपगम्यन्ते, नाप्यर्था अवाच्याः। अपि तु यो भवद्भिर्वाच्यवाचकन्यायोऽभ्युपगम्यते, सोऽस्माभिर्निराक्रियते। अस्माकं तु शब्देनान्यापोहलक्षणा जातिरभिधीयत इति। विशिष्य वक्तव्यं यदि अन्यथा शब्दा अर्थानां वाचका भवन्ति। विशिष्य वक्तव्यम् अस्मत्प्रक्लृप्तजात्यादिव्यतिरेकेण जात्यादिशब्दा जात्यादीनां न वाचका इति।

स्वरूपानभिधानाच्च। न च समानप्रत्ययकारणताव्यतिरेकेण जातेः स्वरूपं निर्देष्टुं शक्यम्। न चानुवृत्तिप्रत्ययः प्रत्याख्यातुं [१]शक्यः। न च विशेषप्रत्ययेनाकस्मात् शक्यं भवितुम्, यतोऽयं प्रत्ययः सा जातिरिति [२]नाम्नि विवाद एवं तावद् यथाश्रुति वाक्ये दोषः। अथ जातिशब्दावाच्यत्वेन भेदा [३]एव पक्षीक्रियन्ते? एतस्मिन्नपि प्रतिज्ञार्थे यावन्त एते वाक्यदोषास्ते सर्वे प्रसज्यन्त इति। एवमेकदेशपक्षीकरणेऽपि विशेषणविशेष्यभावानुपपत्तेः पूर्वदोषानुवृत्तिः।

यदपीदमुच्यते सद्द्रव्यशब्दयोः सामानाधिकरण्यमिति, तदपि न, व्याघातात्। द्रव्यसच्छब्दयोश्च सामानाधिकरण्यम्, न च भेदवाचकाः शब्दा इति व्याहतम्। उपचारतो न व्याघात इति चेत्? अथ मन्यसे सद्द्रव्यशब्दाविति उपचारतोऽभिधीयते[४]। कथमिति? द्रव्यशब्देनाद्रव्यव्युदासः, सच्छब्देनासद्व्युदासः। तावेतावसद्द्रव्यव्युदासरूपेण प्रवर्तमानौ एकमर्थं ब्रूत इति समानाधिकरणावित्युच्यते। मुख्यतस्तु न कश्चिद् विधानतः शब्दो वाचक इति। न, मुख्यासंभवात्। मुख्यतः सद्द्रव्यप्रयोगे सति तेन सामान्यादतथाभूते उपचार इति युक्तं वक्तुम्। न त्वेवंवादिनां प्रधानमस्ति। न च प्रधानमन्तरेणोपचारः संभवति। न चान्यापोहपक्षे उपचारो युक्तः, उभयोः प्रधानशब्दत्वात्। यथा सिंहशब्दः सिंहे वर्ततेऽसिंहरूपव्युदासेन, तथा माणवकेऽपीति [५]तुल्यरूपत्वात्। तस्मात् नोपचार इति।

---

१. युक्तः for शक्यः J २. नास्ति for नाम्नि C ३. अपि for एव C ४. शब्दावेतौ ..... धीयेते C ५. तुल्यवृत्तित्वात् C

यत् पुनरेतद् अन्यशब्दार्थापोह[१] शब्दार्थ इति। तदप्ययुक्तं विधानतः शब्दार्थासंभवे सत्याद्याप्रतिपत्तेः[२]। यदि विधानतः शब्दार्थो भवति, ततो विधीयमान-शब्दार्थप्रतिपत्तौ सत्यां तस्यान्यत्र प्रतिषेध इत्युपपन्नः प्रतिषेधः। यस्य पुनर्विधीयमानः पदार्थो नास्ति तस्याद्यां प्रतिपत्तिमन्तरेण कथं प्रतिषेधः? यावच्चेतरत् न प्रतिपद्यते, तावदितरत् न प्रतिषेधतीति। यथा गौरिति पदस्यार्थोऽगौर्न भवति। यावच्चागां न प्रतिपद्यते, न तावद् गवि प्रतिपत्तिर्युक्ता यावच्च गां न प्रतिपद्यते, न तावद-गवीत्युभयप्रतिपत्त्यभावः।

यश्चायमन्यापोहः अगौर्नभवतीति गोशब्दस्यार्थः स किं भावोऽथाभाव इति? यदि भावः, किं गौरगौरिति? यदि गौर्नास्ति विवादः। अथागौः, गोशब्द-स्यागौरर्थः इत्यहो शब्दार्थकौशलम्। अथाभावः, तन्न युक्तम्, प्रैषसंप्रतिप-त्त्योरविषयत्वात्। न हि गोशब्दश्रवणादभावे प्रैषो न वा संप्रतिपत्तिः। शब्दार्थश्च प्रतिपन्ना[३] प्रतीयते। न च गोशब्दादभावं कश्चित् प्रतिपद्यत इति।

अन्यापोहश्च शब्दार्थ इत्ययुक्तम्, अव्यापकत्वात्। यत्र द्वैराश्यं भवति, तत्रेतरप्रतिषेधादितरत् प्रतीयते। यथा गौरिति पदे गौः प्रतीयमानः, अगौ प्रति-षिध्यमानः। न पुनः सर्वपदे एतदस्ति। न ह्यसर्वं नाम किञ्चिदस्ति, यत् सर्वशब्देन निवर्त्येत। एकादिव्युदासाद् व्यापकत्वमिति चेत्? अथ मन्यसे एकाद्यसर्वं तत् सर्वशब्देन निवर्त्यते? तन्न, स्वार्थापवाददोषप्रसङ्गात्। एवं सत्येकादिव्युदासेन प्रवर्तमानः सर्वशब्दोऽङ्गस्य प्रतिषेधादङ्गव्यतिरिक्तस्य चाङ्गिनोऽनभ्युपगमाद् अनर्थकः स्यात्। एवं सर्वे समुदायशब्दा एकदेशप्रतिषेधरूपेण प्रवर्तमानाः समुदायिव्यतिरिक्तसमुदायानभ्युपगमाद् अनर्थकाः प्राप्नुवन्ति। द्व्यादिशब्दानां च समुच्चयविषयत्वादेकादिप्रतिषेधे प्रतिषिध्यमानानामसमुच्चयत्वात् द्व्यादिशब्दानाम-नर्थकत्वम्।

---

१. °शब्दान्तरार्थापोहः J २. विधानशब्दार्थसंभवे सत्याद्या प्रतिपत्तिः C ३. प्रति-पत्त्या C

क्रियारूपत्वाच्चापोहस्य विषयो वक्तव्यः। अगौर्न भवतीति अयमपोहः किं गोविषयः, अथागोविषय इति। यदि गोविषयः, कथं गोर्गव्येवाभावः? अथागो-विषयः, कथमन्यविषयादपोहादन्यत्र प्रतिपत्तिः? न हि खदिरे छिद्यमाने पलाशे छिदा भवति। अथागोर्गवि प्रतिषेधः, अगौर्गौर्न भवतीति। केन गोरगोत्वं प्रसञ्जितं[१] यत् प्रतिषिध्यते? कथं चागवि गोः प्रतिपत्तिमन्तरेण प्रतिषेधः? न ह्युत्तरपदार्थ-प्रतिपत्तिमन्तरेण प्रतिषेधं पश्याम इति। उक्तं चात्र आद्या प्रतिपत्तिर्न प्राप्नोतीति। आदिप्रतिपत्तिं चान्तरेण न प्रतिषेध इति।

इतश्च न युक्तोऽपोहोऽर्थः, विकल्पानुपपत्तेः। योऽयमपोहो गवि स किं गोर्व्यतिरिक्त आहोस्विदव्यतिरिक्त इति। यदि व्यतिरिक्तः, किमाश्रितोऽनाश्रितो वेति? यद्याश्रितः, आश्रितत्वाद् गुण इति गोशब्देन गुणोऽभिधीयते न गौरिति, गौस्तिष्ठतीति सामानाधिकरण्यं न प्राप्तम्। अथानाश्रितः, केनार्थेन षष्ठी गोरपोह इति? अथाव्यतिरिक्तः, गौरेवासाविति न किञ्चित् कृतं भवति।

अयं चापोहः प्रतिवस्त्वेकोऽनेको वेति वक्तव्यम्। यद्येकः, अनेकगोसंबन्धी च, गोत्वं तदिति। अथानेकः, ततः पिण्डवदानन्त्यात् आख्यानानुपपत्तेरर्थप्रत्ययोऽपि न युक्तः।

इदं च तावत् प्रष्टव्यो भवान् किमयमपोहो वाच्योऽथावाच्य इति। यदि वाच्यः, अनैकान्तिकः शब्दार्थः अन्यापोहः शब्दस्यार्थ इति। अनवस्था वा। यद्यनपोहव्युदासरूपेणाभिधीयतेऽपोहः, तस्याप्यन्य इत्यनवस्था। अथावाच्यः, अन्यशब्दान्तरार्थापोहं करोतीति व्याहतम्। यदि च शब्दस्यापोहो नाभि-धेयोऽर्थः[२], अभिधेयार्थव्यतिरेकेण स्वार्थो वक्तव्यः। अथ स एवास्य स्वार्थः, तथापि व्याहतम्। [३]अन्यशब्दान्तरार्थापोहं स्वार्थे कुर्वती श्रुतिरभिधत्त इत्युच्यत इति। अस्य वाक्यस्यायमर्थः तदानीं भवति, अन्यदनभिदधानोऽभिधत्त[४] इति।

---

१. प्रसक्तं C २. न om J ३. ०न्तरा० om C ४. भवति, अभिदधाना अभिधत्ते J

अनेकमिति चास्य पदस्य द्रव्यादिविषयत्वात् सामान्यगतौ विशेष आश्रयितव्यः। न ह्यसति विशेषाश्रयणे सामान्यशब्दाद् विशेषप्रतिपत्तिर्युक्तेति। नीलोत्पलशब्दयोश्च प्रधानत्वात् विशेषणविशेष्यभावानुपपत्तौ विशेषणस्य पूर्वनिपात इत्युभयोः प्रधानत्वात् न प्राप्तः। एतेन राजपुरुषशब्दौ व्याख्यातौ। समानाधिकरणार्थश्च अन्यापोहवादिना वाच्यः। यस्य चान्यापोहः शब्दार्थः, तेनानीलानुत्पलव्युदासौ कथं समानाधिकरणाविति वाच्यम्। यस्य पुनर्विधीयमानः शब्दार्थः तस्य जाति-गुणविशिष्टं नीलोत्पलशब्दाभ्यां द्रव्यमुच्यते, जातिगुणौ च द्रव्ये वर्तेते, न पुनरनीलानुत्पलव्युदासौ। तस्मात् समानाधिकरणार्थो नास्तीति। तदेवमयमन्यापोहो यथा यथा विकल्प्यते, तथा तथा प्रमाणवृत्तं बाधत इति॥६६॥

व्यक्तिर्गुणविशेषाश्रयो मूर्तिः॥२।२।६७॥

कथं पुनर्ज्ञायते नाना व्यक्त्याकृतिजातय इति। अधिगतत्वात् प्रश्नानुपपत्ति-रिति चेत्? अधिगता व्यक्त्याकृतिजातयो याशब्दादिसूत्रैः। अधिगतत्वात् प्रश्नोऽ-नुपपन्नः। न निमित्तत्रैविध्ये सति तद्विशेषविषयज्ञापनार्थत्वात् प्रश्नस्य। गोशब्द उच्चार्यमाणः प्रधानोपसर्जनभावेन निमित्तत्रयं प्रतिपादयतीति याशब्दादिसूत्राणा-मर्थः। एवं च सति तद्विशेषविषयज्ञापनार्थं युक्तः प्रश्नः, कतमात्र व्यक्तिः, कतमा-कृतिः, कतमा जातिरिति। व्यक्त्याकृतिजातीनां भेदो लक्षणभेदात्। किं पुनर्व्यक्ते-र्लक्षणमिति व्यक्तेर्लक्षणप्रतिपादनार्थं

व्यक्तिर्गुणविशेषाश्रयो मूर्तिः।

इति सूत्रम्। तत्र व्यज्यत इति व्यक्तिः इन्द्रियग्राह्येति। यद् द्रव्यमुपलब्धिलक्षणप्राप्तं स्पर्शपर्यन्तानां गुणानामाश्रयः, तत् मूर्च्छितावयवत्वात् मूर्तिरिति चोच्यते व्यक्तिरिति च। एतत् तु न बुद्ध्यामहे किमिदमवयविद्रव्यस्य लक्षणम्, आहो पदार्थत्वेन त्रयाणां प्रसक्तानां जात्याकृतिव्यवच्छेदकं व्यक्तिलक्षणमिति।

वयं तु ब्रूमः, नात्रावयवी व्यवच्छेद्योऽपि तु जात्याकृतिपदव्यतिरिक्तस्य व्यक्तिपदस्यार्थो वक्तव्य इति। सा च व्यक्तिर्या नाकृतिर्न जातिः। तस्या अनेन सूत्रेण संग्रहः व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिरिति। गुणविशेषाश्च तदाश्रयश्च। अत्र तच्छब्दलोपाद् गुणविशेषाश्रयशब्देन द्रव्यमुच्यते। कर्मापि गुणविशेषशब्दात् लभ्यते। गुणेभ्यो विशेषो गुणविशेष इति। गुणविशेषग्रहणं किमर्थम्? गुणशब्देन संगृहीताया आकृतेर्निराकरणार्थम्। आकृतिः संयोगविशेषः। सा च गुणग्रहणेन [१]गृह्यते, तन्निराकरणार्थं गुणविशेषग्रहणम्। गुणविशेष इति चात्र द्विरूपो विग्रहः। गुणाश्च ते विशेषाश्चेति च, गुणेभ्यश्च विशेषा इति च। आश्रयसमानाधिकरणो मूर्तिशब्दो द्रव्ये, मूर्च्छत इति मूर्तिशब्देन द्रव्यमुच्यते। एवं च प्रतिपदं व्यक्तिलक्षणं सिध्यति। एवं च रूपाद्याकाशाद्यवरोधः। यदि प्रतिपदमेतत् व्यक्तिलक्षणं भवति, ततो रूपादयश्चाकाशादयश्च व्याप्यते। अन्यथा तु लक्षणमव्यापकं स्यात्। अथ वा गुणविशेषाणामाश्रय इति गुणाश्च विशेषाश्च गुणविशेषाः, तेषामाश्रयो द्रव्यम्। तत्र मूर्च्छत रूपादयोऽपि मूर्तिः॥६७॥

आकृतिर्जातिलिङ्गाख्या॥२।२।६८॥

जातिर्जातिलिङ्गानि च प्रख्यायन्ते यया तामाकृतिं विद्यात्। सा च नान्या सत्त्वावयवानां तदवयवानां च नियताद् व्यूहात् नियतावयवव्यूहाः खल्ववयवा जातिमनुमापयन्ति। शिरःपाण्यादिमदाकारसामान्येन गोत्वं व्यज्यते। शिरःपाण्यादीनां चावयवानामवयवविशेषदर्शनेन। कदाचित् पुनरियमाकृतिः पदार्थत्वं जहाति। क्व पुनर्जहाति? यत्राकृतिव्यङ्ग्या जातिर्न भवति। यथा मृत्सुवर्णं रजतमिति आकृतौ नियमो न जातौ। सर्वाकृतिर्जातिलिङ्गमिति[२] न पुनः सर्वा जातिराकृत्या लिङ्ग्यते॥६८॥

---

१. संगृहीतेति C २. जातिं लिङ्गयति J

समानप्रसवात्मिका जातिः ॥२।२।६९॥

यया भिन्नान्यनेकानि वस्तूनि इतरेतरतोऽनुवृत्तिव्यावृत्तिप्रत्ययहेतुभावेन व्यवतिष्ठन्ते सा जातिः। यथेमानि [१]कुण्डानीत्यनुवर्तन्ते, नेमानि कुण्डानीति व्यावर्तन्ते, तदेकं सन्निमित्तमनुवृत्तिव्यावृत्तिकारणं यत् तत् सामान्यविशेषः सा जातिरिति समानप्रत्ययोत्पत्तिकारणं जातिरिति जातौ नियमो न समानप्रत्ययोत्पत्तौ, जातिमन्तरेणापि[२] दृष्टत्वात्। जातिमन्तरेणापि समानप्रत्ययो दृष्टः, यथा पाचकादिषु। तस्माद् व्यवस्थितं व्यक्त्याकृतिजातयः पदार्थ इति। गवादिष्वनुवृत्तिप्रत्ययो दृष्टः पिण्डव्यतिरिक्तात् निमित्तात्[३] भवति विशेषवत्त्वात् नीलादिप्रत्ययवदिति। गोतोऽर्थान्तरं गोत्वं भिन्नप्रत्ययविषयत्वाद् रूपस्पर्शप्रत्ययवत्। गोतोऽर्थान्तरं गोत्वं व्यपदेशशब्दविषयत्वात् चैत्राश्ववत्। गोर्गोत्वानुवृत्तिप्रत्ययो भिन्ननिमित्तः विशेषवत्त्वाद् रूपादिप्रत्ययवदिति ॥६९॥

॥शब्दशक्तिपरीक्षाप्रकरणम्॥

संशयस्य प्रमाणानां विचारस्तद्व्यवस्थितिः।
शब्दस्य तत्त्वं प्रामाण्यं पदार्थाश्चेह कीर्तिताः॥

॥इति औद्द्योतकरे न्यायवार्त्तिके द्वितीयाध्यायस्य द्वितीयाह्निकम्॥
॥द्वितीयाध्यायः समाप्तः॥

---

१. °त्यनुवर्तन्ते बुद्धिः नेमानि J २. अन्यथापि J ३. लिङ्गात् for निमित्तात् C

तृतीयाध्याये प्रथमाह्निकम्

[इन्द्रियभेदप्रकरणम्]

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्॥३।१।१॥

आनन्तर्यात् प्रमेयपरीक्षा। यद्विषयोऽहङ्कारः संसारं प्रतनोति यद्विषयं च सम्यग्ज्ञानं संसारनिवृत्तिहेतुर्भवति तदानन्तर्यात् परीक्ष्यते। तच्चात्मादीत्यात्मा विचार्यते। किं पुनरस्य विचार्यम्? किं शरीरेन्द्रियमनोबुद्धिव्यतिरिक्त आहो नेति। न, धर्म्यप्रसिद्धेः। व्यतिरेकाव्यतिरेकावात्मधर्मौ। सति धर्मिणि धर्मौ भवत इति। धर्मी चात्राप्रसिद्धः। न चाप्रसिद्धे धर्मिणि धर्मयोर्विचारो युक्तः। तस्माद् धर्म्येव तावद् प्रतिपाद्यतामिति। न, इच्छादिसूत्रादात्मप्रसिद्धेः। इच्छादिसूत्रे आत्मसद्भावः प्रतिपादितः। प्रतिपादितत्वादनन्तरो धर्मविचारो युक्त इति। अविप्रतिपत्तेश्च। न हि कश्चिद् वादी आत्मसत्त्वे विप्रतिपद्यते, किं तु विशेषे प्रतिपद्यत इति। शरीरमात्रमात्मा, इन्द्रियमात्रमात्मा,[१] बुद्ध्यादय आत्मा, संघात आत्मा, तद्व्यतिरिक्त आत्मेति। इयं च धर्मविशेषे विप्रतिपत्तिरप्रतिपन्नात्मसत्त्वानां न युक्तेति युक्तो धर्मविचारः। असत्त्वप्रतिपादकप्रमाणासंभवाच्च। न चात्मासत्त्वप्रतिपादकं प्रमाणमस्तीत्यतश्च सद्भावे न विप्रतिपद्यत[२] इति। न, नास्त्यजातत्वादित्येके। नास्त्यात्मा अजातत्वात् शशविषाणवदिति। तत्र नास्त्यात्मेति पदे तावद् व्याहते[३]। नास्तिशब्दसमानाधिकरणोऽयमात्मशब्दो नात्मनोऽसत्त्वं प्रतिपादयति। किं कारणम्? आत्मेति [४]वस्त्वभिधीयते। नास्तीति तस्य प्रतिषेधः। यच्च यत्र प्रतिषिध्यते तत् तस्मादन्यत्रास्तीति। यथा नास्तिना समानाधिकरणो घटशब्दो न घटाभावं प्रतिपादयितुं

---

१. इन्द्रियमात्रमात्मा om C २. सद्भावो न प्रतिपाद्यते J ३. व्याहन्येते C
४. सत्त्वमभि° C

शक्नोति। अपि तु देशकालविशेषे प्रतिषेधः नास्ति घट इति। देशविशेषे वा प्रतिषेधो गेहे नास्तीति। कालविशेषे वा प्रतिषेध इदानीं नास्ति, प्राङ् नास्ति, ऊर्ध्वं नास्तीति।

सर्वश्चायं प्रतिषेधो नानभ्युपगतघटसत्त्वस्य युक्तः तथा नास्त्यात्मेति। किमयं देशविशेषे प्रतिषिध्यते, उत कालविशेष इति? यदि तावद् देशविशेषे प्रतिषेधः स आत्मनि न युक्तः अदेशत्वादात्मनः। न च देशविशेषप्रतिषेधादात्मा प्रतिषिद्धो भवति। अथायं भवतामभिप्रायः शरीरमात्मा न भवतीति? कस्य वा शरीरमात्मा, यं प्रति प्रतिषेधः? शरीरे नास्त्यात्मेत्येवं प्रतिषेध इति चेत्? कस्य वा शरीरे आत्मा, यं प्रति प्रतिषेध इति। क्व तर्हि अयमात्मा? न क्वचिदात्मा किमयं नास्त्येव? न नास्ति, विशेषप्रतिषेधात्। केयं वाचोयुक्तिः न शरीरम् न च शरीरे, न चान्यत्र, न च नास्ति? एषैषा वाचोयुक्तिः, यद्, यथाभूतं तत् तथा निर्दिश्यत इति। न चायमात्मा क्वचिदपीति तस्मात् तथैव निर्देशः। न च कालविशेषप्रतिषेधोऽपि युक्तः, आत्मनि त्रैकाल्यस्यानभिव्यक्तेः। न ह्यात्मनि त्रैकाल्यमभिव्यज्यते, नित्यत्वात्। नित्य आत्मेत्युपरिष्टात् पूर्वाभ्यस्तसूत्रे प्रतिपादयिष्यामः। तस्मात् न कालविशेषप्रतिषेधोऽप्यस्तीति।

आत्मप्रतिषेधं च कुर्वाणेनात्मशब्दस्य विषयो वक्तव्यः। न ह्येकं पदं निरर्थकं पश्यामः। अथापि शरीरादिविषयमात्मशब्दं प्रतिपद्येथाः, एवमप्यनिवृत्तो व्याघातः। कथमिति? नास्त्यात्मेत्यस्य वाक्यस्य तदानीमयमर्थो भवति शरीरादयो न सन्तीति। अथ यं भवन्त आत्मानं कल्पयन्ति स नास्तीति? न वयमात्मानं कल्पयामः। कल्पना हि नामातथाभूतस्य तथाभाविभिः सामान्यात् तद्धर्माध्यारोपेण तत्प्रत्ययः[१]। न चात्मानमेवंभूतं प्रतिपद्यामहे। यं भवन्त आत्मानं कल्पयन्तीति ब्रुवाणो भवान् प्रष्टव्यो जायते, कथं वयमात्मानं कल्पयाम इति, किं सत्त्वेनाथासत्त्वेन वा? यदि सत्त्वेन, किमसतः सता साधर्म्यं येन कल्पनाविषय आत्मा, आत्मसामान्यं

१. °प्रत्ययविषयत्वम् C

चानात्मनो ब्रुवता आत्मा अभ्युपगतो भवति। न ह्यसतः सता सामान्यमस्ति।

अथ शरीरादिविषयमहङ्कारमात्मनि कल्पयित्वा विपर्येति[१]? एवं च शरीरादिव्यतिरिक्ताहङ्कारविषयसत्त्वाभ्युपगमादनिवृत्तो व्याघातः। अथ मन्यसे एकपदस्य नावश्यमर्थेन भवितव्यमिति यथा शून्यं तम इति च? तन्न, व्याघातानिवृत्तेः। शून्यशब्दस्य तावदयमर्थः, यस्य रक्षिता द्रव्यस्य न विद्यते, तद् द्रव्यं श्वभ्यो हितत्वात् शून्यमित्युच्यते। तमःशब्दस्यानुपलब्धिलक्षणप्राप्तानि द्रव्यगुणकर्माणि विषयः। यत्र यत्रासन्निधिस्तेजसः, तत्र तत्र द्रव्यादि तमःशब्देनाभिधीयते। तमः शब्दश्चानर्थक इति ब्रुवाणः स्वसिद्धान्तं बाधते, चतूर्णामुपादानरूपत्वात्[२] तमस इति। तस्मात् नानर्थकमेकं पदमिति।

नास्त्यात्मेति चैवं ब्रुवाणः सिद्धान्तं बाधते। कथमिति? रूपं भदन्त नाहम्, वेदना संज्ञा संस्कारो विज्ञानं वा भदन्त नाहमिति। एवमेतद् भिक्षो रूपं न त्वम् वेदना संज्ञा संस्कारो विज्ञानं वा न त्वमसीति। त एते स्कन्धा रूपादयोऽहङ्कारविषयत्वेन प्रतिषिद्धा। विशेषप्रतिषेधश्चायं न सामान्यप्रतिषेधः। आत्मानमनभ्युपगच्छता सामान्यमेव प्रतिषेद्धव्यम्, नाहं नैव त्वमसीति। अथैकशः प्रतिषेधेन समुदायविषयोऽहङ्कार इति? तथापि रूपादिस्कन्धपञ्चकव्यतिरेकेण समुदायो वक्तव्यः, योऽहङ्कारविषयः। तद्व्यतिरिक्तं च समुदायमहङ्कारविषयमभ्युपगच्छता संज्ञा भिद्यते, आत्मा समुदाय इति। अथाव्यतिरिक्तः, एकप्रत्ययो न प्राप्नोत्यहमिति। न हि बहुष्वेकप्रत्ययं पश्याम इति। न च रूपादयः स्कन्धा एकशः समुदिता वा आत्मान इत्यहङ्कारप्रत्ययः अतस्मिंस्तदिति प्राप्तः। भवतु मिथ्याप्रत्ययः कि नो बाध्यत इति? कथं न बाध्यते यदा सम्यक्प्रत्ययानुकारेण मिथ्याप्रत्यया भवन्ति? न चात्मानमनभ्युपगच्छता **ताथागतदर्शन**मर्थवत्तायां शक्यं व्यवस्थापयितुम्— न चेदं वचनं नास्ति **सर्वाभिसमयसूत्रे**ऽभिधानात्। तस्मात् नास्त्यात्मेत्येवं ब्रुवाणः सिद्धान्तं बाधत इति। तथा च

---

१. विपर्यस्यति C २. उपादेय° C

भारं च वो भिक्षवो देशयिष्यामि भारहारं च। भारश्च पञ्चस्कन्धाः, भारहारश्च पुद्गल इति। यश्चात्मा नास्तीति ब्रवीति स मिथ्यादृष्टिको भवति।

इति सूत्रम्।

योऽप्ययं हेतुरजातत्वादिति, अयमपि राश्यन्तरव्यवच्छेदहेतुत्वाद् विरुद्धः। जातमजातमिति च वस्तुधर्मावेतौ। किं पुनर्जातम्? किं वा अजातमिति? यस्य कारणवतः सत्ता तज्जातम्। यस्याकारणवतः सत्ता तदजातमिति। किं कारणम्? नञो जन्मप्रतिषेधविषयत्वात्। अयं खलु नञ् प्रवर्तमानो जन्मनः प्रतिषेधं करोति, नास्य जन्म विद्यत इति। तदिदमजात इत्यात्मनः प्रतिषेधो न भवति। यथा अनुदकः कमण्डलुरिति। अथायं भावप्रतिषेध एवाजातमिति, तथापि प्रतिज्ञा-हेत्वोरेकत्वम्। अजातत्वमिति चायं धर्मः, न च धर्मः स्वतन्त्रो युक्तोऽन्यत्र समवायात्। यत्तन्त्रोऽयं धर्मः स आत्मेति विरुद्धो हेतुः। अथ धर्मोऽस्ति न धर्मीति? तथाप्यनिवृत्तो व्याघातः, स्वतन्त्रस्य धर्मस्यादर्शनादिति। कश्चायमर्थोऽजातत्वादिति? यदि तावदयमर्थो नास्य जन्म विद्यत इति। ततोऽसिद्धो जन्मवानात्मा। किं पुनरात्मनो जन्म? शरीरेन्द्रियबुद्धिवेदनाभिर्निकायविशिष्टाभिरपूर्वाभिरभिसंबन्धः। अथाजातत्वमकारणत्वम्, तथापि न किञ्चिद् बाध्यते। विरुद्धश्च हेतुः। अकारणस्य नित्यत्वादसत्त्वं साधयतो नित्यत्वमापद्यत इति विरुद्धो हेतुः। प्रतिज्ञाहेत्वोश्च विरोधः। प्रतिज्ञाया विषयो नास्त्यात्मेति। हेतोर्विषय आत्यन्तिकसत्तासंबन्धः। तावेतौ प्रतिज्ञाहेतू असतः सद्विषयत्वाद् विरुद्धौ। एतेन निर्हेतुकत्वात् जन्महेत्वनुपादानादकार्यत्वादकारणत्वादित्येवमादयस्तुल्यदोषा इति प्रत्युक्ताः।

यदपीदमुच्यते शशविषाणवदित्ययमप्यसिद्धो दृष्टान्तः, कथमिति? शशविषाणशब्दस्य संबन्धविषयत्वात् संबन्धप्रतिषेधो न विषाणप्रतिषेधः। शशविषाणसंबन्ध उदाहरणं भविष्यतीति सोऽपि न युक्तः, कदाचिद् विषाणेन शशस्य संबन्धोपपत्तेः। लोकविरोध इति चेत्? अथ मन्यसे यदि शशे विषाणमस्ति, ननु लोको विरुध्यत इति। न विरुध्यते कार्यकारणभावप्रतिषेधद्वारेण लोकप्रवृत्तेः।

लोकस्तावत् कार्यं कारणं वा शशस्य विषाणं नास्तीत्येवं प्रतिषेधति। यथा गोर्विषाणस्य च कार्यकारणभावः, नैवं शशस्य विषाणस्य च कार्यकारणभावः, न च कार्यकारणभावप्रतिषेधादसत्त्वम् न हि यद् यस्य न कार्यं न कारणं तत् नास्ति यथा देवदत्तस्य पट इति। इदं च शशविषाणं नास्तीति ब्रुवाणः प्रष्टव्यः किमयं सामान्यप्रतिषेधोऽथ विशेषप्रतिषेध इति। यदि सामान्यप्रतिषेधः, तन्न युक्तम- शक्यत्वात्। शशस्य विषाणं नास्तीति गवादिविषाणान्यपि शशस्य न सन्तीति प्राप्तम्। एतच्चाशक्यम्। न हि तानि न सन्तीति। अथ विशेषप्रतिषेधः, किंचिद्विषाणं शशस्य प्रतिषिध्यते, यस्य शशो न कार्यम्; यच्च शशस्य न कारणमिति। सोऽयं कार्यकारणसंबन्ध एव प्रतिषिध्यते। कार्यकारणसंबन्धस्त्वन्यत्र दृष्ट इह प्रतिषिध्यत इति नात्यन्तासत्त्वप्रतिपादने दृष्टान्तो भवति। एतेन खपुष्पाद्यसत्त्वं व्याख्यातं वेदितव्यम्।

नास्त्यात्मा अनुपलब्धेरिति चेत्? अत्रापि प्रतिज्ञादोषः, दृष्टान्तदोषश्च पूर्ववत्। यदप्यनुपलब्धेरिति तदप्ययुक्तम्। साप्यनुपलब्धिरसिद्धा प्रत्यक्षादिप्रमाणविषय- त्वादात्मनः। प्रत्यक्षेण तावदात्मा उपलभ्यते। कथं प्रत्यक्षेण? लिङ्गलिङ्गिसंबन्ध- स्मृत्यनपेक्षं विषयस्वभावभेदानुविधाय्यहमिति विज्ञानं रूपादिविज्ञानवत् प्रत्यक्षम्। यच्चापि भवान् मुक्तसंशयं प्रत्यक्षं प्रतिपद्यते, तस्य कुतः प्रत्यक्षत्वमित्यवश्यं भवता ज्ञानमेव लिङ्गादिसंबन्धनिरपेक्षं स्वात्मसंवेद्यं प्रतिपत्तव्यम्। अथ मन्यसे अस्त्ययमहंप्रत्ययो न पुनरस्यात्मा विषयः, हन्त तर्हि निर्दिश्यतां विषयः। रूपादिर्विषय इति चेत्? अथ मन्यसे रूपादय एवाहङ्कारस्य विषयः। तथा चोक्तम्, अहङ्कारालम्बनोत्पत्तिनिमित्त्वादात्मेत्युच्यत इति। तन्न प्रतिषेधादसत्त्वाच्च। प्रतिषिद्धोऽहङ्कारो रूपादिषु

रूपं नाहम्। एवमेतद् भिक्षो रूपं न त्वमसि।

तस्माद् रूपादय एव तावदहङ्कारस्य विषया न भवन्ति। न चायमहङ्कारो रूपादिषु कदाचिदपि दृष्टः। न हि कदाचिदपि भवति अंह रूपम् अहं वेदनादय इति।

ननु भवत्यहं गौर अहं कृष्ण इति? न भवतीति ब्रूमः। कथम्? न ह्येतस्य द्रष्टुर्यदेतन्मम रूपं गौरमेतदहमिति प्रत्ययो भवति। केवलं मतुब्लोपं कृत्वा अहं गौर इति षष्ठ्यर्थं निर्दिशति। एवमेतत् न तत्त्वत इति। कुत इति चेत्[१]? अथ मन्यसे मतुब्लोपादयं षष्ठ्यर्थव्यपदेशो न तत्त्वत इति, अत्र को हेतुरिति? ममप्रत्यय-समानाधिकरणस्य निर्देशाद् यस्मिन्नर्थे ममप्रत्ययोऽस्य भवति, तत्रैवायमहङ्कारोऽ-पीति। ममप्रत्ययसामानाधिकरण्याद् गम्यते मतुब्लोप इति। ममप्रत्ययसमानाधि-करणश्चायमहङ्कारोऽन्यत्वे दृष्ट उपकारकत्वात्। उपकारके वस्तुनि ममप्रत्ययसमाना-धिकरणोऽहंप्रत्ययो दृष्टः योऽयं सोऽहमिति। उक्तं चात्र

रूपादिस्कन्धेष्वहङ्कारोऽतस्मिंस्तदिति प्रत्यय

इति। तदेवमहङ्कारविषयत्वादात्मा तावत् प्रत्यक्षः। अनुमानेनापि यथा आत्मा उपलभ्यते, तथोक्तमिच्छादिसूत्र इति। आगमोऽप्यस्त्येव। तान्येवं त्रीनि प्रमाणान्ये-कविषयतया प्रतिसन्धीयमानानि आत्मानं प्रतिपादयन्ति। न च प्रमाणान्तरं विप्रति-पत्तिहेतुरस्तीति। तस्मात् अनुपलब्धेरित्यसिद्धो हेतुः।

सन्दिग्धश्चानुपलब्धेस्त्रिकारणत्वात्। अनुपलब्धिकारणानि त्रीणि, उपलब्धा उपलम्भनम् उपलभ्यमिति तत्रेयमनुपलब्धिर्भवन्ती कस्याभावाद् भवतीति संदिह्यते? यदि ब्रूषे उपलभ्यस्याभावादिति? नन्वयं प्रतिज्ञार्थ एव, न च प्रतिज्ञा प्रतिज्ञार्थं साधयतीत्यनुपलब्धिरहेतुः। या चेयमनुपलब्धिरात्मासत्त्वप्रतिपादनायोपादीयते, तस्याः क आश्रयः? यद्यात्मानं प्रतिपद्यसे, व्याहतं भवति, आश्रयश्च नास्ति चेति। अथानाश्रया, कः साधनार्थः? न हि अनाश्रयो धर्मः साध्यं साधयितुं शक्नोति। अथानुपलब्धिरपि नास्ति, कः साधनार्थोऽनुपलब्धेरिति? न ह्यसत्साधनं भवितुमर्ह-तीति। अथ कल्पितस्यानुपलब्धिर्धर्म इति? कथं कल्पितस्येति वाच्यम्, किं सत्त्वेन अथासत्त्वेन? यदि सत्त्वेन, नानुपलब्धिस्तस्य धर्मः। न हि स्थाणोः पुरुष-तया कल्पितस्य स्थाणुधर्माः प्रत्यवभासन्ते। अथासत्त्वेन कल्पितस्यानुपलब्धिर्धर्मः,

---

१. न तत्त्वत इति चेत् J

सिध्यत्यनुपलब्धिर्धर्मो व्यर्था तु कल्पना। किं कारणम्? कल्पनाया अतथाभावात्। कल्पना हि नामातथाभावः। असत्त्वेन चात्मा कल्पित इति असत्त्वेनात्मा नास्ति। असत्त्वेन चेत् नास्ति, व्यर्था कल्पना। किमर्थं चायमात्मा असत्त्वेन कल्प्यते? यदि हेत्वर्थम्, उपपन्नो हेतुर्यदर्थमुपात्तः स पुनरर्थो न सिध्यति[१]। न हि यः पुरुषे स्थाणुधर्मानध्यारोप्य हेतुत्वेन व्यपदिशति[२] तस्यासौ स्थाणुः स्यादिति। तदेवमप्यनुपलब्धिरहेतुः।

रूपादिस्कन्धवाचकशब्दविषयव्यतिरिक्तविषय आत्मशब्दः रूपादिशब्देभ्योऽन्यत्वे सति एकपदत्वाद्, घटशब्दवदिति। एतेनाहंप्रत्ययो व्याख्यातः। असिद्धो दृष्टान्त इति चेत्? अत्रोक्तम्, यथा गुणव्यतिरिक्तो गुणीति। तमःशब्दादिभिरनैकान्तिक इति चेत्? अथ मन्यसे यथा रूपादिशब्देभ्योऽन्यत्वे सति एकपदत्वे च तमःशब्दस्यार्थान्तराविषयत्वम्, एवमात्मशब्दस्यापीति। तन्न, विरोधात् तमःशब्दो निर्विषय इति ब्रुवाणः सिद्धान्तं बाधते, उपादायरूपत्वात् तमसः। न चैतदस्माभिरभ्युपगम्यते तमःशब्दो निर्विषय इति। तमःशब्दस्य सविषयत्वे सूत्रव्याघातः

द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद् भाभावस्तमः[३]।

इति। न, सूत्रार्थापरिज्ञानात्। निराकृततेजःसंबन्धीनि द्रव्यगुणकर्माणि तमःशब्देनाभिधीयन्ते। तस्मात् न सूत्रव्याघातः।

अपरे तु जीवच्छरीरं निरात्मकत्वेन पक्षयित्वा सत्त्वादित्येवमादिकं हेतुं ब्रुवते। तन्न, विकल्पानुपपत्तेः। निरात्मकमिति कोऽर्थः? यदि तावदात्मनोऽनुपकारकमिति, न दृष्टान्तोऽस्ति। न हि किञ्चिदात्मनोऽनुपकारकमस्ति। अथात्मप्रतिषेधः, निरात्मकं शरीरम्[४], आत्मा शरीरं न भवतीति। कस्य वात्मा शरीरम्? उत्तरपदविषयत्वाच्च निसः किं सात्मकमिति वाच्यम्। न ह्यसत्युत्तरपदे निसः प्रयोगं पश्यामः। यथा निर्मशकमिति। अथ शरीरे आत्मा प्रतिषिध्यते, सिद्धं साधयति। कस्य वा शरीर आत्मा विद्यते? अथ शरीरमात्मसंबन्धि न भवति,

---

१. न हि सिद्धः J२. अपदिशेत C ३. द्रःवै.सू. (च) ५.२.२१ ४. निरात्मकं शरीरम् om C

पुनर्दृष्टान्तो नास्ति। सर्वे चैते विशेषप्रतिषेधाः। विशेषप्रतिषेधाच्च सामान्यमवगम्यते। एवं च सति यत्प्रतिषेद्धव्यं तदभ्यनुज्ञातं भवति। अथात्मशब्दोऽनित्यविषयः, वर्णात्मकत्वात्, तथापि नित्यशब्देनानैकान्तिकम्। शरीरादीनां चात्मशब्दवाच्यत्वात् सिद्धसाधनम्। अथ शरीरादिव्यतिरिक्तविषय आत्मशब्दोऽनित्यविषयः, तथापि [१]रूपादिव्यतिरिक्तविषयाभ्युपगमाद् विरोधः। तदेवं यथा यथात्मासत्त्वे प्रतिज्ञा क्रियते[२], तथा तथा न्यायं न सहत इति।

परार्थाश्चक्षुरादयः संघातत्वात् शयनासनादिवदिति। संघाताः संघातान्तरार्था इति चेत्? अथ मन्यसे, सत्यं संघाताः परार्था भवन्ति ते तु संघातान्तरार्थाः। यथा शयनादय इति। न, संघातस्याभ्युपगमे विरोधात्। न हि रूपादिस्कन्धव्यतिरिक्तं संघातं भवन्तः प्रतिपद्यन्ते। न चासति संघातान्तरे संघातानां संघातान्तरार्थता सिध्यति[३]। अथ प्रतिपद्यते, व्याहतं भवति। अनिष्टप्रसङ्ग[४] इति चेत्? अथ मन्यसे मया संघातान्तरं प्रतिपद्यते, अपि त्वस्मिन् हेतौ सति इदमनिष्टं प्राप्नोतीति[५] परार्थस्य संघातान्तराविनाभावित्वात्। यावत् परार्थं भवति, सर्वं तत् संघातान्तरार्थं दृष्टमिति। न, विरोधादनभ्युपगमाच्च। न हि कश्चिद् व्यतिरिक्तात्मवादिनः संघातः संघातस्य परस्यार्थं करोति, तदुभयपक्षे संप्रतिपन्ने[६] नानिष्टापादनं दृष्टमिति। विरोधाच्च। यदि विवक्षितार्थव्यतिरेकेणानुमानस्याविवक्षितमपि विषयः, नन्वेतस्यां प्रकल्पनायां सर्वमनुमानं व्याहन्यते। कथमिति? यदिष्टमनुमानत्वेन तदपि ते नानुमानं प्राप्तम्[७]। यथा शब्दानित्यत्वे कृतकत्वम्। किं कारणम्? यथा कृतकत्वमनित्यत्वेनाविनाभूतमनित्यत्वं साधयति, एवं दुःखशून्यानात्माद्यपि साधयति। अनात्मादिवदश्रावणत्वमपि साधयिष्यति[८]। न श्रोत्रग्राह्यः शब्दः कृतकत्वाद् घटादिवदिति। अथानुमानेन बाध्यतेऽयं प्रतिज्ञार्थ इत्यतो न हेतुः। नन्वयमपि संघातान्तरार्थाश्चक्षुरादय

---

१. शरीरादिव्य° C २. °सत्त्वं विचार्यते C ३. भवति C ४. °ष्टसाधक J ५. भवति C ६. °पक्षसिद्धे J ७. प्राप्नोति C ८. °शून्यानात्मकत्वमपि साधयति दुःखशून्यानात्मकत्ववदश्रोत्रग्राह्यत्वमपि साधयिष्यति C

इति आगमेनानुमानेन च बाध्यत इति। यच्चापि भवान् संघातान्तरं प्रतिपद्यते, तत्राप्यनिवृत्तं संघातत्वमिति तेनापि संघातान्तरार्थेन[१] भवितव्यमिति। एवं चानवस्था। न चैनां शक्तः कश्चित् प्रतिपादयितुमिति यत एषा निवर्तते तदसंहतम्। अथासंहतं नैवास्ति? असंहतानभ्युपगमे संघातानुपपत्तेर्व्याघातः। न हि कदाचिदसंहतप्रतिषेधे संघातः सिध्यतीति।

अथानुमानं नैवास्तीति **परः** प्रतिपद्येत? स कथं प्रतिपद्यत इति प्रष्टव्यः। यद्यनुमानबाधितत्वादनुमानं नास्ति, अतिन्यायोऽयम्, अनुमानेन च बाध्यतेऽनुमानं च नास्तीति। अतीन्द्रियार्थाधिगतिश्च कथम्? यद्यनुमानं नास्ति कथमतीन्द्रियार्थोऽधिगम्यते? आगमादतीन्द्रियार्थाधिगतिर्भविष्यतीति न युक्तमागमव्यतिरिक्तविषयत्वात्। कस्मात्? अनुमानस्यागमव्यतिरिक्तो विषयः। यथा स्तनयित्नुशब्दस्य हेतौ। न हि तत्र प्रत्यक्षं नागम इति।

तदेवमात्मास्तीति समधिगतम्। तस्मिन् व्यपदेशस्योभयथासिद्धेः संशयः। कः पुनरयं व्यपदेशः? क्रियाकरणयोः कर्त्रा संबन्धाभिधानं व्यपदेशः। दर्शनं क्रिया, करणं चक्षुः। करणस्य च क्रियायाश्च कर्त्रा संबन्धः चक्षुषा पश्यतीति। स चायं व्यपदेशो द्वेधा भवति। अवयवेन समुदायस्य, यथा मूलैर्वृक्षस्तिष्ठतीति। अत्र समुदायशब्देन अवयवी वृक्षोऽभिधीयते। एकदेशेन चैकदेशान्तराणाम्। यद् भिन्नजातीयैरारभ्यते, तत्र ह्येकदेशदर्शनादेकदेशान्तराणि प्रतिपद्यन्ते, तत्रापि व्यपदेशस्तम्भैः प्रासादो ध्रियत इति। अन्येन चान्यस्य व्यपदेशः। परशुना वृश्चतीति। परशुः करणम् व्रश्चनं क्रिया। ताभ्यां कर्तुरभिसंबन्धः परशुना वृश्चतीति। अस्ति चायमिहापि व्यपदेशः चक्षुषा पश्यतीति। तत् किमयमन्येनान्यस्य व्यपदेशः, अथावयवेनावयविनः, अथैकदेशेनैकदेशान्तराणामिति? क्रियाकरणकर्मणां वा कर्त्रा संबन्धो व्यपदेशः। चक्षुषा वृक्षं पश्यतीति क्रियाकरणकर्मणां कर्त्रा संबन्धः। अस्ति चायमिहापि व्यपदेशः शरीरेण सुखदुःखमनुभवति। तत्र न ज्ञायते

---

१. ॰न्तरार्थ C

किं तत्त्वमिति। अन्येनायमन्यस्य व्यपदेश इत्येतत् तत्त्वम्। कथम्?

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्।

दृश्यतेऽनेनेति दर्शनं चक्षुः। स्पृशत्यनेनात्मा स्प्रष्टव्यमर्थमिति स्पर्शनं त्वगिन्द्रियमुच्यते। दर्शनेन दृष्टमर्थं स्पर्शनेन प्रत्यभिजानाति यमहमद्राक्षं तं स्पृशामि यमस्प्राक्षं तं पश्यामीति एकविषयावेतौ प्रत्ययौ प्रतिसन्धीयेते। प्रतिसन्धानं च नाम स्मृत्या सहैकविषयत्वम्। दर्शनस्पर्शनप्रत्यययोर्घटादिविषयत्वादसंबन्ध इति चेत्? अथ मन्यसे यावेतौ दर्शनस्पर्शनप्रत्ययौ तौ घटादिविषयौ, अतो न व्यतिरेकमात्मनो व्यधिकरणत्वाद् गमयत इति। न, सूत्रार्थापरिज्ञानात्। दर्शनस्पर्शनप्रत्ययावेककर्तृकाविति सूत्रार्थः। यदि चानुषक्तं गुणव्यतिरेकमपि एकविषयत्वेन साधयतो न कश्चिद् दोषः। गुणव्यतिरेकोऽसिद्ध इति चेत्? उक्तमत्र यथा गुणव्यतिरिक्तो गुणीति। कार्यकारणभावात् प्रतिसन्धानमिति चेत्? उक्तोत्तरमेतत् इच्छादिसूत्र इति। अकार्यकारणभूतानां च प्रतिसन्धानादनेकान्तः।

भावस्य भवित्रपेक्षत्वाच्चेति सूत्रार्थः। दृष्टिर्दर्शनं स्पृष्टिः स्पर्शनमिति भावरूपावेतौ प्रत्ययौ भवितारं प्रतिपादयतः। न हि भावमनाधारं पश्याम उत्पत्तिवदिति। कर्माधारो भविष्यतीति न युक्तम्, कर्मण्यसति दर्शनात् असत्यपि कर्मणि स्मृतेर्भावो भवति। न तु विनष्टं कर्म भावस्याधारो युक्तः ततो यदाधारो भावः, स आत्मा दर्शनस्पर्शनग्रहणयो रूपस्पर्शविषयत्वात् न घटादिविषयत्वम्? न, रूपस्पर्शानुपलब्धौ तद्विशिष्टप्रत्ययदर्शनात्। यदायमनुलभ्यमानरूपादिकं वस्तूपलभ्यते, तदास्य तद्विशिष्टः प्रत्यय उपजायते। यथा नीलाद्युपहिते[1] स्फटिके प्रत्ययो रूपाद्यनुपलब्धौ भवति। रात्रौ च बलाकायां शुक्लरूपाद्यग्रहणात् पक्षिप्रत्ययः। तस्मात् रूपस्पर्शव्यतिरिक्तनिमित्तो घटप्रत्ययः[2]। प्रतिसन्धानाच्च व्यतिरिक्तनिमित्तत्वम्। न हि नानाविषयौ प्रत्ययौ प्रतिसन्धीयेते। अस्ति च प्रतिसन्धानं यमद्राक्षं तं स्पृशामि, यं चास्प्राक्षं तं पश्यामीति तस्मादेकविषयत्वम्। संघातकर्तृकौ

---

१. °द्युपरिस्थिते C २. °व्यतिरिक्ते घट° C

दर्शनस्पर्शनप्रत्ययौ भविष्यत इति न युक्तम्, संघातस्य नानात्वाबाधनात्। संघातः संहन्यमानतन्त्रो भवति। संहन्यमानं चानेकम्। अनेकं च प्रतिसन्धानप्रत्ययकारणं न युक्तम्, नानाकर्तृकाणां नानाविषयाणां च प्रत्ययानामप्रतिसन्धानात्। एकेन्द्रिय-कर्तृकाविति चेत्? अथ मन्यसे यदेवेन्द्रियं दर्शनप्रत्ययस्य कारणं तदेव स्पर्शन-प्रत्ययस्यापीति? तन्न, अविषयत्वात् चक्षुषः। चक्षुः खलु स्वविषयग्रहणं प्रतिसन्धातु-मर्हति, यमद्राक्षं स एवायमर्थ इति। न पुनरिन्द्रियान्तरविषयग्रहणमविषयत्वादिति। इन्द्रियान्तरवैयर्थ्यं वा। अथैकैकमेवेन्द्रियमनेकविषयग्रहणं प्रतिसन्धत्ते, इन्द्रिया-न्तरोपादानं व्यर्थम्[१] ॥१॥

न विषयव्यवस्थानात् ॥३।१।२॥

चेतनानीन्द्रियाणि विषयव्यवस्थानात्। विषयव्यवस्थानादित्यस्यायमर्थः करणविषयनियमादिति। सति चक्षुषि रूपग्रहणं भवत्यसति न भवति। यच्च यस्मिन् सति भवत्यसति च न भवति, तस्य तत्। सति च चक्षुषि रूपग्रहणं भवति। तस्माद् रूपग्रहणं चक्षुषः। एवं शेषेष्विति।

एवं च सति किमन्येन चेतनेनेति चेत्? न, सन्दिग्धत्वादहेतुः। किमयमि-न्द्रियाणां विषयनियमः चेतनत्वात्, आहो चेतनोपकरणत्वादिति सन्दिह्यते। चेतनोपकरणत्वेऽपि सतीन्द्रियाणामेतद् भवितुमर्हति। यथा प्रदीपस्य सद्भावे रूपग्रहणं भवति, असति न भवति। न च रूपग्रहणं प्रदीपस्य। विपर्ययप्रसाधकश्चायं हेतुर्विषयव्यवस्थानादिति ॥२॥

तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः ॥३।१।३॥

विपर्ययसाधकत्वज्ञापनार्थं च।

१. ऽन्तरोत्पादो व्यर्थः। C

तद्व्य...षेधः। इति सूत्रम्। यस्मादेवैतानि इन्द्रियाणि व्यवस्थितविषयाणि, अत एवान्येनात्राव्यवस्थितविषयेण भवितव्यम्। यदि हि किञ्चिदेकमिन्द्रियमनेकार्थग्राह्यव्यवस्थितविषयं स्यात्, कस्ततोऽन्यं चेतनमनुमातुं शक्नुयात्? चैतन्यं तु आत्मनः स्वातन्त्र्ये सत्यव्यवस्थानात् चक्षुरादिवदिति। नाचेतन आत्मा, अस्वातन्त्र्यप्रसङ्गात् चक्षुरादिवदिति। अन्वयाभावादयुक्तमिति चेत्? अथ मन्यसे आत्मनश्चैतन्यसाधनस्याव्यवस्थानस्य नान्वयोऽस्ति, न चान्वयमन्तरेण हेतुः सिध्यतीति? न, विपर्ययसंबन्धस्याव्यभिचारात् नायमन्वयहेतुः, अपि तु व्यतिरेक-हेतुः। [१]व्यतिरेकहेतोश्च विपर्ययसंबन्धाव्यभिचारः सामर्थ्यम्। यच्चाचेतनं तत् सर्वं व्यवस्थितविषयं दृष्टमिति। पृथिव्यादिनित्यत्वसाधने गन्धवत्त्वादिप्रसङ्ग इति चेत्? अथ मन्यसे यदि व्यतिरेकी हेतुर्भवति अन्वयमन्तरेण, अथ पृथिव्यादिनित्यत्वे साध्ये गन्धवत्त्वं कस्मात् न हेतुः? न हेतुरुभयव्यावृत्तेः। यस्माद् गन्धवत्त्वं नित्याच्चानित्याच्च व्यावर्तते, न पुनरव्यवस्थानमेवम्, तस्मादव्यवस्थानं हेतुर्न गन्धवत्त्वमिति ॥३॥

॥इन्द्रियभेदप्रकरणम्॥

[शरीरव्यतिरेक्यात्मप्रकरणम्]

शरीरदाहे पातकाभावात् ॥३।१।४॥

इतश्च शरीरादिव्यतिरिक्त आत्मा, न शरीरादिसंघातमात्रम्,

शरीरदाहे पातकाभावात्।

शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासंघातः प्राणिभूतो गृह्यते। शरीरं प्राणिभूतं दहतः प्राणिहिंसाकृतं पापं पातकमित्युच्यते। तस्याभावोऽकर्तुः फलेन संबन्धः

१. तत्र च व्यतिरेकसम्बन्धा॰ C

कर्तुश्चासंबन्ध इति। कस्मात्? अनभ्युपगतार्थान्तरात्मनोऽन्यः शरीरेन्द्रियबुद्धि-वेदनासंघातः कर्ता, अन्यश्च तत्फलस्य भोक्तेति। तदेवमकृताभ्यागमकृतनाशदोष-प्रसङ्गः। अनिष्टश्चायम्। तस्माद् यः कर्ता भोक्ता च य स आत्मेति।

तदिदं सूत्रं यस्यात्मा नास्ति तस्यायं दोष इति दोषप्रतिपादनार्थं न साधनार्थमिति हेतुफलभावात् स्मृतिवत् कर्तृभोक्तृव्यवहार इति चेत्। यथा हेतुफलभावेन व्यवस्थितायां सन्ततौ यस्यामेव भावनोपजायते, तस्यामेव सन्ततौ स्मृतिर्भवति। एवं यत्कायचित्तसन्तानप्रभवं कर्म तत्कायचित्तसन्तानप्रभवं फलमिति नास्त्य-कृताभ्यागमकृतनाशदोषः[1]। स च कथं स्यात्? यद्यन्यस्यां सन्ततौ कृतं कर्मान्यस्यां फलं दद्यात्, यदि च भवानेनमर्थं प्रतिपादयितुं शक्नुयात् य एव करोति स एव फलं भुङ्क्त इति। उभयं च नास्ति। तस्मात् अकृताभ्यागमादिर्न दोषः। न, उक्तो-त्तरत्वात्। न सन्तानो नानात्वं बाधत इत्युक्तोत्तरमेतत्।

यत् पुनरेतत् एकस्मिन्नदर्शनादिति। अत्राप्युक्तम्, एकनिमित्तानां प्रत्ययानां प्रतिसन्धानादिति। शाल्यादिबीजवदिति चेत्? अथ मन्यसे, यथा शालिबीजादङ्कुर उपजायते, [2]अङ्कुरोपमर्दोत्तरकालं नालकाण्डादिभावेन महाभूतानुग्रहवशात् शालिबीजं प्रादुर्भवति। न च तत्रैकं किञ्चिदनुबद्धं निमित्तमस्ति। अथ च नियमः शालिबीजपूर्वकादङ्कुरात् शालिबीजम्, एवं च सति हेतुफलभावेन व्यवस्थितायां सन्तताववान्तरे चेतसि परिणामविशेषप्राप्तात् कर्मणः फलमिति तन्न, बीजावयवानुवृत्तेः शालिबीजवदित्ययमसिद्धो दृष्टान्तः। तत्रापि हि ये बीजावयवास्ते पूर्वव्यूहपरि-त्यागेन व्यूहान्तरमापद्यन्ते। व्यूहान्तरापत्तौ च पृथिवीधातुरब्धातुना संगृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्यं निर्वर्तयति। स रसः पूर्वावयवसहितोऽङ्कुरादिभावमापद्यते। तस्माद् बीजावयवानुवृत्तेरसिद्धमिदमुच्यते यथा शालिबीजाद् विनष्टादङ्कुर उत्पद्यते। अथ च प्रतिसन्धानमिति।

---

१. °नाशप्रसङ्गः C २. शालिबीजाव° C

परमाण्ववस्थत्वाद् बीजावयवानां यथोक्तदोषापत्तिरिति चेत्? अथ मन्यसे यस्यापि बीजावयवा पूर्वव्यूहं जहति व्यूहान्तरं वापद्यन्ते, तस्यापि परमाण्ववस्थत्वाद् बीजस्य परमाणुमात्रं शिष्यत इति। न च परमाणुष्वपरजातयो विद्यन्त इति[१]। न हि शालिबीजपरमाणूनां यवबीजपरमाणूनां च कश्चिद् विशेषः। यथानुपजातविशेषाः परमाणवः कार्यकारणभावनियमात् तत्पूर्वकतया शाल्यङ्कुरमभिनिर्वर्तयन्ति, तथा ममापि कार्यकारणभावात् नियम इति। न, अनभ्युपगमात्। परमाण्ववस्थानि बीजानि भवन्तीत्येतत् न प्रतिपद्यामहे सर्वावस्थोपलब्धेः। यस्मात् [२]शालिबीजमुच्छूनावस्थामादिं कृत्वा यावदुपान्त्यं शालिबीजकार्यं तावत् न कदाचित् परमाण्ववस्थं भवति। यदि च स्यात् कदाचित् नोपलभ्येत। यदि तर्हि आपरमाणोर्विभागो नास्ति कल्पादावुत्पत्तिर्न प्राप्नोति, परमाण्ववस्थत्वात् जगतः। परमाण्ववस्थे च जगति न शाल्यादिजातिव्यक्तिरस्तीति। पुनरुत्पादे जातिव्यक्तिहेतवः परमाणव एवेत्यभ्युपगन्तव्यम्, यथा च कल्पादावेवं परमाण्ववस्थे बीजेऽपि इति। न, अनेनैवोक्तोत्तरत्वात्। अनेनैव सर्वावस्थोपलब्धेरित्युक्तोत्तरमेतत्। सर्गादौ च शालिजातिव्यक्तिहेतुरदृष्टविशेषः, येनादृष्टेन प्राणिनामुपभोगाय शाल्यादयो निर्वर्त्यन्ते, तमदृष्टविशेषमपेक्षमाण ईश्वरस्तांस्तान् परमाणून् तथा तथा संघातयति, यथा यथा शाल्यादिजातिव्यक्तिरिति। एतेन घटादिपाको व्याख्यातः।

नापरमाण्वन्तो विभागः सर्वावस्थोपलब्धेरिति। आ मध्यात् पाकानुपपत्तिरिति चेत्? अथ मन्यसे यदि कार्यकारणद्रव्ये पच्येते, आ मध्यात् पाको न प्राप्नोति पाचकेन तेजसा अप्राप्तत्वात्। नाप्रतिबन्धात्। भवेदप्येष दोषो यदि तेजसोऽनुप्रवेशमवयवी प्रतिबध्नीयात्। स तु न प्रतिबध्नाति। अप्रतिबद्धं तेजोऽनुप्रविशतीति। न प्रतिबध्नातीति न हेतुरस्तीति? न नास्ति परिस्रवादिमतो घटस्योपलब्धेः। यस्मात् परिस्रवादिमतो घटस्य द्रवत्वप्रतिबन्धो न दृष्टः, अप्रतिबन्धेन द्रवत्वं परिस्रुतिं करोति। तच्च प्रत्यक्षत उपलभ्यते। यदि चायमवयवानुप्रवेशो

---

१. °परजातिभेदो विद्यते C २. शाल्यादिबीज° C

द्रव्यस्य विनाशकः स्यात्, न परिस्रवादिमान् घट उपलभ्येत। परिस्रवणाच्च भाजनगतानामपामवस्थानमेव न स्यात्। विनाशे च कार्यद्रव्याणां व्यवहिताव्यवहितयोस्तुल्योपलब्धिप्रसङ्गः। यदि चानुप्रविश्य द्रव्यं द्रव्यान्तरं व्यतिभिनत्ति, तेन चाक्षुषस्य रश्मेरनुप्रवेशात् स्फटिकादि विनष्टमिति व्यवहिते चाव्यवहिते च तुल्योपलब्धिः प्राप्नोति। तस्मात् शालिबीजमदृष्टान्तः।

यस्य च पूर्वस्कन्धनिरोधसमकालानि स्कन्धान्तराणि प्रादुर्भवन्ति, तस्य तेषां स्कन्धान्तराणामकर्मनिमित्तः सर्गः प्राप्नोति। अकर्मनिमित्तेन सत्त्वसर्गेण शुभाशुभफलप्राप्त्यर्था क्रिया न प्राप्नोति। सुखी स्यामिति तत्क्रियेति चेत्? अथ मन्यसे स्वयं कर्माणि करोति कथमहं सुखी स्याम्, दुःखी न स्यामिति? तन्न, अननुभूतत्वात्। येन सुखमनुभूतं सुखसाधनसंबन्धानुस्मृतिश्च यस्य स तत्साधनमुपादत्ते। यस्य पुनः प्रतिक्षणप्रध्वंसिनः संस्काराः, तस्य सुखसाधनसंबन्धानुस्मृतेरभावात् सुखी स्यामिति क्रियानुपपत्तिः। मुक्त्यर्थश्च प्रयासो नोपपद्यते, अयत्नसिद्धत्वात्। जातमात्र एवायं मुच्यत इति मुक्त्यर्थो ब्रह्मचर्यवासो व्यर्थः। परिपृच्छा च न प्राप्नोति। **तथागतेन** भिक्षवः परिपृच्छ्यन्ते कच्चिद् यूयं मया विनीता इति? ते चाहुरङ्ग विनीताः स्मेति। अतीतानागतवर्तमानानामनुपकार्यत्वात् ये तावदनागताः संस्काराः, ते तावदसत्त्वात् नोपक्रियन्ते, येऽप्यतीतास्तेऽप्येवम्। ये तु वर्तमानास्तेषु संस्काराधानमशक्यम्, वर्तमानलक्षणस्यानुपकार्यत्वात्। न हि तस्यावस्थानकालोऽस्ति यस्मिन्नुपक्रिया स्यात्। संस्कार्यसंस्कारकयोः सहोत्पादात्[१] युक्तमिदमिति चेत्? न, संस्कार्यसंस्कारकयोः सहोत्पादे नियमानुपपत्तेरिति। इदं संस्कारकमिदं संस्कार्यमिति नियमो नोपपद्यते। अथ संस्कारकमपेक्षमाणं संस्कार्यं विलक्षणं कार्यं करोति, विलक्षणकार्योत्पादश्च संस्कार इत्युच्यते? न, संस्कार्यार्थानभिधानात्। इदं संस्कारकमिदं संस्कार्यमित्येतत् कथम्? न हि यो यस्य विशेषं नाधत्ते स तत्संस्कारक इति वा संस्कार्य इति वा[२] शक्यं व्यपदेष्टुम्।

१. युक्तमिदम्...संस्कारकयो om J २. तत्संस्कारकः, तत्संस्कार्यमिति च शक्यम् C

अथाप्युपदेशेन संस्काराणामनागतानामनुत्पत्तिः क्रियते? न, अनागतानामनुत्पत्तेः सत्त्वात्। यासावनागतानां संस्कार्याणामनुत्पत्तिर्नासौ कदाचित् नास्तीति किं तस्याः क्रियते? तस्मात् मुक्त्यर्थो ब्रह्मचर्यवास इत्यनुपपन्नम्। तदेवमनभ्युपगतार्थान्तरात्मनो दोष इति ॥४॥

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥३।१।५॥

यस्याप्यात्मा नित्यः तस्यापि हिंसाफले न प्राप्नुतः। हिंसा तावन्न प्राप्नोति नित्यत्वात्। फलमप्यात्मनो न युक्तमनुपकार्यत्वात्। अस्य चार्थस्य ज्ञापिकां कारिकामुदाहरन्ति—

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम्।
चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः॥

तदेवमेकस्मिन् पक्षे हिंसा निष्फला, एकस्मिंस्तु पक्षेऽनुपपन्ना, निष्फला चेति। इयं तु हिंसा **सांख्य**पक्षे संभवति, बुद्धेः परिणामित्वात्। कार्यकारणसंघातः[१] परिणामित्वादुच्छिद्यते, स एव च तत्फलानि भुङ्क्ते तत्फलस्य तत्र व्यक्तेरिति। न, पूर्वावस्थापरित्यागात्। यथैवात्मा पूर्वावस्थां न जहातीति तत्र फलं नेष्यते, तथा बुद्धिरपि नित्यत्वात् पूर्वावस्थां न जहातीति तत्र फलं नेष्यते[२]। अथ मन्यसे पूर्वावस्थां जहातीति नित्यत्वं विरुध्यते, पूर्वावस्थापरित्यागेन बुद्धिनित्यत्वं विरुद्धम्। अथाप्यवस्था भिद्यत इति मन्यसे, तथाप्यनिवृत्तो व्याघातः, अवस्थाभ्योऽवस्थावतोऽनन्यत्वात् न ह्यवस्थाभ्योऽवस्थावानन्य इति। अवस्थाभेदेऽवस्थावान् भिद्यत इति, य एव **बौद्ध**स्य प्रतिक्षणं ध्वंसिषु संस्कारेषु दोषः, स एव प्रतिक्षणविपरिणामिष्वपीति। ऋजुवक्रतादिवदिति चेत्? अथ मन्यसे ऋजुवक्रतादिभेदे यथाङ्गुलिद्रव्यं न भिद्यते न चाङ्गुलितोऽन्ये ते, तथावस्थाभेदे बुद्धेरभेद इति? न,

---

१. °कारणभावः C २. तत्र फलं नेष्यते om C

अन्यत्वात्। अन्ये ऋजुवक्रते। युक्तं च यदन्यभेदेऽन्यस्याभेद इति। न पुनरवस्थातोऽवस्थावतोऽन्यत्वम्। तस्मादसमो दृष्टान्तः। किं पुनर्वक्रत्वं ऋजुत्वं वा? गुणः, आकुञ्चनजं वक्रत्वं प्रसारणजम् ऋजुत्वम्। गुणश्च गुणिनोऽर्थान्तरमिति प्रतिपादितमेतत्।

बुद्धेरप्येवमिति चेत्? अथ मन्यसे, बुद्धेरपि ये ते अवस्थे भिद्येते, तयोर्भेदे बुद्धिर्न भिद्यत इति? अन्यावस्थातो बुद्धिः। तन्न, सिद्धान्तविरोधात्। न भवतां पक्षे धर्मधर्मिणोर्भेद इति। भेदं चाभ्युपगच्छता सिद्धान्तस्त्यक्तो भवति। तस्माद् यथात्मनित्यत्वे सुखदुःखानुपभोगो दोष इति, न तत्र सुखदुःखे कल्प्येते तथा बुद्धिनित्यत्वे इति, बुद्धावपि न कल्पनीये समानं नित्यत्वमिति। अथात्मनो नित्यस्य पुण्यपापाभ्यां किं क्रियत इति? सुखदुःखे पुण्यपापाभ्यामात्मनो नित्यस्य क्रियेते। अथ ताभ्यां सुखदुःखाभ्यामात्मनः किं क्रियते? प्रत्ययः[२]। ये आत्मनि सुखदुःखे तद्विषयः प्रत्यय आत्मनि भवतीत्येतावत् क्रियते, स च प्रत्ययो भोगः।

यत् पुनरेतद् वर्षातपाभ्यां किं व्योम्न इति, यदेव चर्मणः। चर्मणो वर्षातपाभ्यां यत् क्रियते तदेव व्योम्नः। अथ चर्मणः किं क्रियते? संबन्धः। यथा चर्म वर्षातपाभ्यां संबध्यते, तथा व्योमापि। वर्षातपसंबन्धात् चर्मवदनित्यं व्योमेति चेत्? अथ मन्यसे, यथा चर्म वर्षातपसंबन्धाद् विक्रियते, तथा व्योम वर्षातपसंबन्धाद् विकरिष्यते। नानेकान्तात्। वर्षातपसंबन्धी परमाणुरथ च नित्य इत्यनेकान्तः। चर्मणश्चानित्यत्वं किं वर्षातपसंबन्धादथ कारणविभागादथाश्रयविनाशादिति? वयं तु ब्रूमः कारणवतस्तद्विभागात् तद्विनाशाच्च युक्तो विनाशः। न पुनराकाशस्य कारणमस्तीत्यत उभयाभाव इति। तद्वतां चावस्थानान्न संबन्धो विनाशहेतुः। यदि चायं संबन्धो विनाशहेतुरभविष्यत् न तद्वतामवस्थानमभविष्यत्। अवतिष्ठन्ते तु भावास्तावत् यावन्न विनाशकारणसन्निपात इति।

---

१. किं क्रियते सुखदुःखे। ताभ्यां किं क्रियते? प्रत्ययः C

अथ मन्यसे वर्षातपाभ्यां चर्मणः सङ्कोचविकाशौ भवतः। न त्वाकाशस्येति? तन्न, विकल्पानुपपत्तेः। संकोचविकाशौ चर्मण इति कोऽर्थः। किं तावदल्पत्वमहत्त्वे उत संयोगविभागाविति? तन्न तावत् संकोचविकाशावल्पत्वमहत्त्वे, यावद्द्रव्यभावित्वात् परिमाणस्य, यावद्द्रव्यं हि परिमाणम्। तत् सति द्रव्ये न निवर्तितुमर्हति। अथ चर्मणः संयोगविभागौ संकोचविकाशाविति? तदपि न युक्तमेकत्वात्,न ह्येकस्य संयोगविभागौ संभवत इति। कथं तर्हीदमुच्यते चर्मणः संकोचश्चर्मणो विकाश इति? चर्मकारणानामविनश्यत्कार्याणाम्[१] अवयवानामातपसंबन्धापेक्षाणां याः परस्परेण प्राप्तयः आरब्धकार्याणां द्रव्यान्तरानारम्भिकास्ता इतरेतरोपश्लेषेणावयवेषु वर्तमानाः तदेकार्थसमवायिनि चर्मण्युपचर्यन्ते। तदपेक्षं चेदमुच्यते चर्मणः संकोचो न पुनश्चर्म संकुचतीति। एतेन तदवयवानामेवोदकसंबन्धापेक्षाणामविनश्यत्कार्याणां परस्परतो विभागो विकाश इति। विक्रियायां च दृष्टान्ताभावः। तदेव वस्त्वविनश्यद् विक्रियामापद्यत इति न दृष्टान्तोऽस्ति। विक्रिया तु पदार्थान्तरोत्पादः यथा पूर्वरूपादिनिवृत्तौ रूपाद्यन्तरोत्पादे विकृतो घट इति। यद्येवंभूतो विकारः, आत्मन्यपि विकारोऽस्ति[२]। तत्रापि सुखनिवृत्तौ दुःखप्रादुर्भाव इति सुखप्रत्ययनिवृत्तौ दुःखप्रत्यय इति। तस्मात् नित्यस्यात्मनः सुखदुःखोपभोग इति सिद्धम्॥५॥

न कार्याश्रयकर्तृवधात् ॥३।१।६॥

नित्यत्वादात्मनो हिंसादिदोषोऽपरिहार्यः? न, अन्यथा तदुपपत्तेः। आत्मनित्यत्वेऽप्यन्यथा हिंसा भवति। अस्यार्थस्य ज्ञापनाय

न...धात्। इति सूत्रम्। न ब्रूमो नित्यस्य सत्त्वस्य वधो हिंसेति। अपि तु अनुच्छित्तिधर्मकस्य सत्त्वस्य यत् शरीरं यानि च सुखदुःखसंवित्तिसाधनानि

---

१. अविनश्यत्कार्याणां om J २. ०न्यपि चकास्ति C

इन्द्रियान्यसाधारणानि, तेषां पीडा वैकल्यं प्रमापणं वा हिंसेति। कुत एतत् प्रतिपत्तव्यमिति। हिंसायाः फलभोगस्य चोभयपक्षसंप्रतिपन्नत्वात्। हिंसाफलोपभोगश्चोभयपक्षसंप्रतिपन्नः। सेयं हिंसा एकस्मिने[१] पक्षे संभवति, यस्य तावत् प्रतिक्षणविनाशिनः संस्कारास्तस्य किं हिंस्यते निर्हेतुकत्वात् विनाशस्य कस्य व्यापारोऽस्ति। अथ विलक्षणोत्पत्तिनिमित्तत्वेन व्यवतिष्ठमानः परो हिनस्तीत्युच्यते? ननूपचारो भवति, न भवतः प्रधानमस्ति येन शरीरोत्पादक उपचर्यते। न, समानत्वात्। भवतामपि पक्षे न प्रधानं न हिंस्यमिति[२]? सत्यम् ममापि कार्याश्रयकर्तृवधो हिंसेति तुल्यम्। अयं तु विशेषः। एतस्मिन्[३] पक्षे य एवायमात्मा शरीरादिसाधनः कर्म करोति, स एव तत्फलमुपभुङ्क्त इति अकृताभ्यागमदोषो नास्ति। भवतां त्वकृताभ्यागमकृतप्रणाशश्चेति। परिशेषादात्मनित्यत्वे हिंसेति व्यवस्थितम्।

तत्र कार्याश्रयशब्देन शरीरमुच्यते, तन्निमित्तत्वादुपभोगस्येति। कतृणीन्द्रियाणि तत्साधनत्वात्। अथ वा समानाधिकरणसमासात् शरीरमेव कार्याश्रयकर्तृशब्दाभ्यामुच्यत इति कर्ता भोक्ता चात्मा। किं पुनरिदं कर्तृत्वं किं वा भोक्तृत्वमिति ज्ञानचिकीर्षाप्रयत्नानां समवायः कर्तृत्वम्। सुखदुःखसंवित्समवायो भोक्तृत्वम्। एतच्च न शरीरे तन्निमित्तत्वात् तु कर्तृ शरीरमुच्यते ॥६॥

॥शरीरव्यतिरेक्यात्मप्रकरणम्॥

[चक्षुरद्वैतप्रकरणम्]

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥३।१।७॥

इतश्च देहव्यतिरिक्त आत्मा

---

१. एतस्मिन् J २. हिंस्यत इति C ३. °शो यत एकस्मिन् C

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात्।

सव्येन चक्षुषा दृष्टमर्थमितरेण प्रत्यभिजानातीति सूत्रार्थः। तच्च प्रत्यभिज्ञानं स्मृतिपूर्वकत्वात् प्रतिसन्धानम्[१]। प्रतिसन्धानाच्चैककर्तृकत्वं प्रत्ययानां सिध्यतीति।

सिद्धत्वादनारम्भ इति।

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्

इत्येतस्मिन् प्रकरणे सिद्ध आत्मव्यतिरेकः। सिद्धत्वादनारभ्यं प्रकरणमिति। इन्द्रियव्यतिरेकज्ञापनार्थमित्**येके**। एके इदं प्रकरणमिन्द्रियव्यतिरेकज्ञापनार्थं वर्णयन्ति। तन्न, तत एव सिद्धेः पूर्वप्रकरणेनैवेन्द्रियशरीरव्यतिरेकः सिद्ध इति। समुच्चयार्थमित्**यपरे**। अपरे तु समुच्चयार्थं सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति हेतुं ब्रुवते। युक्तोऽन्यः[२] समुच्चयः अयं तु न युक्तो विरोधात्। सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति हेतुं ब्रुवाणो युक्तिं बाधते। का पुनरियं युक्तिबाधा? अनेकत्वादिन्द्रियस्य युगपदधिष्ठानासंभवः। अणु मनोऽनेकं चक्षुः। न चाणोर्मनसो युगपदनेकेन चक्षुषा संबन्धः संभवति। अथासंबद्धमपि द्वितीयं चक्षुरर्थानालोचयति? एवं च सति द्वितीयचक्षुर्वदितरचक्षुरपि मनसानधिष्ठितमेव प्रवर्तिष्यत इति व्यर्थं मनः प्राप्तम्। अनधिष्ठितं च प्रवर्तमानमिन्द्रियं करणत्वं बाधते। न हि करणमनधिष्ठितं प्रवर्तमानं दृष्टमिति। समग्रासमग्रचक्षुषोश्च तुल्योपलब्धिप्रसङ्गः। न ह्यनधिष्ठितमिन्द्रियं प्रवर्तत इत्यणुत्वात् मनसः नित्यमिदमेकेनैव[३] संबध्यत इति विकलाविकलयोस्तुल्योपलब्धिः प्राप्ता[४] प्रकरणविरोधश्च

इन्द्रियार्थपञ्चत्वात्[५]।

इति इन्द्रियपञ्चत्वप्रतिपादकं प्रकरणं विरुध्यत इति ॥७॥

---

१. तच्च प्रतिसन्धानं प्रत्यभि....त्वात् प्रत्यभिज्ञानस्य C २. अन्यः om J ३. मनसा नित्यमेकमेव C ४. प्राप्नोति C ५. इन्द्रियपञ्च° C

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ॥३।१।८॥

यदि तर्ह्येकमिन्द्रियम्, कथं द्वित्वोपलब्धिः? द्वित्वोपलब्धिप्रतिपादनार्थम् **नैक...नात्।** इति सूत्रम्। एकमिन्द्रियद्रव्यं द्व्यधिष्ठानमभिन्नम्। कोऽधिष्ठानार्थः? तैजसस्य चक्षुषः पार्थिवेन कृष्णसारेण उपकारविकारभेदानुविधानम्[१]। यस्मात् कृष्णसारे उपक्रियमाण उपक्रियते, विक्रियमाणे विक्रियते, तिष्ठति तिष्ठति[२], नश्यति नश्यतीति[३], तस्मादस्य कृष्णसारमधिष्ठानमित्युच्यते। एतच्च व्याख्यातं शरीरसूत्रे। तस्यान्तौ गृह्यमाणौ द्वित्वाभिमानं प्रयोजयतो यथा दीर्घस्य द्रव्यस्य मध्ये व्यवहितस्यान्तावुपलभ्यमानौ द्वित्वाभिमानं प्रयोजयत इति॥८॥

एकविनाशे द्वितीयाविनाशान्नैकत्वम्॥३।१।९॥

एकस्मिन् विनष्टे उद्भूते वा द्वितीयमवतिष्ठते विषयग्रहणलिङ्गम्। न, अन्यथा तदुपपत्तेः। द्वितीयमवतिष्ठत इति नैतत् कस्यचित् प्रत्यक्षम्। प्रत्ययमात्रं तु विनष्टेऽप्येकस्मिन्नधिष्ठाने यदवतिष्ठते तेन भवति। न चाधिष्ठानमिन्द्रियम् अपि तु यत् तदनुविधायि तदेकमनुविधत्त इति। यथा बहुवातायनस्य वेश्मन एकपिधाने इतरेण ग्रहणमिति ॥९॥

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः॥३।१।१०॥

अपरे त्ववयवविनाशेऽप्यवयव्युपलब्धेरहेतुरिति परिहारं वर्णयन्ति ॥१०॥

---

१. उपकार°विकार° om J २. तिष्ठति पश्यतीति C ३. नश्यति नश्यतीति om C

दृष्टान्तविरोधादप्रतिषेधः ॥३।१।११॥

तस्योत्तरम्

दृष्टा...षेधः। इति सूत्रम्। अस्यार्थः। न कारणद्रव्यविनाशे कार्यद्रव्यमवतिष्ठत इति। यदि नावतिष्ठते, कथं कारणद्रव्यविनाशे कार्यमुपलभ्यत इति? क एवमाह उपलभ्यत इति? अपि तु बहुष्ववयविषु यस्य कारणानि विभक्तानि तद्विनष्टम्, यस्य न विभक्तानि तदुपलभ्यत इति शेषं **भाष्ये** ॥११॥

इन्द्रियान्तरविकारात् ॥३।१।१२॥

अनुमीयते चायं देहादिव्यतिरिक्तश्चेतनः

इन्द्रियान्तरविकारात्।

कस्यचिदम्लस्य फलस्य गृहीतसाहचर्ये रूपे गन्धे वा केनचिदिन्द्रियेण गृह्यमाणे रसनेन्द्रियविकारः। कः पुनर्विकारः? रसानुस्मृतौ रसगर्द्धिप्रवर्तितः, गर्द्धिस्तृष्णा रसतृष्णाप्रवर्तितो दन्तान्तरपरिश्रुताभिरद्भी रसनेन्द्रियस्य संबन्धः संप्लवो विकार इत्युच्यते। सा चेयं स्मृतिरिन्द्रियचैतन्ये न प्राप्नोति। न च प्रतिक्षणविनाशिषु संस्कारेषु अन्यानुभूतस्यान्येनास्मरणादिति। इन्द्रियान्तरविकार इन्द्रियान्तरधर्मः। स कथं व्यधिकरणत्वादात्मव्यतिरेकं प्रतिपादयति? नेन्द्रियान्तरविकार आत्मव्यतिरेकप्रतिपत्तिकारणम्, अपि तु स्मृतिः। न ह्येकमनुभवितारमन्तरेण स्मृतिः प्राप्नोति। स्मृतिश्च भावत्वाद् भवित्रपेक्षा उत्पत्तिवदिति न्यायः। न च स्मृतिमन्तरेण इन्द्रियविकारः संभवतीति प्रत्यक्ष इन्द्रियान्तरविकार उपादीयते। अननुभूतरसस्येन्द्रियान्तरविकाराभावादिति व्यतिरेकहेतुः ॥१२॥

न स्मृतेः स्मर्तव्यविषयत्वात् ॥३।१।१३॥

स्मृतिर्नाम धर्मः, तस्याः स्मर्तव्योऽर्थो विषयः। सेयं स्मर्तव्यार्थसन्निधानादुपजायमाना अपरिदृष्टसामर्थ्यं न स्मर्तारं प्रतिपादयिष्यति। न हि स्वकारणसन्निधानात् प्रादुर्भवन्नङ्कुरोऽपरिदृष्टसामर्थ्यं स्तम्भादिकमर्थं प्रतिपादयति॥१३॥

तदात्मगुणसद्भावादप्रतिषेधः ॥३।१।१४॥

न स्मर्तव्यमात्रात् स्मृतिरुत्पद्यत इति। यदायमतीतमर्थं स्मरति तदा स्मृतिरनाधारा प्राप्नोति। न चेयमनाधारा युक्ता गुणत्वात्। न हि कश्चिद् गुणोऽनाधारो दृष्ट इति। न चेयमिन्द्रियेषु संभवत्यननुभूतत्वात्। न विषये तस्यासत्त्वात्। न शरीरे शरीरगुणानां प्रत्यक्षाणां स्वात्मपरात्मप्रत्यक्षत्वात्। न चेयमनाधारा गुणत्वादित्युक्तम्। न चेयं नास्ति। न चात्मन्यसति अस्याः सद्भावो युक्त इति। तेभ्योऽन्यस्य तदुत्पत्तौ सामर्थ्यं गम्यते। कथमित्येतदनेनैव प्रत्युक्तम् अस्त्यात्मनः सामर्थ्यं स्मृतेराधारभावः। न चेयमनाधारा कार्यत्वात्। सर्वं कार्यमाधारवत् क्षीरनीरादि दृष्टमिति। एतेन

न तच्चक्षुषि नो रूपे नान्तराले तयोः स्थितम्।
न तदस्ति न तन्नास्ति यत्र तन्निष्ठितं भवेत्॥

इति प्रत्युक्तम्। न तदस्ति न तन्नास्तीति च व्याहतम्। न चानया कारिकया विज्ञानस्याश्रयभावः प्रतिषेद्धुं शक्यः। किं कारणम्? विशेषप्रतिषेधात् न चक्षुषि नो रूप इत्येवमादिर्विशेषप्रतिषेधः। अथानाश्रितमेव विज्ञानम्, व्यर्थं वाक्यम्, न तच्चक्षुषि नो रूप इति। कस्य वा चक्षुषि रूपे वा विज्ञानं वर्तत इति सिद्धम्[१], यं प्रति प्रतिषेधः। अयं च विज्ञानस्याश्रयाश्रयिभावप्रतिषेधो विचार्यमाण आत्मसत्तां

१. इति सिद्धम् om C

प्रतिपादयति। न हि [१]विज्ञानस्यात्माश्रितत्वमन्तरेण वाक्यमेतदर्थवत्तायां व्यवतिष्ठत इति।

अथ वैकस्यानेकविषयोपलब्धिप्रतिसन्धानमनेन सूत्रेण प्रदर्श्यत इत्युक्त-न्यायम्। शेषं **भाष्य** इति[२] ॥१४॥

॥चक्षुरद्वैतप्रकरणम्॥

[आत्मनो मनोव्यतिरेकित्वप्रकरणम्]

नात्मप्रतिपत्तिहेतूनां मनसि संभवात्॥३।१।१५॥

य एते भवता आत्मप्रतिपादका[३] हेतव उपदिष्टाः, सर्व एते मनसि संभ-वन्ति। एवं च न मनोव्यतिरिक्त आत्मा सिध्यति॥१५॥

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम्॥३।१।१६॥

यथा ज्ञातारमभ्युपगच्छता ज्ञानस्य साधनानि चक्षुरादीनि प्रतिपद्यन्ते, तथा मन्तारं प्रतिपद्यमानेन मतिसाधनमभ्युपेयम्। यच्च तन्मतिसाधनं तन्मन इति संज्ञाभेदमात्रम्। अथायं मन्ता निःसाधनो मतिं करोति? एवमयं ज्ञाता निःसाधनो [४]ज्ञप्तिं करिष्यतीति सर्वेन्द्रियविलोपप्रसङ्गः[५] ॥१६॥

नियमश्च निरनुमानः॥३।१।१७॥

योऽयं नियम आश्रीयते मतिरसाधना न पुनर्ज्ञप्तिरिति। नियमोऽयं निरनु-

---

१. आत्मसत्त्वमन्त° C २. C adds अपरिसंख्यानाच्च स्मृतिविषयस्य। ३. आत्म-व्यतिरेक° प्रति° J ४. ज्ञानं C ५. विलोपः J

मानः, ज्ञप्तिवन्मतेर्न निःसाधनत्वेऽनुमानमस्ति, अस्ति तु ससाधनत्वे[१]। सुखादयश्च रूपादिभ्यो विषयान्तरमिति तद्विषयाया[२] उपलब्धेः साधनेन भवितव्यम्। न हि किञ्चित् सविषयं विज्ञानमसाधनं दृष्टं रूपादिविज्ञानवदिति। निरनुमानः नियमश्च सुखादिविज्ञानानि निःसाधनानि भवन्तु मा भूवन् रूपादिविषयाणीति। यदि सर्वं विज्ञानं ससाधनमुत्पद्यते[३] मनस्यपि करणान्तरं प्राप्नोति विषयत्वात्, ओमित्युच्यते। अस्ति मनसि करणम्। किं पुनस्तत् येन मनोऽधिगम्यते। केन पुनर्मनोऽधिगम्यते? अयुगपज्ज्ञानोत्पत्त्या। यस्य तु मनः प्रत्यक्षं भवति तस्य च योगजधर्मानुगृहीत आत्ममनःसंयोगः करणम् योगिधर्माणां चाचिन्त्यत्वात् कथं ते मनो गृह्णन्तीत्यविचारणीयमेतत्। एतेन आत्मविज्ञानं प्रत्युक्तम्, आत्ममनःसंयोगस्य करणभावादिति। एंव तावदात्मनोऽस्तित्वव्यतिरेकौ सिद्धौ। बहुत्वं चात एव

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्

नान्यदृष्टमन्यः स्मरतीति,

शरीरदाहे पातकाभावात्

इति च। तेन सर्वा व्यवस्था शरीरिभेदे सति संभवतीति॥१७॥

॥आत्मनो मनोव्यतिरेकित्वप्रकरणम्॥

[आत्मनित्यत्वप्रकरणम्]

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसंप्रतिपत्तेः

॥३।१।१८॥

किं पुनरयं देहादिसङ्घातादन्यो नित्योऽथानित्य इति एतस्मिन्नर्थे

---

१. ज्ञप्तिवत्तु मतेः ससाधनत्वेऽनुमानमस्ति। C २. °विषयत्वाद् C ३. °मुच्यते C

उभयथा दृष्टत्वात् [द्रः वै. सू. (च) २.२.२२]

इति संशयमुपपादयति। अनुपपन्नरूपश्चायं संशयः। आत्मास्तित्वव्यतिरेकहेतुभिः शरीरभेदेऽप्यभेद आत्मनि सिद्धः। सिद्धत्वात् प्रकरणमनारभ्यम्। न अनारभ्यम्। कथम्? जन्मप्रभृति यावत् प्रायणमित्येतस्मादेकः सिध्यति। न पुनः शरीरविनाशादूर्ध्वं भवतीत्येवं सिध्यतीति। एतस्यार्थस्य ज्ञापनार्थं

पूर्वा...पत्तेः। इति सूत्रम्। अस्यार्थः। जातः खल्वयं कुमारको विषयावगमासमर्थेषु इन्द्रियेषु हर्षभयशोकान् संप्रतिपद्यमानो दृष्टः स्मितकम्परुदितानुमेयान्[१]। ते च स्मृत्यनुबन्धादुत्पद्यन्ते। स्मृत्यनुबन्धश्च नान्तरेण पूर्वशरीरमिति। तत्र जन्म निकायविशिष्टाभिरपूर्वाभिः शरीरेन्द्रियबुद्धिवेदनाभिः संबन्धः। अभिप्रेतविषयप्रार्थनाप्राप्तौ सुखानुभवो हर्षः। अनिष्टविषयसाधनसन्निपाते तज्जिहासोर्हानाशक्यता भयम्। इष्टविषयवियोगे सति तत्प्राप्त्यशक्यप्रार्थना शोकः। तदनुभवः संप्रतिपत्तिः। एकविषयानेकविज्ञानोत्पादोऽभ्यासः, एकाकारविषयो वा। यथा शालयोऽनेन अभ्यस्ता इति। प्रत्यक्षबुद्धिनिरोधेन तदनुसन्धानविषयः प्रत्ययः स्मृतिः। तदनुगृहीतस्तदनुसन्धानविषयः प्रत्ययस्तद्भावविषयः प्रत्यभिज्ञानम्। अनुबन्धो भावनाख्यः स्मृतिहेतुः संस्कारः[२]। इष्टविषयानुस्मरणात् नयनादिप्रसादः स्मितम्। अनिष्टविषयानुस्मरणात् तत्साधनजिहासानुष्ठानलक्षणो हस्तादिविक्षेपवतोऽश्रुविमोचनसहचरितः शब्दविशेषो रुदितम्।

स्मितरुदिते व्यधिकरणत्वादसाधनम्। अथ मन्यसे, स्मितरुदिते बाल्यावस्थायां भवतः। न च बाल्यावस्था आत्मनः। तस्माद् व्यधिकरणत्वादसाधनमिति? न, शोकादिमदात्मवत्या[३] बाल्यावस्थायाः साध्यत्वात्। शोकादिवदात्मवती बाल्यावस्थेति साध्यम् स्मितरुदितादिमत्त्वादिति बाल्यावस्थाया धर्मो[४] यौवनावस्थावत्। एतेन स्मृतिसंस्कारानुभवपूर्वशरीरसंबन्धवदात्मवत्त्वं व्याख्यातम्। कथमिति?

---

१. स्मिते रुदितानुमेयात् J २. संस्कार इति। J ३. °वतीति C ४. बाल्यावस्था वयोधर्मः C

यथा स्मितरुदितवत्त्वेन शोकादिमदात्मवती बाल्यावस्था साध्यते, एवं शोकादिमदात्मवत्त्वेन स्मृतिमदात्मवती बाल्यावस्था साध्या। तथा स्मृतिमदात्मवत्त्वेन संस्कारवदात्मवती बाल्यावस्था साध्या[१]। संस्कारवदात्मवत्त्वेन पूर्वानुभववदात्मवती, पूर्वानुभववदात्मवत्त्वेन पूर्वशरीरसंबन्धवदात्मवतीति। सर्वत्र पूर्वानुभववदात्मवत्त्वेन पूर्वशरीरसंबन्धवदात्मवती साध्या[२]। सर्वत्र यौवनावस्था दृष्टान्तः। सा हि स्मितरुदितवती भवतीति शोकादिमदात्मवती चेति सर्वत्र योज्यम्॥१८॥

पद्मादिषु प्रबोधसंमीलनविकारवत्तद्विकारः॥३।१।१९॥

अनित्येऽपि विकारदर्शनादनेकान्त इति सूत्रार्थः। कः पुनरयं प्रबोधः, किं वा संमीलनमिति? पद्मपत्रावयवविभागोऽविनश्यत्कार्यः प्रबोधः। पद्मपत्रावयवानामेवारब्धकार्याणां याः पुनः परस्परेण प्राप्तयस्ताः[३] संमीलनमिति। न, विकल्पानुपपत्तेः। पद्मादिषु प्रबोधसंमीलनविकारादिवत् तद्विकार इति किमयं दृष्टान्तः साधनपक्षे उतानैकान्तिकपक्ष इति? यदि साधनपक्षे न हेतुरस्ति[४], न च हेतुमन्तरेण दृष्टान्तमात्रं साधकमित्यसाधनं दृष्टान्तः। अथ दूषणम्, तत् किं दृष्टकारणप्रत्याख्यानम्, अथ कारणान्तरोपपादनम्, अथात्मनि उत्पत्तिनिरोधकारणानुमानम्, अथाकस्मिकत्वमिति? तद् यदि तावद् दृष्टकारणप्रत्याख्यानम्? तन्न युक्तम्, दृष्टेन विशेषितत्वात्। यौवनाद्यवस्थासु स्मितरुदितवत्त्वं शोकादिमदात्मवत्त्वं च दृष्टम्। दृष्टेन स्मितरुदितवत्त्वेन शोकादिमदात्मवत्त्वं बाल्यावस्थायां गम्यत इति न दोषः। अथ कारणान्तरोपपादनम्? तदपि न युक्तम्। अत एव दृष्टेन विशेषितत्वादिति। अथात्मन उत्पत्तिनिरोधकारणानुमानम्, तन्न युक्तम्। द्रव्यस्य सतः सर्वदा अमूर्तत्वादकारण आत्मा आकाशवदिति। आत्मानं च कृतकं प्रतिपद्यमानेन

---

१. बाल्यावस्था साध्या om J २. सर्वत्र... साध्या om J ३. ऽस्तत् C ४. न हेतुरस्ति om C

कारणमस्य वाच्यम्। कुतः? कार्यस्य कारणवत्त्वात्। सर्वं कार्यं कारणवद् दृष्टमिति ॥१९॥

नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ॥३।१।२०॥

अथ पद्मादिप्रबोधसंमीलनविकारोऽकस्माद् भवतीति? तत्

नोष्ण...णाम्। नायमाकस्मिकः पद्मादिषु प्रबोधसंमीलनविकार इति सूत्रार्थः। एवं च सति न किञ्चिद् दृष्टान्तेन प्रतिषिध्यते। पञ्चात्मकविकाराणामिति, न पञ्चात्मकानि पद्मादीनि, अपि तु पञ्चानां भूतानामनुग्रहे सति भवन्तीति पञ्चात्मकानीत्युच्यन्ते। मुख्यतस्तु न किञ्चित् पञ्चात्मकमस्तीत्युपरिष्टाद् वक्ष्यामः॥२०॥

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्॥३।१।२१॥

जातमात्रस्य वत्सस्य प्रवृत्त्या स्तन्याभिलाषो गम्यते। स्तन्यप्राप्तौ निवृत्तेः प्रवृत्त्यनुमेयः[1] स्तन्याभिलाषः। तेन स्मृतिः। तया संस्कारः। तेनानुभवः। तेन पूर्वशरीरमिति पूर्ववत् प्रयोगः। किमर्थं पुनरिदं सूत्रमारभ्यते, यदायमर्थः पूर्वाभ्यस्तसूत्र एवाधिगतः? सामान्यतोऽधिगतस्य विशेषज्ञापनार्थं सूत्रमित्यदोषः॥२१॥

अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ॥३।१।२२॥

प्रवृत्तिमात्रस्यानैकान्तिकत्वज्ञापनार्थम्

अय...णम्। इति सूत्रम्। न, विकल्पानुपपत्तेः। किमिदमयसोऽयस्कान्ता-

---

१. गम्यते तत्र प्रवृत्त्युन्नेयः C

भिगमनं सनिमित्तम्, आहो निर्निमित्तमिति? यदि सनिमित्तम्, तत्केनावगम्यते? नियमेनायोऽयस्कान्तमेवोपसर्पतीति न लोष्टादीन्। न च लोष्टादय उपसर्पन्ति। सोऽयं कार्यनियमः कारणनियमाद्[१] गम्यते। एतेनाकस्मिकत्वं प्रतिषिद्धम्। तदिदमयसामुपसर्पणं किं दृष्टकारणप्रत्याख्यानार्थमुपन्यस्तमथ कारणान्तरोपपादनार्थमथात्मन उत्पत्तिनिरोधकारणानुमानमिति[२] पूर्ववत् प्रसङ्गः॥२२॥

नान्यत्र प्रवृत्त्यभावात् ॥३।१।२३॥

आकस्मिकत्वप्रतिषेधार्थं च **नान्य...भावात्** इति सूत्रम्॥२३॥

वीतरागजन्मादर्शनात्॥३।१।२४॥

नित्य आत्मा

वीतरागजन्मादर्शनात्।

न हि कश्चित् जातमात्रो वीतरागो दृश्यते[३]। वीतरागाणां जन्मादर्शनात् सरागो जायत इति गम्यते। जन्म व्याख्यातम्। ततः किम्? रागस्य पूर्वानुभूतविषयानुचिन्तनं योनिः। न च विषयावगमासमर्थेषु इन्द्रियेषु रागः संभवति। न च स्मृतिमन्तरेण [४]पूर्वानुभूतविषयानुचिन्तनं युक्तम्। पूर्वानुभूतविषयप्रार्थना सङ्कल्पः। अदृष्टादिति चेत्? अथ मन्यसे न पूर्वशरीरयोगो रागाद् गम्यते, अपि त्वदृष्टाद् राग इति? नाभिप्रायापरिज्ञानात्। नायमभिप्रायः कारणनियमेन रागः, अपि तु पूर्वशरीरसंबन्धमात्रप्रतिपादनं सूत्रार्थः। न चादृष्टाद्राग इति ब्रुवता तत् प्रतिषिध्यत [५]इति किञ्चिदुक्तम्[६]॥२४॥

---

१. कार्यनियमात् कारणनियमः C २. °त्मन्युत्पत्तिनिरोधानुमान C ३. जायते C ४. पूर्वानुभूत° om C ५. न for इति J ६. मातृकासु दृष्टं तन्मयत्वाद्राग.... वीरणादिवदित्यर्थचर्चया भाष्यसंगत्या च ३.१.२६ सूत्रवार्त्तिके सन्निविष्टम्। cf. C, p. 751

सगुणद्रव्योत्पत्तिवत् तदुत्पत्तिः ॥३।१।२५॥

इति अनैकान्तिकपक्षे सूत्रम्। न, उक्तोत्तरत्वात्। उक्तोत्तरमेतत्॥२५॥

न, सङ्कल्पनिमित्तत्वाद्रागादीनाम्॥३।१।२६॥

अत्रापि पूर्ववत् सङ्कल्पस्मृतिसंस्कारानुभवपूर्वशरीरवदात्मवत्त्वानि योज्या-
5 नीति।

तन्मयत्वाद् रागः।[द्रः वै. सू. (च) ६.२.१३]

इति। विषयाभ्यासः खल्वयं भावनाहेतुस्तन्मयत्वमुच्यते।

जातिविशेषाच्च रागविशेषः।[वै.सू. (च) ६.२.१६]

इति। कर्म खल्विदं जातिविशेषस्य निर्वर्तकम्। तादर्थ्यात् ताच्छब्द्यं लभ्यते
10 वीरणादिवत्।

एवं चानादिः संसारोऽपवर्गान्तः सिध्यतीति व्यवस्थितमेतत् अस्त्यात्मा व्यतिरिक्तोऽनेको नित्यश्चेति ॥२६॥

॥आत्मनित्यत्वप्रकरणम्॥

[शरीरपरीक्षाप्रकरणम्]

15 **पार्थिवं गुणान्तरोपलब्धेः ॥३।१।२७॥**

आत्मानन्तरं शरीरमवसरप्राप्तम्। तत् परीक्ष्यते। अथ वा अनादिश्चेतनस्य शरीरयोग इति शरीरं परीक्ष्यते। तस्मिन् परीक्ष्यमाणे आत्माधिकार एवायं परिसमाप्तो

भवतीति। किं पुनरस्य परीक्ष्यम्? किं घ्राणादिवदेकप्रकृति, उत नानाप्रकृतीति विप्रतिपत्तेः संशयः। श्रूयते खल्वत्र विप्रतिपत्तिः। तत्रेदं तत्त्वम्[१]

पार्थिवं गुणान्तरोपलब्धेः।

मानुषं शरीरं पार्थिवमिति। मानुषमिति किमर्थं विशिष्यते? लोकान्तरशरीराणि न पार्थिवानीति युक्तं विशेषणम्। गन्धवत्त्वात् परमाणुवत्। गन्धवान् परमाणुरेकात्मको दृष्टः। गन्धवच्च शरीरम्। तस्मादेकात्मकमिति। एकात्मकमिति[२] एकस्वभावमिति। न त्विदमबादिभिरसंपृक्तया पृथिव्यारब्धं चेष्टेन्द्रियार्थाश्रयभावेन कल्प्यत इति भूतसंसर्गोऽविप्रतिषिद्धो मिथः पञ्चानामिति[३] ॥२७॥

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ॥३।१।२८॥

निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ॥३।१।२९॥

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ॥३।१।३०॥

एवं च सति[४]

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः।
निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम्।
गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम्।

इति प्रत्युक्तम्, तत्र सन्निहितानां तद्गुणोपलब्धेरिति। तदिदमनेकभूतप्रकृति[५] शरीरम्, अगन्धमरसमरूपमस्पर्शं च प्रकृत्यनुविधानात् स्यादिति **भाष्यम्**। तस्य व्याख्यानम्।

---

१. तत्रेदं तत्त्वम् om C २. तस्मादेकात्मकम् C ३. मिथः पञ्चानाम् om C द्रः वै. सू. (च) ४.२.३. ४. एवं तर्हि C ५. °भूत° om J

पृथिव्युदका-भ्यामारभ्यमाणमगन्धं कारणगन्धस्यैकस्यानारम्भकत्वात् पृथिव्यनलाभ्या-मारभ्यमाणमगन्धं चारसं च कारणगन्धरसयोः केवलयोरनारम्भकत्वात्। पृथिव्यनिलाभ्यामगन्धं चारसं चारूपं च, वायोरगन्धरसरूपत्वात्। पृथिव्याकाशाभ्यामगन्धमरसमरूपमस्पर्शं च आकाशे गन्धाद्यभावात्। सर्वत्र समानो न्यायः, कारणगुणस्य केवलस्यानारम्भकत्वादिति। जलानलाभ्यामगन्धं चारसं च। जलवायुभ्यामगन्धं चारसं चारूपं च[१]। जलाकाशाभ्यामगन्धमरसमरूपमस्पर्शं च। तेजोऽनिलाभ्यामगन्धं चारसं चारूपं च। अनलाकाशाभ्यामगन्धमरसमरूपमस्पर्शं च। अनिलाकाशाभ्यामेवमेव। भूजलानलैरगन्धमेव। भूजलानिलैरेवमेव। भूजलाका-शैरेवमेव। पृथिव्यनिलानलैरगन्धमरसं च। पृथिव्यनलाकाशैरेवमेव। पृथिव्यनिलाकाशैरगन्धमरसमरूपं च। जलानलानिलैरगन्धमरसं च। जलानलाकाशैरेवमेव। जलानिलाकाशैरगन्धं चारसं चारूपं च। अनलानिलाकाशैरेवमेव। पृथिव्युदकतेजोवायुभिरगन्धम्। पृथिव्युदकज्वलनाकाशैरेवमेव। [२]पृथिवीजलानिलाकाशैरेवमेव, [३]पृथिव्यनलानिलाकाशैरगन्धमरसं च। जलानलानिलाकाशैरेवमेव। पृथिव्युदकतेजोवाय्वाकाशैरगन्धम्। कारणगुणस्यैकस्यानारम्भकत्वादिति [४]समानम्। एककारणकत्वे तु [५]सततोत्पत्त्यनुपलब्धिनित्यत्वप्रसङ्ग इत्युक्तम् ॥२८-३०॥

श्रुतिप्रामाण्याच्च ॥३।१।३१॥

सूर्यं ते चक्षुः स्पृणोमीति अस्य मन्त्रस्यान्ते पृथिवीं ते शरीरमिति, सेयं [६]स्मृतिः कारणात् कार्योत्पत्तिं दर्शयति[७]। सूर्यश्चक्षुषः कारणम्, पृथिवी शरीरस्येति। अन्त्येष्टिकाले च मन्त्रः सूर्यं ते चक्षुर्गच्छतु पृथिवीं शरीरमिति। अस्यापि

---

१. जलानिलाभ्यामारब्धमगन्धमरूपमरसं च स्यात् J २. अवनिजला॰ C ३. पृथिव्यनिलाज्वलना॰ C ४. वाच्यम् C ५. त्यनुत्पत्ती... प्रसङ्गश्चेत्युक्तम् C ६. श्रुतिः J ७. ॰त्पत्तिः। C

मन्त्रस्यार्थो यद् यस्मादायातं तत् तस्मिन्नेव प्रलयं गच्छत्विति। प्रकृतौ विकारस्य प्रलयाभिधानम्। प्रलयशब्देन च कार्यशून्यं कारणमभिधीयते, न पुनः कार्यस्य कारणे लयः प्रलयः। एवं च सति असदुत्पद्यते सन्निरुध्यते इत्ययमर्थ उक्तो भवति ॥३१॥

॥शरीरपरीक्षाप्रकरणम्॥

[इन्द्रियभौतिकत्वप्रकरणम्]

कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः
॥३।१।३२॥

अथेदानीमिन्द्रियाणि[१] प्रमेयक्रमेण विचार्यन्ते, किमाव्यक्तिकानि, आहङ्कारिकाणि, आहो भौतिकानीति? संशयकारणप्रतिपादनार्थं सूत्रम्[२]

कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात्[३] संशयः।

कृष्णसारं भौतिकम्, तस्मिन्ननुपहते विषयोपलब्धिः। कृष्णसारव्यतिरेकेण च विप्रकृष्टदेशावस्थितस्य विषयस्योपलब्धिः। सेयं व्यतिरेकोपलब्धिरभौतिकधर्मः। तदेवमुभयधर्मोपलब्धेः संशय इति। कृष्णसारमेव चक्षुः। तस्मिन् सति भावाद् रूपग्रहणस्य। यस्मादिदं रूपग्रहणं सति कृष्णसारे भवति, असति न भवति। यच्च यस्मिन् सति भवत्यसति न भवति[४] तस्य तदिति, यथा कार्यद्रव्यस्य रूपादय इति।

न, प्रदीपादिभिरनेकान्तात्। प्रदीपे सति रूपोपलब्धिर्भवति[५]। न च प्रदीपस्य रूपोपलब्धिरित्यनेकान्तः। यस्य च कृष्णसारं चक्षुः, तस्य सन्निकृष्टविप्रकृष्टयो-

१. अथेमानीन्द्रि° J २. संशय....सूत्रम् om J ३. °च्चोपलम्भाच्च J ४. असति न भवति om J ५. भवति om J

स्तुल्योपलब्धिप्रसङ्गः। कृष्णसारं च विषयं न प्राप्नोति, अप्राप्त्यविशेषात् सन्निकृष्टविप्रकृष्टयोस्तुल्योपलब्धिः प्राप्नोति। विषयीभावादिति चेत्? अथ मन्यसे सन्निकृष्टमस्य विषयी भवति विप्रकृष्टमविषयः[१], एवं च न तुल्योपलब्धिरिति? न, उक्तोत्तरत्वात्। उक्तोत्तरमेतत्[२] प्रत्यक्षसूत्र इति ॥३२॥

महदणुग्रहणात्॥३।१।३३॥

अभौतिकानीत्यपरे

महदणुग्रहणात्।

महदिति महत्तरं महत्तमं चोच्यते। अण्वित्यणुतरमणुतममिति। तदिदमुभयं[३] चक्षुषोपलभ्यमानं भौतिकत्वं चक्षुषो बाधते। भौतिकं हि यावद् भवति तावदेव व्याप्नोति। अभौतिकं तु व्यापकत्वात् सर्वस्य व्यापकमिति[४]। न, भौतिकेषु प्रदीपादिषु दृष्टत्वात्। भौतिकाः प्रदीपादयो महदण्वोः प्रकाशका भवन्तीत्यनेकान्तः, प्रदीपाद्यनभ्युपगमे वा महदणुप्रकाशकत्वं चक्षुष एवेत्यसाधारणत्वादहेतुः, भौतिकाभौतिकयोर्निवृत्तेः। ननु चाभौतिके विज्ञाने महदणुप्रकाशकत्वं दृष्टम्? न दृष्टम्। न हि बुद्ध्या महदणुनी प्रकाश्येते, अपि तु प्रकाशो बुद्धिर्न प्रकाशनमिति। अवधारितस्य त्वर्थस्य हानोपादानोपेक्षाबुद्धीनां साधनं बुद्धिरिति नाभौतिकं महदणुप्रकाशकमस्ति। ननु च मनो विद्यते? सत्यं मनो विद्यते[५], न पुनस्तद्भौतिकं नाप्यभौतिकमिति।

एतेनात्मा व्याख्यातः, नासौ भौतिको नाप्यभौतिक इति। यदि मनो नाभौतिकम् यदुक्तं भौतिकानीन्द्रियाणि, अभौतिकं मन[६] इति तद् व्याहतम्[७] नाभौतिकत्वार्थस्याभूतात्मकत्वपर्यायत्वात्। अभौतिकं मन इति अभूतात्मकं मन इति यावदुक्तं भवति।

---

१. सन्निकृष्टोऽस्य विषयो....कृष्टो न विषयः C २. उक्तोत्तरमेतत् om C ३. चक्षुष्युप° C ४. सर्वव्यापकम् C ५. मनो विद्यते om C ६. द्रः भाष्य १.१.४ ७. °तिकार्थस्य...त्मकप° C

मुख्यतस्तु मनो न भौतिकं नाप्यभौतिकमिति। नेन्द्रियेऽपि समानत्वात्। इन्द्रियम-भौतिकमिति अभूतात्मकमिति यावदुक्तं स्यात्। अभूतात्मकं व्यापकं चेन्द्रियं प्रतिपद्यमान इदं पर्यनुयोज्यः, व्यवहितार्थग्रहणं कस्मात् न भवतीति? किं कारणम्? व्यापकत्वादिन्द्रियस्य कुड्यकटादेरावरणस्य न सामर्थ्यमस्तीति। वृत्तिः [1]प्रतिबध्यत इति चेत्? अथ मन्यसे सत्यं व्यापकमिन्द्रियम् तस्य तु पुरुषार्थेन हेतुना क्षोभ्यमाणस्य महाह्रदाद् बुद्बुदा इव तद्वृत्तयो निश्चरन्ति[2], ताः कुड्यादिभिः प्रतिबध्यन्त[3] इति? न, वृत्तिव्यतिरेकेणेन्द्रियस्य सत्त्वे प्रमाणाभावात्। येयं विषयग्रहणात्मिका वृत्तिः, तां त्यक्त्वा तद्व्यतिरिक्तमिन्द्रियमिति किं प्रमाणम्? न चाप्रमाणकोऽर्थः शक्यः प्रतिपत्तुम्। न च प्रतिबध्यमानाप्रतिबध्यमानयोरेकत्वम्। एकत्वे चानर्थकं वृत्तिः प्रतिबध्यते निश्चरति चेति।

अव्यतिरेकाच्च तदुत्पत्तिविनाशधर्मकत्वम्। यदि च वृत्त्यव्यतिरेकीन्द्रियम्, यथा वृत्तेरुत्पादविनाशावेवम् इन्द्रियस्यापि प्राप्नुतः। वृत्तेर्व्यक्तिर्नोत्पत्तिरिति चेत्? अथ मन्यसे न मया वृत्तेरुत्पत्तिरभ्युपगम्यते, अपि तु व्यक्तिः। न निरोधो विनाशः, अपि तु तिरोभाव इति। नोत्पत्तिविशेषत्वात्। व्यक्तिरुत्पत्तिविशेषः। कथमिति? नानुपजातविशेषस्य व्यक्तिरिति। अथानुपजातविशेषं व्यज्यत इति मन्यसे, नित्यं व्यक्तिः स्यात्।

एतेन विनाशो व्याख्यातः। तिरोभाव इति विद्यमानं न किञ्चित् निवृत्तम्[4]। न ह्यनिवृत्तविशेषस्याग्रहणं संभवतीति। न च सर्वनित्यतावादिनो[5] ग्रहणाग्रहणे युक्ते, विशेषस्यानुपजननात् न ग्रहणम्, विशेषस्यानपचयात्[6] नाग्रहणमिति। नित्यं व्यापकं चेन्द्रियमभ्युपगच्छतः कारणार्थो हीयते। कारणं हि नाम यस्यानन्तरं यद्भवति। कारणं च नित्यं कार्यं च नित्यमिति किं कस्यानन्तरम्? कार्यकारणभावश्च कथमुभयोर्नित्यत्वात्। कारकशब्दार्थश्च वाच्यः। ननु च करोतीति कारकम्? सत्यं

---

१. प्रतिषिध्यत° C २. इव निःस्वरन्त्यः C ३. °षिध्यन्त C ४. निरुद्धम् C
५. °वादिना C ६. °नुप° C

करोतीति कारकम्। न पुनर्नित्यवादिनः किञ्चित् कर्तव्यमस्ति। न चासति कर्तव्ये कारकार्थं पश्यामः। व्यक्तौ कारकार्थ इति चेत्? व्यक्तावपि तुल्यम्? व्यक्तिरपि व्यङ्ग्यवत् नित्येति व्यक्तावपि न कारकार्थोऽस्ति। युगपदनेकविज्ञानप्रसङ्गाच्च। यदि च वृत्तिर्वृत्तिमतो नान्या भवति, वृत्तिमतोऽवस्थानात् वृत्तीनामवस्थानमिति युगपदनेकविज्ञानप्रसङ्गः। वृत्त्यनेकत्वे चैकमिन्द्रियमनेकं प्राप्नोति, वृत्तिभ्योऽनन्यत्वात्। अथ मा भूदिन्द्रियभेद इति, वृत्तीनां तर्हि एकत्वं प्राप्नोति, वृत्तिवृत्तिमतोरनन्यत्वात्। अथ मा भूदेष दोष इत्युभयं नेष्यते, भेदस्तर्हि वृत्तिवृत्तिमतोरिति, न चान्या गतिरस्ति। तस्मादयुक्तं व्यापकमिन्द्रियं नित्यं चेति॥३३॥

रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ॥३।१।३४॥

महदणुग्रहणस्य चान्यथासिद्धेरहेतुः। योऽप्ययं हेतुर्महदणुग्रहणादभौतिकानीन्द्रियाणीति, अयमप्यन्यथासिद्धः। न महदणुग्रहणमात्रादभौतिकत्वं व्यापकत्वं चेन्द्रियाणां शक्यं प्रतिपत्तुम्। कस्मात्? यस्मादिदं

रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम्।

यस्माद्रश्म्यर्थसन्निकर्षविशेषात् महदण्वोर्ग्रहणम्। चक्षूरश्मेश्चार्थस्य च सन्निकर्षविशेषात् महदण्वोर्ग्रहणं भवति। तत्र सन्निकर्षमात्रात् सामान्यग्रहणं सन्निकर्षविशेषाद् विशेषग्रहणम्। कः पुनः सन्निकर्षस्य विशेषः? भूयोऽवयवसन्निकर्षानुग्रहः। यस्मादयं सन्निकर्षो विशेषप्रतिपत्तिहेतुः भूयोभिरवयवसंयोगैरनुगृह्यते सोऽयमवयवान्तरसंयोगापेक्षोऽवयवीन्द्रियसन्निकर्ष सन्निकर्षविशेष इत्युच्यते। स च रश्म्यर्थसन्निकर्षविशेषोऽणोर्महतश्च तुल्यो भवतीत्यन्यथा महदण्वोर्ग्रहणं सिध्यति। रश्म्यर्थसन्निकर्षश्चावरणलिङ्गः कुड्यादिव्यवहितानामप्रकाशकत्वात्। अप्राप्यकारित्वे तु न कुड्यादेरावरणस्य सामर्थ्यमस्तीति अस्ति चाक्षुषो रश्मिर्यथा प्रदीपरश्मिरिति॥३४॥

तदनुपलब्धेरहेतुः ॥३।१।३५॥

आवरणानुमेयत्वे सतीदमाह

तदनुपलब्धेरहेतुः।

न चाक्षुषो रश्मिर्विद्यत इति सूत्रार्थः कथमिति? उपलब्धिलक्षणप्राप्तत्वाद-नुमानानुपपत्तिः। यत् खलूपलब्धिलक्षणप्राप्तं नोपलभ्यते, तन्नास्ति। यथा घटादि। घटादेर्महदनेकद्रव्यवत्त्वरूपाण्युपलम्भकानि[१] सन्तीत्युपलभ्यन्ते घटादयः। तथा च महदनेकद्रव्यरूपवांश्चाक्षुषो रश्मिः कस्मात् प्रत्यक्षतो नोपलभ्यत इति वाच्यम्। महत्त्वं तावत्

कारणमहत्त्वबहुत्वप्रचयेभ्यः[२]।

अनेकद्रव्यवत्त्वमपि कारणबहुत्वादेव।

रूपस्पर्शवद्धि तेजः[३]।

इति नारूपं तत्। एवमशेषोपलब्धिकारणसन्निधाने सति येन नोपलभ्यते तेन गम्यते नास्तीति ॥३५॥

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥३।१।३६॥

यत् प्रत्यक्षतो नोपलभ्यते तदनुमानेनोपलभ्यमानं नास्तीत्ययुक्तं वक्तुम्, यथा चन्द्रमसः परभागस्य पृथिव्याश्चाधोभागस्येति। [४]यथा चन्द्रमसः पृथिव्याश्च परभागाधोभागावुपलब्धिलक्षणप्राप्तावपि न प्रत्यक्षत उपलभ्येते, न चानुमाने-नोपलब्धेस्तौ न स्तः। किं पुनरनुमानम्? अर्वाग्भागवत्त्वमुभयप्रतिपत्तौ। तथा चाक्षुषस्य रश्मेः कुड्याद्यावरणमनुमानं संभवतीति ॥३६॥

---

१. °रूपवत्त्वानि C २. द्रःवै. सू. (च) ७.१.१६ ३. द्रः वै. सू. (च) २.१.३
४. यथा चन्द्रमसः....°भागावुपलब्धि° om C

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥३।१।३७॥

अपरे तु

महत्त्वादनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः[१]

इत्युपलब्धौ नियमं वर्णयन्ति। नोपलभ्यमान इति किमुक्तं भवति? न ब्रूमो[२] यत्र यत्र महदनेकद्रव्यवत्त्वरूपाणि सन्ति, तत्तदुपलभ्यत इति, अपि तु यद्यदुपलभ्यते, तत्र तत्र महदनेकद्रव्यवत्त्वरूपाणि सन्तीति। एवं तर्हीद सूत्रं नोपलब्धेः कारण-प्रतिपादकं सत्सु अभावादिति। सत्सु महदनेकद्रव्यरूपेषु उपलब्धिर्न भवेदिति नैतान्युपलब्धिकारणानि

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः।

इति। शेषं **भाष्ये**।

कस्मात् तर्हि चाक्षुषो रश्मिर्नोपलभ्यते? उपलब्धिकारणाभावादिति, नैताव-देवोपलब्धिकारणं यदुत महदनेकद्रव्यरूपाणि, अपि तु रूपग्रहणेन रूपविशेषोऽ-भिधीयते न रूपमात्रम्। एवं च सूत्रम्

अनेकद्रव्येण द्रव्येण समवायाद्रूपविशेषाच्च रूपोपलब्धिः[३]

इति। अत्र रूपविशेषग्रहणेन रूपधर्म उद्भवसमाख्यातोऽभिधीयते, न रूपत्वं रूपान्तराद् रूपं विशिनष्टि अपि तु उद्भवो विशेषकत्वाद् विशेष इत्युच्यते। यथा ब्राह्मणविशेष इति। न ब्राह्मणत्वं ब्राह्मणविशेषः। एवं यत् समानजातीयविशेषकं तद् विशेष इत्युच्यते। उद्भवश्च कार्यगम्यः। यस्याभावाद् विषक्तावयवमाप्यं द्रव्यं हेमन्ते न गृह्यते, तैजसं च ग्रीष्मे यस्य च भावात् प्रदीपरश्मिरुपलभ्यते, आदित्य-रश्मिश्च स उद्भवो नाम रूपविशेषः। स तस्मिन् नायने रश्मौ रूपविशेषो नास्तीत्यतश्चाक्षुषो रश्मिर्नोपलभ्यत इति।

---

१. द्रः वै. सू. (च) ४.१.६ २. न युक्तो C ३. इदं न्यायसूत्रार्थविशदीकरणाय समुपात्तं वैशेषिकसूत्रम् (४.१.९ च), न न्यायसूत्रम्। द्रः विश्वेश्वरानन्दभारतभारतीलेखमाला-४८, पृः २-३; अनेकद्रव्यसम॰ C

दृष्टश्च तेजसो धर्मभेदः। चतुर्विधं च तेजो भवति उद्भूतरूपस्पर्शं यथा आदित्यरश्मिः, उद्भूतरूपमनुद्भूतस्पर्शं यथा प्रदीपरश्मिः, उभयं च प्रत्यक्षं रूपस्योद्भूतत्वात्। उद्भूतस्पर्शमनुद्भूतरूपं यथा वारिस्थं तेजः, अनुद्भूतरूपस्पर्शो यथा नायनो रश्मिः। उभयं चाप्रत्यक्षं रूपस्यानुद्भूतेः ॥३७॥

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥३।१।३८॥

शेषं **भाष्ये**। रूपस्पर्शानभिव्यक्तिश्च व्यवहारप्रक्लृप्तार्था। यदि नायनो रश्मिरुद्भूतरूपस्पर्शो भवेत् तेन दृश्यविशेषे अनेकरश्मिसन्निपाते च[१] सति द्रव्यं दह्येत। अनेकरश्मिसन्निपाते च सति व्यवहितत्वाद् द्रव्यस्यानुपलब्ध्या भवितव्यम्। अथ मन्यसे यथा आदित्यरश्मिसंबद्धेऽर्थे नायनो रश्मिर्न व्यवधीयते, एवं रश्म्यन्तरसन्निपातेऽपीति। तन्न, [६]व्यतिभेदादनुग्राहकत्वाच्च। व्यतिभिद्यादित्यरश्मिं तत्संबद्धेन द्रव्येण संबध्यते, उद्भूतरूपस्पर्शवत्त्वे तु चक्षुषो यस्य पूर्वं सन्निपतितं चक्षुः तदितरेणाव्यतिभिन्नमिति[३] नार्थं गृह्णीयात्। अथानेकरश्मिसन्निपाते सति समानजातीयद्रव्येभ्यो द्रव्यान्तरं रश्मिरुत्पद्यत इति। एवं च समग्रासमग्रचक्षुषो रूपोपलब्धिः समाना[४] प्राप्नोति। न चैतदिष्टमनुपलब्धेरिति। तेन सर्वो व्यवहारो न कल्पते[५]। व्यवहारप्रक्लृप्त्यर्थं च नायनस्य रश्मेरनुद्भूतरूपस्पर्शवत्वमिति। सर्वद्रव्याणां च विश्वरूपो व्यूहः पुरुषार्थतन्त्रः कर्मकारित[६] इति। कर्म तु धर्माधर्मभूतं चेतनस्योपभोगार्थमिति।

अव्यभिचारी तु प्रतीघातो भौतिकधर्मः। भौतिकं चक्षुः कुड्यादिभिः प्रतीघातदर्शनाद् घटादिवदिति। अप्रतीघातादभौतिकमिति चेत्? अथ मन्यसे यदि

१.सन्निधाने for °सन्निपाते च C २. व्यतिभिद्यार्थग्रा° C ३. व्यवहितमपि C; व्यवहितमिति C var. ४. चक्षुषोस्तुल्योपलम्भः C ५. तेन....न कल्पते om C ६. पुरुषार्थकारित इति C

प्रतीघाताद् भौतिकमप्रतीघातात् तर्हि अभौतिकमिति। दृष्टश्चाप्रतीघातः, काचाभ्रपटलस्फटिकान्तरितोपलब्धेरिति। नानेकान्तात् प्रदीपरश्मिवदिति। भौतिकस्याप्यप्रतीघातः, यथा प्रदीपरश्मेरिति। स्थाल्यादिषु पाचकस्य तेजसोऽप्रतीघातादिति[1] ॥३८॥

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥३।१।३९॥

उपपद्यते चानुपलब्धिः कारणभेदात्

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः।

यथोपलब्धिलक्षणप्राप्तस्य मध्यन्दिने उल्काप्रकाशस्य निमित्तादग्रहणमभिभवात् तथोपलब्धिलक्षणप्राप्तस्य चाक्षुषस्य रश्मेरग्रहणं निमित्ताद् रूपस्यानुद्भूतेरिति ॥३९॥

न, रात्रावप्यनुपलब्धेः ॥३।१।४०॥

मध्यन्दिनोल्काप्रकाशो नोपलभ्यते[2] आदित्यप्रकाशाभिभवादित्ययुक्तम्, सर्वरश्मिवत्त्वप्रसङ्गात्[3]। एवं सति सर्वं लोष्टादि रश्मिवत्[4] प्राप्नोति। अथ लोष्टादिरश्मयः कस्मात् नोपलभ्यन्त इत्यत्रानुयुक्तो ब्रुयात् आदित्यप्रकाशाभिभवात् [5]इति। एतदुद्धारकं सूत्रम्

न, रात्रावप्यनुपलब्धेः।

यदि लोष्टादिरश्मयः स्युः, दिवा आदित्यप्रकाशाभिभवात् नोपलभ्यन्त इति रात्रौ तर्हि उपलभ्येरन्। रात्रावपि नोपलभ्यन्ते व्यञ्जकाभावादिति चेत्? न हि यद्

---

१. अप्रतीघातः (?) C २. °लभ्यत इति? आदित्यप्रकाशात्। om J ३, ४. रश्मिम° J ५. °भवादिति, अयुक्तं तत् C

यस्याभिभावकं तत् तस्याभिव्यञ्जकमिति प्राप्तो[1] लोष्टरश्मीनामुपलम्भः। अनुमानतश्च नोपलभ्यते लोष्टे रश्मिरित्यपिशब्दाद् गम्यते, तदेवं सर्वप्रमाणविनिवृत्तेन विद्यते लोष्टे रश्मिः। न पुनरेवं चाक्षुषो रश्मिर्निरनुमानः, कुड्यादेरावरणस्य सामर्थ्यादिति ॥४०॥

बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥३।१।४१॥

तस्य विद्यमानस्य

बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः।

दृष्टान्तस्थान एवैतत् सूत्रम्। किमुक्तं भवति? यत् खलु बाह्यप्रकाशानुग्रहमपेक्षते तस्यानुपलब्धौ रूपस्यानभिव्यक्तित इति। अनुद्भूतेर्यथा विषक्तावयवस्याप्यद्रव्यस्य रूपस्यानुद्भूतेरग्रहणम्, तथा चाक्षुषो रश्मिर्बाह्यप्रकाशानुग्रहमपेक्षते, तस्मादस्यापि रूपस्यानुद्भूतेरग्रहणमिति ॥४१॥

अभिव्यक्तौ चाभिभवात् ॥३।१।४२॥

कस्मात् पुनर्नायनस्य रश्मेरनुपलब्धिकारणमभिभवो[2] नोच्यत इति?

अभिव्यक्तौ चाभिभवात्।

यदुद्भूतरूपं बाह्यप्रकाशानुग्रहं च नापेक्षते तदभिभूयते यथा मध्यन्दिने उल्काप्रकाशः। अनुद्भूतरूपश्च नायनो रश्मिः, बाह्यप्रकाशानुग्रहं चापेक्षते। यदनुद्भूतरूपं तन्नाभिभूयते यथा तदेव विषक्तावयवमाप्यं द्रव्यम्। यच्च बाह्यप्रकाशानुग्रहापेक्षम्, उद्भूतरूपमपि तन्नाभिभूयते यथा घटादिद्रव्यमिति। सोऽयमुभय-

---

१. कथं न प्राप्नोति for प्राप्तो C २. °लब्धेरभिभवो न कारणमुच्यते इति C

विषयोऽभिभवो नायनरश्मावनुपपन्न इति। विप्रतिपत्तिविषयः कृष्णसारं रश्मिवत् द्रव्यत्वे सति रूपोपलब्धौ नियतस्य साधनाङ्गस्य निमित्तत्वात् प्रदीपवदिति। अथ वा रश्मिमच्चक्षुः द्रव्यत्वे सति नियतस्य साधनाङ्गत्वे च[१] सति स्फटिकादिव्यवहितार्थप्रकाशकत्वात् प्रदीपवदिति ॥४२॥

नक्तञ्चरनयनरश्मिदर्शनाच्च ॥३।१।४३॥

इति दृष्टान्तसूत्रम्। मानुषं चक्षू रश्मिमत् अप्राप्तिस्वभावत्वे सति रूपाद्युपलब्धिनिमित्तत्वात् नक्तञ्चरचक्षुर्वदिति। जातिभेदवदिन्द्रियभेद इति चेत्? अथ मन्यसे विडालत्वं जातिर्वृषदंशे वर्तते न मनुष्ये एवं रश्मिमद् विडालस्यैव चक्षुर्भविष्यति न मानुषस्येति? न, आवरणसामर्थ्यसामान्यात्। सत्येतस्मिन् जातिभेदे यथा वृषदंशप्रभृतीनां कुड्यादिभी रश्मय आव्रियन्ते तथा मनुष्याणामपीति समानमेव।

इतश्च भौतिकानीन्द्रियाणि प्रतिघातित्वात् घटादिवदिति। भूतं श्रोत्रम्, द्रव्यत्वे सति बाह्यार्थप्रकाशकत्वात् घ्राणादिवदिति॥४३॥

अप्राप्य ग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥३।१।४४॥

रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणमित्ययुक्तम्, अन्यथापि ग्रहणात्[२]।

अप्राप्य ग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः।

तृणादि सर्पद्द्रव्यं काचेऽभ्रपटले वा व्याहन्यते। यदि च चाक्षुषो रश्मिः प्राप्तार्थप्रकाशकः स्यात् काचाभ्रपटलस्फटिकव्यवहितार्थप्रकाशको[३] न स्यात्,

---

१. नियतत्वे च C २. अन्यथापि ग्रहणात् om J ३. स्फटिकान्तरिते प्रका॰ C

अस्ति तु। तस्मात् न प्राप्यकारि चक्षुरिति। अत एव चाभौतिकम्। प्राप्यकारित्वं हि भौतिकधर्मः[१] ॥४४॥

[२]कुड्याद्यन्तरितानुपलब्धेरप्रतिषेधः ॥३।१।४५॥

अप्राप्यकारित्वे इन्द्रियस्य न कुड्याद्यावरणस्य सामर्थ्यमस्तीत्युक्तम्। शेषं **भाष्ये** ॥४५॥

अप्रतीघातात् सन्निकर्षोपपत्तिः ॥३।१।४६॥

न काचोऽभ्रपटलं वा रश्मिं[३] विष्टभ्नाति। सोऽप्रतिहन्यमानो व्यतिभिद्यार्थेन संबध्यते॥४६॥

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात् ॥३।१।४७॥

यच्च मन्येत न भौतिकस्यास्त्यप्रतीघात इति, सर्वं भौतिकं प्रतीघातधर्मकमिति तन्न,

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात्।

न, आदित्यरश्मेरविघातात् स्फटिकान्तरितेऽप्यविघातात् दाह्येऽप्यविघातात्। अविघातादिति च पदाभिसंबन्धभेदाद्[४] वाक्यभेदः। नैकं वाक्यमनेकार्थम्। प्रतिवाक्यं चार्थभेदः। शेषं **भाष्ये**।

---

१. अत एवाभौतिकं प्राप्यकारित्वं न भौतिकधर्म इति C २. सूत्रात् पूर्वं वार्त्तिके नकारोऽधिकः C ३. प्रतिबध्नाति C ४. °दिति पदाभिसंबन्धात् C

कोऽयमविघातः? अव्युह्यमानावयवद्रव्यानुप्रवेशः। यस्य द्रव्यस्यावयवा न व्युह्यन्ते, तस्यान्तरावयवैरव्युह्यमानस्य योऽभिसंबन्धः सोऽविघात इति। अन्तर्व्यवस्थितस्य वा द्रव्यस्याव्युह्यमानावयवस्य बहिरवस्थितद्रव्यप्राप्तिः। दृष्टं हि कलसे [१]निषिक्तानामपां बहिः शीतस्पर्शस्य ग्रहणम्। न च गुणस्यास्वतन्त्रस्य[२] गुणिनमन्तरेण बहिर्निर्गमनं युक्तमिति[३]। तत्र प्रस्पन्दः तिर्यग्गमनं परिस्रवः पात इति ॥४७॥

नेतरेतरधर्मप्रसङ्गात् ॥३।१।४८॥

इतरधर्म इतरत्र प्रसज्यत इति इतरधर्मश्चेतरत्र। यद्यविघातश्चक्षूरश्मेः, स्फटिकादिभिः [४]कटादिभिरपि प्राप्नोति। कुड्यादिभिर्वा प्रतीघात इति स्फटिकादिभिरपि प्राप्नोति ॥४८॥

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः ॥३।१।४९॥

नैष दोषः

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः।

आदर्शोदकयोः प्रसादो रूपविशेषः। स च स्वो भवति नियमात्। कः पुनरयं रूपविशेषः? द्रव्यान्तरासंपृक्तद्रव्यसमवायः। तस्य वा रूपोपलम्भनसामर्थ्यं स्वो धर्मः स च स्वभावः[५]। तस्य या विद्यमानतोदकादिषु तत् स्वाभाव्यम्। प्रसादस्वभावत्वाद् आदर्शोदकादिषु नयनरश्मिः प्रतिहन्यते। स च प्रतिहतः प्रतिनिवृत्य[६]

---

१. निषक्ताना॰ C २. गुणस्य द्रव्यतन्त्रस्य C var ३. द्रः वै. सू. (च) १.१.१५
४. कुड्यादिभि॰ C ५. स्वभावतः C ६. प्रतिनिवृत्तौ C

स्वमुखादिना संबध्यते। तस्य चाग्रसंबन्धाद् यदभिमुखमग्रं तदभिमुखं मुखादि पश्यतीति यथाग्रतो व्यवस्थितस्य पुरुषस्येति। आदर्शमुखग्रहणं तु क्रमेण भवदपि[१] आशुभावात् न विभाव्यत इति आदर्शरूपानुग्रहात् तदनुरञ्जितः प्रत्ययः। शेषं **भाष्ये** ॥४९॥

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः ॥३।१।५०॥

प्रमाणस्य तत्त्वविषयत्वात्। दृष्टानुमिताः खल्विमे द्रव्यधर्मा यथाभूता भवन्ति तथाभूता एव प्रमाणेन प्रतिपाद्यन्त इति। इमौ च भवता नियोगप्रतिषेधौ देशितौ क्व विषये स्याताम्? न चैतद् युक्तम्। न हि यथा धूमेनाग्निप्रतिपत्तिः, तथोदकप्रतिपत्तिरपि भवत्विति। न चोदकप्रतिपत्तिर्धूमेन न भवतीत्यग्निप्रतिपत्तिरपि न युक्ता। अर्थांश्च नियुञ्जानो भवानुपेक्षणीयः। प्रतिघाताप्रतिघातयोः खलूपलब्ध्यनुपलब्धी व्यवस्थापिके। व्यवहितोपलब्ध्यानुमीयते स्फटिकादिभिरप्रतिघातः, व्यवहितानुपलब्ध्या च कुड्यादिभिः प्रतिघात इति। यदि प्राप्यकारि चक्षुर्भवति, अथ कस्मादञ्जनशलाकादि नोपलभ्यत इति? न, इन्द्रियेणासंबन्धात्। इन्द्रियेण संबद्धा अर्था उपलभ्यन्ते, न चाञ्जनशलाकादि इन्द्रियेण संबद्धम्, अधिष्ठानस्यानिन्द्रियत्वात्। रश्मिरिन्द्रियं नाधिष्ठानम्, न च रश्मिरञ्जनशलाकादिसंबद्ध[२] इति। एवं तावद् भौतिकानि इन्द्रियाणीति व्यवस्थितम्[३] ॥५०॥

॥इति इन्द्रियभौतिकत्वप्रकरणम्॥

---

१. °ग्रहणमनुक्रमेण तदपि C २. न रश्मिना अञ्जनशलाका संबद्धा C ३. समर्थितम् for व्यवस्थितम् C; वाक्यमिदं परसूत्रवार्त्तिकपातनिकारूपेणोपात्तम् C

[इन्द्रियनानात्वप्रकरणम्]

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ॥३।१।५१॥

किं पुनरेकमिन्द्रियम्, आहो अनेकमिति? **एके** तु

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः।

[१]स्थानान्यत्वे नानात्वं दृष्टम्, यथा बहूनां घटादीनाम्। एकस्य च नानास्थानत्वम्, यथावयविन इति। अनुपपन्नरूपश्चायं संशयः। कथमिति। यदि तावदेवं क्रियते, स्थानान्यत्वे नानात्वैकत्वदर्शनादिति? तदैकत्वे स्थानान्यत्वस्यादर्शनात् न समानधर्मः। अथ नानास्थानत्वे सत्येकानेकत्वदर्शनात् संशय इति, तदा द्रव्यं नानास्थानमनेकं न किञ्चिद् दृष्टमिति न समानधर्मत्वम्। यत् तु घटाद्यनेकं न तत् नानास्थानम्, अपि तु स्थानान्यत्वं तस्य। सोऽयं संशय उभयथा अनुपपन्न इन्द्रियेषु। स्थानेषु तु युक्तः। किं नानास्थानानि, उत नानास्थानमिति? इन्द्रियेषु तु न स्थाननानात्वात् संभवति नापि नानास्थानत्वादिति।

शरीरव्यतिरेकात् सत्त्वाच्च संशयः। शरीरव्यतिरिक्तमुभयथा दृष्टमेकमनेकं च, यथाकाशं घटादि च। सच्चोभयथा दृष्टमेकमनेकं च। तदेवमुभयं चेन्द्रियेषु शरीरव्यतिरेकश्च सत्त्वं च। तेन संदिह्यत इति॥ ५१॥

त्वगव्यतिरेकात् ॥३।१।५२॥

एकमिन्द्रियम्। किं पुनस्तत्?

त्वगव्यतिरेकात्।

कः पुनरयमव्यतिरेकः? सर्वाधिष्ठानसंबन्धः। न हि किञ्चिदिन्द्रियाधिष्ठानं[२]

---

१. एके तु स्थाना° C २. इन्द्रियम् C

त्वचा न प्राप्तम्। सति भावो वा। न ह्यसत्यां त्वचि किञ्चिद् विषयग्रहणं भवति। तस्मात् त्वगेकमिन्द्रियम्।

नेन्द्रियान्तरार्थानुपलब्धेरिति लोकविरोधः। एकमिन्द्रियमिति ब्रुवाणो लोकं विरुणद्धि। विद्यमाने त्वगिन्द्रिये स्पर्शोपलब्धिलिङ्गे[१] इन्द्रियान्तरार्था रूपादयोऽन्धादिभिरप्युपलभ्येरन। न तूपलभ्यन्ते। तस्मात् नैकमिन्द्रियमिति। यदप्यव्यतिरेकादिति तदपि न, अनेकान्तात्। अनेकेन चानिन्द्रियेण सर्वाणीन्द्रियाधिष्ठानानि पृथिव्यादिना प्राप्तानीत्यनेकान्तः।

अवयवोपघातादिति चेत्? अथ भवेदेतत् त्वगवयवः कश्चिदुपहतो भवति, तदुपघातादन्धादिभिर्नोपलभ्यन्ते रूपादय इति? यथा त्वगवयवविशेषेण धूमोपलब्धिः, यश्चक्षुषि त्वगवयवविशेषस्तदुपघाताद् धूमस्पर्शानुपलब्धिरिति? न, व्याघातात्। त्वगवयवविशेषणधूमोपलब्धिवद् रूपाद्युपलब्धिं ब्रुवता यदुक्तमेकमिन्द्रियमिति तद् व्याहतं भवति। प्रागेकमिन्द्रियं त्वगित्यभ्युपगम्य इदानीं त्वगवयवविशेषा रूपादिग्राहका इति ब्रुवाणः प्रतिषेध्यमभ्यनुजानातीति। न ह्यवयव्यनतिरिक्ता अवयवा इति। यांश्चावयवान् रूपादिग्राहकान् त्वचो मन्यसे[२], ते किमिन्द्रियात्मका उत नेति? किं चातः? यदीन्द्रियात्मकाः, नैकमिन्द्रियम्। अथेन्द्रियात्मका न भवन्ति, न तर्हि इन्द्रियग्राह्या रूपादय इति॥ ५२॥

न युगपदर्थानुपलब्धेः ॥३।१।५३॥

सूत्रेण चाभिसंबन्धः

न युगपदर्थानुपलब्धेः।

यस्यैकमिन्द्रियं तस्य युगपदर्थानामुपलब्धिः प्रसज्यते। कथमिति? आत्मा मनसा संबध्यते, मन इन्द्रियेण, इन्द्रियं सर्वार्थैः सन्निहितैरिति आत्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो युगपद् [३]बुद्धयः प्रादुःष्युरिति[४]।

---

१. °ब्धिप्रसङ्गे C २. मन्यन्ते C ३. उपलब्धयः C ४. द्रःवै.सू.(च) ३.१.१३

नैकेन्द्रियग्राह्याणां युगपदुपलब्धिप्रसङ्गात्। यथैकेन्द्रियवादिनो युगपदनेकार्थसन्निकर्षे सति युगपदुपलब्धिर्दोषो भवतीति, तथानेकेन्द्रियवादिनोऽपि एकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्गः। य एवात्र परीहारः स ममापि भविष्यतीति। अथायमदुष्टः पक्षः? अचोद्यं तर्ह्येतद् युगपदुपलब्धिप्रसङ्ग इति।

अत्र **केचित्** परीहारं वर्णयन्ति। बुभुत्साभेदात् न युगपदुपलब्धिरिति। ममाप्येवम्। यदि बुभुत्साभेदात् न युगपदुपलब्धिर्लभ्यते, ममापि बुभुत्साभेदो न दण्डवारित इति। सत्यां च बुभुत्सायामयुगपदुपलब्धावन्यो न्यायोऽवधारणीयः।

करणत्वादित्**यन्ये**। अन्ये तु परीहारं ब्रुवते करणत्वादिति। करणस्य किलायं धर्मः, अधिष्ठितमप्यनेकां क्रियां न युगपत् शक्नोति कर्तुम्। अनधिष्ठितं च न प्रवर्तत इति। तुल्यम्, यस्याप्येकमिन्द्रियं तस्यापि करणत्वं न निवार्यत इति। तस्माद् युगपदर्थानुपलब्धिरित्यदोषोऽयमिति। एवं ब्रुवाण एकेन्द्रियवादी विकल्पतः पर्यनुयोज्यः। यत् तदेकमिन्द्रियं सर्वार्थमिति मन्यसे, तत किं प्राप्यकारि, आहो नेति? किं चातः? यदि प्राप्यकारि, किं तदिति वक्तव्यम्। यदि त्वक्, त्वचा अप्राप्तानां रूपाणामग्रहणप्रसङ्गः। अथाप्राप्तं रूपं गृह्णाति, स्पर्शादिष्वप्येवं प्रसङ्गः।

अथ सामिकारीन्द्रियम्, किञ्चित्प्राप्तं गृह्णाति किञ्चित् चाप्राप्तम्। एवं सति करणधर्मातिक्रमः। भवतु करणधर्मातिक्रमः, किं नो बाध्यत इति। एतस्मिन् पक्षे न युगपदुपलब्धिप्रसङ्गादिति सूत्रम्। [१]यश्चानेकेन्द्रियवादिन एकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्गे करणत्वादिति परीहारः सोऽस्या[२] न भवति। करणधर्मातिक्रमाभ्युपगमात्[३]। व्याहतं चैतत्, करणं प्राप्यकारि चाप्राप्यकारि चेति। असाहचर्याच्च न त्वक्। साहचर्यं नाम यस्यैकं विषयग्रहणं तस्य द्वितीयमपीत्यन्धबधिराद्यभाव – प्रसङ्गः॥ ५३॥

---

१. यथाने॰ C २. सोऽस्य C ३. अतिक्रमात्। C

विप्रतिषेधाच्च न त्वगेका[1] **॥३।१।५४॥**

शेषं **भाष्ये**। एकोपघाते तद्विनाशे वा सर्वानुपलब्धिप्रसङ्गः। अथैकमिन्द्रियं भवति, तदुपघाते तद्विनाशे वा सर्वानुपलब्धिप्रसङ्गः। आवरणानुपपत्तिश्च। यदि त्वगेकमिन्द्रियं भवति नावरणस्य सामर्थ्यमस्तीति[2] व्यवहितावस्थितरूपोपलब्धिप्रसङ्गः। दूरान्तिकानुविधानं चोपलब्ध्यनुपलब्ध्योर्न स्यात्। अप्राप्यकारित्वे त्वगिन्द्रियस्यान्तिके ग्रहणं दूरे चाग्रहणमित्येतत् न स्यात्॥ ५४॥

इन्द्रियार्थपञ्चत्वात् ॥३।१।५५॥

प्रतिषेधाच्च नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते प्रतिषेधात् नानात्वं सिध्यतीति न बुध्यामहे। प्रतिषेधादेकत्वसाधनं न स्यात्। नानात्वं तु कथं सिध्यतीति? नासाधना क्रियेति। एकत्वं च कथं प्रतिषेद्धुं शक्यते? प्रतिषेधादेकत्वसाधनमनुमानं निवर्तते, न पुनरेकत्वमनेकत्वं वा निवर्तत इति। कथं तर्हि अयं ग्रन्थो ग्राह्यः, प्रतिषेधात् चानन्तरं नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते, इन्द्रियार्थपञ्चत्वात्। अथ वा प्रतिषेधाच्च नानात्वसिद्धाविति प्रतिषेधहेतुना एकत्वप्रतिषेधे कृते अर्थान्नानात्वं सिध्यतीत्ययमर्थः। कतमः पुनरसौ प्रतिषेधहेतुः? युगपदर्थोपलब्धिप्रसङ्गादित्ययम्, अनेनैकत्वं प्रतिषिद्धम्।

तदेवमवीतसिद्धौ वीतदर्शनार्थमिदमुच्यते

इन्द्रियार्थपञ्चत्वात्॥

इति सूत्रम्। अर्थः प्रयोजनमित्येवमादि **भाष्ये**। इदं च सूत्रं न कथञ्चन न्यायेन संबध्यते। कथमिति? विधीयमानोऽर्थः साध्यः पञ्चेन्द्रियाणीति, इन्द्रियार्थपञ्चत्वादि-

---

१. एका om J २. विप्रकृष्टावस्थितोप° C

त्यसंबद्धम्। अथ प्रयोजनपञ्चत्वम्? तदप्येवमेव। अथ ग्रहणानि पक्षीक्रियन्ते, तत्राप्यैकान्तिको हेतुर्नास्तीति। एतेन विषया व्याख्याताः।

इदं तु सूत्रमेवं स्यात्। रूपरसगन्धस्पर्शशब्देषु नानासाधनक्रियः कर्ता एकविषयावसितौ विषयान्तरसिद्ध्यै[१] करणान्तरापेक्षित्वात्। यस्य कर्तुरनेको विषयः, तस्यान्यतमविषयावसाये विषयान्तरसिद्धौ [२]साधनान्तरापेक्षित्वं दृष्टम्। यथानेकशिल्पपर्यवदातस्य पुरुषस्य रथक्रियावसाये घटादिक्रियायां[३] करणान्तरापेक्षित्वम्, तथा च रूपाद्यन्यतमविषयावसाये विषयान्तरसिद्ध्यै[४] साधनान्तरापेक्षित्वमस्तीति। तस्माद् रूपरसगन्धस्पर्शशब्देषु नानासाधनक्रियः कर्तेति ॥ ५५॥

न, तदर्थबहुत्वात् ॥३।१।५६॥

अस्य यथाश्रुत्युत्थानम्। अस्य चार्थ इन्द्रियपञ्चत्वविरोधः। न, विरोधात्। अर्थबहुत्वादिन्द्रियबहुत्वं प्राप्नोतीति ब्रुवाणो यदभ्युपगतमेकमिन्द्रियमिति तद् बाधते। नासाधनात्। न मयार्थबहुत्वादिन्द्रियबहुत्वं साध्यते यतो मे विरोधः स्यात्, अपि तु भवता इन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति यत् साधनमुक्तम् तस्य मया विरोधो देश्यते। यदीन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणि भवन्ति, इन्द्रियार्थबहुत्वाद् बहूनीन्द्रियाणीति प्रसज्यत इति॥ ५६॥

गन्धत्वाद्व्यतिरेकादन्धादीनामप्रतिषेधः॥३।१।५७॥

अस्योत्तरद्वारकं सूत्रम्[५]

गन्धत्वाद्व्यतिरेकादन्धादीनामप्रतिषेधः।

---

१. °सिद्धौ C २. कारणान्तरा° C ३. क्रियावसायात् क्रियायां C ४. °सिद्धौ C ५. उद्धारकं C

इति। गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्था गन्धादयो न स्वकरणव्यतिरेकेण करणान्तराणि प्रयोजयन्ति। यावत्सु गन्धत्वं वर्तते, तावतामेकसाधनसाध्यत्वात्। यः पुनरपरजातिभेद इष्टानिष्टोपेक्षणीयत्वादिः, नासौ करणान्तरं प्रयोजयति। एवं सर्वत्र। शेषं **भाष्ये** ॥५७॥

विषयत्वाव्यतिरेकादेकत्वम् ॥३।१।५८॥

यदि सामान्यं संग्राहकं प्राप्तमिन्द्रियाणां

विषयत्वाव्यतिरेकादेकत्वम्।

अस्याप्यर्थोऽविरोध एव। नोक्तोत्तरत्वात्। इन्द्रियार्थपञ्चत्वादित्यस्यार्थेनोक्तोत्तरमेतत् ॥५८॥

न, बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥३।१।५९॥

अस्य चार्थस्य ज्ञापनार्थं

न, बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः।

इति सूत्रम्। तत्र बुद्धय एव लक्षणानीत्यस्यार्थो वर्णित इन्द्रियार्थपञ्चत्वादिति। नानेन्द्रियं भिन्नाधिष्ठानत्वात्। यस्याधिष्ठानं भिन्नं तदनेकं दृष्टं यथा घटादि। अधिष्ठानभेदश्चेन्द्रियाणामस्ति। तस्मात् नानेति। अधिष्ठानभेदोऽसिद्ध इति चेत्? नासिद्धोऽन्धबधिराद्यभावप्रसङ्गादिति। यस्य पुनरधिष्ठानभेदः, तस्यैकाधिष्ठानविनाशे अधिष्ठानान्तराश्रयस्येन्द्रियस्यावस्थानमिति न दोषः। गतिभेदादपीन्द्रियभेदो भिन्नगतित्वादिति प्रयोगः पूर्ववत्[१]।

---

१. गतिभेदादित्यस्य भिन्न...प्रयोगः प्रसङ्गः पूर्व॰ C

आकृतिः परिमाणमियत्ता। स्वस्थानप्रमाणानि घ्राणरसनस्पर्शनानि। चक्षुर्बहिर्विनिःसृतं विषयव्यापि तन्महत्। श्रोत्रं त्वाकाशम् तदधिष्ठाननियमेन प्रवर्तते। धर्माधर्मसंस्कृतया[१] इष्टानिष्टोपेक्षणीयशब्दसाधनभूतया कर्णशष्कुल्या य आकाशस्य संबन्धः, तत्संबन्धानुविधाय्याकाशम्, न विवरान्तरेणास्यादिना शब्दमुपलम्भयति[२]। नान्यत्रेति तदुपकारप्रतीकारभेदाद्वोपक्रियते प्रतिक्रियते चेति। न पुनराकाशं नित्यत्वादुपक्रियते न प्रतिक्रियत इति। प्रकृष्टाप्रकृष्टश्रोत्रभेदोऽप्यत एव।

जातिरिति योनिं प्रचक्ष्महे[३]। पञ्च खल्विमा इन्द्रिययोनयः पृथिव्यादीनि भूतानि इन्द्रियाणां योनय इति। योनिस्तादात्म्यं न पुनस्तत्कार्यत्वमाकाशेऽसंभवादिति तन्नित्यत्वात्[४] ॥५९॥

भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥३।१।६०॥

कथं पुनर्ज्ञायते भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति? न, उक्तोत्तरत्वात्। नाव्यक्तप्रकृतीनीन्द्रियाणीत्युक्तोत्तरमेतत्।

भूतगुणविशेषोपलब्धेस्तादात्म्यम्।

भूतगुणविशेषा गन्धरसरूपस्पर्शशब्दा विशेषकत्वाद् विशेषा इत्युच्यन्ते। यस्माद् गन्धेन[५] पृथिव्यबादिभ्यो विशिष्यते[६], रसादिभिरबादय इति। दृष्टो हि बाह्यानामुभयपक्षसंप्रतिपन्नानां पृथिव्यादिभूतानां स्वगुणाभिव्यक्तिनियमः। अस्ति च घ्राणादिभिरपि गन्धादिव्यक्तिनियमः। तेन भूतगुणविशेषोपलब्धेर्भूतप्रकृतीनीन्द्रियाणीति। किं किमात्मकमिति? येन यद्गुणाभिव्यक्तिः। तत्र पार्थिवं घ्राणं गन्धाभिव्यक्तिहेतुत्वात्, बाह्यपार्थिववदिति। एवं शेषेषु॥ ६०॥

॥इन्द्रियनानात्वप्रकरणम्॥

---

१. संहितया C २. °लक्षयति C ३. प्रचक्षते C ४. आकाशे संभवति नित्य° C
५. यथा गन्धवत्त्वादिना C ६. भिद्यते C

[अर्थपरीक्षाप्रकरणम्]

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥३।१।६१॥

अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥३।१।६२॥

गन्धादयः पृथिव्यादिगुणा इत्युद्दिष्टम्। उद्देशश्च नियोगविकल्पसमुच्चयैः समानः। तत्र नियोगः एकैकगुणत्वम्। विकल्पः कस्यचिदेकः कस्यचिद् द्वावित्येवमादिः। समुच्चयः सर्वे सर्वत्र। अतो विशेषणार्थम्

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः।
अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः।

नियमार्थे सूत्रे। चत्वारः पृथिव्याः। एकैकशोऽपकर्ष उत्तरेषु स्पर्शपर्यन्तानामिति विभक्तिविपरिणामः। तेन किं कृतं भवति? स्पर्शपर्यन्तानां गुणानां विनियुक्तानां य उत्तरः स आकाशस्येति। आकाशस्योत्तरः शब्दः। उत्तर इत्ययं तरब्निर्देशो न युक्तः, द्वयोर्दृष्टत्वात्। इह पुनः प्रकर्षवाचित्वे सत्युत्तम इति स्यात्। नायं भोस्तरब्निर्देशः, अपि तु पराभिधानमेतत्। यदुक्तं भवति पर इति, तदुक्तं भवत्युत्तर इति। [१]तरब् वा स्पर्शस्य विवक्षितत्वात्। भवतु वा तरब्निर्देशः। ननूक्तमुत्तम इति प्राप्नोति। न, स्पर्शस्य विवक्षितत्वात्। गन्धादिभ्यः परः स्पर्शः। परादयं पर इति यावदुक्तं भवति, तावदिदमुक्तं भवति उत्तर इति ॥ ६१-६२॥

न सर्वगुणानुपलब्धेः ॥३।१।६३॥

नायं गुणविनियोगः साधुः। कस्मात्? पार्थिवेन घ्राणेन पार्थिवानां गन्धादी-

---

१. तन्त्रं वेति सार्वत्रिकः पाठोऽसंलग्नत्वात् परित्यक्तः।

नामुपलब्धिप्रसङ्गात्। एवमाप्येन रसनेन त्रयाणाम्। तैजसेन चक्षुषा द्वयोरिति॥ ६३॥

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ॥३।१।६४॥

कथं तर्हीमे गुणा विनियोक्तव्याः?

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः।

यस्मादेकैकगुणानि भूतानि, तस्मादेकैकगुणग्रहणमिति एकैकश्येनेति सौत्रो निर्देशः। कथं तर्ह्यनेकगुणानि भूतानि गृह्यन्त इति? संसर्गात् त्वनेकगुणग्रहणम्। संसृष्टाबादिभिः पृथिवी। तस्मादनेकगुणा गृह्यत इति। एवं शेषेषु ॥ ६४॥

विष्टं ह्यपरं परेण ॥३।१।६५॥

[१]संयोगस्त्वप्रतिषिद्धो मिथः पञ्चानां चेति। नियमस्तर्हि न प्राप्नोति पृथिव्यां चत्वारो नेतरेषु संसर्गस्यानियमादिति? न न प्राप्नोति। [२]कस्मात् ?

विष्टं ह्यपरं परेण।

अपरं परेण विष्टमबादिना, नापरेण पृथिव्यादिना परमबादिविष्टम्। विष्टत्वं [३]संयोगविशेष॥६५॥

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥३।१।६६॥

न...त्वात् इति। नेति त्रिसूत्रीमनन्तरोक्तामनेन सूत्रेण प्रत्याचष्टे। यस्यैकैकगुणानि भूतानि, तस्य तैजसमेव द्रव्यं रूपवत्त्वात् प्रत्यक्षं प्राप्नोति। न पार्थिवमाप्यं वा अरूप-

---

१. संसर्गस्त्व° C २. यस्मात् J ३. संयोगः J

त्वात्। अस्य सूत्रस्य विकल्पतोऽनेकः सूत्रार्थः [१]प्रकल्पत इति **भाष्ये** वर्णितम्॥ ६६॥

पूर्वं पूर्वं गुणोत्कर्षात्तत्तत् प्रधानम्॥३।१।६७॥

तदेवं न्यायविरुद्धं प्रवादं प्रतिषिध्य

न सर्वगुणानुपलब्धेः

इति यद् देशितं तत् समाधीयते।

पूर्वं पूर्वं गुणोत्कर्षात्तत्तत् प्रधानम्।

तस्मात् न सर्वगुणोपलब्धिः। घ्राणादीनामिन्द्रियाणां पूर्वं पूर्वमिन्द्रियं यस्मात् परस्मात् परस्मात् प्रधानम्। का प्रधानता? चतुर्गुणत्वादिका। को गुणोत्कर्षः? स्वगुणाभिव्यक्तिसामर्थ्यम्। येन गुणेन यद् द्रव्यमुत्कृष्यते स तज्जातीयाभिव्यञ्जकत्वादुत्कृष्टो भवति, यथा बाह्यानां द्रव्याणामिति। अस्ति चेन्द्रियाणामपि स्वगुणाभिव्यक्तिनियमः। तस्मात् न सर्वगुणोपलब्धिः। यः पुनर्गन्धगुणत्वाद् घ्राणं गन्धग्राहकमिति प्रतिजानीते, तस्य सर्वगुणोपलब्धिप्रसङ्गः॥ ६७॥

तद्व्यवस्थानं तु भूयस्त्वात् ॥३।१।६८॥

कस्मात् पुनर्न सर्वं पार्थिवं घ्राणमिति? व्यवस्थानियमज्ञापनार्थम्।

तद्व्य.....त्वात्। इति सूत्रम्। किं पुनरिदं भूयस्त्वम्? अर्थनिर्वृत्तिसमर्थस्य प्रविभक्तस्य द्रव्यस्य संसर्गः पुरुषसंस्कारकारितो भूयस्त्वम्। दृष्टो हि प्रकर्षे भूयस्त्वशब्दः। यथा लोके प्रकृष्टो विषयो भूयानित्युच्यते। तथा च पृथगर्थक्रियासमर्थानि पुरुषसंस्कारोपग्रहाद् विषौषधिमणिप्रभृतीनि द्रव्याणि निर्वर्त्यन्त इति॥ ६८॥

---

१. कल्प्यते C

सगुणानामिन्द्रियभावात् ॥३।१।६९॥

स्वगुणान्नोपलभन्त इन्द्रियाणि। कस्मादिति चेत्? केन कारणेन स्वान् गन्धादीन्[१], इन्द्रियाणि नोपलभन्त इति?

सगुणानामिन्द्रियभावात्।

सह गुणेन [२]इन्द्रियमिन्द्रियं भवति। निर्गुणं तु नेन्द्रियम्। अतो न गृह्णाति॥ ६९॥

तेनैव तस्याग्रहणाच्च ॥३।१।७०॥

यदि पुनरिन्द्रियस्य सहकारी च गन्धः स्याद् ग्राह्यश्चेति?

तेनैव तस्याग्रहणाच्च।

यदीन्द्रियं स्वगन्धं गृह्णीयात् ते, नासाविन्द्रियगन्धः। अथेन्द्रियगन्धः? नेन्द्रियग्राह्यः स्यात्। गन्धं च गृह्णदिन्द्रियमात्मानं गृह्णीयात् आत्मा ह्यस्य गन्ध इति। न चात्मसाधनं करणमस्तीति दृष्टविरोधः। न चैतत् प्रत्यक्षं यदुत घ्राणगन्धो घ्राणग्राह्य इति। कस्मात् पुनरिदं न देश्यते घ्राणेन घ्राणं कस्मात् न गृह्यत इति? न देश्यते, अदृष्टत्वात्। न दृष्टं घ्राणेन घ्राणस्य ग्रहणमित्यतो न देश्यत इति। तुल्यं घ्राणेन स्वस्य गन्धस्याग्रहणमिति, एतदप्यदेशनीयम्। स्वगुणान् नोपलभन्त इन्द्रियाणि, कस्मादिति? तुल्यो ह्युभयत्र[३] प्रतिपत्तिहेत्वभावः ॥७०॥

न शब्दगुणोपलब्धेः ॥३।१।७१॥

स्वगुणान् नोपलभन्त इन्द्रियाणीत्येतदयुक्तम्। स्वगुण उपलभ्यते श्रोत्रेण[४] शब्द इति ॥ ७१॥

---

१. स्वानि गन्धादीनि C २. गुणेन इन्द्रियं भवति C ३. प्रतिपत्ति॰ om C ४. आकाशेन for श्रोत्रेण C

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥३।१।७२॥

सत्यमुपलभ्यते। न पुनः श्रोत्रं सशब्दमिन्द्रियमिति। यथेतराणि सगुणानीन्द्रियाणि नैवमाकाशमिति। कस्मात्? शब्दस्येतरगुणवैधर्म्यात् आकाशस्य [१]चेतरद्रव्यवैधर्म्यात्। अस्यार्थस्य ज्ञापनार्थम्

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात्।

इति सूत्रम्। न शब्दः शब्दस्य व्यञ्जकः। नाकाशं सगुणमिन्द्रियमिति। किं पुनरिदं श्रोत्रम्? आकाशं परिशेषात्। तत्रात्मा तावत् न श्रोत्रम्, कर्तृत्वात्। श्रोता चात्मा न श्रोत्रम्[२]। मनः श्रोत्रं[३] भविष्यतीत्यपि न, मनसः श्रोत्रत्वे बाधिर्याभावः। सर्वविषयत्वाच्च मनसः, सर्वविषयं श्रोत्रं प्राप्नोति। पृथिव्याद्यपि न श्रोत्रम्, घ्राणादिषु[४] विनियोगात्। घ्राणादिषु विनियुक्ताः पृथिव्यादयः। श्रोत्रभावे च घ्राणादीनां तद्वैकल्ये शब्दानुपलब्धिप्रसङ्गः। त्वचः श्रोत्रभावे बधिराभावः सर्वोपघाते च प्रायणम्। दिक्कालयोः श्रोत्रभावे च शब्दस्यान्यगुणत्वादग्रहणप्रसङ्गः। तद्गुणत्वमेवेति चेत्? नाम्नि विवादः। यस्य शब्दो गुणस्तदाकाशम्। [५]भवतां तु संज्ञामात्रं भिद्यते तौ दिक्कालाविति। आकाशप्रत्याख्यानं चान्यगुणत्वात् शब्दस्य। यदि तु शब्दो दिक्कालगुणो भवति आकाशं तर्हि प्रत्याख्यातम्। न हि शब्दमन्तरेण आकाशास्तित्वे लिङ्गमस्ति। यथा दिक्कालयोः परापरादिलिङ्गमिति। न च द्रव्यान्तरं शिष्यते। न च गुणानां श्रोत्रभावो युक्तः, न च कर्मणाम्, न च सामान्यविशेषसमवायानां सामर्थ्यानुपलब्धेः। न चेदं श्रोत्रं नास्ति शब्दोपलब्धिलिङ्गम्। शिष्यते चाकाशम्। तस्मादाकाशं श्रोत्रमिति॥ ७२॥

॥अर्थपरीक्षाप्रकरणम्॥

॥इति औद्द्योतकरे न्यायवार्त्तिके तृतीयाध्यायस्य [६]प्रथमाह्निकम्॥

---

१. च om C २, ३. श्रवणम् J ४. घ्राणादिभावेन C ५. भवता सं॰ C ६. आद्यम् C

तृतीयाध्याये द्वितीयाह्निकम्

[बुद्ध्यनित्यताप्रकरणम्]

कर्माकाशसाधर्म्यात् संशयः ॥३।२।१॥

परीक्षितानीन्द्रियाण्यर्थाश्च। बुद्धेरिदानीं परीक्षाक्रमः। सा किमनित्या नित्या वेति धर्मविचारः, सत्त्वस्याधिगतत्वात्। तस्यां च संशयमुपपादयति।

कर्माकाशसाधर्म्यात् संशयः।

उभाभ्यां साधर्म्यमस्पर्शवत्त्वम्। विशेष [१]उपजनापायधर्मकत्वं विपर्ययश्च बुद्धौ नोपलभ्यते। ततः संशयः ॥१॥

विषयप्रत्यभिज्ञानात् ॥३।२।२॥

अनुपपन्नरूपः खल्वयं संशयः, सर्वशरीरिणां प्रत्यात्मवेदनीयत्वात्। सर्वशरीरिणां [२]प्रत्यक्षमेतत् यदुतानित्या बुद्धिरिति। त्रैकाल्यव्यक्तेश्च। बुद्धौ त्रैकाल्यं व्यज्यमानं दृष्टम्, जानामि ज्ञास्याम्यज्ञासिषमिति, न चोपजनापायावन्तरेण त्रैकाल्यव्यक्तिः। न ह्यनुपजनापायधर्मकेषु आकाशादिषु त्रैकाल्यं व्यज्यते। न च विशेषदर्शने सति युक्तः संशयः। तस्मात् संशयप्रक्रियानुपपत्तिरिति। शेषं **भाष्ये**।

दृष्टिप्रवादोपलम्भार्थं तु प्रकरणम्। न बुद्धेरनित्यत्वं प्रतिपाद्यम्, अपि तु परस्य दर्शनं निवर्तनीयमिति। एवं हि पश्यन्तः प्रवदन्ति **साङ्ख्याः** नित्या बुद्धिरिति। साधनं च प्रचक्षते

विषयप्रत्यभिज्ञानात्।

---

१. उपजननापाय° C　　२. प्रत्यात्मवेदनीयमे° C

इति। यं पूर्वमज्ञासिषं तमिमं जानामीति ज्ञानयोः समानेऽर्थे प्रतिसन्धानमवस्थिताया बुद्धेरुपपन्नम्। बुद्धिनानात्वे तु प्रत्यभिज्ञानानुपपत्तिः, यथा पुरुषान्तरबुद्धिषु ॥२॥

साध्यसमत्वादहेतुः ॥३।२।३॥

यथैव बुद्धेर्नित्यत्वं साध्यं तथा बुद्धेः प्रत्यभिज्ञानमपि साध्यम्। कस्मात्? चेतनधर्मस्य करणेऽनुपपत्तेः। पुरुषधर्मः खल्वयं ज्ञानं दर्शनमुपलब्धिर्बोध इति। चेतनो हि पूर्वज्ञातमर्थं प्रत्यभिजानाति। तस्यैतस्माद्धेतोर्नित्यत्वं युक्तम्।

क्रियानाधारत्वाच्च करणस्य। न हि करणं क्रियाया आधारो भवति, उपलब्धिश्च क्रिया। सा च न करणे [१]भवितुमर्हतीति। स्वक्रियाधारत्वादयुक्तमिति चेत्? अथ मन्यसे सर्वं कारकं स्वक्रियाया आधारो भवतीत्यतोऽयुक्तं करणं क्रियाया नाधार इति। सत्यम्, भवति स्वक्रियाधारो न पुनः स्वक्रियातः करणव्यपदेशः। स्वक्रियासु सर्वं कारकं कर्तृ भवति, करणभावं चाश्रित्य बुद्धौ विचारः। तस्मादयुक्तमेतत्।

सर्वकर्तृत्वप्रसङ्ग इति चेत्? यदि पुनः स्वक्रियानिमित्तकः कर्तृव्यपदेशः, सर्वं कारकं कर्तृ प्राप्तम्। सत्यमेवमेतत्। नाभ्युपगमा एव दोषत्वेन देश्यन्त इति। कर्तृकरणादिव्यपदेशश्च कथम्? प्रधानक्रियापेक्षः कर्तृकरणादिव्यपदेशः, यदर्थं [२]कारकमुपादीयते सा प्रधानक्रिया। [३]तस्याः साधनभावे सामान्येन विवक्षिते, भेदे चाविवक्षिते कारकमित्यनेन शब्देनाभिलप्यन्ते कर्त्रादयः। यदा तु भेदो विवक्षितः, तदा कर्तृकर्मकरणशब्दवाच्यानीति। कारकशब्देनापि सामान्येनाभिधीयमानेषु कारकेषु यः स्वगतो विशेष इतरेतरव्यावृत्तः, सोऽभिधीयते, अन्यस्यासंभवात्।

प्रधानक्रियाव्यपेक्षं तु कारकाणां कर्त्राद्यभिधानमिति। तत्र यदपराप्रयोज्यमितरकारकप्रयोक्तृ च तत् कर्तृकारकम्। एवं शेषेषु कारकशब्दाः पूर्ववद्[४] वक्त-

---

१. वर्तितुम° C २. करणमु° C ३. तस्यां च C ४. २.१.१६ भा. वा. टी.

व्याः। यद्यन्यकारकप्रयोज्यत्वं कर्तृत्वम्, नन्वयमपि कारकोपादानेन प्रयुज्यते? न प्रयुज्यते फलस्य प्रयोजकत्वात्। फलं कर्तारं प्रयोजयति, न कारकं करणादि। न च फलं कारकमिति तेषां तन्नान्तरीकमुपादानम्। न हि करणादिकारकोपादानमन्तरेण क्रिया संभवतीति तन्नान्तरीयकत्वात् करणादीण्युपादीयन्त इति। तस्मात् चेतनधर्मः करणे न संभवतीति।

उपेत्य प्रत्यभिज्ञानमन्तःकरणे तस्यैकानेकव्यावृत्तेरसाधारणता। न हि प्रत्यभिज्ञानमेकत्वे दृष्टम्, न नानात्व इति प्रत्यभिज्ञानस्वरूपावधारणे च सति विरुद्धः। यदा चेदं प्रत्यभिज्ञानं निरूप्यते तदा बुद्धिभेदं प्रतिपादयति। कथमिति? प्रत्यभिज्ञानं हि नामाद्यप्रत्यक्षनिरोधे द्वितीयदर्शने प्रागाहितसंस्काराभिव्यक्तौ स्मृतिपूर्वकं तृतीयं दर्शनम्। न च बुद्ध्यभेदवादिनो द्वितीयमपि तावद् दर्शनं संभवति कुतस्तृतीयमिति?

प्रत्ययभेद इति चेत्? अथ मन्यसे, अवस्थिताया बुद्धेः प्रत्ययास्तिरोभवन्ति व्यज्यन्ते च। तत्राद्यदर्शनतिरोभावे प्रत्ययान्ताराविर्भावे च प्रत्यभिज्ञानमिति। तन्न युक्तम्, तद्व्यतिरेकेण बुद्धिस्वभावानवधारणात्, यां तां प्रत्ययव्यतिरिक्तां बुद्धिं भवन्तः कल्पयन्ति, तस्याः कः स्वभाव इति वक्तव्यम्। अस्माकं तु प्रत्ययमात्रं बुद्धिः। अर्थग्रहणं हि बुद्धिरिति। दर्शनदृष्टस्य स्पर्शनेन प्रत्यभिज्ञानात् नानात्वे प्रत्यभिज्ञानमिति विरुद्धः प्रदीपान्तरदृष्टस्य च[१] प्रदीपान्तरेणेति।

यदि बुद्धिरध्यवस्यति, अथ बुद्धौ वर्तमानेन ज्ञानेन चेतनः किं करोति? चेतयत इति चेत्? कश्चेतयते? यदि यस्याध्यवसायः स चेतयते, विरुद्धमेतत्। अथात्मा चेतयते? कथं बुद्धौ वर्तमानेन प्रत्ययेनात्मा चेतयते? न ह्यन्यत्र वर्तमानया क्रियया अन्यस्य तद्वत्ता भवति।

अथ पुरुषश्चेतयते, बुद्धिर्जानीत इति? नेदं ज्ञानादर्थान्तरमुच्यते। यावदुक्तं भवति चेतयते, तावदुक्तं भवति जानीत इति। बुद्धिर्ज्ञापयतीति चेत्? अथ मन्यसे

---

१. च om C

बुद्धिर्ज्ञापयत्यात्मा जानीत इति। अद्धा, जानीते पुरुषो बुद्धिर्ज्ञापयतीति। अध्यवसायचेतनयोश्च स्वभावभेदो वक्तव्यः। भवताप्येकत्वं वक्तव्यम्। देशकाल-स्वभावाभेदात्। यस्मादविदेशमविकालं च बुद्ध्याध्यवसितम् आत्माध्यवस्यतीति। स्वभावाभेदोऽसिद्ध इति चेत्? अथ मन्यसे सत्यम्, अभिन्नकालमभिन्नदेशं च बुद्ध्याध्यवसितमात्माप्यध्यवस्यतीति, न [1]पुनः यैव चेतना स एवाध्यवसाय इति। न, प्रतिशरीरमनेकपुरुषप्रसङ्गात्। यद्यन्यश्चेतयिता अन्यश्चाध्यवसाता भवति, अन्यः प्रतिजानीते, अन्यः पश्यति, अन्यः शृणोति मन्तेत्येवमादिषु[2] पुरुषान्तराणि खल्विमानि द्रष्टा श्रोता मन्तेति, नैकस्यैते धर्मा इति। तत्र भवतां किं वक्तव्यम्? अभिन्नार्था एते शब्दा इत्येतद् वक्तव्यम्। अभिन्नार्थाश्चेत्[3] शब्दा भवन्ति, नन्वत्राप्यर्थो न भिद्यते चेतनोऽध्यवसाता मन्ता बोद्धेति। तस्मादयुक्तमेतत् बुद्धिरध्यवस्यत्यात्मा चेतयत इति।

यदि पुनरिदं प्रत्यभिज्ञानं मनसोऽनित्यत्वसाधनं स्यात्? न युक्तमेवं भवितुम्, मनसो नित्यत्वस्याभ्युपगमात्। अभ्युपगम्यते मनसो नित्यत्वमिति तत्र साधन-मनर्थकम्। अनेकान्ताच्च, न च प्रत्यभिज्ञानात् करणैकत्वं सिध्यति, दृष्टं करणभेदेऽपि प्रत्यभिज्ञानं ज्ञातुरेकत्वात्। दर्शनदृष्टस्य स्पर्शनेन प्रत्यभिज्ञानात्, प्रदीपदृष्टस्य च प्रदीपान्तरेणेति ॥३॥

न, युगपदग्रहणात् ॥३।२।४॥

यच्चेदं मन्यते बुद्धेरवस्थिताया यथाविषयं वृत्तयः प्रादुर्भवन्ति। वृत्तिश्च वृत्तिमतो नान्येति। एतच्च

न, युगपदग्रहणात्।

वृत्तिमतोऽवस्थानाद् वृत्तेरवस्थानमिति सूत्रार्थः॥४॥

---

१. पुनरचेतनात्मैवाध्य° C २. शृणोतीत्येवमा° J ३. °र्थास्तदेते C

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥३।२।५॥

वृत्तीनामपगमे वृत्तिमतोऽप्यपगम इति सूत्रार्थः ॥५॥

क्रमवृत्तित्वादयुगपद्ग्रहणम् ॥३।२।६॥

अविभु चैकं मनः पर्यायेणेन्द्रियैः संबध्यत इति

क्रमवृत्तित्वादयुगपद्ग्रहणम्।

वृत्तिवृत्तिमतोर्नानात्वादिति सूत्रार्थः। वृत्तिवृत्तिमतोरेकत्वे प्रादुर्भावतिरोभावयोरभाव इति ॥६॥

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात् ॥३।२।७॥

अ .... त् इति वृत्तिवृत्तिमतोर्भेदे सति उपपद्यत इति, एकत्वे त्वनर्थको व्यासङ्ग इति ॥७॥

न, गत्यभावात् ॥३।२।८॥

[1]विभुत्वे चान्तःकरणस्य पर्यायेणेन्द्रियैः संयोगः

न, गत्यभावात्।

व्याप्तान्यन्तःकरणेनेन्द्रियाणीति सूत्रार्थः। व्यापित्वे युगपदनेकेन्द्रियसंबन्धाद् युगपद्ग्रहणप्रसङ्गो दोषः।

अणावपि मनस्येकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्ग इति चेत्? करणत्वात् न युगपद्ग्रहणम्। ममाप्येवं कस्मात् न परिहारः? न [2]करणभेदे दृष्टत्वात्। यानि

१. परपक्षे दोषमाह J margin २. कारण° C

खलु भिन्नानि [१]करणानि तान्येकेनैवाधिष्ठायकेनाधिष्ठितानि युगपत्प्रवर्तमानानि दृष्टानि। यथोभयहस्ताधिष्ठिते वास्यौ प्रवर्तेते, तथा चेन्द्रियाणि व्यापकेनान्तःकरणेनाधिष्ठीयन्त इति युगपत् प्रवृतिः प्रसक्ता। तत्प्रसक्तौ च युगपद्ग्रहणप्रसङ्ग इति।

गत्यभावाच्च विभुनोऽन्तःकरणस्य प्राप्त्यर्थस्य गमनस्याभावात्। [२]नायुगपत्प्रययोत्पत्तौ प्रमाणमस्ति येन प्रमाणेन प्रतिषिद्धमपि [३]प्रत्ययायौगपद्यं प्रतिपद्येत। [४]यथा किञ्चित् प्रतिषिद्धमपि प्रतिपद्यते। यथा चक्षुषो गतिः प्रतिषिद्धा केनचित् सन्निकर्षविप्रकर्षयोस्तुल्यकालग्रहणात्। यस्मात् सन्निकृष्टं पाणिं विप्रकृष्टं च चन्द्रमसमेकस्मिन् काले चक्षुषा प्रतिपद्यते तस्मान्न गतिमच्चक्षुरिति। प्रतिषिद्धापि सती गतिर्व्यवधानप्रतिघातेनानुमीयत इति। न च युगपत् प्रत्ययोत्पत्तौ प्रमाणमस्ति।

सोऽयं नान्तःकरणे विवादो न तस्य नित्यत्वे। क्व तर्हि विवादः? तस्य विभुत्वे। तच्च प्रमाणतोऽनुपलब्धेर्नास्ति। न ह्यन्तःकरणस्य विभुत्वप्रतिपादकं प्रमाणमस्ति, एकमन्तःकरणं नाना चेमाश्चक्षुर्विज्ञानाद्यात्मिका वृत्तय इति एतच्च वृत्तिवृत्तिमतोरेकत्वे अनुपपन्नम्। यस्य पुनर्वृत्तिवृत्तिमतोर्नानात्वं तस्यान्तःकरणसाधनश्चक्षुरादिसाधनश्चात्मा अर्थानुपलभत इति युक्तम्। एतेन विषयान्तरव्यासङ्गः प्रत्युक्तः पुरुषो जानीते नान्तःकरणमिति। कः पुनरयं व्यासङ्गः? अभीष्टविषयोऽनेकविज्ञानोत्पादः स च पुरुषस्य नान्तःकरणस्य। यः पुनरयं सन्निधानासन्निधानलक्षणोऽन्तःकरणस्य व्यासङ्गः सोऽनुज्ञात इति ॥८॥

स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमानः ॥३।२।९॥

एकमन्तःकरणं नाना वृत्तय इति नैतत् न्यायवित्संचक्षाणकः प्रतिपत्तुमर्हति। यथैवान्तःकरणमेकं तथैवैका वृत्तिरिति। दृष्टविरोध इति चेत्? अथ मन्यसे यदि

---

१. कारण॰ C २. न वा युग॰ C ३. प्रत्ययायौग॰ C ४. यथाकथञ्चित् C var

चान्तःकरणात् न वृत्तिर्भिद्यते न तु दृष्टं विरुध्यते रूपं रसो गन्धः स्पर्श इति दृष्टः प्रत्ययभेदो न स्यात्? न न स्यात्, विषयभेदानुविधानात्। वृत्तिरभिन्नापि विषयभेदमनुविधीयमाना भिन्नेव ख्याति। यथोपधानभेदमनुविधीयमानं स्फटिकादिद्रव्यं भिन्नमिव प्रकाशते। अस्य चार्थस्य ज्ञापनार्थम्

स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमानः।

इति सूत्रम्। न, अनेकान्तात्। उभयथा खल्वयं नानात्वाभिमानो दृष्टः, नानाभूतेषु च गन्धादिषु, अभिन्ने च स्फटिक इति।

यथाश्रुति सूत्रे हेत्वभावो दृष्टान्तमात्रत्वात्। दृष्टान्तमात्रमेतत्, नात्र हेतुरस्ति इति विकल्पानुपपत्तेश्च। यश्चायं दृष्टान्तः स्फटिकवदिति, विकल्पोऽत्र किमयं स्फटिक उपधानभेदेन भिद्यते उत नेति? किं चातः? यदि भिद्यते न दृष्टान्तः। अथ न भिद्यते, नानात्वाभिमानः कथम्? यद्युपधानभेदात्, भिन्नमुपधानमिति कथं प्रतिपद्यते? यदि प्रत्ययभेदात् व्याघातः। अभिन्ना वृत्तिः, प्रत्ययश्च भिन्न इति व्याहतं प्रत्ययपर्यायत्वाद् वृत्तेः।

अथ भवतां वृत्तीनां भेदे किं प्रमाणम्? ज्ञानानां क्रमेणोपजनापायदर्शनम्। क्रमेण ज्ञानान्युपजायन्त अपयन्ति चेति दृश्यते। एकानेकविषयत्वाच्च प्रत्ययनानात्वाभिमानस्य एकानेकविषयाधिगतिः कथम्? एकस्मिंश्च विषये नानात्वाभिमानः स्फटिके दृष्टः। नानाभूतेषु च गन्धादिषु नानात्वाभिमानो दृष्टः। तेन नानात्वाभिमानस्योभयथा दृष्टत्वादिदमेकमिदमनेकमिति न युक्तः प्रत्यय इति। यश्चायमभिन्ने स्फटिके भेदप्रत्ययः, सोऽपि प्रत्ययभेदमन्तरेण न युक्तः। न हि प्रत्ययाभेदवादिनः स्फटिके नीलादिप्रत्ययभेदो युक्त इति। स्फटिके नीलादिप्रत्ययोऽसंबन्धात् न युक्तः। न हि नीलं द्रव्यं चक्षुःसन्निकृष्टमिति। अथ सन्निकृष्टम्, तदेव नीलं न स्फटिक इति स्फटिकसमानाधिकरणः स्फटिके नीलप्रत्ययो न युक्तः। न, नैरन्तर्यदर्शनात्। नैरन्तर्येणावस्थिते स्फटिकनीलद्रव्ये

चक्षुषा सन्निकृष्येते। ततः सन्निकर्षात् नीलगुणाध्यारोपेण स्फटिके मिथ्याप्रत्ययो नील इति यथा सान्तरेष्वन्तरालादर्शनात् संयुक्तप्रत्यय इति।

यस्य च प्रत्ययो न भिद्यते तस्य त्रीणि प्रमाणानीति शास्त्रं व्याहन्यते। न हि प्रत्ययाभेदे प्रमाणभेदः संभवति। विषयभेदात् त्रित्वमिति चेत्? अथ मन्यसे विषयस्त्रेधा भिन्नः, तेनानुरञ्जितः प्रत्ययस्त्रेधैव भवति? तन्न युक्तम्, प्रमाणाभेदे विषयभेदानधिगतेः। न हि प्रमाणभेदमन्तरेण विषयभेदोऽधिगन्तुं शक्यत इति। विषयतादात्म्यादिति चेत्? अथ मन्यसे विषय एवासौ तथा व्यवस्थितः तादात्म्यात् तथा ख्यातीति? तन्न, प्रमाणवैयर्थ्यप्रसङ्गात्। एवं च सति व्यर्थं प्रमाणम्। न विषयभेदं प्रमाणभेदोऽवगमयति। विषयस्तु तादात्म्यात् तथावतिष्ठत इति।

यथाध्यवस्यति तथा चेतयत इति च व्याघातः, अप्रकारवत्त्वात्। प्रकारवत्येतद् युक्तम्, अप्रकारे न युक्तम्। बुद्धिस्तं प्रत्ययमुपलभत इति च विरोधोऽधिकरणाधेययोरभेदात्। यः प्रत्ययः सा बुद्धिरित्यधिकरणाधेययोरभेदः। एवं च सति बुद्धिस्थं प्रत्ययमुपलभत इति व्याहतम् ॥९॥

॥बुद्ध्यनित्यताप्रकरणम्॥

[औपोद्घातिकं क्षणभङ्गप्रकरणम्]

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद् व्यक्तीनामहेतुः ॥३।२।१०॥

स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमान इत्येतदमृष्यमाणः क्षणिकवाद्याह

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद् व्यक्तीनामहेतुः।

स्फटिकस्याभेदेनावस्थितस्यान्यत्वाभिमान इत्ययुक्तं क्षणिकत्वाद् व्यक्तीनाम्। क्षणिकत्वमुपचयापचयप्रबन्धदर्शनात्। यस्मात् शरीरादिषु पक्तिनिर्वृत्तं रसद्रव्यं

प्रतिक्षणमुपचीयते चापचीयते च, उपचयाद् व्यक्तीनामुत्पादः अपचयाद् व्यक्तिनिरोधः, तौ चोत्पादनिरोधावस्य कालान्तरेण दृष्टौ। अतोऽवगम्यते प्रतिक्षणमुपचीयते चापचीयते च शरीरमिति।

यस्य खलु प्रतिक्षणमुपचयापचयौ न दृष्टौ तस्य कालान्तरेणापि न भवतो यथा भूमेरपच्यमानायाः पाकजानामिति। पच्यमानभूमिपाकजवच्च प्रतिक्षणं विशेष इति। अस्य प्रयोगः, प्रतिक्षणं शरीरमन्यच्चान्यच्च भवति। बाह्यप्रत्ययाभेदे सत्यन्ते विशेषदर्शनात् पच्यमानभूमिपाकजवत्, अपच्यमानभूमिपाकजवच्चेति ॥१०॥

नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा ॥३।२।११॥

तदिदमुपचयापचयप्रबन्धदर्शनं शरीरे दृष्टत्वात् शरीरस्यान्यत्वं साधयतु, न पुनरनुपलभ्यमानोपचयापचयविशेषाणां स्फटिकादीनामेतस्मादन्यत्वं सिध्यतीत्यहेतुः। यत्रोपलब्धिस्तस्यान्यत्वमिति चेत्? अथ मन्यसे नैवास्माभिरुपचयापचयप्रबन्धदर्शनेन सर्वभावानां क्षणिकत्वं साध्यते, अपि तु यत्र तदस्ति तस्मिन् क्षणिकत्वमिति? सत्यम्, यस्य यस्योपचयापचयप्रबन्ध उपलभ्यते, तस्य तस्यान्यत्वमिति, न तु क्षणिकत्वम्। उपचयापचयप्रबन्धदर्शनं चान्यथाभवदहेतुः क्षणिकत्वे। कथमन्यथा पूर्वशरीरावयवसहिता आहारावयवाः[१] पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यमानाः शरीरान्तरमुत्पादयन्तीति युक्तो भेद इत्यहेतुरेषः। तुल्यं पक्षप्रतिज्ञानमिति चेत्? अथ मन्यसे अपूर्वाहारावयवोपयोगे[२] सति शरीरावयवाः शरीरान्तरमारभन्ते पूर्वव्यूहपरित्यागेन, न पुनः क्षणिकत्वादन्यत् जातमित्यत्र को हेतुरिति? नासाधनात् न मया आहारावयवोपयोगात्[३] शरीरस्यान्यता साध्यते, अपि तु भवता विशेषदर्शनात् शरीरस्यान्यत्वमभ्यधायि। ततश्च क्षणिकत्वमिति

---

१. पूर्वावयवाः आहारावयवसहिताः C २. °वोपचयोपयोगे C ३. आहारोपचयापचययो° C

विशेषदर्शनं क्षणिकत्वसाधनम्। तदस्माभिर्विशेषदर्शनमन्यथाभवत् क्षणिकत्वे न साधनमित्येतावन्मात्रमुच्यते। न साधनमभिधीयत इति ॥११॥

नोत्पत्तिविनाशकारणोपलब्धेः ॥३।२।१२॥

अथावश्यं साधनं वक्तव्यम्, इदं ब्रूमः

नोत्पत्तिविनाशकारणोपलब्धेः।

उत्पत्तिकारणं विनाशकारणं चोपचयापचयौ वल्मीकघटादीनां दृष्टाविति तदुभयं क्षणिकत्वे न स्यात्। उपचय इति वृद्धिः [१]अवर्धत गौरिति, अपचय इति ह्रासः अपचितो गौरिति। उभयं चैतदवस्थितवस्तुविषयम्। न ह्यपूर्वं जायमानं वर्धत इत्युच्यते, नापि विनश्यदपचितमित्युच्यते। उपचयापचयोत्पत्तिविनाश-कारणोपलब्धेरिति सूत्रार्थः।

अथवा कारणमित्याधारोऽभिधीयते, कार्यमित्याधेयम्। न च क्षणिकत्वे आधाराधेयभावः संभवति। न चाधाराधेयभावमन्तरेण कार्यकारणभावः तस्मात् कार्यकारणभावोपलब्धेरक्षणिकत्वमिति। अस्य प्रयोगः। कार्यकारणे एककालानु-भाविनी आधाराधेयभावात् क्षीरकुण्डवदिति। क्षीरं कुण्डे वर्तते, तच्च कुण्डकाल-मनुभवति। तथा च कार्यं कारणे वर्तत इति। तस्मात् तदपि कारणकालमनुभवति। [२]न, आधाराधेयभावस्यासिद्धत्वादिति चेत्? अथ मन्यसे असिद्धः कार्यकारण-योराधाराधेयभावः, कार्यस्यानाधारत्वात्। नैव हि नः किञ्चित् कार्यमाधारवद् दृष्टमिति। नानेकान्तात्। नायमेकान्तः, सर्वं कार्यमनाधारमिति। यथोभयपक्षसंप्रति-पत्त्या रूपं कार्यं चाधारवच्च, स्पर्शस्तदाश्रय इति व्याघातः। यदि च रूपमनाश्रितं भवति, स्पर्शस्तदाश्रय इति व्याहतम्। अनेन च रूपदृष्टान्तेन यावत् समानकालतया साध्यते सर्वं तदेककालानुभावि भवतीति सिद्धः कार्यकारणभावः क्षणिकेष्वपि।

---

१. उपचितः C २. न om J

नाशोत्पादयोरेककालत्वात् तुलान्तनामोन्नामवदिति[१] चेत्? अथ मन्यसे कार्यकारण-भावः क्षणिकेष्वपि संभवति, कारणविनाशसमकालं कार्यभावात्। यदा कारणं विनश्यति तदा कार्यमुत्पद्यत इति विनश्यच्च कारणमस्ति। कारणविनाशेन चाभिन्न-कालः कार्योत्पादो यथा तुलाया अन्तयोर्नामोन्नामाविति? न, हेत्वर्थापरिज्ञानात्। न ब्रूमः क्षणिकेषु[२] कार्यकारणभावो नास्ति, अपि तु [३]क्षणिकेष्वाधाराधेयभावो भिन्नकालत्वात् कार्यकारणयोर्न युक्तः। कार्यं चानाधारमिति न दृष्टान्तोऽस्ति। अस्मत्पक्षे कार्यमाधारवदित्यस्ति दृष्टान्तो रूपादि। तुलाधारस्य च कर्मणो[४] नामोन्नामभावेनानभ्युपगमात्[५] युगपद्भावानुपपत्तिरेकत्वात्, यदि तावत् तुलामधिकृत्य ब्रवीषि तदैकं कर्म भ्रमणाख्यम् एकत्वाच्च युगपद्भावो न युक्तः। न ह्येकं युगपद् भवतीति। अथावयवकर्मणी, तयोरपि कार्यकारणभावेनानभ्युपगमात् किं केन संबध्यते? अथ युगपद्भावमात्रं विवक्षितमिति? युगपद्भावः कारणयौगपद्यात्। यावतामर्थानां कारणानि यौगपद्येन भवन्ति, तावतामेकस्मिन् काले भाव इति नामोन्नामावसंबद्धौ। कारणयौगपद्यं तु गुरुत्वप्रयत्नसंयोगा उन्नतेः, अवनतेरपि गुरुत्ववद्द्रव्यसंयोगानुगृहीतो रज्जुतुलासंयोगः। अथ न कर्मान्तरं संयोगं वा परः प्रतिपद्यते? तस्याप्युक्तमुत्तरं संयोगोऽर्थान्तरमिति, संयोगकारणत्वेन च कर्माप्यर्था-न्तरमिति। यथा च भावानामुत्पत्तिविनाशकारणमुपलभ्यते नैवं स्फटिकस्य। न चानुपलभ्यमानं शक्यमभ्यनुज्ञातुमिति ॥१२॥

क्षीरविनाशकारणानुपलब्धिवद् दध्युत्पत्तिवच्च तदुपपत्तिः ॥३।२।१३॥

यथा क्षीरस्य विनाशकारणमनुपलभ्यमानमभ्यनुज्ञायते दध्नश्चोत्पत्तिकारणम्, एवं स्फटिकादिव्यक्तीनामनुलभ्यमाने उत्पत्तिविनाशकारणे अभ्यनुज्ञेये इति ॥१३॥

---

१. तुलान्तयोरुन्नमनावनमनवदिति C २. क्षणिकत्वे C ३. क्षणिकेषु om C
४. व्यापारस्य for कर्मणः C ५. °भावानभ्युप° C

लिङ्गतो ग्रहणान्नानुपलब्धिः ॥३।२।१४॥

यल्लिङ्गत उपलभ्यते न तन्नास्तीति। विपर्ययस्तु स्फटिकादिषु। न हि स्फटिकादिव्यक्तीनामपरापरोत्पत्तौ लिङ्गमस्तीति। न नास्ति, शीतोष्णस्पर्शभेदस्य नानात्वसाधनत्वात्। शीतोष्णस्पर्शभेदो नानात्वे दृष्टः, यथाग्नावुदके च। अस्त्ययं शीतोष्णस्पर्शभेदः स्फटिके, स तु निमित्तान्तराद् भवति। किं पुनर्निमित्तम् ? अग्नेजोऽवयवानुप्रवेशः। उदकावयवानुप्रवेशात्[१] शीतः, तेजोऽवयवानुप्रवेशाच्चोष्ण इति।

अग्नेजोऽवयवानुप्रवेशो न युक्तः। अल्पतरबहुतरानुप्रवेशे हेत्वभावात्। हेमन्ते ह्याकाशे पर्युषितानां काष्ठभूम्यश्मलोहानां शैत्यस्योत्तरोत्तरविशेषो दृष्टः। तथा पुनः ग्रीष्मातपसन्तापितानां तेषामेवौष्ण्यस्य। न हि तेष्वल्पतरबहुतरप्रवेशे कारणं पश्यामः। तस्मात् स्वगतमहाभूतविशेषापेक्षाण्यासादितबाह्यनिमित्तानि भूतान्येव तथा तथोत्पद्यन्त इति युक्तम्।

न युक्तम्। न ह्यग्नेजोऽवयवानुप्रवेशेन भूतस्वभावो निवार्यते, भूतस्वभावस्योभयपक्षसाम्यात् असाधनं भूतस्वभाव इति। विरुद्धश्चायं हेतुः। यद्यवयवानुप्रवेशं न प्रतिपद्यसे, खरस्नेहोष्णेरणात्मकानि भूतानीति[२] व्याहन्यते। कथमिति ? यत् कठिनं तदेकस्मिन् काले उष्णमपि भवतीति, यच्चोष्णं तत् कठिनं गच्छतीति। तदेकं वस्तु द्विस्वभावकं त्रिस्वभावकं च प्राप्नोति। यस्य पुनरवयवानुप्रवेशस्तस्यैष दोषो नास्ति, अन्यत्रावस्थितस्य संयुक्तसमवेतस्य औष्ण्यस्य ग्रहणादिति। विरुद्धश्चायं हेतुः कथम् ? एकस्य विशेषाभ्युपगमात्। एकं तद् वस्त्वेकस्मिन् काले कठिनमुष्णं गच्छति चेति त्रिस्वभावकम्। ततश्च विशेषदर्शनादित्ययं हेतुः

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः

इति विरुद्धो भवति।

---

१. °:। उदकावयवानुप्रवेशात् om C २. द्रः अभिधर्मकोशः १/१२

अथ मन्यसे न विशेषमात्रं नानात्वं प्रतिपादयति। अपि तु विरोधी विशेषो नानात्वे साधनमिति? नाभिप्रायापरिज्ञानात्। वयमपि ब्रूमो न विशेषमात्रं नानात्वमपि तु भूतानां यो[१] विशेष इतरेतरव्यावृत्तो लक्षणत्वेनोपात्तः[२] स विरुद्धः यद्यविरुद्धः स्यात् न लक्षणं स्यात्। एकवृत्तित्वे वा लक्षणत्रयस्य तत्तद्वस्तु किमित्यभिधीयते। यदि तावत् पृथिवीति, तन्न युक्तम् , औष्ण्यस्य दर्शनात्। अथ तेजः, तदपि न युक्तम्, काठिन्यस्य दर्शनात्। एतेन वायुर्व्याख्यातः। सोऽयं हेतुभूतलक्षणं वा बाधते, नानात्वसाधनं वा न भवति। एतेन जले तापविशेषग्रहणं प्रत्युक्तम्। तत्राप्यौष्ण्यं स्निग्धतेरणभावश्च युगपद् भवन्तीति। जलेऽग्निरूपग्रहणप्रसङ्गस्तु न युक्तोऽभिभवात्। तन्न, सिद्धान्तापरिज्ञानात्। नायं सिद्धान्तो जलरूपेणाग्निरूपमभिभूयत इति। अपि तु तेजसश्चातुर्विध्यात् तत्र रूपाग्रहणम्। चतुर्विधं तेज इत्येतत् प्रतिपादितमिन्द्रियप्रकरण [द्रः पृ. ३५७] इति।

या चेयं प्रतिज्ञा अन्यश्चान्यश्च स्फटिक इति अस्याश्च कोऽर्थः ? यदि तावदन्यत्वमात्रं ततः सिद्धसाधनं भवति [३]स्तम्भादिभ्योऽन्यः स्फटिक इति। अथ स्फटिकान्तरादन्य इति, एतदपि तादृगेव। अथ पूर्वस्फटिकादन्यः ? कतमोऽसौ पूर्वः स्फटिको यतोऽयमन्य इति ? व्यवच्छेदस्याशक्यत्वादनभिधानं यथोभयपक्षसंप्रतिपन्ना रूपादयः तेभ्योऽन्यानन्यविचारो घटादेर्युक्तः। न पुनरिह पूर्वस्फटिकान्तरमुभयपक्षसंप्रतिपन्नं यतो वर्तमानः स्फटिकोऽन्यत्वेन[४] साध्यते। अथोभयपक्षसंप्रतिपन्नं पूर्वं स्फटिकान्तरम्? व्यर्थं साधनम्। अथ वर्तमानं स्फटिकमभ्युपगम्य यदतीतं स्फटिकान्तरं तदन्यदिति साध्यते? एवं सति शीतोष्णस्पर्शभेदो न तद्धर्मः, वर्तमानस्फटिकधर्मत्वात्। वर्तमानाच्च स्फटिकादन्यदतीतं स्फटिकान्तरमिति केनैतन्न संप्रतिपन्नम्? अथ तदेवान्यदिति? व्याघातः, तदेवान्यच्चेति। एवं यथा यथान्यत्वं विचार्यते, तथा तथा सिद्धसाधनं भवति सिद्धान्तं वा बाधत इति।

---

१. विरोधी for भूतानां यो C २. °नोपपन्नः C ३. कुम्भादिभ्यो° C ४. वर्तमान मन्यत्वेन C

अथायुगपत्कालप्रत्ययानामालम्बनं स्फटिको न भवतीत्ययं प्रतिज्ञार्थः। एतस्मिन्नपि प्रतिज्ञार्थे न दृष्टान्तोऽस्ति। न नास्ति। प्रदीपादिर्दृष्टान्त इति। प्रदीपोऽयुगपत्कालप्रत्ययानालम्बनं सदादिधर्मा चेति विद्यते दृष्टान्तः। नासिद्धत्वात्। असिद्धमेतत्, अयुगपत्कालप्रत्ययानामालम्बनाः प्रदीपादयः, तेषामनेकक्षणावस्थानात्। प्रदीपस्य तावत् स्वकारणसत्त्वासंबन्धकालः, सामान्याभिव्यक्तिकालः, अवयवकर्मकालः, तदनन्तरं तद्विनाशकालः, तदनन्तरं तत्संयोगविनाशकालः, ततो द्रव्यविनाश इति। यथा च प्रदीप एवं सर्वे भावाः स्वकारणसत्तासंबन्धाभिव्यक्तितद्विरोध्याश्रयविनाशानुविधानेन विनश्यन्ति, अकारणस्य विनाशस्यानभ्युपगमात्। न हि नः किञ्चित् निष्कारणं विनश्यतीति विनश्यदवस्थद्रव्यकर्मवदेतत् स्यात्? न, कर्मणोऽनभ्युपगमे विरोधात् अनभ्युपगमाच्च।

विनाशहेत्वभावादिति चेत्? अथ मन्यसे नात्र विनाशस्य कारणमस्ति, तस्मादुत्पन्नमात्र एवायं भावो विनश्यतीति? न, विकल्पानुपपत्तेः। विनाशस्य हेतुर्नास्तीति ब्रुवाणः पर्यनुयोक्तव्यः किमकारणत्वाद् विनाशो नास्ति, उताकारणत्वान्नित्य इति। भवतां पक्षे अकारणं द्विधा नित्यमसच्च। अस्माकं तु नित्यमेव। तद् यद्यकारणत्वात् नित्यो विनाशः, कार्यस्योत्पादो न प्राप्नोति। अनुत्पन्नस्य च विनाशो भावस्य विनाशो न[१] सहावस्थानमिति च दोषः। ततश्च भावानामभावविरोधित्वादत्यन्तावस्थानमिति।

अथासन् विनाशः, एवमपि सर्वनित्यत्वं विनाशाभावात्। यदि चासन् विनाशः, विनश्यतीत्यसति विनाशे प्रत्ययो न प्राप्नोति। नासत्यां गतौ गच्छतीति भवति। अथाविनाशित्वादकारणो विनाश इति मन्यसे? विनाशो न विनश्यतीति कुत एतत्? विनष्टानां पुनरनुत्पत्तेरिति चेत्? अथ मन्यसे यदि विनाशो विनश्येद् विनष्टं पुनरुत्पद्येत। न युक्तमेतत्। न हि विनाशाभावो भावो यतो विनाशविनाशाद् भवेत्, अपि तु कारणवान् भावः तस्य यदा कारणं भवति तदोत्पाद इति। अपि

---

१. उत्पन्नस्य च भावस्य विनाशेन C

च विनाशः कारणवांश्च न च विनश्यत्यभावत्वात्। भावधर्म एष यत् कारणवत् तद् विनश्यतीति। अभावस्त्वकारणोऽपि विनश्यति, यथा प्रागभावः। कारणवानपि न विनश्यति, यथा प्रध्वंसाभावः। यदि कारणवान् विनाशः, ननु जनकं विनाशकं प्राप्नोति। य एवाग्निसंयोगः पाकजानामुत्पादयिता, स एव पाकजान्तरोत्पादे पूर्वपाकजानुच्छिनत्तीति जनकं विनाशकं प्राप्तम्? नानवबोधात्। नेदं भवता **काश्यपीयं** दर्शनं व्यज्ञायि, न हि नो य एवाग्निसंयोगः पाकजानुत्पादयति, स एव चोच्छिनत्ति। अपि त्वग्निसंयोगान्तरं पूर्वरूपादीनुच्छिनत्ति। [१]तत्समकालं रूपादीनारभते। ततस्तानप्यन्यस्तानप्यन्य इत्येवं जनकस्य विनाशकत्वप्रसङ्गो नास्ति।

अथ मन्यसे जनकसरूपमपि विनाशकं न भवतीति? न न भवति। दृष्टो ह्यबादिसंयोगादङ्कुरस्योत्पादः। स एवाबादिसंयोगः तद्विनाशक इति। नास्ति दृष्टेऽनुपपन्नं नाम। यश्चाकारणे विनाशे दोषः, स चापरिहार्य इत्यत एवमुच्यते जनकसरूपं विनाशकमिति एवं तावदन्यत्वे साध्ये दोष उक्तः।

ये तु क्षणिकत्वं साधयन्त्यन्ते विशेषदर्शनाद् विनाशहेत्वभावाच्च, तान् प्रतीदमुच्यते। क्षणिकाः संस्कारा इति ब्रुवाणः क्षणिकशब्दस्यार्थं प्रष्टव्यः, किमुक्तं भवति क्षणिका इति? यदि विनाशिन इति? सिद्धसाधनम्। अथाशुविनाशिन इति? तथापि विशेषणं सिद्धान्तविरोधि। अथोत्पन्नप्रध्वंसिन इति। एतदपि तादृगेव। उत्पन्नाः प्रध्वंसिन इति सिद्धसाधनम् अथोत्पन्नं विनष्टमित्येकः कालः, उत्पत्तिविनाशावेककालाविति। तेन यथा अनुत्पन्नस्योत्पत्तिः, एवमनुत्पन्नस्य विनाश इति प्राप्तम्। अथोत्पन्नं विनश्यतीति? एतस्मिन्नपि पक्षे उत्पत्तिवद् विनाशः कारणवान्, यथोत्पत्तिः क्रियात्वात्[२] सकारणा तथा विनाश इत्युत्पद्य विनाशकारणमनुभवति। ततो विनश्यतीति। अकारणे च विनाशे दोष उक्तः[३]। यश्चायं मत्वर्थीयः क्षणिक इति स कथम्? यदि निरुक्तन्यायेन क्षयः क्षण इति

---

१. समनन्तरकालाद् C २. °त्वात् कादाचित्कत्वात् C ३. विनाश उक्तम् J

क्षणोऽस्यास्तीति क्षणिक इति? तन्न युक्तं कालभेदात्। यदा क्षयो न तदा क्षयीति भिन्नकालयोर्न मत्वर्थीयो दृष्टः। अथ पुनर्भाव एवानन्तरविनाशेन विशिष्यमाणः क्षण इत्युच्यते, तदापि तेनैव तदेव तद्वन्न भवतीति न युक्तो मत्वर्थीयः। अथ क्षणावस्थितिकालाः क्षणिका इति सर्वान्त्यं कालं क्षणत्वेन प्रतिपद्य तत्रावतिष्ठन्ते ते क्षणिका इति? एतदपि न युक्तमं संज्ञाभेदमात्रेण[१] कालस्याभ्युपगमात्।

पञ्च भिक्षवः संज्ञाभेदमात्रम्

इति **शास्त्रम्**। न च संज्ञामात्रं वस्तुविशेषणत्वेन युक्तम्। क्षणिका इति च प्रतिज्ञां कृत्वा न दृष्टान्तोऽस्तीत्युक्तम् प्रदीपादेरसिद्धत्वात्।

येऽपि हेतवोऽन्ते विशेषदर्शनादित्येवमादयः, तेऽप्यसिद्धा वा, अन्यथासिद्धा वा विरुद्धा वा भवन्तीत्यहेतवः। उपेत्य वा विशेषवत्त्वं वर्तमानैकक्षणविशेषवत्त्वेनानैकान्तिकम्। उभयपक्षसंप्रतिपत्त्या य एकक्षणो वर्तमानः स विशेषवान् भवत्येकश्चेत्यनेकान्तः। अन्ते विशेषदर्शनादिति च विशेषणानर्थक्यम्। अन्तार्थानभिधानात् कतमस्मिन्नन्ते विशेषदर्शनमिति वक्तव्यम्। अथान्तो विनाशः, नैतस्मिन् विशेषदर्शनमस्ति। अथान्तिमं वस्त्वेवान्तशब्दवाच्यम् एवं सत्येकस्मिन् विशेष इति विरुद्धो हेतुः।

योऽप्ययं हेतुर्दर्शनादर्शनादिति, अस्यार्थः। नीयमानस्य किल प्रदीपादेर्द्रव्यस्य देशान्तरे उत्पादो देशान्तरे च निरोधः। तत्कृते दर्शनादर्शने स्तः। [२]तथा च गच्छतो देवदत्तादेर्दर्शनादर्शने। [३]तस्मादस्यापि प्रतिक्षणमुत्पादविनाशाविति। नैतत् न्याय्यम्, देवदत्तादेर्दर्शनादर्शनयोरन्यनिमित्तत्वात्। संयोगविभागकृते दर्शनादर्शने, नोत्पादविनाशकृते। यस्मिन् देशे संयोगो विनष्टः, तस्मिन् संयोगी न गृह्यते, यस्मिंस्तूत्पन्नः, तत्र गृह्यत इति। संयोगाद्धि द्रव्ये इहबुद्धिर्भवति, भावाभावयोस्तद्वत्त्वादिति। अथ संयोगविभागौ न प्रतिपद्यते? तस्यापि संयोगोऽर्थान्तरं भवतीति

---

१. संज्ञामात्रत्वेन C २. अतश्च C ३. अतस्तस्या° C

प्रतिपादितम्। एतेन विभागो व्याख्यातः। तदेवं संयोगविभागोपपत्तेर्द्रव्यस्य दर्शनादर्शने भवतो नान्यथेति।

यत् पुनरेतत् प्रदीपस्य देशान्तर उत्पाद इति, एतदपि न बुध्यामहे। कथमिति? यत् तावद् भवतां पक्षे वस्तूत्पन्नं यत्र तत्रैव तद् ध्वंसते यदुत्पित्सु तदनाहितसंस्कारमसत्त्वाद् देशान्तरे नोत्पत्तुमर्हति। अथानाहितसंस्कारस्यापि देशान्तरे उत्पादः, न किञ्चिद्वस्तु [१]अभिन्नदेशमुत्पद्येत। अथ कारणं संस्कृतमिति? तदाधेयवशात् कार्यमपि तथाभूतमेवोत्पद्यत इति तुल्यं कार्येण। यथैव कार्ये संस्कार आधातुमशक्यः, तथा कारणेऽपीति तुल्यम्। नित्यं भवतां पक्षे भिन्नदेशेन कार्येणोत्पत्तव्यमभिन्नदेशेन वा।

एतेनैवातुल्यपातो व्याख्यातः। अतुल्यपातात् क्षणिकत्वमिति। न किलाकाशे पततो लोष्टादेः प्रतिबन्धकं किञ्चिदस्ति यदनुविधानेन लोष्टादि किञ्चित् चिरेण पतति किञ्चिदाश्विति। तस्मात् क्षणिकत्वात् काश्चिदवस्थास्तादृश्य उत्पद्यन्ते यासां न भवत्यधःसन्तानोत्पत्तौ सामर्थ्यम्। पुनश्च तादृश्य उत्पद्यन्ते यासां भवतीति। एतदपि अन्यथासिद्धमेव। तुल्यानां गुरुत्ववतां द्रव्याणामेकस्य गुरुत्वप्रयत्नक्षेपाः कारणम्। एकस्य गुरुत्वमात्रम्। एकस्य गुरुत्वप्रयत्नाविति। तदेवं कारणभेदानुविधायीनि गुरुत्ववन्ति द्रव्याणि चिराशुपातानुविधानभाञ्जि भवन्तीत्यहेतुरतुल्यपातः। यदपीदमिषोश्चापतनं भवेदिति संस्कारैकत्ववादिनो दोषः, अयमपि संस्कारैकत्वानभ्युपगमेन प्रत्युक्तः। यथा चानेकः संस्कार इति तथोक्तं

पाणिनिमित्तप्रश्लेषसूत्रे

इति। एकश्च संस्कारो निमित्तभेदात् कदाचित् पटूनि कर्माणि करोति, कदाचिन्मन्दानीति गुरुत्ववद् द्रष्टव्यम्। यथैकं गुरुत्वं सहकारिसंयोगापेक्षं मन्दं पातं करोति। तदेव प्रतिबन्धापगमे पटुं करोति। दृष्टो हि ग्राब्ण आकाशे मुक्तस्य पटुः पातो मन्दोऽप्स्विति। तदेवमतुल्यपातोऽप्यहेतुः।

---

१. स्वभिन्न॰ C

अथाक्षणिकत्वे किं प्रमाणम्? उक्तम्, आधाराधेयभावादेककालानुभाविनी कार्यकारणे कुण्डे बदरवद्[१] इति। अतश्च विप्रतिपन्ना अयुगपत्काला: प्रत्यया एकविषया अव्युत्थायितत्प्रत्ययसामानाधिकरण्ये सति समानशब्दवाच्यत्वात् वर्तमानैकक्षणानेकपुरुषप्रत्ययवत्। यथा वर्तमानैकक्षणविषयाणामनेकपुरुषप्रत्ययानामव्युत्थायितत्प्रत्ययसामानाधिकरण्ये सति समानशब्दवाच्यानामेकविषयत्वं तथा चाव्युत्थायितत्प्रत्ययसमानाधिकरणा: समानशब्दवाच्याश्च विप्रतिपन्ना अयुगपत्काला: प्रत्यया:। [२]तस्मात् तेऽप्येकविषया इति। प्रत्यात्मं नानेककर्तृका: प्रत्यया अप्रतिसन्धानप्रसङ्गात् देवदत्तादिप्रत्ययवदिति। रूपरसगन्धस्पर्शप्रत्यया एकानेकनिमित्ता: प्रतिसन्धानात्। कृतसमयानां बहूनां वर्तमानैकक्षणानेकविज्ञानवदिति। ह्यस्तनाद्यतनानि विज्ञानान्येकसन्ततौ एकानेकनिमित्तानि मयेति प्रतिसन्धानात् पूर्ववत्। शास्त्रार्थप्रत्यया एकानेकनिमित्ता: प्रतिसन्धानात् पूर्ववदिति। नानाविषयाणां नानाकर्तृकाणां च प्रत्ययानामप्रतिसन्धानादिति पूर्ववदेव न्याय इति॥१४॥

न पयसः परिणामो गुणान्तरप्रादुर्भावात्॥३।२।१५॥

नैवं क्षीरं विनश्यति नापि दध्युत्पद्यते। अपि त्ववस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरमुत्पद्यत इत्**येके** वर्णयन्ति। **अपरे** त्ववस्थितस्य द्रव्यस्य गुणनिवृत्तौ गुणान्तरमुत्पद्यत इति। स खल्वयमेकपक्षीभाव इव। क उपमानार्थ:? उभयत्र द्रव्यमवतिष्ठते। एकस्य तिरोभावाभिव्यक्ती, एकस्य विनाशप्रादुर्भावावित्युपमानार्थ:॥१५॥

---

१. एककालानुभव: J २. तस्मात् om C

व्यूहान्तराद्व्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥३।२।१६॥

उभयोरपि चोत्तरम्[१]

व्यूहा....नम्। शेषं **भाष्ये**। यत् पुनरेतत् एकस्य तिरोभावाभिव्यक्ती, एकस्य [२]विनाशप्रादुर्भावाविति तन्न, पूर्वावस्थापरित्यागात्। यदि विनाशोत्पादौ निवृत्तिप्रादुर्भावौ अथाप्यभिव्यक्त्यनभिव्यक्ती, सर्वथा पूर्वावस्थां जहाति द्रव्यमिति। न ह्यप्रच्युतस्य[३] पूर्वावस्थातोऽभिव्यक्त्यनभिव्यक्ती भवतो विनाशप्रादुर्भावौ वेति। तस्मात् अयुक्तमवस्थितस्य परिणाम इति॥१६॥

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ॥३।२।१७॥

अभ्यनुज्ञाय च निष्कारणं क्षीरविनाशं निष्कारणं च दध्युत्पादम्—

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः।

क्षीरदधिवन्निष्कारणौ विनाशोत्पादौ स्फटिकव्यक्तीनाम्, न पुनः कुम्भादिवत् सकारणाविति नात्र हेतुरस्तीति। निरधिष्ठानं च दृष्टान्तवचनम्। कोऽधिष्ठानार्थः? आश्रयः। किमुक्तं भवति निरधिष्ठानमिति? धर्मी नास्तीति यावदुक्तं भवति। न हि स्फटिकस्योत्पादविनाशौ प्रतिक्षणमुपलभ्येते, यत इयं चिन्ता भवेत् किमेतौ सकारणावाहोस्विदकारणाविति। यथानभ्युपगतशब्दसत्त्वं[४] प्रति कश्चिद् ब्रूयात् कृतकत्वादनित्यः शब्दः, तादृगेतदिति। धर्म्यप्रसिद्धेश्च दृष्टान्ताभाव इति च समानम्।

---

१. उभयत्रोत्तरम् C २. निवृत्तिप्रादु° J ३. अनपवृक्तस्य C ४. तत्त्वं C

अभ्यनुज्ञाय च स्फटिकस्योत्पादविनाशौ योऽत्र साधकस्तस्याभ्यनुज्ञानाद-प्रतिषेधः। उभावेतौ दृष्टान्तौ क्षीरदधिवत् कुम्भादिवच्च। तत्र किं कुम्भादिदृष्टान्तो भवत्वथ क्षीरदधिनी इति। कुम्भादिवदिति युक्तं कुम्भाद्युत्पत्तिविनाशकारणस्य दृष्टत्वात्। क्षीरदधिवत्तु न युक्तम्, अनुमानतो ग्रहणादिति सिद्धमिदमनित्या बुद्धिरिति। इतश्चानित्या बुद्धिः, गुणत्वे सति प्रत्यक्षतया व्यापकद्रव्यसमवायात् शब्दवत्। जातिमत्त्वे सति अस्मदादिप्रत्यक्षत्वादाश्रितत्वाच्च शब्दवत्। करणभावे सत्ययोगिप्रत्यक्षत्वात् शब्दवदेव ॥१७॥

॥औपोद्घातिकं क्षणभङ्गप्रकरणम्॥

[बुद्धेरात्मगुणत्वप्रकरणम्]

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ॥३।२।१८॥

सा त्वियं बुद्धिः कस्य गुण इत्येतत् चिन्त्यते। न गुणभावासिद्धेः। अनित्यत्वे सति नियमेनाचाक्षुषप्रत्यक्षत्वात् रसवत् सिद्धो गुणभावः। सन्निकर्षोत्पत्तेः संशय इति। तत्रायं विशेषः

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात्।

भवति खल्विदमिन्द्रियेऽर्थे च विनष्टे ज्ञानमद्राक्षमिति। अद्राक्षमित्येत-न्नेन्द्रियार्थसन्निकर्षात्। स्मृतित्वात् स्मृतिरेषा नेन्द्रियार्थसन्निकर्षाद् भवितुमर्हति। स्मृतावपि तुल्यम्। यथैव ज्ञातारमन्तरेण ज्ञानं न भवति, एवमनुभवितरि नष्टे अनुभवितारमन्तरेण स्मृतिरप्ययुक्तेति ॥१८॥

युगपज्ज्ञेयानुपलब्धेश्च न मनसः ॥३।२।१९॥

अस्तु तर्हि मनोगुणो ज्ञानम्

युगपज्ज्ञेयानुपलब्धेश्च न मनसः।

यत् खलु युगपज्ज्ञेयानुपलब्ध्या समधिगतं मनः, नातस्तस्य गुणो ज्ञानम्। विशेषणोपादानादन्तःकरणबहुत्वप्रसङ्ग इति चेत्? अथ मन्यसे यत् खलु युगपज्ज्ञेयानुपलब्ध्या समधिगतं मनो न तस्य गुणो ज्ञानमित्येवं ब्रुवाणेन बहुन्यन्तःकरणानि प्रतिपन्नानि भवन्ति। न ह्यसत्यन्तःकरणबहुत्वे विशेषणमर्थवदिति। न, सर्वस्येन्द्रियस्य मननिमित्तत्वात्। सर्वमेवेन्द्रियं मननिमित्तत्वात् मन इत्यभिधीयते। एवं च सति युक्तं विशेषणम्, युगपज्ज्ञेयानुपलब्ध्या यत् समधिगतं मनो न तस्य गुणो ज्ञानमिति। एवमपि विशेषणं व्यर्थम्, अन्यस्यानभ्युपगमात्। यदि तस्यान्तःकरणस्य न भवत्यन्यस्य तर्हि साधनस्य ज्ञानं गुण इति प्राप्तम्। अन्यस्यानभ्युपगमात्[१]। अन्यस्योपपत्तेरप्रतिषेधः। अनवस्थितत्वात् प्रमाणप्रमेयव्यवहारस्य[२]। यदायं योगी पुरुषान्तरेण पुरुषान्तरं परिच्छिनत्ति, तदा पुरुषान्तरपरिच्छेदे पुरुषान्तरं साधनमिति तत्त्वज्ञानगुणं भवतीति युक्तं विशेषणमिति। तस्मात् न तस्य गुणो ज्ञानमिति।

कस्य तर्हि? अस्यार्थस्य प्रदर्शनार्थं ज्ञस्य वशित्वात्। वशी ज्ञाता वश्यं करणमिति। न चायं ज्ञातरि नियमो ज्ञाता वश्येव, वश्योऽपि भवतीति। अचेतने तु नियमः। अचेतनं सर्वं वश्यमिति। वश्यं मनोऽचेतनत्वात् घ्राणादिवदिति। ज्ञानगुणत्वे च संज्ञाभेदमात्रम्, विभु[३] चान्तःकरणं ज्ञानगुणं चेति संज्ञामात्रं भिद्यते। यथा ज्ञातुर्ज्ञानसाधनमिन्द्रियमेवं मन्तुर्मतिसाधनेनावश्यं भवितव्यमिति। उभयोश्चेतनत्वे प्रत्ययव्यवस्थानुमानं न स्यात्। विभु चान्तःकरणं ज्ञानगुणमिति सर्वेन्द्रियैर्युगपदुपलब्धिप्रसङ्गः॥१९॥

---

१. अन्यस्यानभ्युपगमात् om J २. प्रमेयभावस्य C ३. चित्तं for विभु C

तदात्मगुणत्वेऽपि तुल्यम्॥३।२।२०॥

यस्याप्यात्मा विभुश्च ज्ञानगुणश्च तस्यापि सर्वेन्द्रियैः संबन्धस्याप्रतिषेधात् युगपदुपलब्धिप्रसङ्गः॥२०॥

इन्द्रियैर्मनसः सन्निकर्षाभावात्तदनुत्पत्तिः॥३।२।२१॥

न प्रसङ्गः कारणान्तरभावात्। इन्द्रियार्थसन्निकर्षवत् इन्द्रियमनःसन्निकर्षोऽपि कारणमिति। तस्य चायौगपद्यमणुत्वान्मनस इति॥२१॥

नोत्पत्तिकारणानपदेशात्॥३।२।२२॥

यदि पुनरात्मेन्द्रियार्थसन्निकर्षादेव ज्ञानमुत्पद्येत किं स्यात्?

नोत्पत्तिकारणानपदेशात्।

अस्मादेवोत्पद्यतामिति न कारणमपदिश्यत इति सूत्रार्थः। आत्मेन्द्रियार्थसन्निकर्षात् ज्ञानमुत्पद्यत इति। अयुगपदुत्पत्तौ वा न कारणान्तरमपदिश्यते। विदेहप्रत्ययानुत्पत्तौ वा। यदेन्द्रियमर्थेन बहिरवस्थितेन संबध्यते, आत्मसंबन्धोऽपि तत्रास्तीति कस्माद् विदेहप्रत्ययो न भवतीति वक्तव्यम्। अन्तःकरणप्रत्याख्याने च केवलमात्मा स्मृत्यादिकारणमिति कस्मात् न युगपदुत्पत्तिः स्मृतीनाम्? यदा चेन्द्रियमात्मा चार्थेन युगपत् संबद्धौ तदा किमिन्द्रियार्थसन्निकर्षः कारणम्, उत आत्मार्थसन्निकर्षः, उतात्मेन्द्रियार्थसन्निकर्ष इति कारणानपदेशः॥२२॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥३।२।२३॥

तदात्मगुणत्वेऽपि तुल्यमित्येतदनेन समुच्चीयते। यद्यात्मगुणो बुद्धिर्भवति, विनाशकारणाभावात् नित्यत्वमस्याः प्रसज्येत। कथमिति? गुणानां द्विविधो विनाश-हेतुराश्रयाभावो विरोधिगुणप्रादुर्भावश्च। तत्र नित्यत्वादात्मनोऽनुपपन्नः पूर्वः, विरोधी च गुणो नास्तीति नित्यत्वप्रसङ्गः॥२३॥

अनित्यत्वग्रहणाद्बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् ॥३।२।२४॥

अनित्या बुद्धिरित्येतत् प्रतिपादितम्। तत्रास्या बुद्ध्यन्तराद् वा संस्काराद् वा विनाश इति प्रतिपत्तव्यम्। न द्वे बुद्धी सहेति चेत्? अथ मन्यसे न द्वे बुद्धी सह भवतो यतः परया पूर्वा निवर्त्त्येतेति। तच्च न, युगपदुत्पत्तिप्रतिषेधात्। युगपदुत्पत्तिः प्रतिषिध्यते, न [१]सहभावः। न हि बुद्ध्योर्युगपद्भावे किञ्चिद् विरुध्यत इति। लब्धात्मकेन च कार्येण कारणस्य विनाशाभ्युपगमात्। यदा च कार्यं लब्धात्मकं भवति तदा कारणं विनाशयति, शब्दवत्। यथा लब्धात्मकः कार्यः शब्दः कारणं शब्दं निर्मार्ष्टि, तथा बुद्धिरपीति। अन्त्ययोर्न स्यादिति चेत्? अथ मन्यसे यदि पूर्वौ बुद्धिशब्दौ पराभ्यां विनाश्येते, अन्त्ययोर्बुद्धिशब्दयोः किं विनाशकारणमिति। यथा चान्त्यौ बुद्धिशब्दौ विनाशकारणं विना विनश्यतः, एवमन्यदपि कार्यमिति? न, स्पर्शवद्द्रव्यसंयोगात् तदुपपत्तेः[२]। स्पर्शवद्द्रव्यसंयोगेनान्त्यशब्दो विरुध्यते। ये कुड्यादिभिराकाशस्य[३] संयोगाः, त एकार्थसमवायिनं शब्दं प्रतिबध्नन्ति। अतोऽन्त्यस्याश्रुतिः[४] शब्दस्येति। अन्त्या बुद्धिः स्थितिहेत्वभावाद् विनश्यतीति

---

१. संभवः J २. न तदुत्पत्तिः C ३. °दिभिः कारणस्य C ४. अतोऽ-त्यन्तमश्रुतिः C

कालाद् वा, संस्काराद् वा। कथं कालात्? यावन्त्यस्य जन्मनः स्थितिहेतू धर्माधर्मौ, तयोरभावादन्त्या बुद्धिर्विनश्यतीति। कस्मात् पुनरेतदेवमुच्यते, न पुनरहेतुको विनाशोऽभ्युपगम्यत इति? नाभ्युपगम्यते उक्तदोषात्। निर्हेतुके विनाशे उक्तो दोषः क्षणभङ्गं निराकुर्वद्भिरिति। यदि कारणस्यायौगपद्याद् बुद्धीनामयुगपदुत्पत्तिः, यत्र कारणस्य यौगपद्यमस्ति तत्र युगपदुत्पत्तिप्रसङ्गो यथा स्मृतिषु। अत्र तावदेकः परिहारः, करणस्यैकक्रियानिवृत्तौ सामर्थ्यात्। न हि करणमेकस्मिन् कालेऽनेकां क्रियां निर्वर्तयितुं शक्तमिति। परिच्छेदत्वाच्च स्मृतीनां ज्ञानवदयुगपदुत्पत्तिरिति॥२४॥

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ॥३।२।२५॥

अपरे तु कारणस्यायौगपद्यमुपपादयिष्यन्तो ज्ञानसमवेतात्मप्रदेशसन्निकर्षात् मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिरित्याहुः॥२५॥

नान्तःशरीरवृत्तित्वान्मनसः॥३।२।२६॥

एतत्तु न सम्यगिति प्रतिपादयितुमाह—

नान्तःशरीरवृत्तित्वान्मनसः।

अन्तःशरीरे मनो वर्तत इति को वृत्त्यर्थः? न तावदाश्रयाश्रयिभावः, न हि मनः क्वचिदाश्रितम्। नापि वृत्तिः स्वकार्यसामर्थ्यम्, बहिः कार्यदर्शनात्। मनसाधिष्ठितं चक्षुर्निःसृत्य रूपादिकमर्थं ग्राहयति चक्षुषोर्विसरार्वोर्मनसः[१] कार्यं तद्भावभावित्वात्। न चान्या वृत्तिः संभवति। तस्मात् नान्तःशरीरवृत्ति मन इति। अत्र ब्रूमः।

१. विसारो J

नाश्रयाश्रितभावो मनसो वृत्तिः, नापि कार्यप्रतिलम्भः, अपि तु नाशरीरस्य मनसः कार्यमिति मनसो वृत्त्यर्थः। न ह्यशरीरं मनः पुरुषस्यार्थं करोतीति ॥२६॥

साध्यत्वादहेतुः ॥३।२।२७॥

अशरीरं मनः पुरुषार्थासमर्थमिति साध्यमेतत् ॥२७॥

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ॥३।२।२८॥

स्मरणशरीरधारणे युगपद् भवत इति दृष्टम्। दृष्टं च सर्वेण प्रतिपत्तव्यम्। चिरनिश्चरिते च मनसि स्मरतः शरीरधारणं न स्यात् ॥२८॥

न तदाशुगतित्वान्मनसः ॥३।२।२९॥

उभयं सिध्यति स्मरणं धारणं च ॥२९॥

न स्मरणकालानियमात् ॥३।२।३०॥

अनियतः स्मृतिकालः। अतोऽयुक्तमेतत्। शरीरसंयोगानपेक्षं [१]चात्ममनः-संयोगं स्मृतिकारणं ब्रुवतः शरीरस्योपभोगायतनत्वं निवर्तते। तन्निवृत्तौ च शरीरोत्पत्तिवैयर्थ्यमिति ॥३०॥

---

१. चात्मनः सं॰ C

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ॥३।२।३१॥

अपरे तु

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः।

इति परिहारं ब्रुवते ॥३१॥

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् 5

॥३।२।३२॥

एतच्च

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम्।

भवतीत्यपरिहारः। कर्मादृष्टमुपभोगार्थं नियामकं भविष्यतीति न युक्तम्, समानत्वात्। तस्मात् पूर्व एव परिहारो 10

नान्तःशरीरवृत्तित्वान्मनसः .

इति ॥३२॥

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद् युगपदस्मरणम्

॥३।२।३३॥

यदि तर्हि ज्ञानसमवेतात्मप्रदेशसन्निकर्षस्यायौगपद्यादिति परिहारो नेष्यते, 15 प्राप्तः स्मृतीनां युगपदुत्पादः कारणस्य यौगपद्यादिति।

प्रणि.....णम्। न, अपेक्षाकारणस्यायुगपद्भावात्। प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्त्ते यौगपद्यप्रसङ्गः[१]। [२]यत्प्रणिधानाद्यात्ममनःसंयोगस्य सहकारि कारणं तन्न

---

१. प्राति...सङ्गः om J २. यतः C

युगपद्भवतीति अयुगपदुत्पत्तिः स्मृतीनाम्। यदि प्रणिधानाद्यपेक्षात्ममनःसंयोगो न युगपत्स्मृतिकारणम्, याः स्मृतयः प्रणिधानज्ञानादिसन्निधानमन्तरेण भवन्ति, तासां यौगपद्यं स्यात्? नानभ्युपगमात्। न हि प्रणिधानाद्यनपेक्षं स्मार्तमस्ति, सतः स्मृतिहेतोस्त्वसंवेदनात् प्रातिभेन समानाभिमानोऽयमिति। प्रातिभं तर्हि युगपद्भवितुमर्हति। न हि तस्यासन्निहितं कारणमिति। नोक्तोत्तरत्वात्। उक्तोत्तरमेतत्। न हि करणस्यानेकक्रियानिर्वृत्तिसामर्थ्यमस्ति। प्रातिभं चानेकं ज्ञानं भवदेकस्मिन्नर्थे भवेदनेकस्मिन् वा? तन्न तावदेकस्मिन् वैयर्थ्यात्। नानेकस्मिन् सामर्थ्याभावात्।

न चायं नियमः प्रत्ययानां यौगपद्यं न भवतीति ज्ञातुर्विकरणधर्मणो देहनानात्वे प्रत्ययययौगपद्यादिति। यदि च ज्ञानसमवेतात्मप्रदेशासन्निकर्षात् न स्मृतीनां युगपदुत्पत्तिः, ये संस्कारा एकदेशास्तेष्ववस्थितशरीरस्यानेकज्ञानसमवायादेकप्रदेशे युगपदनेकार्थस्मरणं स्यात्। न चैतदस्तीति। अतश्चापरिहार इति। अवस्थितशरीरस्य संस्काराः समानदेशा इत्ययुक्तम् आत्मप्रदेशानामद्रव्यान्तरत्वात्। एवं सति[१] सर्वसंस्काराणां समानदेशत्वे प्रत्ययययौगपद्यप्रसङ्गोऽपरिहार्यः।

संस्कारप्रत्यासत्त्या स्मृतियौगपद्यं न भवतीति। का प्रत्यासत्तिः? न हि संस्काराणां सन्निकृष्टविप्रकृष्टभावोऽस्ति समानदेशत्वात्। न ब्रूमः सन्निकृष्टता प्रत्यासत्तिरपि तु संस्कारस्य सहकारिकारणसमवधानं[२] प्रत्यासत्तिः शब्दवत्। यथा शब्दाः सन्तानवर्तिनः सर्व एवाकाशे समवयन्ति, समानदेशत्वेऽपि यस्योपलब्धेः कारणानि सन्ति स उपलभ्यते नेतरे, तथा संस्कारेष्वपीति॥३३॥

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः॥३।२।३४॥

पुरुषस्य ज्ञानम् इच्छादयोऽन्तःकरणस्येति कस्यचिद् दर्शनम्। तत् प्रतिषिध्यते,

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः।

---

१. एवं सति om C २. °कारणसन्निधानं C

ज्ञातुरेवेच्छादय इति सूत्रार्थः। यद्यन्तःकरणस्येच्छादयः स्युः, न प्रत्यक्षाः स्युः। न हीच्छादयोऽन्यत्र वर्तमाना अन्यस्य प्रत्यक्षा भवितुमर्हन्तीति। नित्यं चेच्छादयोऽप्रत्यक्षाः स्युः, मनोगुणानां नित्यमतीन्द्रियत्वात्। आरम्भनिवृत्त्योश्च प्रत्यगात्मनि दृष्टत्वात् परत्रानुमानम्॥३४॥

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः॥३।२।३५॥

प्रवृत्तिनिवृत्तिभ्यां सामानाधिकरण्यात् शरीरादिषु प्रसङ्गः[१] इति सूत्रार्थः॥३५॥

परश्चादिष्वारम्भनिवृत्तिदर्शनात्॥३।२।३६॥

इत्यनेकान्तो वाक्यार्थः॥३६॥

नियमानियमौ तु तद्विशेषकौ॥३।२।३७॥

प्रयुज्यमानभूतविषयत्वं प्रवृत्तिनिवृत्त्योर्नियमः। यानि भूतानि प्रयुज्यन्ते, तेषु प्रवृत्तिनिवृती भवतः, न सर्वेष्विति। यदि पुनर्ज्ञत्वात् भूतानां प्रवृत्तिनिवृत्ती स्याताम्, भूतमात्रे स्याताम्। यथा गुरुत्वादिभ्यो भूतगुणेभ्यः। यानि गुरुत्वादिमन्ति भूतानि तानि स्वगुणात् पतन्तीति नियमश्च दृष्टः। तस्मात् न भूतानि चेतनानीति।

एकशरीरे च ज्ञातृबहुत्वं निरनुमानम्। यस्य भूतानि चेतनानि तस्यैकशरीरे बहूनि भूतानीति बहवश्चेतनाः स्युः। भवन्तु बहवश्चेतनाः किं नो बाध्यत इति चेत्? न, बहुत्वे [२]व्यवस्थानुमानं न भवेत्। [३]व्यवस्थां तु न पश्यामः प्रत्ययानां

---

१. °ष्वप्रसङ्गः C २. प्रत्ययव्यवस्था for व्यवस्थानुमानं C ३. अव्यवस्थानं तु प° C

प्रतिसन्धानात्। सर्वः प्रत्ययः प्रतिसन्धीयमान एकस्मिन् कार्यकारणसङ्घाते दृष्ट इति। अन्यथाभिधानाच्च। हिताहितप्राप्तिपरिहारार्थः परिस्पन्दः प्रवृत्तिनिवृत्ती। भवता तु क्रियामात्रं क्रियोपरममात्रं चाश्रित्य **तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेध** इत्युक्तम्॥३७॥

यथोक्तहेतुत्वात्पारतन्त्र्यात्स्वकृताभ्यागमाच्च न मनसः॥३।२।३८॥

यथाविधे च प्रवृत्तिनिवृत्ती प्रयुज्यमानभूताधारे दृष्टे न तथाविधे[१] भूतमात्रे भवत इति। भूतेन्द्रियमनसां समानः प्रतिषेधः। मनस्तूदाहरणमात्रम्।

यथोक्तहेतुत्वात्पारतन्त्र्यात्स्वकृताभ्यागमाच्च न मनसः।

यथोक्तहेतुत्वादिति

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्

इत्येवमादीनामात्मप्रतिपत्तिहेतूनामप्रतिषेधात्। पारतन्त्र्यादिति परतन्त्राणि शरीरेन्द्रियमनांसि धारणप्रेरणव्यूहनक्रियासु प्रयत्नवशात् प्रवर्तन्ते। चैतन्ये पुनः स्वतन्त्राणि स्युः। स्वकृताभ्यागमाच्च। चेतनत्वात् शरीरादीनां तैः कृतं कर्म पुरुषेण भुज्यते इत्यकृतकृतागमनाशदोषप्रसङ्गः। अचेतनत्वे तु तत्साधनस्य पुरुषस्य स्वकृतकर्मफलोपभोग इति॥३८॥

परिशेषाद् यथोक्तहेतूपपत्तेश्च॥३।२।३९॥

अथायं सिद्धोपसंग्रहः

परिशेषाद् यथोक्तहेतूपपत्तेश्च।

---

१. °भूताधारस्ते न तथाभूते C

आत्मनो गुणो ज्ञानमिति प्रकृतम्। यथोक्तहेतूपपत्तेरिति आत्मप्रतिपादकानां हेतूनामप्रतिषेधात्। परिशेषादिति शरीरेन्द्रियमनसां प्रतिषेधात्, अन्यस्य च शिष्यमाणस्यासंभवात्, आत्मनश्च शिष्यमाणत्वात् तस्य गुणो ज्ञानमिति। उपपत्तेरिति वा स्वतन्त्रो हेतुरात्मनो नित्यत्व इति। कस्योपपत्तेः? संसारापवर्गयोरुपपत्तेरित्येवमादि **भाष्ये** ॥३९॥

स्मरणं त्वात्मनो ज्ञस्वाभाव्यात्॥३।२।४०॥ 5

स्म.....व्यात्॥४०॥

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसंबन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः॥३।२।४१॥

स्मृतिहेतूनामयौगपद्याद् युगपदस्मरणमित्युक्तम्। अथ केभ्यः स्मृतिरुत्पद्यत 10
इति स्मृतिकारणानामयौगपद्यप्रतिपादनार्थं प्रणिधानादिसूत्रम्॥

प्रणि.....त्तेभ्यः।

एवमुपपन्नमनित्या बुद्धिरिति॥४१॥

॥बुद्धेरात्मगुणत्वप्रकरणम्॥

[बुद्धेरुत्पन्नापवर्गित्वप्रकरणम्]

कर्मानवस्थायिग्रहणात्॥३।२।४२॥

अनित्यायां च बुद्धावुत्पन्नापवर्गित्वात् कालान्तरावस्थायित्वाच्च नित्यानां संशयः किमुत्पन्नापवर्गिणी बुद्धिः शब्दवदाहो कालान्तरावस्थायिनी कुम्भवदिति। उत्पन्नापवर्गिणीति युक्तम्। कः पुनरयमर्थ उत्पन्नापवर्गिणीति? अन्येभ्यो विनाशिभ्य आशुतरं विनश्यतीति। न त्वयमर्थ उत्पत्त्यनन्तरं ध्वंसत इति। कः पुनरत्र न्यायः? आशुतरविनाशिनी बुद्धिः जातिमत्त्वे सत्यस्मदादिप्रत्यक्षायाः व्यापकद्रव्यसमवायात्[१] शब्दवत्। प्रतिक्षणमपूर्वोत्पत्तावयुगपदुत्पत्तौ च करणत्वे सति प्रत्यर्थप्रकाशकत्वात्। यस्य प्रतिक्षणमपूर्वोत्पन्नपदार्थप्रकाशकत्वं करणत्वे सति तस्याशुविनाशित्वं दृष्टं यथा प्रदीपस्य। प्रतिक्षणमपूर्वोत्पन्नाश्च प्रध्वंसिनः पदार्थान् बुद्धिः प्रत्यर्थनियमेन प्रकाशयति। तस्मादियमप्याशुतरविनाशिनीति। अथ वा आशुतरविनाशिनी बुद्धिः गुणत्वे सत्यबाह्यकरणप्रत्यक्षत्वात् सुखादिवदिति। अस्यार्थस्य ज्ञापनार्थम्

कर्मानवस्थायिग्रहणात्।

इति सूत्रम्। यदि तर्ह्यनवस्थायिषु पदार्थेषु एवंभूता[२] बुद्धिः, अथ यदा अवस्थितं कुम्भादिकमर्थमुपलभते, तदा किं कुम्भवत् कालान्तरावस्थायिनी उताशुध्वंसिनीति? अवस्थितग्रहणेऽपि प्रत्यक्षनिवृत्तेः प्रध्वंसिनी, यदाप्यवस्थितं कुम्भादिकमर्थमुपलभते तदापि सन्तानेनैव बुद्धयो वर्तन्ते। कस्मात्? व्यवहिते प्रत्यक्षनिवृत्तेः। यदि कुम्भवत् कालान्तरावस्थायिनी बुद्धिरभविष्यत् व्यवहितेऽपि प्रत्यक्षमवास्थास्यत। न त्ववतिष्ठते। तस्मात् न कालान्तरावस्थायिनीति। स्मृतेरवतिष्ठत इति चेत्? यदि बुद्धिः प्रध्वंसिनी स्यात्, स्मृतिर्न स्यात्। न हि बुद्धिभेदे स्मृतिं पश्यामः

---

१. प्रत्यक्षत्वे सति व्यापकद्रव्याश्रितत्वात् C २. अनवस्थिता for एवंभूता C

यथा पुरुषान्तरबुद्धिषु। अस्ति च स्मृतिः। तस्मादवतिष्ठते बुद्धिरिति। नात एव। अत एव नावतिष्ठते[१]। न हि बुद्धाववस्थितायां स्मृतिः संभवति। स्मृतिर्नाम प्रत्यक्षबुद्धिनिरोधे तत्पूर्वको विषयप्रतिसन्धिः। यथेदमद्राक्षमिति। [२]अद्राक्षमिति च न प्रत्यक्षायां बुद्धाववस्थितायां युक्तमिति। अन्यतश्च तद्भावात् स्मृतिरलिङ्गमिति। येयं [३]स्मृतिर्बुद्ध्यवस्थानलिङ्गत्वेनाभ्युपगम्यते, नेदं लिङ्गम्, अन्यतस्तद्भावात्। अवतिष्ठते हि बुद्धिजः संस्कार इति। ततः प्रणिधानादिनिमित्तापेक्षात् स्मृतिरिति।

हेत्वभाव इति चेत्? अथ मन्यसे संस्कारात् स्मृतिर्न बुद्ध्यवस्थानादित्यत्र को हेतुः? स्मृतिरेव। यद्यवतिष्ठते बुद्धिः स्मृतिर्न स्यादित्युक्तम्॥४२॥

अव्यक्तग्रहणमनवस्थायित्वाद्विद्युत्सम्पाते रूपाव्यक्तग्रहणवत्
॥३।२।४३॥

यद्यनवस्थायिनी बुद्धिरव्यक्तं व्यक्तस्य ग्रहणं प्राप्नोति, यथा [४]विद्युता प्रकाशितानामर्थानामव्यक्तं ग्रहणमिति॥४३॥

हेतूपादानात्प्रतिषेद्धव्याभ्यनुज्ञा॥३।२।४४॥

न विरोधात् अव्यक्तग्रहणादनवस्थायिनी[५] बुद्धिरिति ब्रुवाणो यत् प्रतिषेद्धव्यमनवस्थायिनी बुद्धिरिति तदभ्यनुजानाति। तस्य चाभ्यनुज्ञानात् यदुक्तं कालान्तरावस्थायिनी बुद्धिरिति तद् बाधितं भवति। अव्यक्तग्रहणस्य चान्यनिमित्तत्वात् नाव्यक्तग्रहणाद् बुद्ध्यनवस्थानं सिध्यति। यत् तदव्यक्तं व्यक्तं च ग्रहणं न तद् बुद्धेरवस्थानानवस्थानाभ्याम्, अपि तु ग्रहणहेतोर्भेदादिति तदसंभवाच्च। न

---

१. नात एवानवस्थानात् C २. एतच्च न C ३. °बुद्धावस्थान° C ४. विद्युत्प्रकाशितानामव्यक्तग्र° C ५. अव° C

चाव्यक्तं नाम ग्रहणमस्ति। कस्मात्? अर्थग्रहणमात्रत्वाद् बुद्धेः। अर्थग्रहणमात्रं हि बुद्धिः। तच्चार्थग्रहणं सामान्यतो विशेषतश्च। यच्च सामान्यविषयं तत् सामान्यं प्रति व्यक्तम्। एवं विशेषविषयम्। एवं तद्वद्विषयमिति। तदिदमव्यक्तग्रहणं देशितं कतमस्मिन्[१] विषये बुद्ध्यनवस्थानकारितं स्यात्? लोकविरोध इति चेत्? यदि तर्हि व्यक्ताव्यक्तग्रहणे न स्यातां योऽयं व्यवहारो लोकेषु व्यक्तं पश्यामीति स कथम्? न अन्यथा तदुपपत्तेः। नायं सामान्यविशेषतद्वत्सु व्यक्ताव्यक्तग्रहणभेदोऽपि तु धर्मिणः सामान्यतोऽधिगतस्य विशेषत उपलिप्साद्वारकमव्यक्तग्रहणमिति। अनेकान्ताच्च। न चायमेकान्तोऽस्ति यद्विषयग्रहणहेतोर्ग्राह्यस्य चानवस्थानं तत्रा-व्यक्तग्रहणम् ॥४४॥

न प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम्॥३।२।४५॥

अनवस्थायित्वेऽपि यथा प्रदीपार्चिषां सन्तत्या वर्तमानानां ग्राह्यानवस्थानं ग्रहणानवस्थानं च भवति, भवति च व्यक्तं ग्रहणमर्चींषीति, यथा अर्चिःषु तथान्यत्रापीति व्यवस्थितं क्षणिका बुद्धिरिति॥४५॥

॥बुद्धेरुत्पन्नापवर्गित्वप्रकरणम्॥

[बुद्धेः शरीरगुणव्यतिरेकप्रकरणम्]

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥३।२।४६॥

शरीरगुणश्चेतना सति शरीरे भावादसति चाभावादिति। यच्च यस्मिन् सति भवति असति च न भवति तस्य तदिति विज्ञायते यथा रूपादय इति। न सति

---

१. कथमेकस्मिन् C

भावात् शरीरगुणत्वं चेतनायाः सिध्यति, सति भावस्यान्यगुणत्वेऽपि दर्शनात्। न तावत् संयोगविभागसंस्काराः कर्मगुणाः। अथ च सति कर्मणि भावोऽसति चाभाव[१] इति। संयोगविभागशब्देषु च सत्सु शब्दो भवति, अथ च न तद्गुण इति। तद्गुणत्वं च तत्रोपलब्ध्या सिध्यति। यद् यत्र वर्तमानमुपलभ्यते रूपादिकं तत् तस्य गुण इति। अथ सति भावादित्यनेन शरीरे चेतनोपलब्धिं ब्रूयात्? तस्याप्यसिद्धता-दोषः। न हि नः शरीरे चेतनोपलभ्यते। चेतनामात्रं तूपलभ्यते। तच्च सन्दिग्धं किं शरीरे उतान्यस्मिन्निति। उपेत्य शरीरे चेतनोपलब्धिं किं शरीरगुणश्चेतना, उत द्रव्यान्तरगुण इति।

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः।

इत्युक्तार्थं सूत्रम्॥४६॥

[२]यावच्छरीरभावित्वाद्रूपादीनाम्॥३।२।४७॥

न शरीरगुणश्चेतना

यावच्छरीरभावित्वाद्रूपादीनाम्।

दृष्टान्तसूत्रम्। वैधर्म्येण ये शरीरगुणा भवन्ति ते यावच्छरीरं वर्तन्ते, यथा रूपादयः। न तु यावच्छरीरं चेतना वर्तते। तस्मात् न तद्गुण इति। साधर्म्येण वा न तद्गुण इति[३], यथाप्सूष्णतेति। संस्कारवदिति चेत्? अथ मन्यसे यथा संस्कारः शरीरगुणः, न च यावच्छरीरं वर्तते, तथा चेतनापीति? न, कारणानुच्छेदात्। संस्कारस्य न शरीरमात्रं कारणं तस्य नोदनादिकारणसन्निधाने तदभावे च भावाभावौ युक्तौ, न तु चेतनायाः कारणसन्निधानम्। अतोऽयुक्तमेतदिति।

चेतनानिमित्तस्याप्यसन्निधानमिति चेत्? अथ मन्यसे यथैव संस्कारस्य कारणमसन्निहितम्, एवं चेतनाकारणमपीति? तदयुक्तं विकल्पानुपपत्तेः। यत्तच्छरीरे

---

१. असति चाभाव om J २. यावद्द्रव्यभावि॰ C ३. वा न तद्गुण इति om J

चेतनोत्पत्तिकारणं तत् किं शरीरस्थमुत द्रव्यान्तरस्थम्? शरीरस्थमपि च किं यावच्छरीरभावि उत नैमित्तिकमिति? यदि यावच्छरीरभावि, न कदाचिच्चेतनाहीनं शरीरमुपलभ्येत, तन्निमित्तस्य सन्निहितत्वात्। अथ नैमित्तिकम्, यत्तच्छरीरे चेतनोत्पत्तेर्निमित्तकारणं तत्रापि चेतनावत्प्रसङ्गः। अथ द्रव्यान्तरस्थम्, द्रव्यान्तरवृत्ति निमित्तं शरीरे चेतनां करोति न द्रव्यान्तरेष्वित्यत्रापि नियमहेतुर्वक्तव्यः। द्रव्यान्तरस्थं चैतत् नित्यमनित्यं वा; अनित्यमपि कालान्तरावस्थायि, प्रतिक्षणप्रध्वंसि वेति चेतनावत् प्रसङ्गः॥४७॥

न, पाकजगुणान्तरोत्पत्तेः॥३।२।४८॥

यच्च [१]मन्येत श्यामादिगुणं च द्रव्यं भवति, न च यावद्द्रव्यभाविनी श्यामेति, तच्च[२]

न, पाकजगुणान्तरोत्पत्तेः।

नात्यन्तं श्यामरूपोपरमे रूपान्तरानुत्पादः[३], चेतनोपरमस्त्वत्यन्तमिति॥४८॥

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः॥३।२।४९॥

इतश्च

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः।

यावत्सु द्रव्येषु पूर्वगुणप्रतिषेधस्तावत्सु प्रतिद्वन्द्विनो गुणान्तरस्य दर्शनम्, यथा श्यामादिनिवृत्तौ रक्तादीनामिति। न पुनः शरीरे चेतनाविपरीतं गुणान्तरमुपलभ्यते, चेतनामात्रोपरमस्त्वत्यन्तमिति। अथ मन्यसे शरीरेऽप्यचेतनत्वं नाम गुणान्तरमिति, तन्न, स्वरूपतोऽनिर्देशात्। यत् तदचेतनत्वं नाम, किं तत् चेतनाविपरीतं

१. मन्यते C २. तच्च न C ३. रूपान्तरोत्पत्तिः C

धर्मभूतं वस्तु, उत चेतनाप्रतिषेधमात्रमिति? यदि विपरीतं वस्तु, चेतनावत् संवेद्यं स्यात्। अथ चेतनाप्रतिषेधमात्रम्, तन्न गुण इति॥४९॥

शरीरव्यापित्वात्॥३।२।५०॥

इतश्च न शरीरगुणश्चेतना

शरीरव्यापित्वात्।

शरीरवत्[1] शरीरावयवाश्चेतनोत्पत्त्या व्याप्यन्ते। को व्याप्त्यर्थः? न कश्चित् शरीरावयवश्चेतनाहीनो[2] भवतीति, सर्वस्य चेतनानिमित्तत्वात् शरीरवत् शरीरावयवाश्चेतनाः प्राप्नुवन्ति। भवन्तु शरीरावयवा अपि चेतनाः? न, प्रत्ययव्यवस्थाप्रसङ्गात्। शरीरवत् शरीरावयवाश्चेतना इति प्रत्ययव्यवस्थानं स्यात्॥५०॥

न केशनखादिष्वनुपलब्धेः॥३।२।५१॥

न शरीरावयवाश्चेतना

न केश.....लब्धेः। इति दृष्टान्तसूत्रम्॥५१॥

त्वक्पर्यन्तत्वात् शरीरस्य केशनखादिष्वप्रसङ्गः॥३।२।५२॥

संयोगिद्रव्यं केशादय इति, न तु शरीरावयवा इति। तस्मादप्रसङ्गोऽयमिति॥५२॥

---

१. शरीरम् J २. चेतनानिमित्तं न J

शरीरगुणवैधर्म्यात्॥३।२।५३॥

इतश्च न शरीरगुणश्चेतना

शरीरगुणवैधर्म्यात्।

द्वये शरीरगुणा भवन्ति बाह्यकरणप्रत्यक्षाश्च रूपादयः, अतीन्द्रियं च गुरुत्वम्। विधान्तरं तु चेतना न बाह्यकरणप्रत्यक्षा, अन्तःसंवेद्यत्वात्। नातीन्द्रिया, मनोविषयत्वात्। तस्मात् न शरीरगुण इति॥५३॥

न रूपादीनामितरेतरवैधर्म्यात्॥३।२।५४॥

यथेतरेतरविधर्माणो रूपादयो न शरीरगुणत्वमतिवर्तन्ते तथा रूपादिवैधर्म्येऽपि न चेतना शरीरगुणत्वं हास्यतीति॥५४॥

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः॥३।२।५५॥

अप्रत्यक्षत्वाच्च। द्वये शरीरगुणा भवन्तीत्युक्तः सूत्रार्थः। रूपादीनामितरेतरवैधर्म्यमननुसंहितं चाव्यावृत्तं चेति वैधर्म्यमात्रम्। अन्वयव्यतिरेकि तु चेतनायाः शरीरगुणत्वसाधनं न भवति। तस्मादसममेतत्।

ये हेतवोऽनेन [१]प्रकरणेन लभ्यन्ते तेषां प्रयोगः। न शरीरगुणश्चेतना निमित्तान्तराभावे विरोधिगुणादर्शने च सति अयावद्द्रव्यभावित्वाद् अप्सु औष्ण्यवदिति। शरीरव्यापित्वादिति न साधनम्, किं तु शरीरे चेतनां ब्रुवतो दोषोऽनेकचेतनत्वप्रसङ्गः। न शरीरगुणश्चेतना, बाह्यकरणाप्रत्यक्षत्वात् सुखादिवदिति। अथेदं

---

१. प्रकारेण C var.

प्रकरणं निर्णीतार्थम्, कस्मात् पुनरारब्धमिति? बहुपरीक्ष्यमाणं तत्त्वं निश्चिततरं भवतीत्यत आरभ्यत इति॥५५॥

॥बुद्धे: शरीरगुणव्यतिरेकप्रकरणम्॥

[मन:परीक्षाप्रकरणम्]

ज्ञानायौगपद्यादेकं मन:॥३।२।५६॥

परीक्षिता बुद्धि:। मनोऽवसरप्राप्तं परीक्ष्यते। तत् प्रतिशरीरमेकमनेकमिति विचारे

ज्ञानायौगपद्यादेकं मन:।

अयुगपत् ज्ञानानि भवन्तीत्येतत् प्रत्यक्षम्। एतच्च मनस एकत्वं साधयति। कथमिति? यदि बहूनि मनांसि स्यु:, प्रतीन्द्रियं मनस: संबन्ध इति युगपदनेकार्थसन्निधाने युगपदनेकविज्ञानानि भवेयु:। यत्त्वेकेन्द्रियग्राह्येष्वर्थेषु विज्ञानानामयुगपज्जन्म तन्न मनस एकत्वे लिङ्गमन्यतस्तद्भावात्। अन्यतो हि करणत्वात् तद्भवतीत्युक्तम्॥५६॥

न युगपदनेकक्रियोपलब्धे:॥३।२।५७॥

इति। शेषं **भाष्ये**[1]॥५७॥

अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात्॥३।२।५८॥

अस्योत्तरद्वारकं सूत्रम्

---

१. इति भाष्यम् for शेषं भाष्ये J

अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात्।

यथालातस्य भ्रमतो विद्यमानः क्रमो नोपलभ्यते, तथा बुद्धीनामाशुभावात् विद्यमानः क्रमो नोपलभ्यत इति। न चास्त्युभयपक्षसंप्रतिपन्ना बुद्धीनां युगपदुत्पत्तिर्यया बहुत्वं मनसः प्रतिपद्येमहीति॥५८॥

यथोक्तहेतुत्वाच्चाणु॥३।२।५९॥

य एवैकत्वे हेतुर्मनस उक्तोऽनेनैवाणु मनोऽध्यवसातव्यमिति॥५९॥

॥मनःपरीक्षाप्रकरणम्॥

[शरीरस्यादृष्टनिष्पाद्यत्वप्रकरणम्]

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः॥३।२।६०॥

मनसः खलु भोः सेन्द्रियशरीरे वृत्तिः। शरीरे विचार्यमाणे मन एव विचारितं भवति। अतः पुनः शरीरं विचार्यते, किमयं शरीरसर्गः कर्मनिरपेक्षैर्भूतैरारभ्यते, आहोस्वित् सापेक्षैरिति विप्रतिपत्तेः संशयः। श्रूयते खल्वत्र विप्रतिपत्तिरिति। तत्रेदं तत्त्वम्।

पूर्व.....पत्तिः। पूर्वकृतमिति[१] पूर्वशरीरे या प्रवृत्तिः वाग्बुद्धिशरीरारम्भलक्षणा तत् पूर्वकृतम्। तस्य फलं तज्जनितौ धर्माधर्मौ। तयोरनुबन्धः आत्मसमवेतयोः [२]प्रतिबद्धयोरवस्थानं विपाककालस्यानियमादिति। अनियतो विपाककाल इहामुत्र जात्यन्तरे चेति। तेनावस्थितेन प्रयुक्तेभ्यो भूतेभ्यः पृथिव्यादिभ्यः तस्य शरीरस्योत्पत्तिर्न स्वतन्त्रेभ्यः। कस्मात् पुनः कर्म धर्माधर्मसंज्ञकमुत्पत्तिसमकालं

---

१. पूर्वकृतमिति om C २. प्रतिबद्धयो om C

फलं न ददाति? क एवमाह न ददातीति? विपाककालस्यानियमात्। यदा अशेषकारणसन्निधानं भवति, सन्निधानेऽपि च यदा कारणान्यप्रतिबद्धानि भवन्ति तदा ददात्यपि[१]। यदा पुनर्न ददाति, तदा विपच्यमानकर्माशयप्रतिबन्धात्। यो विपच्यमानकर्माशयो भवति यस्य धर्माधर्मसमाख्यातोऽनुपभुक्तफलः तेन प्रतिबन्धात् विद्यमानमपि कर्म फलं न ददातीति। यानि च प्राण्यन्तराणि तस्य कर्मणः समानोपभोगीनि, तेषां विपच्यमानैः कर्माशयैः प्रतिबन्धात् यानि वा सत्त्वान्तराणि तस्य कर्मणः फलभागीनि तस्मिन् देशे तेषां तत्रासन्निधानात्। यानि वा प्राण्यन्तराणि भागीनि तस्य कर्मणस्तत्कर्मभिः प्रतिबन्धात् , तस्य वा कर्मणः सहकारिधर्माधर्मलक्षणं निमित्तं नास्तीत्यतो वा फलस्यानारम्भः, तस्य वा सहकारिणः कारणस्य प्रतिबन्धात् सत्त्वान्तरकर्मणां वा सहकारिणामनुत्पत्तेः, सत्त्वान्तरकर्मणां वा सहकारिणां प्रतिबन्धात् न सर्वदा फलं धर्माधर्मौ प्रयच्छत इति। दुर्विज्ञेया च कर्मगतिः। सा न शक्या मनुष्यधर्मणा अवधारयितुम्। आकृतिमात्रं तूक्तमिति।

कः पुनरत्र न्यायः कर्मतन्त्राणि भूतानि शरीरमारभन्ते, न निरपेक्षाणीति? अयं न्यायोऽभिधीयते। पुरुषगुणविशेषप्रेरितभूतपूर्वकं शरीरं पुरुषार्थक्रियासामर्थ्यात्। यद् यत् पुरुषार्थक्रियासमर्थं तत्तत् पुरुषगुणविशेषप्रेरितभूतपूर्वकं दृष्टं यथा रथादि पुरुषगुणेन प्रयत्नेन प्रेरितैर्भूतैरारभ्यमाणं पुरुषार्थक्रियासमर्थं दृष्टम्। तथा च शरीरम्। तस्मादिदमपि सापेक्षैर्भूतैरारभ्यत इति सुखदुःखनिमित्तत्वाद् घटादिवदिति। इतश्च कार्यत्वाद् रथादिवदिति। बाह्यकरणग्राह्यत्वे सति रूपादिमत्त्वाद् घटादिवदेव ॥६०॥

भूतेभ्यो मूर्त्युपादानवत् तदुपादानम् ॥३।२।६१॥

अत्र **नास्तिक** एवमाह—

---

१. ददात्येव C

भूतेभ्यो मूर्त्युपादानवत् तदुपादानम्।

यथा कर्मनिरपेक्षेभ्यो भूतेभ्यो निर्वृत्ता[१] मूर्तयः सिकताशर्करागैरिकाञ्जनप्रभृतयः पुरुषार्थकारित्वादुपादीयन्ते, तथा शरीरसर्गोऽपीति। पुरुषार्थक्रियासामर्थ्यादित्यस्य हेतोरनैकान्तिकत्वद्वारकं सूत्रम्। साधनपक्षे दृष्टान्तमात्रत्वादसंबद्धम्[२] ॥६१॥

न, साध्यसमत्वात्॥३।२।६२॥

अथायं पक्षः कर्मनिरपेक्षाणि भूतानि शरीरमारभन्ते पुरुषार्थक्रियासामर्थ्यात् सिकतादिवदिति। एतच्च,

न, साध्यसमत्वात्।

यथैव शरीरसर्गः कर्मनिरपेक्षैर्भूतैरारभ्यत इति साध्यं तथा सिकतादीनामकर्मनिमित्तः सर्गः साध्य इति। सिकतादीनामपि च कर्मनिमित्तः सर्ग इत्येतस्मादेव हेतोः सिध्यतीति। यथा चोभयपक्षसंप्रतिपन्नो रथादिदृष्टान्तः पुरुषगुणविशेषप्रेरितभूतपूर्वकोऽस्ति, न तथा अकर्मनिमित्तसर्गपक्षे दृष्टान्तोऽस्तीति॥६२॥

नोत्पत्तिनिमित्तत्वान्मातापित्रोः॥३।२।६३॥

विषमश्चायमुपन्यासः भूतेभ्यो मूर्त्युपादानवदिति

नोत्पत्तिनिमित्तत्वान्मातापित्रोः।

मातापितृशब्देन लोहितरेतसी बीजभूते गृह्येते। तत्र पित्रोश्च पुत्रफलानुभवनीये कर्मणी सत्त्वस्य च गर्भवासानुभवनीयं कर्म मातुर्गर्भाशये शरीरोत्पत्तिं प्रयोजयन्ति[३]।

---

१. निर्वर्त्त्या C २. असिद्धम् C ३. °जयति C

तत्र चोपपन्नं बीजानुविधानम्। बीजानुविधानाच्च यज्जातीयौ तस्य पितरौ तज्जातीयः [१]स भवतीति ॥६३॥

तथाहारस्य ॥३।२।६४॥

उत्पत्तिनिमित्तत्वादिति प्रकृतम्। एतदपि सिकतादिभिर्वैधर्म्यमेवोच्यते। अशितपीतमाहारः। तस्य पाकाद् रसद्रव्यं निर्वर्तते। तन्मातृशरीरे उपचीयते। गर्भशरीरे चोपचितं कललादिभावेनोपचीयमानं कर्मसापेक्षैर्भूतैः [२]पेश्यादिभावमापद्यते। यदि पुनः कर्मनिरपेक्षाणि भूतानि स्युः, स्थाल्यादिगतमिवान्नं पच्येत। न त्विदमस्ति। तस्मात् सापेक्षाणीति ॥६४॥

प्राप्तौ चानियमात् ॥३।२।६५॥

कर्मनिरपेक्षाणि भूतानि शरीरमारभन्त इति सर्वो दम्पत्योः संयोगः पुत्रादिफलकः स्यात्। कर्मसापेक्षेषु भूतेषु उपपन्नो नियमाभाव इति ॥६५॥

शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म ॥३।२।६६॥

सर्वात्मभिः संबन्धात् साधारणविग्रहवत्त्वप्रसङ्गः, नियमहेत्वभावादिति चेत्? अथ मन्यसे शरीरं सर्वात्मभिः संबध्यते संयोगजेन संयोगेन क्रियाजेन वा, तत्र शरीरादिगतो न कश्चित् नियमहेतुरस्ति, येन शरीरमेकस्यात्मनो व्यवतिष्ठेत। न च पुरुषगतः कश्चिदतिशयो विद्यते येन शरीरमेकस्य पुरुषस्योपभोगसाधनं भवेत्।

---

१. संभव॰ C २. पाण्यादि॰ C

अस्ति च नियमः। तस्माद् वक्तव्यो नियमहेतुरिति। एतस्योत्तरद्वारकं सूत्रम्—

शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म।

येनैव कर्मणा शरीरमुत्पाद्यते, तदेव [१]तच्छरीरं नियमयति। अकर्मनिमित्ते तु शरीरसर्गे यथोक्तो दोष इति। कर्मणस्तत्स्थता कुत इति चेत्? अथ मन्यसे यदि कर्म नियामकं शरीरसर्गस्य, [२]कर्मणि कुतो नियम इति? न स्वसंयोगोत्पत्तिनियमात्, यो यस्यात्मनः संयोगः, तस्मात् यत् कर्मोपजायते तत् तस्य भवतीति। संयोगे कुतो नियम इति? यथैव कर्मणि पर्यनुयोगो न व्यावर्तते तथा संयोगेऽपीति? न, मनोनियमहेतुत्वात् यस्यात्मनो यन्मनः तेन यः संयोगो जन्यते स तस्य भवतीति। मनस्यपि तुल्यम्। मनसस्तर्हि सर्वात्मभिः संबन्धात् किं नियामकमिति? कर्मणो नियामकत्वात्[३]। यन्मनो यदीयेन कर्मणा उपनिबद्धं तदीयं तद् भवतीति। सर्गादौ कथमिति चेत्? सर्गादेरनभ्युपगमाददेश्यम्। अनादिः संसारः पूर्वाभ्यस्तसूत्रे प्रतिपादितमेतत्। आदिमति संसार एष देश्यो नानादाविति॥६६॥

एतेनानियमः प्रत्युक्तः॥३।२।६७॥

कः पुनरयं नियमः? यथैकस्यात्मनः शरीरं तथा सर्वात्मनामिति नियमः, अन्यस्यान्यथा अन्यस्यान्यथेत्यनियमो भेदो व्यावृत्तिदृष्टः शरीरभेदः प्राणिनामनेकरूपः। स च कर्मनिरपेक्षैर्भूतैः शरीरारम्भे न युक्तः। कर्मणां तु भेदात् शरीराणि भिद्यन्त इति युक्तम्।

उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः। द्वे शरीरस्य प्रकृती व्यक्ता चाव्यक्ता च। तत्राव्यक्तायाः कर्मसमाख्यायाः प्रकृतेरुपभोगात् प्रक्षयः। प्रक्षीणे च कर्मणि

---

१. संयोगं for तच्छरीरं C २. अथ कर्मणि C ३. कर्मैव for कर्मणो नियामकत्वात् C

विद्यमानान्यपि भूतानि न शरीरमुत्पादयन्तीति उपपन्नोऽपवर्गः। कर्मनिरपेक्षेषु भूतेषु कस्य प्रक्षयात् मोक्षमाणा अपवृज्येरन्, भूतलक्षणाया प्रकृतेरनुच्छेदात् ॥६७॥

तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे ॥३।२।६८॥

तददृष्टकारितमिति चेत्? अथ मन्यसे अदृष्टकारिता शरीरोत्पत्तिः, अदृष्टशब्देनादर्शनमुच्यते, अदर्शनमदृष्टमिति। सर्गादौ प्रधानं पुरुषार्थेन हेतुना प्रवर्तते, तत् प्रवर्तमानं महदादिभावेन शरीरमुत्पादयति। उत्पन्ने शरीरे द्रष्टा दृश्यं पश्यति। दृश्यं च द्वेधा विषयाः[१] नानात्वं च प्रकृतिपुरुषयोः। दृष्टेन[२] पुनः प्रधानं चरितार्थत्वात् न प्रवर्तत इति। तदेवमदर्शनं शरीरसर्गे हेतुस्तद्भावभावित्वादिति।

एतस्मिन्[३] खलु दर्शने पुनस्तत्प्रसङ्गोऽपवर्गे— या च प्राक् प्रवृत्तेर्दर्शननिवृत्तिरदर्शनाभिमता या चोत्तरकालं निवृत्ते सर्गे नैतयोरदर्शनयोः कश्चित् विशेषः। अदर्शननिमित्ता चेत् शरीरोत्पत्तिर्भवति, तेन यथा प्राक् नानात्वदर्शनात् प्रधानं पुरुषार्थं प्रवर्तते, तथा अपवर्गेऽपीति[४]। न चैवमभ्युपगम्यते। तस्मात् नादर्शनं सर्गे कारणमिति।

चरितार्थता विशेषो भविष्यतीति न युक्तम्, चरितार्थानामचरितार्थानां च भूतानां पुनः पुनरारम्भदर्शनात् आद्येन शरीरेण [५]शब्दाद्युपलब्धेः कृतत्वाद् द्वितीयादिशरीरं शब्दाद्युपलब्धिसाधनं न स्यात्। भवति च शब्दाद्युपलब्धिसाधनं द्वितीयादिशरीरम्, तेन गम्यते चरितार्थान्यपि भूतानि पुनः शरीरमारभन्त इति। पुरषार्थेन च हेतुना पुनः शरीराण्यारभन्ते। पुरुषार्थश्च पुरुषप्रधाननानात्वदर्शनम्। तस्य चाकरणादनर्थकः शरीरारम्भो भवतीति[६]।

---

१. विषयो C २. दृष्टे पुनः J ३. खलु दर्शने C ४. तथापवृक्तेऽपि प्रवर्तते C
५. रूपाद्यु° C ६. भवेदिति C

दिदृक्षाविशेषोऽदर्शनमिति चेत्? अथ मन्यसे नादर्शनं दर्शनाभावः, किं तु दिदृक्षा दर्शनमित्युच्यते। सा चापवृक्ते प्रधाने दृष्टत्वात्[१] न भवतीति? न, प्राक् प्रवृत्तेस्तदभावात्। यावत् प्रधानं महदादिभावेन न परिणमते तावद् दिदृक्षा नास्ति, असती कथं कारणं भविष्यति प्रवृत्तेरिति। सर्वशक्तिमत्त्वात् तदाप्यस्तीति चेत्? अथ मन्यसे सर्वाः कारणशक्तयः प्रधाने विद्यन्ते। तदिदमात्मभूताभिः [२]कारणशक्तिभिः सर्वशक्तिमत् प्रधानम्। सर्वशक्तिमत्त्वाच्च प्रागपि प्रवृत्तेः प्रधाने दिदृक्षास्तीति। न, अपवर्गाभावप्रसङ्गात्। दिदृक्षावन्नानात्वदर्शनमप्यस्तीत्यपवर्गाभावः। विद्यमाने च नानात्वदर्शने प्रधानस्य प्रवृत्तिरयुक्ता। यदा च नानात्वदर्शनं तदापि दिदृक्षा न व्यावर्तते। न हि तदात्मानं जहातीति वः पक्षः। दिदृक्षायां च सत्यां कुतोऽपवर्गः? दिदृक्षानानात्वदर्शने च विरुद्धे कथमेकस्यैकस्मिन् काले भवतः? अज्ञानमदर्शनमिति च ब्रुवाणो विकल्पतः पर्यनुयोज्यः। किं ज्ञानाभावोऽज्ञानम्, उत मिथ्याज्ञानमज्ञानम्? किं चातः? यद्यभावः, अपवर्गो न प्राप्नोति, प्राक्प्रवृत्तेरपवृक्ते च प्रधाने ज्ञानाभावस्य तुल्यत्वात्। अथ मिथ्याज्ञानम्? तन्न युक्तम्। प्राक् प्रवृत्तेस्तदभावात्। कथमभावः? बुद्धिधर्मकत्वात्। अपवृक्ते च प्रधाने न बुद्धिरस्ति, कथं तद्धर्मोऽज्ञानं भविष्यतीति?

सत्कार्यवादाभ्युपगमात् सर्वदा अस्तीति ब्रुवाणो मोक्षं बाधते। कथम्? तत्त्वज्ञानस्य सर्वदा भावात् तत्त्वज्ञानमिथ्याज्ञानयोश्च सहानवस्थानात् प्रवृत्तेस्तादर्थ्यमयुक्तम्। न हि भवतां पक्षे किञ्चिदसद्भवति, सद्वात्मानं जहातीति सर्वार्थानां संभवात् प्रधानं किमर्थं प्रवर्तत इति वक्तव्यम्। अथाभिव्यक्तिनिमित्तं प्रवृत्तिं प्रतिपद्येथाः? [३]साप्यभिव्यक्तिः प्राक् प्रवृत्तेः सती आहो असतीति पूर्ववत् प्रसङ्गः।

यच्च प्रागनुपलब्धं पश्चादुपलभ्यते तत् किमुपजातविशेषमुतानुपजातविशेषमिति? यदि विशेषोपजननात् पश्चादुपलभ्यते व्याहतं भवति। अथानुपजात

---

१. दिदृक्षा for दृष्टत्वात् C २. कारकश° J ३. सा चाभि° J

विशेषम्, कस्मात् प्राङ् नोपलभ्यत इति वक्तव्यम्। सत्कार्यवादाभ्युपगमे च विस्फूर्जतापि न विशेषोपजनः शक्यः प्रतिपादयितुम्। न च विशेषोपजनप्रत्याख्याने वस्तुन उपलब्ध्यनुपलब्धिभेदविषयत्वं शक्यमवगमयितुम्। कर्मनिमित्ते तु सर्गे दृश्यदर्शनार्थं भूतानि शरीरं पुरुषगुणप्रेरितान्यारभन्त इति युक्तम्। न ह्यनुत्पन्ने शरीरे द्रष्टा निरायतनो दृश्यं पश्यतीति।

अपरे त्वदृष्टं परमाणुगुणं वर्णयन्ति, तेषामपि पुनस्तत्प्रसङ्गोऽपवर्ग इति परमाणुगुणस्यादृष्टस्य शरीरोत्पत्तिनिमित्तत्वात् पुनस्तत्प्रसङ्गोऽपवर्गे इति॥६८॥

मनःकर्मनिमित्तत्वाच्च संयोगाव्युच्छेदः॥३।२।६९॥

परमाणवः [१]स्वकाददृष्टात् संहन्यन्ते। संहताश्च द्व्यणुकादिना प्रक्रमेण शरीरमुत्पादयन्ति। तन्मनः स्वगुणाददृष्टादुपसर्पतीति। उपसर्पणहेतोरदृष्टस्य नित्यत्वात् किंकृतमपसर्पणमिति? कर्माशयक्षये तु कर्माशयान्तरादपसर्पणमिति युक्तं प्रायणम्। उभयहेतुर्मनोवृत्तिरदृष्टो भविष्यतीति न युक्तमेकस्य जीवनप्रायणहेतुत्वानुपपत्तेः॥६९॥

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः॥३।२।७०॥

नित्यत्वप्रसङ्ग इति प्रायणानुपपत्तिं ब्रूमः। तदिदमुक्तमुपसर्पणहेतोरदृष्टस्य नित्यत्वादुपसर्पणहेतोश्चादृष्टस्याभावात्। यादृच्छिके तु प्रायणे प्रायणभेदो न स्यात्॥७०॥

---

१. स्वगुणाद° C

अणुश्यामतानित्यत्ववदेतत् स्यात्॥३।२।७१॥

अणु ... स्यात् इति परिहारं वर्णयन्ति। यथा किलाणौ श्यामता नित्या अथ [१]चाग्निसंयोगेन प्रतिषिध्यते, एवमणुमनसोरदृष्टः सम्यग्ज्ञानेन प्रतिषेत्स्यत[२] इति॥७१॥

नाकृताभ्यागमप्रसङ्गात्॥३।२।७२॥

एतच्च न, अकृताभ्यागमप्रसङ्गादिति अनुपपन्नप्रमाणस्याभ्युपगमोऽकृताभ्युपगम इति सूत्रार्थः। यथाश्रुति वा सूत्रार्थः। अकृतस्य कर्मण उपभोगप्रसङ्गादिति। एतच्च विस्तरेणोक्तं **भाष्य** इति॥७२॥

॥शरीरस्यादृष्टनिष्पाद्यत्वप्रकरणम्॥

आत्मा शरीरं करणमर्थो बुद्धिर्मनस्तथा।
यद् यथा वस्तुतत्त्वेन तत् तथेहोपपादितम्॥

॥इति औद्द्योतकरे न्यायवार्त्तिके तृतीयाध्यायस्य द्वितीयाह्निकम्॥
॥तृतीयाध्यायः समाप्तः॥

---

१. अथापि संयो° C २. प्रतिषिध्यते C

चतुर्थाध्याये प्रथमाह्निकम्

[प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम्]

प्रवृत्तिर्यथोक्ता ॥४।१।१॥

मनसोऽनन्तरं प्रवृत्तिरवसरप्राप्ता परीक्षितव्येत्यत आह–

प्रवृत्तिर्यथोक्ता।

प्रवृत्तिर्यथोक्ता तथा परीक्षितव्येत्यर्थः सूत्रस्य। किं पुनः प्रवृत्तेः परीक्षितव्यमिति? यावद्धर्माधर्माश्रयं परीक्षितं सर्वा सा प्रवृत्तेः परीक्षा। तत्र प्रवृत्तिर्द्वयी[1] भवति, कारणरूपा कार्यरूपा च। तत्र कारणरूपा प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति। कार्यरूपा धर्माधर्मसमाख्या दुःखादिसूत्रे वर्णिता। तत्र कारणरूपायाः प्रवृत्तेर्विंशतिधा भेदः[2]। कार्यरूपा तु प्रवृत्तिरेकद्रव्याभ्युदयस्य प्रतिनियमात्, अवस्थिता विपाककालस्य नियमात्, आत्मसमवायाद् गुणभूता, अनित्या प्रायणादिदर्शनात्। तदुक्तं विपच्यमानकर्माशयप्रक्षये प्रायणमिति। जन्मनः कारणं पूर्वकृतफलानुबन्धात् तदुत्पत्तिरिति। संसारापवर्गहेतुभूता तद्भावे संसारः तदभावेऽपवर्ग इत्येवमाद्युक्तम् ॥१॥

तथा दोषाः ॥४।१।२॥

प्रवृत्त्यनन्तरं तर्हि दोषा अभिधीयन्तामित्यत आह–**त.....षाः**। उक्ता इति। बुद्धिसमानाश्रयत्वादात्मगुणाः। संसारस्यानादित्वात् अनादिना प्रबन्धेन प्रवर्तन्ते,

---

१. °द्वैधा C २. द्रः भा १.१.२.

सम्यग्ज्ञानाच्च मिथ्याज्ञाननिवृत्तौ निवर्तन्त इत्युत्पादनिरोधधर्मकाः। कार्यत्वे सत्यस्मदादीन्द्रियान्तरप्रत्यक्षत्वाद् अचाक्षुषप्रत्यक्षत्वाच्च गुणाः॥२॥

॥प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम्॥

[दोषत्रैराश्यप्रकरणम्]

तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात्॥४।१।३॥

प्रवर्तनालक्षणा दोषा[1] इत्युक्तम्। तथा च मानादयः प्रवर्तयन्तीति लक्षणसामान्यात् तेऽप्युपसंख्येया इति? नोपसंख्यायन्ते संगृहीतत्वात्। केन संग्रहः? प्रवर्तनालक्षणा दोषा इत्यनेनैव।

तत्त्रै.....वात्। तेषां तु लक्षणेन संगृहीतानां तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात्। तेषां दोषाणां त्रयो राशयः त्रयः पक्षाः संभवन्ति, रागपक्षो द्वेषपक्षो मोहपक्ष इति। तत्र रागपक्षः, कामो मत्सरः स्पृहा तृष्णा लोभ इति। द्वेषपक्षः, क्रोध ईर्ष्या असूया द्रोहोऽमर्ष इति। मोहपक्षः, मिथ्याज्ञानं विचिकित्सा मानः प्रमाद इति।

कामो मत्सर इत्येवमादि किं पर्यायवचनम्, आहो अर्थान्तरभाव इति? किं चातः? यदि पर्यायवचनम्, त्रयो राशय इति न युक्तम्। न हि पर्यायशब्देषु राशित्वं संभवति। न हि इन्द्रशक्रपुरन्दरशब्दानां राश्यर्थः कश्चिदस्ति। अर्थान्तरभावः, तदा विशेषो वाच्य इति। अर्थान्तरभाव इति ब्रूमः। तत्र कामः स्त्रीगतोऽभिलाषः। या स्त्रीगता प्रार्थना सा काम इति। एवं चाहुः— नाकामयमानो मण्डयत इति। अक्षीयमाणवस्त्वपरित्यागेच्छा मत्सरः। यद्वस्तु दीयमानमुपभुज्यमानं वा न क्षीयते तदपरित्यागेच्छा, सा मत्सर इति। यथा राजकीयोदपानान्मोदकं पा इति। अस्वव-

---

१. न्या. सू. १.१.१८

स्त्वादानेच्छा स्पृहा। यद्वस्तु स्वं न भवति, तस्या या आदित्सा सा स्पृहा। पुनर्भव-प्रतिसन्धानहेतुभूता तृष्णा। या पुनर्भवप्रार्थना सा तृष्णा इति। प्रमाणविरुद्धपरद्रव्या-दानेच्छा लोभः। प्रमाणविरुद्धं परद्रव्यादानं कुर्वाणो लुब्ध इत्युच्यत इति। एषां च सामान्यं रागः। सामान्येन विशेषः संगृहीत इति।

शरीरेन्द्रियाधिष्ठानवैकृत्यहेतुः क्रोधः। संजाते यस्मिन् शरीरेन्द्रियाधिष्ठानानि विकृतानि भवन्ति स क्रोध इति। साधारणे वस्तुनि पराभिनिवेशप्रतिषेधेच्छा ईर्ष्या। यदपरिगृहीतं साधारणं वस्तु, तस्मिन् यः पराभिनिवेशप्रतिषेधाभिप्रायः सा ईर्ष्या। परगुणाक्षमता असूया। या परगुणान् श्रुत्वा अक्षमतोपजायते, सा असूया। परापकारेच्छा द्रोहः। अशक्तस्यापि या परं प्रत्यपचिकीर्षा सा द्रोहः। अपकारा-सहिष्णुता अमर्षः। या कृतापकारस्यासहिष्णुता सोऽमर्षः। अस्य च द्वेषः सामान्यं तेन संग्रहः।

विपर्ययज्ञानं मिथ्याज्ञानम्। अतस्मिंस्तदिति प्रत्ययो विपर्यय इति। संशयो विचिकित्सा किंस्विदिति। विद्यमानाविद्यमानगुणाध्यारोपेणात्मोत्कर्षप्रत्ययो मानः, अहो अहमस्मीति यथा। शक्तस्य कर्तव्याकरणं प्रमादः। यः शक्तः स्वकर्तव्यं न करोति स प्रमाद इति। अस्य च सामान्यं मोहः। तेन संग्रह इति। अतः त्रैराश्यात् नोपसंख्यायन्त इति।

कुत एतत्? लोकतस्तदधिगतेः। लोकत एते कामादय एवम्भूतेष्वभिप्रायेषु प्रयुज्यन्ते। नाभिप्रायमात्रे। न हि भिक्षां प्रार्थयमानः कामयत इति भवति। लक्षणस्य तर्हि अभेदात् त्रित्वमनुपपन्नम्, एकं रागद्वेषमोहाः लक्षणाभेदात् रागभेदव-दिति? नानुपपन्नम्, रागद्वेषमोहार्थान्तरभावात्। सत्यपि लक्षणस्याभेदे आन्तर्गणिकं भेदकं लक्षणमस्ति। तदुपपत्तेः त्रित्वम्। यथा रागलक्षणेन संगृहीतानां कामादीना-मिति। न च सामान्यमेकत्वे कारणम्। सामान्यस्यैवाभावः स्यात्, यदि रागद्वेष-मोहानामेकत्वं स्यात्। समानमेतल्लक्षणमित्येतदेव न स्यादिति न ह्येकस्य सामान्यं भवति।

किं पुनरान्तर्गणिकं लक्षणमिति? सक्तिलक्षणो रागः। यो विषयेष्वभिष्वङ्गः स रागः। अमर्षलक्षणो द्वेषः। असहिष्णुता दुःखस्य दुःखसाधनानां वेति द्वेषः। मिथ्याप्रतिपत्तिलक्षणो मोहः। यथावस्थिते पदार्थे अतथाभावप्रतिपत्तिर्या। एतच्च रागद्वेषमोहानां व्यवच्छेदकं लक्षणमात्मप्रत्यक्षमिति॥३॥

नैकप्रत्यनीकत्वात्॥४।१।४॥

एकं रागद्वेषमोहा एकप्रत्यनीकत्वात्, विभागवदिति। यथा विभाग एकेनैव संयोगेन विरुध्यमान एको भवति, तथा तत्त्वज्ञानेनैकेन विरुध्यन्ते रागादयः। तस्मादेकं रागादय इति॥४॥

व्यभिचारादहेतुः॥४।१।५॥

एकप्रत्यनीकाश्च रूपादयः एकाग्निसंयोगविरोधिनः। न चैषामेकत्वमिति अनैकान्तिकम्। एकयोनित्वादेकं रागादयः शब्दवदित्यप्यनेनैव प्रत्युक्तम्। एकयोनयो रूपादयो न चैषामेकत्वमिति॥५॥

तेषां मोहः पापीयान् नामूढस्येतरोत्पत्तेः॥४।१।६॥

सति चार्थान्तरत्वे

तेषां.....पत्तेः। तेषां मोहः पापीयान्। पापतमः पापिष्ठ इति वा प्राप्ते द्वौ द्वावभिप्रेत्य पापीयानित्युच्यते। रागमोहयोर्मोहः पापीयान्। द्वेषमोहयोर्मोहः पापीयानिति। कस्मात्? नामूढस्येतरोत्पत्तेः। नामूढस्येतरौ भवतः। मूढः कुप्यति, मूढो रज्यते, मूढो मुह्यतीति। तत्त्वज्ञानाच्च मोहनिवृत्तौ रागादिनिवृत्तिरित्येक-

प्रत्यनीकता। यस्मात् तत्त्वज्ञानात् निवृत्ते मोहे न रागद्वेषौ भवतः, अत एक-प्रत्यनीकता। न पुनरेकत्वादिति। एवं च कृत्वा दुःखादीनामुत्तरोत्तरापाये तदनन्तरा-भावादपवर्ग इति सिध्यति॥६॥

[1]निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः॥४।१।७॥

प्राप्तस्तर्हि

निमि.....भ्यः। अदोषो मोहः, दोषनिमित्तत्वाद् रूपादिवदिति॥७॥

न दोषलक्षणावरोधान्मोहस्य॥४।१।८॥

नात्र कार्यकारणभावेन पदार्थानां तथाभावोऽतथाभावो वा सिध्यति किन्तु लक्षणस्याभेदादिति। दोषलक्षणं च मोहेऽस्तीति दोषो मोहः॥८॥

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः॥४।१।९॥

तुल्यजातीयानामनेकविधविकल्पो निमित्तनैमित्तिकभावो दृष्ट इति। यथा बुद्धिर्बुद्ध्यन्तरस्य निमित्तम्, तुल्यजातीया चेति। तुर्यादयो द्रव्यस्य निमित्तं द्रव्य-जातीयाः।

नोदनाभिघातसंयुक्तसंयोगाः संस्कारश्च गुणाः

इति॥९॥

॥दोषत्रैराश्यप्रकरणम्॥

---

१. °त्तिकनिर्देशान्मोहार्था° J

[प्रेत्यभावपरीक्षाप्रकरणम्]

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥४।१।१०॥

परीक्षिता दोषाः। दोषानन्तरं प्रेत्यभावः। तस्यासिद्धिरात्मनो नित्यत्वात्। नित्य आत्मा। न जायते न म्रियते। उभयं च प्रेत्यभावः, मृत्वा पुनर्जन्म। तत्रायं सिद्धार्थानुवादः,

आ.....द्धिः। नित्यः सन् आत्मा प्रैति जायते चेति। किमुक्तं भवति म्रियत इति? पूर्वोत्पन्नाभिः शरीरेन्द्रियबुद्धिवेदनाभिर्वियुज्यत इति। किं चोक्तं भवति जायत इति? [१]अपूर्वाभिर्निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिः संबध्यत इति। न पुनर्जन्ममरणे आत्मन उत्पादनिरोधौ नित्यत्वादात्मनः। नित्य आत्मेत्ये-तत्पूर्वाभ्यस्यसूत्रे प्रतिपादितम्। यस्य पुनरात्मन उत्पादनिरोधौ जन्ममरणे तस्याकृता-भ्यागमकृतनाशदोषप्रसङ्ग इत्युक्तम्

शरीरदाहे पातकाभावात् [न्या. सू. ३.१.४]

इति सूत्रं वर्णयद्भिरिति॥१०॥

व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यात्॥४।१।११॥

कथमुत्पत्तिरिति चेत्? किंधर्मकात् कारणादिदं शरीरेन्द्रियमहाभूतादि व्यक्तमुत्पद्यत इति?

व्य.....ण्यात्। किं पुनर्व्यक्तम्? उपलब्धिलक्षणप्राप्तं रूपादियुक्तं द्रव्यम्। तत्सामान्यात् परमाणुलक्षणमपि पृथिव्यादिकारणं व्यक्तमित्युच्यते। किं पुनः सामान्यम्? रूपादियोगः। रूपादिसामान्यात् परमाणवोऽपि व्यक्ता इत्युच्यन्ते।

---

१. र्वोत्पन्नाभि॰ C

रूपादियुक्तेभ्यः परमाणुभ्यो घटादि गवादि व्यक्तमुत्पद्यत इति। कः पुनरत्र न्यायः? प्रत्यक्षप्रामाण्यात् दृष्टा रूपादिमद्भ्यो रूपादिमतामुत्पत्तिरिति। नानेकान्तात्। नायमेकान्तो रूपादिमद्भ्य एव रूपादिमत उत्पत्तिरिति, अरूपाद् अपि संयोगाद् रूपादिमदुत्पद्यमानं घटादि गवादि दृष्टमिति। न, सूत्रार्थापरिज्ञानात्। नायं सूत्रार्थो रूपादिमद् रूपादिमत एवोत्पद्यत इति। अपि तु रूपादिमत्सामग्रीपूर्वकं गवादि व्यक्तमिति सूत्रार्थः। एवं च सति नानेकान्तोऽस्ति। न ह्यरूपायाः सामग्र्या रूपादिमत् कार्यमिति॥११॥

न घटाद् घटानिष्पत्तेः॥४।१।१२॥

सजातीयात् सजातीयमुत्पद्यत इति मत्वा प्रतिषेधः। न, सूत्रार्थापरिज्ञानादिति। न ब्रूमः सर्वं सर्वस्य कारणमिति, यश्च सर्वं सर्वस्य कारणमभ्युपेयात् स एवं प्रत्यवस्थेयो न घटाद् घट उत्पद्यमानो दृष्ट इति॥१२॥

व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः॥४।१।१३॥

अपि तु

व्य.....षेधः। यदपि घटादिकं व्यक्तमुत्पद्यते तदपि व्यक्तादेव कपालादेः। व्यक्ताच्चोत्पद्यमानं घटादि न किञ्चिद् बाध्यत इति। रूपादिमत्सामग्रीपूर्वकं गवादि व्यक्तं

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्

घटवदिति। शब्दवद् वा वैधर्म्येण। तदेतत् तत्त्वम्॥१३॥

॥प्रेत्यभावपरीक्षाप्रकरणम्॥

[शून्यतोपादानप्रकरणम्]

अभावाद् भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्॥४।१।१४॥

अतः परं **प्रावादुकानां** दर्शनान्युपन्यस्य कानिचित् प्रतिषिध्यन्ते, कानिचिद् अभ्यनुज्ञायन्त इति। तत्र तावत्,

अभा.....वात्। अभावाद् भावो जायत इति कस्यचिद् दर्शनम्। तत्र च न्यायं ब्रुवते, नानुपमृद्य प्रादुर्भावादिति। न किलाविनष्टे कारणे कार्यमुत्पद्यत इति। यथा बीजविनाशोत्तरमङ्कुरः प्रादुर्भवति। यदि च बीजविनाशोऽङ्कुरकारणं नाभविष्यत्, अविनष्टेऽपि बीजेऽङ्कुरोऽभविष्यत्। न चैवमस्ति। तस्माद् बीजविनाशोऽङ्कुरकारण-मिति॥१४॥

व्याघातादप्रयोगः॥४।१।१५॥

उपमृद्य प्रादुर्भवतीति व्याघातः। यदुपमृद्नाति तदस्ति। न ह्यसदुपमर्दकारण-मिति। यच्च प्रादुर्भवति तन्नास्ति, न हि सदुत्पद्यत इति। तदिदमुपमृद्नाति प्रादुर्भवति चेति व्याहतमुच्यते। को व्याघातः? सहासंभवः। यद्युपमृद्नाति, न जायते। अथ जायते, नोपमृद्नाति॥१५॥

नातीतानागतयोः कारकशब्दप्रयोगात्॥४।१।१६॥

अतीतेऽनागते च कारकशब्दाः प्रयुज्यमाना दृष्टाः। अतीते तावद् भिन्नं कुम्भमनुशोचति, भिन्नस्य कुम्भस्य कपालानि, अभूत् कुम्भ इति। अनागतेऽपि, पुत्रो जनिष्यते, जनिष्यमाणं पुत्रमभिनन्दति, जनिष्यमाणस्य पुत्रस्य नाम करोतीति।

अजाताः पुत्राः स्थविरं तापयन्तीति बहुलं प्रयोगा भाक्ताः। एवमयं प्रादुर्भविष्यन्नङ्कुर उपमृद्नातीत्युच्यत इति। कः पुनरुपमर्दार्थः? आनन्तर्यसामर्थ्यादनन्तरोत्पत्त्यर्थः। यस्माद् बीजोपमर्दादनन्तरमयं प्रादुर्भवतीति। अत्रोक्तं व्याघातादिति। नाजातेनोपमर्दो नोपमर्दासमर्थो जायत इति। यदपीदमुच्यते, अतीते चानागते च कारकशब्दा प्रयुज्यन्त इति, न प्रयोगो वार्यते। अपि त्वसतः कारणादुत्पत्तिर्न युक्तेति। कारकशब्दानां च त्रैकालिकः प्रयोगः। तदुक्तं प्रमाणसामान्यचिन्तायां वृक्षस्तिष्ठतीति यथा। यत् पुनरेतत् आनन्तर्यसामर्थ्यादुपमृद्य प्रादुर्भवतीत्युच्यत इति, न बीजनाशोऽङ्कुरस्य कारणमपि तु व्याहतव्यूहानां बीजावयवानां पूर्वव्यूहनिवृत्तौ व्यूहान्तरमुत्पद्यत इति व्यूहान्तराद् अङ्कुर आविर्भवतीति। न चाविनष्टे पूर्वव्यूहे व्यूहान्तरेण शक्यते भवितुमित्यानन्तर्यं प्रादुर्भावार्थः। एवं च बीजोपादानं युक्तमिति॥१६॥

न विनष्टेभ्योऽनिष्पत्तेः॥४।१।१७॥

अस्य चार्थस्य ज्ञापनार्थं सूत्रम्,

न विन.....पत्तेः। इति। न हि बीजविनाशोऽङ्कुरस्य कारणम्, अपि तु बीजावयवाः पूर्वव्यूहपरित्यागेनेत्यर्थः सूत्रस्य॥१७॥

क्रमनिर्देशादप्रतिषेधः॥४।१।१८॥

पूर्वं बीजविनाशः पश्चादङ्कुरोत्पत्तिरिति सूत्रार्थः। अभावश्चेद् अङ्कुरोत्पत्तिकारणं स्यात् सर्वं सर्वस्मादुत्पद्येत, अभावस्य निर्विशेषत्वात्। न हि शालिबीजे विनष्टे काचिदन्वयशक्तिरस्ति। अनन्वितं च कार्यं सर्वाभिः शक्तिभिरुत्पद्येत। अन्वितं तु दृष्टम्। तस्मान्नाभावः कारणमिति सूत्रार्थः॥१८॥

॥शून्यतोपादानप्रकरणम्॥

[ईश्वरोपादानताप्रकरणम्]

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्॥४।१।१९॥

अपर इदानीमाह **ईश्व.....नात्।** पुरुषोऽयं समीहमानो नावश्यं समीहाफलमाप्नोति। तेनावगम्यते पराधीनं पुरुषस्य कर्मफलाराधनमिति। निरपेक्षश्चेत्, पुरुषः कर्मफलोपभोगे समर्थः स्यात्। न कस्यचिदफला क्रिया भवेत्। न कश्चिद् दुःखं कुर्यादिति। उभयं च दृष्टम्। तस्मादीश्वरः कारणमिति॥१९॥

न पुरुषकर्माभावे फलानिष्पत्तेः॥४।१।२०॥

न .... त्तेः इति। ईश्वरः कारणं भवेत्। पुरुषकर्मान्तरेणापि सुखदुःखोपभोगो भवेत्[१]। ततश्च क्रियाविलोपोऽनिर्मोक्षप्रसङ्गश्च[२]। ईश्वरस्यैकरूपत्वादेकरूपा क्रियेति। अथेश्वरः कारणभेदानुविधानेन कार्यं निर्वर्त्तयति, यदपेक्षते तन्न करोतीति प्राप्तम्। न हि कुलालो दण्डादीन् करोति। एवं [३]कर्माद्यपेक्षश्चेदीश्वरो जगदुत्पत्तिकारणं स्यात्, कर्मणि ईश्वरोऽनीश्वरः स्यात्॥२०॥

तत्कारितत्वादहेतुः॥४।१।२१॥

न ब्रूमः कर्माद्यनपेक्ष ईश्वरः कारणमिति। अपि तु पुरुषकर्म ईश्वरोऽनुगृह्णाति। कोऽनुग्रहार्थः? यद् यथाभूतं यस्य च यदा परिपाककालः, तत् तथा तदा च विनियुङ्क्ते इति। यः पुनरीश्वरं कर्मानपेक्षं कारणत्वेन प्रतिपद्यते, तस्यानिर्मोक्षत्वादिदोषः। सापेक्षे त्वीश्वरे यथोक्तो न दोषः। शेषं **भाष्ये।**

---

१. °पभोगौ स्याताम् C २. कर्मलोपोऽनिर्मोक्षश्च C ३. कर्मसापे° C

तत्कारितत्वादित्येवं ब्रुवता निमित्तकारणमीश्वर इत्यभ्युपगतं भवति। यच्च निमित्तं तदितरयोः समवायिकारणासमवायिकारणयोरनुग्राहकम्। यथा तूर्यादि तन्तूनां तत्संयोगानां चेति। ईश्वरश्चेज्जगतो निमित्तम्, यज्जगतः साक्षादुपादानकारणं तत् किम्? उक्तं पृथिव्यादि परमसूक्ष्मं परमाणुसंज्ञितं [१]व्यक्तं कारणमिति।

व्यक्तकारणाभ्युपगमे च सति निमित्तविशेषविप्रतिपत्तौ ईश्वरप्रक्रिया, यस्मान्निमित्तकारणे विप्रतिपद्यन्ते[२], केचित् कालं केचिदीश्वरं केचित् प्रकृतिमिति। तदेवं निमित्तविशेषविप्रतिपत्तौ किं न्याय्यमिति? ईश्वर एव न्याय्यम्। तत्र हि प्रमाणानि अविघातेन प्रवर्तन्त इति।

अस्तित्वासिद्धिरिति चेत्? अथ मन्यसे सिद्ध ईश्वरस्यास्तित्वे कारणान्तरनिराकरणं निमित्तकारणभावश्च[३] सिध्येत्। तत्तु असिद्धम्। तस्मादयुक्तमेतदिति। न, अत एव तदुपपत्तेः। येनैव न्यायेन ईश्वरस्य कारणत्वं सिध्यति, तेनैवास्तित्वमिति। न ह्यविद्यमानं कारणमिति। कः पुनरीश्वरस्य कारणत्वे न्यायः? अयं न्यायोऽभिधीयते। प्रधानपरमाणुकर्माणि प्राक् प्रवृत्तेर्बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते, अचेतनत्वाद् वास्यादिवदिति। यथा वास्यादि बुद्धिमता तक्ष्णा अधिष्ठितमचेतनत्वात् प्रवर्तते, तथा प्रधानपरमाणुकर्माणि अचेतनानि प्रवर्तन्ते। तस्मात् तान्यपि बुद्धिमत्कारणाधिष्ठितानीति।

तत्र प्रधानकारणिकास्तावत् पुरुषार्थमधिष्ठायकं प्रधानस्य वर्णयन्ति। पुरुषार्थेन प्रयुक्तं प्रधानं प्रवर्तत इति। पुरुषार्थश्च द्वेधा भवति, शब्दाद्युपलब्धिर्गुणपुरुषान्तरदर्शनं चेति। तदुभयं प्रधानप्रवृत्तिं विना न भवतीति? न, प्राक् प्रवृत्तेस्तदभावात्। यावत् प्रधानं महदादिभावेन न परिणमते, तावन्न शब्दाद्युपलब्धिरस्ति। न गुणपुरुषान्तरोपलब्धिरिति हेत्वभावात् प्रधानप्रवृत्तिर्न युक्ता। अथास्ति, नासदात्मानं लभते न सन्निरुध्यत इति? एवं च सति विद्यमानः पुरुषार्थः प्रधानं प्रवर्तयतीति न पुरुषार्था प्रधानस्य प्रवृत्तिः। न हि लोके यद् यस्य भवति स तदर्थं पुनर्यतत

---

१. द्रव्यमिति C २. °कारणं प्रतिपद्यन्ते J ३. °कारणाभा° C

इति। सततं च प्रवृत्तिः प्राप्नोति कारणस्य सन्निहितत्वात्। पुरुषार्थः प्रवृत्तेः कारणमिति पुरुषार्थस्य नित्यत्वात् सततं प्रवृत्त्या भवितव्यमिति। अथ विद्यमानोऽपि न प्रवर्तयति, न तर्हि पुरुषार्थः कारणमिति। यस्याभावात् प्रधानं न प्रवर्तते यस्य च भावात् प्रवर्तते तत् कारणमिति। अथ विद्यमानः प्रतिबन्धान्न प्रवर्तयति, प्रतिबन्धापगमस्याशक्यत्वात् सततमप्रवृत्तिः। यत्तत् प्रतिबन्धकारणं पुरुषार्थस्य तस्यापगमः कर्तुमशक्यः, न तदात्मानं जहातीति प्रतिबन्धकस्य च नित्यत्वात् नित्यमप्रवृत्त्या भवितव्यम्। [१]यां च भवन्तः सत्त्वरजस्तमसां साम्यावस्थां प्रकृतिं वर्णयन्ति सा कुतो निवर्तत इति वक्तव्यम्। न चानिवृत्तायां साम्यावस्थायां वैषम्येण शक्यं भवितुम्।

अथाङ्गाङ्गीभावस्यानियमात् वैषम्यं भवतीति तत्रापि भवन्तं पर्यनुयुञ्ज्महे, कथं साम्येनावस्थितमधिकं हीनं वा भवति, नापूर्वोपचयो विद्यते न पूर्वहानमस्तीति। यांश्च शब्दादीन् प्रागनुपलब्धस्वरूपान् पुरुष उपलभते बुद्धिरुपलम्भयतीति ते किमुपजातविशेषा उतानुपजातविशेषा इति? यद्युपजातविशेषा उपलभ्यन्त इति, व्याहतं भवति नासदात्मानं लभत इति। अथानुपजातविशेषा एवोपलभ्यन्ते तथाप्यनिवृत्तो व्याघातः प्रधानं [२]पुरुषार्थं प्रति प्रवर्तयतीति। सोऽयं प्रधानवादः यावद् यावद् विचार्यते, तावत् तावत् प्रमाणवृत्तं बाधत इति।

येऽपि परमाणून् पुरुषकर्माधिष्ठितान् जगतः कारणत्वेन वर्णयन्ति तान् प्रतीदमुच्यते, परमाणवः प्रवर्तन्त इति सततं प्रवृत्त्या भवितव्यम्। अथ काल-विशेषापेक्षाः प्रवर्तन्ते, परमाणुभिः कालो व्याख्यातः। यथा अचेतनत्वात् परमाणवो बुद्धिमन्तमधिष्ठातारमपेक्षन्ते तथा कालोऽपीति, न हि तत्राचेतनत्वं निवर्तत इति। [३]क्षीरादिवदचेतनस्यापि प्रवृत्तिरिति चेत्? यथा अपत्यभरणार्थं क्षीरादेरचेतनस्य प्रवृत्तिरेवं परमाणवोऽचेतनाः सन्तः पुरुषार्थं प्रवर्तिष्यन्त इति। तन्न युक्तम्। साध्यसमत्वात्। यथैव परमाणवः स्वतन्त्राः प्रवर्तन्त इति साध्यम्, तथा क्षीराद्यचेतनं

---

१. यदा C २. पुरुषार्थं प्रव॰ C ३. सांख्यकारिका ५७

स्वतन्त्रं प्रवर्तत इति। यदि च क्षीरादि स्वतन्त्रं प्रवर्तेत मृतेष्वपि पूर्ववत् प्रवर्तेत। न तु प्रवर्तते। अतोऽवगम्यते बुद्धिमत्कारणाधिष्ठितं तदपि। न चायं हेतुः। तस्मान्निवर्तते। एवं यावद् यावदचेतनं प्रवर्तते सर्वं [१]तत् बुद्धिमत्कारणाधिष्ठितमिति।

अयमपरो हेतुः। बुद्धिमत्कारणाधिष्ठितं महाभूतादि व्यक्तं सुखदुःखादिनिमित्तं भवति रूपादिमत्त्वात् तुर्यादिवदिति। धर्माधर्मौ बुद्धिमत्कारणाधिष्ठितौ पुरुषस्योपभोगं कुरुतः करणत्वाद् वास्यादिवदिति। आत्मैवाधिष्ठाता धर्माधर्मयोर्भविष्यतीति चेत्? यस्य तौ धर्माधर्मौ स एवाधिष्ठाता भविष्यतीति न युक्तम्। प्राक् [२]कायकरणोत्पत्तेः तदसंभवात्। यावत् [३]कायकरणसंघातो नोपजायते पुरुषस्य तावदयमज्ञः [४]उपसन्धातापि उपलभ्यानपि तावद् रूपादीन् नोपलभते कुतोऽनुपलभ्यौ धर्माधर्मावुपलप्स्यत इति। यदि च पुरुषः स्वतन्त्रः प्रवर्तते, न दुःखं कुर्यात्। न हि कश्चिदात्मनो दुःखमिच्छतीति। यश्चात्मनोऽङ्गोपघातं शिरश्छेदादि वा करोति, सोऽपि तद्वैकल्ये प्रायणे वा हितबुद्धिः प्रवर्तत इति।

यदि पुनर्धर्माधर्माभ्यामेवाधिष्ठिताः परमाणवः प्रवर्तेरन्, न युक्तमिदम्, अचेतनत्वात्। न हि किञ्चिदचेतनं स्वतन्त्रमधिष्ठायकं दृष्टमिति। अभ्युपगम्यापि [५]ब्रूमः, धर्माधर्मयोः परमाणुषु वृत्तिसामर्थ्यम्, न करणस्य केवलस्य क्रियानिवृत्तावसामर्थ्यात्। न हि करणं केवलं क्रियां निर्वर्तयदुपलभ्यत इति।

अथ परमाण्वपेक्षाभ्यां धर्माधर्माभ्यां क्रिया जन्यते[६], एतदपि न युक्तम्, अदृष्टत्वात्। न हि कर्मकरणाभ्यां क्रियां जन्यमानां क्वचिदपि पश्याम इति आत्मा कर्ता भविष्यतीति। उक्तमेतत्, अज्ञत्वादिति। अकारणोत्पत्तिर्भविष्यतीति न युक्तमदृष्टत्वादिति। न चान्या गतिरस्ति। तस्माद् बुद्धिमत्कारणाधिष्ठिताः परमाणवः कर्माणि च प्रवर्तन्त इति।

---

१. तत् चेतनाधि° C २, ३. कार्यक° C ४. उपसन्धातापि नास्ति J ५. च for ब्रूमः C ६. क्रियते C

क्रियानावेशादकारणमिति चेत्— अथ मन्यसे ये खलु कर्तारो भवन्ति ते क्रियाविष्टा दृष्टाः कुलालादय इति, क्रियारहितश्चेश्वरः। तस्मादकारणमिति। न, विकल्पानुपपत्तेः। ईश्वरो निष्क्रिय इति कां क्रियामधिकृत्योच्यते? द्वयी हि नः शास्त्रे क्रिया, उत्क्षेपणादिका चाख्यातशब्दवाच्या च। यद्याख्यातशब्दवाच्यामधिकृत्योच्यते, तदा असिद्धो हेतुः, स्वातन्त्र्याभ्युपगमात्। स्वातन्त्र्यं हि भगवति नित्यमस्ति। किं पुनः स्वातन्त्र्यम्? अन्यकारकाप्रयोज्यत्वमितरकारकप्रयोक्तृत्वं च। तदुक्तं कारकाणि वर्णयद्भिरिति[१]। अथोत्क्षेपणादिकां क्रियामधिकृत्योच्यते निष्क्रिय इति, तदा अनेकान्तः। क्रियावच्च कारणं दृष्टं निष्क्रियं चेति। कदाचिद् द्रव्याणि उपरतक्रियाणि द्रव्यमारभन्ते। संयोगात् निवृत्ते कर्मणि संयोगोपकरणानि द्रव्याणि द्रव्यमारभन्त इति निष्क्रियाणामारम्भः। यदा च युगपद् बहूनि द्रव्याणि संहन्यन्ते, तदा असाधारणकार्यव्यावृत्तेभ्यः संयोगेभ्य एकमेव द्रव्यमुत्पद्यते। एकावयविविभागे तु द्रव्यनिवृत्तौ शेषाणि द्रव्यान्तराणि द्रव्यमारभन्त इति निष्क्रियाणामारम्भः। कानिचित् पुनः क्रियावन्तमारभन्ते। तद् यथान्यतरकर्मजात् संयोगात् निवृत्ते कर्मणि इतरस्मिन् द्रव्ये कर्मनिवृत्तिसमकालमेव द्रव्यमुत्पद्यते तदा क्रियावता द्रव्येणारम्भात् क्रियावतामारम्भः। विरोधश्चोत्क्षेपणादिकायाः क्रियाया अनभ्युपगमादिति।

न कारणमीश्वरः विकल्पानुपपत्तेः। कर्ता चेदीश्वरो भवति किं सापेक्षः करोति, उत निरपेक्ष इति। किं चातः? यदि सापेक्षः, यदपेक्षते[२] तस्याकर्ता इति। एवमन्यत्रापि प्रसङ्गः। तदपि साधनं येन करोति तस्याकर्ता इति। अथायं किंचिदनपेक्ष्य करोति, तद्वदन्यत्रापि प्रसङ्गः। अथायं सर्वमनपेक्षः[३] करोति, एवमपि पुरुषकर्माफलं प्रसज्यते, अनिर्मोक्षप्रसङ्गश्च। यश्चाकर्मनिमित्ते सर्गे दोषः स इहापि प्रसज्यत इति? निरपेक्षकर्तृत्वस्यानभ्युपगमात् धर्माधर्मवैफल्यादिदोषो नास्ति। न चाकर्मनिमित्ते सर्गे दोष इति। येन करोति तस्याकर्तेति चेत्? न,

---

१. द्रः वा २.१.१६ २. येन करोति C ३. वैयर्थ्यादि॰ J

अनेकान्तात्। नायमेकान्तोऽस्ति येन करोति स तन्न करोतीति। यथानेकशिल्प-पर्यवदातः पुरुषः करणान्तरोपादानो वास्यादि करोति, वास्याद्युपादानो दण्डादि करोति, तदुपादानो घटादीन्। न च पर्यायकर्तृत्वे सति अकर्तृत्वम्, तथेश्वरोऽपि धर्माधर्मोपादानः शरीरसुखादिकं, आत्ममनःसंयोगशुद्धाशुद्धाभिसन्धिसाधनश्च धर्माधर्मौ, सुखदुःखस्मृत्यपेक्षः तत्साधनाद्यपेक्षश्च शुद्धमशुद्धं वाभिसन्धिमिति। यदा करोति तदा साधनस्याकर्तेति चेत्, अथ मन्यसे यदायं साध्यं किञ्चिद् वस्तु[१] निर्वर्तयति तदा येन साधयति तस्याकर्ता प्रसज्यत इति? नैतदेवम्। न ब्रूमः, सर्वानर्थान् अयम् एकस्मिन् काले करोतीति, अपि तु पर्यायेण। पर्यायकर्तृत्वे चायमदोषः। यदादौ करोति तस्यासाधनोत्पत्तिरिति चेत्, अथ मन्यसे यदि शरीरादिकर्तृत्वं धर्माधर्माद्यपेक्षस्य, अथ यदादौ करोति कथं तत्? आदेरनभ्युपगमाद् अचोद्यम्[२]। अनादिरयं संसार इति प्रतिपादितमेतत्। धर्माधर्मसाफल्यं चैवम्। यदि चानादिः संसारः सापेक्षश्च कर्ता, एवं प्राण्यन्तरसमवायिनां धर्माधर्माणां साफल्यम्।

अथायमीश्वरः कुर्वाणः किमर्थं करोतीति? लोके हि ये कर्तारो भवन्ति ते किञ्चिद् वस्तूद्दिश्य प्रवर्तन्त इदमाप्स्यामि इदं हास्यामि चेति। न पुनरीश्वरस्य हेयमस्ति दुःखाभावात्; नोपादेयं वशित्वात्।

क्रीडार्थमित्**येके**। एके तावद् ब्रुवते क्रीडार्थमीश्वरः सृजतीति। नन्वेदमयुक्तम्। क्रीडा हि नाम रत्यर्थं भवति विना क्रीडया रतिमविन्दताम्। न च रत्यर्थी भगवान्, दुःखाभावादित्युक्तम्। दुःखिनश्च सुखोपगमार्थं क्रीडन्ति।

विभूतिख्यापनार्थमित्**यपरे**। जगतो वैश्वरूप्यं ख्यापनीयम् इतीश्वरः प्रवर्तत इत्यपरे मन्यन्ते। एतदपि तादृगेव। न हि विभूतिख्यापनेन कश्चिदतिशयो लभ्यते, न चास्याख्यापनेन किंचिद्धीयत इति।

---

१. दृष्टं C २. अदेश्यमेतत् C

किमर्थं तर्हि करोति? तत्स्वाभाव्यात् प्रवर्तत इत्यदुष्टम्। यथा भूम्यादीनि भूतानि धारणादिक्रियां तत्स्वाभाव्यात् कुर्वन्ति, तथेश्वरोऽपि तत्स्वाभाव्यात् प्रवर्तते। प्रवृत्तिस्वभावकं तत्तत्त्वमिति। तत्स्वाभाव्यात् सततं प्रवृत्तिरिति चेत्? अथ मन्यसे यदि प्रवृत्तिस्वभावकं तत् तत्त्वं प्रवृत्तिनिवृत्ती न प्राप्नुतः। न हि प्रवृत्तिस्वभावके तत्त्वे निवृत्तिर्युज्यत इति क्रमेण चोत्पत्तिर्न प्राप्नोति, तत्त्वस्यैकरूपत्वात्। इदमिदानीं भवत्विदं मा भूदित्येतन्न युक्तम्। न ह्येकरूपात् कारणात् कार्यभेदं पश्याम इति। नैष दोषः, बुद्धिमत्त्वविशेषणात्। बुद्धिमत्तत्त्वमित्येतत् प्रतिपादितम्। बुद्धिमत्तया च विशिष्यमाणं सापेक्षम्। सापेक्षं च न सर्वं प्रवर्तते। न च सर्वमेकस्मिन् काले उत्पादयति यस्य कारणसान्निध्यं तद् भवति। यदसन्निहितकारणं तन्न भवतीति। न च सर्वस्य युगपत् कारणसान्निध्यमस्ति इत्यतः सर्वस्य युगपदुत्पादो न प्रसक्तः। स खलु प्रवर्तमानो धर्माधर्मयोः परिपाककालमपेक्षते कारणोत्पादं तद्भागिनां च सत्त्वानां तत्र सन्निधानं तद्भागिसत्त्वधर्माधर्मपरिपाकं च तदप्रतिबन्धं चेति।

यत् तदीश्वरस्यैश्वर्यं किं तन्नित्यमनित्यं वेति? यद्यनित्यं तस्य कारणं वक्तव्यमिति। यस्य चानित्यमैश्वर्यं तस्य कारणतो भवति अणिमादि[१]। एवमन्येषामपीत्यनेक ईश्वरः प्रसज्यते। अथानेकत्वे किं बाध्यत इति? एकस्मिन् वस्तुनि व्याहतकामयोरीश्वरयोः प्रवृत्तिर्न प्राप्नोति। अथैकमितरोऽतिशेते, योऽतिशेते स ईश्वरो नेतर इति। अथ नित्यमैश्वर्यं धर्मवैयर्थ्यम्। न तद् धर्माद् भवतीति। नित्यमिति ब्रूमः। न च धर्मवैयर्थ्यं दोषस्तस्यैव। यो धर्मः स ईश्वरे। नासौ तत्रैश्वर्यं करोति। किं तु प्रत्यात्मवृत्तीन् धर्माधर्मसन्निचयान् अनुगृह्णाति। न च ईश्वरे धर्मोऽस्तीत्यचोद्यमेतत्।

तत्स्वभावानवधारणात् सन्देहः, ईश्वरः किं द्रव्यमाहो गुणादीनामन्यतम इति। द्रव्यं बुद्धिगुणत्वाद् द्रव्यान्तरवदिति। बुद्धिगुणत्वात् तर्हि आत्मान्तरमिति?

---

१. अणिमादेः C

नात्मान्तरं गुणभेदात्। यथा गुणभेदे सति पृथिव्यादयो नात्मानः, तथा गुणभिन्न ईश्वरः। तस्माद् असावपि नात्मेति।

कः पुनरस्य गुणभेदः? **एके** तावद् ब्रुवते, धर्मज्ञानवैराग्यैश्वर्याण्यतिशयवन्ति तस्मिन्निति। नित्यत्वमतिशयः। एतत् तु न बुध्यामहे यथा बुद्धिमत्तायामीश्वरस्य प्रमाणसद्भावो नैवं धर्मादिनित्यत्वे प्रमाणमस्तीति। न चाप्रामाणकं प्रतिपत्तुं शक्यमिति। अतिशयस्तु बुद्धिनित्यत्वं गुणभेदः। तत्र नित्या बुद्धिः, संख्यादयश्च सामान्यगुणाः। षड्गुण आकाशवदीश्वर इति।

अथास्य बुद्धिनित्यत्वे किं प्रमाणमिति? नन्विदमेव। बुद्धिमत्कारणाधिष्ठिताः परमाणवः प्रवर्तन्त इति। बुद्धिमत्तायामेतत् साधनं सा पुनर्नित्येत्येतत् कुतः? प्रत्यर्थनियमासंभवात्। ये खलु प्रत्यर्थनियता बुद्धिभेदाः ते शरीरादिकारणसन्निधाने सति भवन्ति। न त्वियं प्रत्यर्थनियता युगपदनेककार्योत्पत्तिदर्शनात्। तद् यथा स्थावरभेदस्यानेकस्य युगपदुत्पाद इति। स च प्रत्यर्थनियतेषु बुद्धिभेदेष्वीश्वरस्य न युक्तः [१]संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धय एव तस्य गुणाः[२]।

अथ बुद्धिमत्तयेश्वरस्य शरीरयोगमपि प्रतिपद्यते? तेनापि प्रतिपद्यमानेन शरीरादयो नित्या अनित्या वा अवश्यमेषितव्याः। यद्यनित्याः धर्माधर्मसद्भावोऽ-प्यभ्युपेयः। तदभ्युपगमे च तत्तन्त्रत्वादीश्वरो नेश्वरः स्यात्। अथ नित्यानि शरीरादीनि कल्पयसि, एवमपि दृष्टविपरीतं कल्पितं भवति। दृष्टविपर्ययं प्रतिपद्यमानेन वरं बुद्धेरेव नित्यत्वं प्रतिपत्तव्यमिति।

अथ सन्तानवर्तिनीमनेकां बुद्धिमीश्वरे प्रतिपद्येत? एवमपि न युगपदुत्पादः स्थावरादीनां प्राप्नोति। अथ ताः सन्तानवर्तिन्यः सर्वार्थाबुद्धयो भवन्तीति? एवमपि दृष्टबुद्धिविपरीतं कल्पितं भवति। एवं च कल्पयता बुद्धिनित्यत्वमेव प्रतिपत्तव्यम्। एतावच्चैतत् स्यात्। नित्या वा सन्तानवर्तिनी वा। सन्तानवर्तिनीति न युक्तम्। यदि गुणभेदाद् भेदः, यदभिन्नगुणं तदेकं प्राप्नोति। यथा दिक्कालाविति? नानेकान्तात्।

१, २. om J

गुणभेदात् नानात्वं ब्रूमः। न पुनर्गुणाभेदादेकत्वमिति। तथा हि अभिन्नगुणानां घटादीनां नानात्वं दृष्टम्। दिक्कालयोश्च गुणाभेदेऽपि कार्यभेदान्नानात्वमिति। न च बुद्धिमत्तया विनेश्वरस्य जगदुत्पादो घटत इति। सा च बुद्धिः सर्वार्थातीतानागतवर्तमानविषया प्रत्यक्षा, नानुमानिकी नागमिकी च। न हि तत्रानुमानं नागम इति।

ज्ञाननित्यत्वाच्च न संस्कारः। नित्यं ज्ञानमीश्वरस्येति न तत्र संस्कारो विद्यत इति संस्काराभावाद् बुद्धिनित्यत्वाच्च न स्मृतिः। स्मृतेरभावाच्च नानुमानम्।

न दुःखमधर्मस्याभावात्। अत एव न वैराग्यम्, यत्र दुःखं तत्र वैराग्यमिति। दुःखाभावान्न विरज्यत इति। अत एव न द्वेषो दुःखाभावादिति। इच्छा तु विद्यतेऽक्लिष्टाव्याहता सर्वार्थेषु यथा बुद्धिरिति।

अथ किमयं बद्धो मुक्त इति? न बद्धो दुःखाभावादेव। अबद्धत्वात् न मुक्त इति। बन्धवान् मुच्यते, न च भगवति बन्धनमस्तीति। अतो न मुक्तः।

आत्मान्तराणामसंबन्धादधिष्ठातृत्वमनुपपन्नमिति चेत्? अथ मन्यसे प्राण्यन्तरसमवायिनो धर्माश्चाधर्माश्च। ते न साक्षादीश्वरेण संबध्यन्ते। न पारम्पर्येण। न चासंबद्धमधिष्ठातुं शक्यते। न चानधिष्ठितयोर्धर्माधर्मयोः प्रवृत्तिर्युक्तेति? तच्च न, अजसंबन्धोपपत्तेः। अजः संबन्ध आत्मान्तराणामित्येक इच्छन्ति। न चैतदिह प्रतिषिध्यत इति अप्रतिषेधादुपात्तः स इति। ते त्वजं संबन्धं प्रमाणतः प्रतिपादयन्ति व्यापकैराकाशादिभिः संबद्ध ईश्वरो मूर्तिमद्द्रव्यसंबन्धित्वाद् घटवदिति। यथा घटादि मूर्तिमता घटादिना संबन्धित्वेन व्यापकैराकाशादिभिः संबन्धि भवति, तथेश्वरोऽपि मूर्तिमत्संबन्धीति। तस्मादयमपि व्यापकैराकाशादिभिः संबध्यत इति।

स पुनरात्मेश्वरसंबन्धः किं व्यापकोऽव्यापको वेति? अर्थाभावादव्याकरणीयः प्रश्नः।आत्मेश्वरसंबन्धोऽस्तीत्येतदेव शक्यते वक्तुम्। स पुनरीश्वरात्मानौ व्याप्नोति, न व्याप्नोतीति न व्याक्रियते। येऽप्यजं संयोगं नेच्छन्ति तेषामप्यणुमनःसंयोगोप-

पत्तेरस्ति संबन्धः। यानि प्रत्यात्ममनांसि तानि सर्वाणीश्वरसंबद्धानीत्यतः संबन्धिसंबन्धोपपत्तेरात्मान्तराण्यधितिष्ठतीति यथा आत्महस्तसंयोगप्रयत्नाभ्यां हस्ते कर्म भवति, उत्पन्नकर्मको हस्तः संदंशादिना संबध्यते, तत्संबन्धादयःपिण्डाद्यधितिष्ठतीति। यदि तर्हि सर्गादावीश्वरस्य कारणत्वेऽयं न्यायोऽभिधीयते इदानीमीश्वरो न कारणमिति प्राप्तम्? इदानीमपि स एव न्यायः। मृतानामशरीरिणां[1] यौ धर्माधर्मौ तौ बुद्धिमत्कारणाधिष्ठिताविति समानो न्यायः। बुद्धिमत्कारणाधिष्ठितानि स्वासु स्वासु धारणादिक्रियासु महाभूतानि वाय्वन्तानि प्रवर्तन्ते अचेतनत्वाद् वास्यादिवदिति। एवं कार्यत्वात् तृणादीनि पक्षीकृत्य दर्शनस्पर्शनविषयत्वादिति वक्तव्यम्। एवं यत्र यत्र विप्रतिपत्तिः कार्यत्वं च यत्, तदनेनैव न्यायेनानेन दृष्टान्तेन वास्यादिना पक्षयित्वा साधयितव्यमिति।

आगमाच्च। आगमश्चास्मिन् पक्षे श्रूयते[2] ईश्वरकारणे

यथा

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा[3]॥
यदा स देवो जागर्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति[4]॥२१॥

॥ईश्वरोपादानताप्रकरणम्॥

[आकस्मिकत्वप्रकरणम्]

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्॥४।१।२२॥

अपर इदानीमाह, **अनि.....नात्।** यथा कण्टकस्य तैक्ष्ण्यादि निर्निमित्तं

१. मृतशरीराणां C २. आगमादपि श्रू° C ३. महाभारते ३.३०.२८ ४. मनुसंहितायाम् १.५२

चोपादानवच्च, तथा शरीरादिसर्गोऽपीति। तदिदं दृष्टान्तसूत्रम्। कः पुनरत्र न्यायः? [१]अनिमित्तरचनाविशेषाः शरीरादयः संस्थानविशेषवत्त्वात् कण्टकादिवदिति। न, अनुपलभ्यमाननिमित्तानामनुमानतो निमित्तोपलब्धेः। यस्य निमित्तं प्रत्यक्षतो नोपलभ्यते, तस्यानुमानतो निमित्तं प्रत्येतव्यम्। कुतः? निमित्तवद्द्रव्यसामान्यात्। यानि खलु निमित्तवन्ति द्रव्याणि संस्थानविशेषवन्ति तानि घटादीनि। संस्थानविशेषवच्च शरीरं कण्टकादयश्च। तस्मात् तेऽपि निमित्तवन्त इति। उक्तं चात्र। किमुक्तम्? **पूर्वकृतफलानुबन्धात् तदुत्पत्तिरिति**[२]। न चोभयपक्षसंप्रतिपन्नं संस्थानविशेषवन्निर्निमित्तं दृष्टमिति॥२२॥

अनिमित्तनिमित्तत्वान्नानिमित्ततः॥४।१।२३॥

अपरे तु **अनि.....त्ततः**। इति परिहारं वर्णयन्ति। अनिमित्तमेव निमित्तम्। यतश्चोत्पत्तिस्तन्निमित्तमिति अनिमित्तनिमित्तत्वात् नानिमित्तत उत्पत्तिरिति॥२३॥

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः॥४।१।२४॥

एतच्च न, **निमि.....षेधः**। अन्यन्निमित्तम्, अन्यच्च निमित्तप्रत्याख्यानम्। न च प्रत्याख्यानमेव प्रत्याख्येयं भवति। निमित्तमित्यर्थाभ्यनुज्ञा। अनिमित्तमिति तस्य प्रतिषेधः। अभ्यनुज्ञाप्रतिषेधयोश्चैकत्वमयुक्तमिति। स खल्वयं वादोऽकर्मनिमित्तः शरीरसर्ग[३] इत्येतस्मान्न भिद्यत इति। अभेदात् तत्प्रतिषेधेनैव प्रतिषिद्धो बोध्यव्यः।

कण्टकादीनां चानिमित्तं जन्मेति ब्रुवाणः प्रष्टव्यः, किं कण्टकादिमात्रस्यानिमित्तं जन्म उत सर्वस्येति? यदि कण्टकादिमात्रस्यानिमित्तं जन्म, तच्छेषेण दृष्टान्तेन

---

१. °मित्ता रचना° C २. न्या. सू. ३.२.६० ३. सत्त्वसर्ग C

शक्यं प्रतिपादयितुं निमित्तवदिति। अथ सर्वमनिमित्तं जन्मेत्ययं पक्षः, तथापि व्याघातः प्रतिपाद्यप्रतिपादकन्यायस्याभ्युपगमात् सर्वं चानिमित्तं प्रतिपादयसि चेति व्याहतम्। वाक्योपादानाच्च व्याघातः। अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिवदिति वाक्यं प्रतिपादकमुपादीयते। न च निमित्तमस्तीति व्याघातः। अनिमित्ततो भावोत्पत्तिरिति च वाक्यम्, सनिमित्ताभावोत्पत्तिरिति च वाक्यम्। यद्यनयोरर्थभेदं प्रतिपद्यसे, वाक्यभेदादर्थप्रतिपत्तिरिति व्याहतं भवति अनिमित्ता भावोत्पत्तिरिति। अथ न वाक्यभेदेनार्थभेदं प्रतिपद्यसे, वाक्यविशेषोपादानं व्याहतम्। यत्किञ्चिद् वाक्यमुपादेयमिति। अनिमित्तां भावोत्पत्तिं प्रतिपद्यमानेन सर्वलोकव्यवहार उच्छिन्नो भवति। अनिमित्ता भावोत्पत्तिरिति च भावमात्रपरीक्षाप्रकरणे न दृष्टान्तोऽस्ति। अथ शरीराद्येकदेशं पक्षयसि? तथाप्यन्यतरधर्मासिद्धो दृष्टान्तः संस्थानविशेषवत्त्वस्य विद्यमानत्वात् अनिमित्तत्वस्य चाभावादिति॥२४॥

॥आकस्मिकत्वप्रकरणम्॥

[सर्वानित्यताप्रकरणम्]

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात्॥४।१।२५॥

अन्ये तु मन्यन्ते, **सर्व.....त्वात्**। किमनित्यं नाम? यस्य कदाचिद्भावस्तदनित्यम्। उत्पत्तिधर्मकमनुत्पन्नं नास्ति विनाशधर्मकं च विनष्टं नास्तीति। किं पुनः सर्वम्? भौतिकं शरीरादि अभौतिकं च बुद्ध्यादि। तदुभयम् उत्पत्तिविनाशधर्मकमिति विज्ञायत इति। तस्मात् सर्वमनित्यमिति। सूत्रस्य दृष्टान्तार्थत्वात् तस्य सर्वान्तर्भावादुदाहरणाभावः। सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वादिति यदि ब्रूषे दृष्टान्ताभावः। सर्वस्य पक्षीकृतत्वात्। न साध्यमुदाहरणं युक्तमिति। उत्पत्तिविनाशधर्मकत्वादिति चायं हेतुरव्यापकः। यदि सर्वं पक्षयित्वा उत्पत्ति-

विनाशधर्मकत्वादिति ब्रूषे, परमाण्वाकाशादिषु तद्गुणेषु च केषुचित् सामान्य-विशेषसमवायेषु नोत्पत्तिविनाशधर्मकत्वमस्तीति हेतुरव्यापकः॥२५॥

नानित्यतानित्यत्वात्॥४।१।२६॥

सर्वमनित्यमेवेति ब्रुवाणः प्रष्टव्यः, किं सर्वस्यानित्यता नित्या, आहोस्विद-
5 नित्येति? यद्यनित्यता नित्या, न तर्हि सर्वमनित्यम्। अथानित्या नित्यता, अनित्यताया अभावात् सर्वमनित्यमिति व्याहतो हेतुः॥२६॥

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत्॥४।१।२७॥

यथाग्निर्दाह्यं विनाश्यानुविनश्यति एवमनित्यतापि सर्वं विनाश्यानु-विनंक्ष्यतीति॥२७॥

10 **नित्यस्याप्रत्याख्यानं यथोपलब्धि व्यवस्थानात्॥४।१।२८॥**

अयं च खलु वादः सर्वमनित्यमिति नित्यं प्रत्याचष्टे। नित्यस्य प्रत्याख्या-नमशक्यं यथोपलब्धि व्यवस्थानात्। यत्र यत्रायं हेतुरुपलभ्यते, तत्र तत्र हेतुसामर्थ्यादनित्यत्वं प्रतिपद्यामहे। यत्र पुनरयं हेतुर्नास्ति, तेषामनित्यत्वं कथं प्रतिपत्तव्यम्? अथाकारणकमनित्यत्वं तेषां प्रतिपद्यसे, व्याहतस्तर्हि हेतुः, उत्पत्ति-
15 विनाशधर्मकत्वादिति। अनित्यमिति च ब्रुवाणेनावश्यं नित्यमभ्युपेयम्, नञः प्रसज्यप्रतिषेधपर्युदासविषयत्वात्। अयं खलु नञ् प्रवर्तमानः प्रसज्यप्रतिषेधे वा प्रवर्तते पर्युदासे वा। तथा चोत्तरपदसिद्धिः। यदि नित्यं न भवतीत्यनित्यम्, तर्हि यदन्यत्र भवति तदन्यत्र प्रतिषिध्यत इति सिद्धमुत्तरपदम्। अथ नित्यादन्यद-

नित्यमिति, तथाप्युत्तरपदेन भवितव्यम्। नासत्युत्तरपदार्थे तस्मादन्यदनित्यत्वं[१] सिध्यतीति। अनित्यताभावाच्च सर्वमनित्यमिति न दोषः, अनित्यताया धर्मत्वेनाभ्युपगमात्। अनित्यत्वं नाम धर्मः। सोऽसति धर्मिणि न भवतीति। एवं च सति सर्वस्यानित्यत्वं न दोष इति। अथ पुनरुत्पत्तिविनाशधर्मकेणानित्येन सिद्धेन शेषं सन्दिह्यमानानित्यत्वं तद्विपरीतनित्यत्वं च सत्त्वादनित्यमिति साधयेत्, तस्याप्युत्तरपदसिद्ध्या नित्यत्वसिद्धिरिति प्रतिज्ञादोषाद् वाक्यं निवर्तत इति॥२८॥

॥सर्वानित्यताप्रकरणम्॥

[सर्वनित्यत्वनिराकरणप्रकरणम्]

सर्वं नित्यं पञ्चभूतनित्यत्वात्॥४।१।२९॥

अय**मपर** एकान्तः, **सर्वं .....त्वात्।** इति । भूतमात्रमिदं सर्वम्। तानि च नित्यानि भूतोच्छेदानुपपत्तेः सर्वं नित्यमिति॥२९॥

नोत्पत्तिविनाशकारणोपलब्धेः॥४।१।३०॥

उत्पत्तिकारणं च भावानामुपलभ्यते विनाशकारणं च। तदुभयं नित्यत्वे न स्यात्। न हि नित्यं नाम जायते विनश्यति वा॥३०॥

तल्लक्षणावरोधादप्रतिषेधः॥४।१।३१॥

यदिदमुत्पद्यते विनश्यतीति च मन्यसे, न तद् भूतलक्षणहीनं गृह्यते।

---

१. तस्मादन्यत्वं C

भूतलक्षणावरोधात् सर्वं नित्यमिति। सर्वं नित्यमिति ब्रुवाणो न किञ्चिज्जायते न विनश्यतीति प्रतिपद्येत, तत्प्रतिपत्तौ च हिताहितप्राप्तिपरिहारार्थोऽस्य परिस्पन्दो व्यर्थ आपद्येत। सर्वस्य च पक्षीकरणाद् दृष्टान्ताभावः। वाक्योपादानं च व्याहतम्। यदिदं वाक्यं परप्रतिपादनायोपादीयते, सर्वं नित्यं पञ्चभूतनित्यत्वादिति, अनेन वाक्येनायं किं करोति? किमसिद्धं साधयति, उत सिद्धं निवर्तयति? यदि तावदसिद्धं साधयति, केयं सिद्धिर्या वाक्येन प्रतिपाद्यते? यदि विज्ञानम्, ननु व्याहतं भवति सर्वम्। नित्यं विज्ञानं च जायत इति। अथ प्रतिपत्तिर्न क्रियते, का तर्हि सिद्धिः, या प्रवर्तमानं साधनं करोति। अवश्यं कारकेणापूर्वं किञ्चिन्निष्पाद्यम्। तन्निष्पत्तेर्व्याघातः कारकत्वं वा निवर्तते। न हि नित्यस्य किञ्चित् कर्तव्यमस्ति। अथ सिद्धं निवर्तयतीति पक्ष आश्रीयते? एतस्मिन्नपि पक्षे नित्यं निवर्तते चेति व्याहतम्। अथ तिरोभवति? तिरोभावेऽप्यवश्यमपूर्वोत्पत्तिः पूर्ववस्तुविनाशो वाभ्युपेय इति सर्वथा न व्याघातान्मुच्यसे। यच्च वस्तु प्रागनुपलब्धरूपं पश्चादुपलभ्यते, तत्राप्यवश्यमपूर्वोत्पत्तिर्वा पूर्ववस्तुविनाशो वाभ्युपेय इति। तदभ्युपगमे च व्याघातः॥३१॥

नोत्पत्तितत्कारणोपलब्धेः॥४।१।३२॥

यत्पुनरेतद् भूतलक्षणावरोधात् सर्वं नित्यमिति, नान्यथा तदुपपत्तेर्भूतलक्षणयोगोऽन्यथा संभवतीति। **नोत्पत्तितत्कारणोपलब्धेः**। उत्पत्तितत्कारणोपलब्धेः कारणसमानगुणस्योत्पत्तिश्च दृश्यते। कारणं च अस्या दृश्यत इति न चैतदुभयं नित्यविषयम्। न हि नित्यस्योत्पत्तिः, नापि नित्यस्य कारणमस्ति। अस्ति चेदमुभयम्। तस्मात् कारणसमानगुणं कार्यमुत्पद्यत इति कारणसमानगुणोत्पादे च कार्यभूतलक्षणगुणावरोधः सिध्यतीति। विभक्तन्यायं चैतद् **व्यक्ताद् व्यक्तानामु-**

त्पत्तिः प्रत्यक्षप्रामाण्यात्[१] इत्येतस्मिन् सूत्रे। अव्यापकश्चायं हेतुः पञ्चभूत-नित्यत्वादिति। कथमिति? कर्मादीनामव्याप्तेः। कर्मबुद्धिशब्दादयः पञ्चभूत-नित्यत्वादित्यनेन न व्याप्ता इति। ज्ञातुः प्रयत्नदर्शनाच्च व्याघातः। उत्पत्तिविनाश-कारणप्रयुक्तस्य च ज्ञातुः प्रयत्नो दृष्टः। स च सर्वनित्यत्वे न युक्तः। प्रसिद्धश्चावयवी तद्धर्मा। उत्पत्तिविनाशधर्मा चावयवी प्रतिपादितः। अतोऽयुक्तमेतत्। कथम-व्यापकोऽनैकान्तिकः? पक्षस्यान्तद्वयेऽवस्थानात्। पक्षो हि सर्वं नित्यमिति। तच्च सर्वं भूतलक्षणयुक्तम्, इतरथा च। तत्पक्षस्यान्तद्वयेऽवस्थानात् सर्वं[२] भूतलक्षण-युक्तमित्यनेकान्तः।

स्वप्नविषयाभिमानवन्मिथ्योपलब्धिरिति चेत्? अथ मनुषे यदिदमुत्पद्यते विनश्यति चेति तन्न तत्त्वतोऽस्ति, असति तु तस्मिन्नभिमानो भवति उत्पन्नं विनष्टमिति, यथा न स्वप्ने विषयाः सन्ति अथ च विषयाभिमानो भवतीति। न, प्रमाणाभावात्। यदिदं [३]गवादिघटादिकमुत्पत्तिविनाशयुक्तमुपलभ्यते एतन्नास्तीति नासत्त्वप्रतिपादकं प्रमाणमभिधीयते। न चाप्रमाणकं शक्यं प्रतिपत्तुम्। यथा च चित्तव्यतिरेकिणो विषयाः, तथा उपरिष्टात् प्रतिपादयिष्यामः[४]। यदि च स्वप्नविषयाभिमानवदुत्पत्तिविनाशाभिमानः, ननु[५] भूतोपलब्धिरपि स्वप्नविषया-भिमानवत् प्रसज्यते। पृथिव्याद्यभावे सर्वव्यवहारविप्रलोप इति चेत्? अथ मन्यसे यदि पृथिव्यादीनि भूतानि न सन्ति, ननु पृथिव्याद्याश्रयो व्यवहार उच्छिद्यत इति? तदितरत्रापि समानम्। यदि व्यवहारोच्छेदभयाद् भूतानि प्रतिपद्यसे, व्यवहारो-च्छेदभयादेवोत्पत्तिविनाशावपि प्रतिपद्यस्व। न ह्युत्पत्तिविनाशावन्तरेण कश्चन व्यवहारः सिध्यतीति। नित्यानां द्रव्याणामतीन्द्रियत्वात् अविषयत्वाच्चोत्पत्तिविनाशयोः। यन्नित्यं तदतीन्द्रियम्, अविषयश्चोत्पत्तिविनाशयोः। तेन स्वप्नविषयाभिमानवत् तदभिमान इत्ययुक्तम्। उत्पत्तिविनाशाभिमान इति च ब्रुवतोत्पत्तिविनाशयो-

---

१. न्या. सू. ४.१.११ २. न सर्वं C ३. गवादिघटादिकमुप° J ४. बाह्यार्थभङ्गनिराकरणप्रकरणे न्या. सू. ४.२.२६ ff ५. अथ C

र्विषयो वक्तव्यः। न च सर्वनित्यवादिनामुत्पत्तिविनाशयोर्विषयोऽस्ति। विषयं च प्रत्याचक्षाणेन तदनुकारी विपर्ययप्रत्ययो हेय इति॥३२॥

न व्यवस्थानुपपत्तेः॥४।१।३३॥

अपरे तु सर्वं नित्यमित्येतदन्यथा वर्णयन्ति। व्यवस्थितस्योपादानस्य धर्ममात्रं निवर्तते धर्ममात्रमाविर्भवति। यच्च निवर्तते तन्निवृत्तमप्यस्तीति यच्चाविर्भवति तत्प्रागप्याविर्भावादस्ति।

न.....त्तेः इति। शेषं **भाष्ये**। यच्च निवर्तते तन्निवृत्तमप्यस्तीति ब्रुवाणः प्रष्टव्यो भवान् [१]जायते किमुक्तं भवति निवृत्तमिति? यदि ब्रूषे पूर्वमुपलब्धं पश्चान्नोपलभ्यत इति, अथ सतोऽनुपलब्धिः किंकृता? यद्यावरणादिकृता, तदावरणाद्युपलभ्येत। उक्तं चात्र यत्पूर्वमनुपलब्धं वस्तु पश्चादुपलभ्यते, तस्यापूर्वविशेषोत्पादः पूर्वविशेष-प्रच्यवो वाभ्युपेय इति। तदभ्युपगमे च व्याघातः। [२]यदप्युक्तं यच्चाविर्भवति तत् प्रागपि आविर्भावाद् विद्यत इति, तन्न, व्याघातात्। आविर्भवति प्राग् विद्यते चेति व्याहतम्। अथाविर्भावोऽभिव्यक्तिः, तथापि पूर्वदोषानिवृत्तिः अभिव्यक्तिरसती भवतीति॥३३॥

॥सर्वनित्यत्वनिराकरणप्रकरणम्॥

[सर्वपृथक्त्वनिराकरणप्रकरणम्]

सर्वं पृथग् भावलक्षणपृथक्त्वात्॥४।१।३४॥

अय**मपर** एकान्तः—**स.....क्त्वात्**। भावस्य लक्षणं भावलक्षणं शब्दः,

---

१. भवति C २. यच्चोक्तम् C

लक्ष्यतेऽनेन भाव इति। सर्वो भावसमाख्याशब्दोऽनेकविषयो यथा कुम्भ इति भावसमाख्याशब्दोऽनेकस्मिन्नवयवसमूहे रूपादिसमूहे च[१] वर्तत इति। यथा कुम्भशब्दः एवमन्येऽपि शब्दा इति। अस्य प्रयोगः। कुम्भशब्दोऽनेकविषयः एकपदत्वात् सेनाशब्दवत्। पदश्रवणादनेकार्थाधिगतेश्च। यस्मात् पदश्रवणादनेकोऽर्थोऽवगम्यते यथा सेनेति॥३४॥

नानेकलक्षणैरेकभावनिष्पत्तेः॥४।१।३५॥

अनेकलक्षणैरिति मध्यमपदलोपी समासोऽनेकविधलक्षणैरिति। गन्धादिभिश्च गुणैर्बुध्नादिभिश्चावयवैः संबद्ध एको भाव उत्पद्यते। अतः शब्दादेकार्थावगतौ शेषोऽनुक्तोऽप्यवगम्यत इति। गुणव्यतिरिक्तो गुणीति अवयवव्यतिरिक्तश्चावयवीति विभक्तन्यायमेतत्[२]। यत् पुनरेतदेकपदत्वादनेकविषयः कुम्भादिशब्द इति, तन्न, दृष्टान्ताभावात्। न हि कश्चिच्छब्दोऽनेकविषयोऽस्ति, सेनादिशब्दानामनेकविषयत्वेनासिद्धत्वात्। यथैकविषयाः सेनादिशब्दास्तथोक्तमिति। सर्वस्य पक्षीकरणाद् दृष्टान्ताभावः। आधाराधेयभावेनानुषक्तानां रूपादीनामवयविनश्च ग्रहणादन्यथासिद्धः। नञः प्रसज्यप्रतिषेधपर्युदासविषयत्वेनावस्थानाच्च विरुद्धः। अनेकमित्ययं नञः प्रयोगः। स चायं प्रसज्यप्रतिषेधेन पर्युदासविषयत्वेन वा कल्प्यते[३]। तद् यदि तावत् प्रसज्यप्रतिषेधः, एकं न भवतीति, यदेकत्र प्रतिषिध्यते तदन्यत्र भवतीत्येकमभ्युपगतं भवतीति। एवं च व्याघातः। अथ पर्युदासपक्षः, एकस्मादन्यदनेकमिति एवमप्येकमभ्युपगतं भवति। न ह्यसत्येकस्मिन् तस्मादन्यदनेकं सिध्यतीति॥३५॥

---

१. रूपादिसमूहे चेति नास्ति C २. द्रः न्या. भा. २.१.३६ ३. °त्वेन प्रतिषेधात् प्रकल्प्यते C

लक्षणव्यवस्थानादेवाप्रतिषेधः ॥४।१।३६॥

इतश्च **ल.....षेधः**। न हि कश्चिदेको भाव इत्ययुक्तः प्रतिषेधः। कस्मात्? तल्लक्षणव्यवस्थानात्[१]। न हि कुम्भ इत्युक्तेऽनेकोऽर्थोऽवगम्यत इति। कथं नावगम्यते? एकवचनान्तत्वात्। एकवचनान्त एष शब्दः कुम्भ इति। न च बहुष्वेकवचनं युक्तम्, प्रैषसंप्रतिपत्त्योरेकविषयत्वात्। कुम्भमानयेति प्रैष एकविषयो भवति, इतरोऽपि कुम्भशब्दात् प्रतिपद्यैकमेव कुम्भमानयति। ते एते प्रैषसंप्रतिपत्ती एकविषये ज्ञापयतः कुम्भशब्देनैकोऽर्थोऽभिधीयत इति। यांस्त्वत्र रूपादीनवयवांश्च प्रतिपद्यसे स न शब्दार्थः, किं त्वनुषङ्गः, तन्नान्तरीयकत्वादिति। समूहे भेदस्य[२] चानवस्थानात् यत्रावस्थानं तदेकम्[२]। गोघटादिद्रव्याणि समुदितानि प्रतिपद्यमानेन समूहोऽभ्युपेयः। स चायं समूह इयन्ति द्रव्याणि एतानि गवादिभावेन[३] व्यवस्थितानीति न व्यवतिष्ठते तस्य भेदोऽल्पतरतमत्वेन। यत् तत् परमाल्पं तदभेद्यम्। ततो निवर्तत इति। यतश्चायं भेदो निवर्तते तदेकम्। एकं च प्रत्याचक्षाणेनानेकमपि प्रत्याख्येयम्, एकसमुच्चयत्वादनेकस्य। अथ मन्यसे, यं तमभेद्यं परमाणुं प्रतिपद्यसे, सोऽपि रूपादीनां समुदाय इति। चत्वारि वा द्रव्याणि पृथिव्यादीनि समुदितानि परमाणुरिति? एतस्मिन् वै दर्शने ये रूपादयः समुदितास्ते परमाणुरिति, यत् परमाणौ रूपं स कस्य समुदाय इति वक्तव्यम्। एवं शेषेणु गुणेषु। चत्वारि द्रव्याणि समुदितानि परमाणुरिति ब्रुवाणेन [४]चतुष्कस्य एकसमुच्चयनिमित्तत्वाद् यदेकं पृथिव्यादि स कस्य समुदाय इति वक्तव्यम्। अथानन्तं समुदायं प्रतिपद्यसे अष्टौ द्रव्याणि समुदितानि परमाणुरिति शास्त्रं[५] व्याहतं भवति, कामेऽष्टद्रव्यकोऽणुरशब्द इति। एकानुपपत्तौ चानेकोपपत्तिरित्येतद् व्याहतम्[६]। यश्चायं हेतुः समूहे भावशब्दप्रयोगादिति, अयमुभयतो व्याघातान्न किञ्चित्। कथमुभयतः? न कश्चिदेको

---

१. लक्षणव्यवस्थापनात् C २. समूहभेदस्य J ३. घटादिभावेनाव° C ४. चतुष्टस्य C ५. द्रः अभिधर्मकोषे २.२२ ६. नानेको.....तद्धेयम् C

भाव:। समूहे भावशब्दप्रयोगादिति प्रतिज्ञाहेत्वोर्व्याघात:। यस्मादेकार्थानुपपत्तौ न समूह उपपद्यत इति समूहं चाश्रित्यैकं प्रत्याचक्षाणेन समूह एव प्रत्याख्यातो भवतीति सोऽयमुभयतो व्याघाताद् यत्किञ्चनवाद इति। शेषं **भाष्ये**॥३६॥

॥सर्वपृथक्त्वनिराकरणप्रकरणम्॥

[सर्वशून्यत्वनिराकरणप्रकरणम्]

सर्वमभावो भावेष्वितरेतराभावसिद्धेः॥४।१।३७॥

अथाय**मपर** एकान्त:, **सर्व.....सिद्धेः**। यावद् भावजातं तत्सर्वमभाव:। कस्मात्? भावेष्वितरेतराभावसिद्धे:। असत्प्रत्ययप्रतिषेधाभ्यां भावशब्दसामानाधिकरण्यात् सर्वासत्त्वम् अनुत्पन्नप्रध्वस्तघटवत्[१]। सर्वो भावशब्दोऽसत्प्रत्ययसमानाधिकरण: प्रतिषेधसमानाधिकरणश्च अनुत्पन्नप्रध्वस्तघटवत्[२]। यथा नास्ति घट इति। कथं नास्ति कदा च नास्तीति? स्थाल्याद्यात्मना चानुत्पद्यमानो ध्वस्तश्चेति। सोऽयं घटशब्दोऽसत्प्रत्ययसमानाधिकरणो घटस्यात्यन्तासत्त्वं प्रतिपादयति। तथा च सर्वे भावा असत्प्रत्ययसमानाधिकरणा:। तस्मात् सर्वमभाव इति॥३७॥

न स्वभावसिद्धेर्भावानाम्॥४।१।३८॥

प्रतिज्ञापदयो: प्रतिज्ञाहेत्वोश्च व्याघात:। सामानाधिकरण्यमभिन्नविभक्तिकत्वमेकविभक्त्युच्चारणमिति भावाभ्युपगमात् तच्छब्दाभ्युपगमाच्च विरुद्ध:। यत् सर्वमिति मन्यसे तदभाव इति? नासति तत्प्रत्ययेन भवितुं शक्यम्। न च भावप्रत्ययेनाभाव इति च भाव: प्रतिषिध्यते। न चासत्युत्तरपदार्थे नञ: प्रयोग इति

---

१. सर्वमभाव...घटवत् C २. णश्च...प्रध्वस्तपटवत् C

प्रसज्यप्रतिषेधपर्युदासाभ्यां पूर्ववत् प्रसङ्गः। यथानेकपदेऽनित्यपदे च, एवं सर्वपदेऽभावपदे च व्याघात ऊह्यः। शेषं **भाष्ये।**

सर्वासत्त्वे विभक्तिस्वभावावधारणं[१] कर्तव्यम्। यदि च सर्वमभावो विभक्तिः किंस्वभाविकेति वक्तव्यमेतत्। असत्यां च विभक्तावभिन्नविभक्तिकत्वं सामानाधिकरण्यमिति व्याहतम्। असत्प्रत्ययप्रतिषेधौ च सामानाधिकरण्यादिति ब्रुवाण एव सर्वमभाव इति व्यावर्तयसि[२]। न ह्यसदधिकरणं भवति। अधिकरणं हि नाम यद्यत्र वर्तते। तच्चाभावे नास्तीति सूत्रेण चाभिसंबन्धः। **न स्वभावसिद्धेर्भावानाम्** इति। स्वेन भावेन भावा भवन्तीति सूत्रार्थः। किं पुनरनेन सूत्रेण क्रियते? पूर्वसूत्रस्य विरोधश्चोद्यते। कथमिति? भावेष्वितरेतराभावसिद्धेरित्यभावो भवताभिधीयते। तथा चाभिदधानः स्वभावतो भावानभ्युपैषि। विशेषणवैयर्थ्यं वा भावेष्वितरेतराभावसिद्धेरिति। सर्वासत्त्वे ह्येवमेव वक्तव्यम्। न सन्ति भावाः। न पुनरेवं वक्तुं युक्तम् इतरदितरन्न भवतीति। इतरदिति चायं विधानशब्दः। न च सर्वस्याभावे विधीयमानं वस्तु संभवति[३] यदितरशब्दवाच्यं स्यादिति। इतरवाच्यतां चाभ्युपगम्येतरदितरत्र प्रतिषिध्यत इति स्वभावसिद्धिरभ्युपगता भवति।

कश्च स्वो भावो भावानां द्रव्यादीनाम्? सदादि सामान्यं क्रियावदादिर्विशेषः स्पर्शपर्यन्तं पृथिव्या इति च प्रत्येकमनन्तो भेदः। सामान्यविशेषसमवायादीनां च सामान्यो वैशेषिकश्चान्तर्गणिकोऽनन्तो भेद इति। सोऽयम् अभावस्य निरुपाख्यत्वात् संप्रत्यायकः स्वभावभेदो न स्यात्। अस्ति त्वसौ। तस्मान्न सर्वमभाव इति।

अथ वा स्वभावसिद्धेरिति गौरिति प्रयुज्यमाने नाभावः प्रतीयते किन्तु जातिविशिष्टं द्रव्यम्[४]। यदि च सर्वमभावः स्यात् गौरिति प्रयुक्तेऽभावो गम्येत। न त्वभावो गम्यते। तस्मान्न सर्वमभाव इति।

---

१. विभक्त्यव॰ J २. ॰षेधसामानाधिकरण्यमिति ब्रूषे सर्वमभाव इति च व्या॰ C
३. विद्यते J ४. किं तु....द्रव्यम् om J

अथ वा स्वभावसिद्धेरिति असन्नश्वो गवात्मना अनश्वो गौरगौर्गौरिति कस्मान्नोच्यत इति [१]अवचनादगौर्गौरित्युक्ते व्याहतं स्यात्। यदि व्याघातभयाद्-गौर्गौरिति नोच्यते, हन्त तर्हि सिद्धो भावः। कथं तर्हि अयं प्रतिषेधोऽगौरश्च इति? व्यतिरेकप्रतिषेधे भावेनासत्प्रत्ययस्य सामानाधिकरण्यमिति यथा न सन्ति कुण्डे बदराणीति कुण्डबदरयोः संबन्धः प्रतिषिध्यते। न कुण्डे बदरसद्भावः॥३८॥

न स्वभावसिद्धिरापेक्षिकत्वात्॥४।१।३९॥

[२]स्वभावसिद्धिरापेक्षिकी यतो न स्वेनात्मना किञ्चित् सिद्धमिति। यथा दीर्घह्रस्वत्वे परापरे चेति॥३९॥

व्याहतत्वादयुक्तम्॥४।१।४०॥

यदि ह्रस्वापेक्षाकृतं दीर्घत्वम्, ह्रस्वमनापेक्षिकम्। अथ दीर्घापेक्षाकृतं ह्रस्वत्वम्, दीर्घमनापेक्षिकम्, परस्परापेक्षयोश्च यदपेक्षयेतरज्जायते तदनापेक्षिकमिति उभयोरभाव एकस्याभावादिति। अपेक्षायामनपेक्षायां च द्रव्ययोर्न भेदः। यावती एव द्रव्येऽपेक्षमाणे तावती एवानपेक्षमाणे अपि, न ह्यन्यतरत्र भेदः। अतिशयग्रहणं कथं यदि द्रव्ययोर्द्वयोरभेदः, अपेक्षमाणयोरनपेक्षमाणयोश्च दीर्घह्रस्वप्रत्ययस्तर्हि न प्राप्नोति। न न प्राप्नोति, द्वयोर्ग्रहणेऽतिशयस्य ग्रहणात्। द्वयोस्तावद् द्रव्ययोः प्रत्यर्थनियते द्वे ह्येव बुद्धी भवतः। अत एकस्मिन् विद्यमानमतिशयं गृह्णाति एकस्मिन् विद्यमानं च ह्रस्वत्वम्। सोऽयं [३]भेददर्शने प्रतिसन्धत्ते। प्रतिसन्धान-प्रत्ययजा त्वस्य बुद्धिरुत्पद्यते, अस्माद् दीर्घमदोऽस्माददो ह्रस्वमिति। न पुनर्वस्तुन

---

१. अवचनाद् गौरित्यगौ° C २. न स्वभाव° C ३. उभयदर्श° C

उत्पादानुत्पादाविति। स्वभावसिद्धौ चासत्यामपेक्षा न प्राप्नोति। यदि स्वभावसिद्धिमन्तरेणापेक्षाभेदाद् दीर्घादिप्रत्यया भवन्ति, सर्वमपेक्ष्य सर्वस्य सर्वत्र तथाभूतः प्रत्ययः स्यात्। न च रूपरसगन्धस्पर्शप्रत्ययेष्वपेक्षासामर्थ्यमस्ति। न च परिमण्डलौ परमाणू उपलभमान [१]इतरं परमाणुमपेक्ष्य परमाण्वन्तरे दीर्घह्रस्वादिप्रत्ययान् करोति। अतो नापेक्षाकृताः प्रत्यया इति।

सर्वमभाव इति सर्वथा चायं वादो व्याहतः। को व्याघातः? आदौ तावत् प्रमाणोपपत्त्यनुपपत्ती[२] सर्वमभाव इति ब्रुवाणः प्रमाणं पर्यनुयोज्यः। यदि प्रमाणं ब्रूते, व्याहतं भवति। अथ नाभिधत्ते, अर्थोऽस्य न सिध्यति प्रमाणाभावात्। सर्वमभाव इति च वाक्यम्। तस्य यद्यभिधेयमर्थं प्रतिपद्यते, पूर्ववद् [३]व्याहतं भवति। अथ न प्रतिपद्यते, वर्णोच्चारणमात्रमनर्थकमिति। सर्वमभाव इति च वाक्यार्थस्य प्रतिपादयितारं प्रतिपत्तारं च यदि प्रतिपद्यते पूर्ववद् व्याघातः। सर्वमभाव इति च सर्वं भाव इति च वाक्ये, यद्यनयोरर्थभेदं प्रतिपद्यते, व्याहतं भवति। अथ न प्रतिपद्यते विशेषवाक्योपादानं व्यर्थम्। सोऽयं सर्वाभाववादो यावद् यावद् विचार्यते, तावत् तावदुपपत्तिं न सहत इति॥४०॥

॥सर्वशून्यत्वनिराकरणप्रकरणम्॥

[संख्यैकान्तवादनिराकरणप्रकरणम्]

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम्॥४।१।४१॥

अथेमे संख्यैकान्तवादाः[४]। सर्वमेकं सदविशेषादित्येवमादि **भाष्ये**। तेषां प्रतिषेधद्वारकं सूत्रम्, **संख्यै.....भ्याम्**। संख्यैकान्तानामसिद्धिः कारणस्य

---

१. ईश्वरः C २. °णोत्पत्त्यनुत्पत्ती C ३. व्याघातः C ४. °कान्ताः J

प्रतिज्ञातार्थव्यतिरेकात्। सर्वमेकमिति प्रतिज्ञां कृत्वा यदि प्रतिज्ञेयव्यतिरिक्तं साधनं ब्रवीति, एकान्तो न सिध्यति। तच्च साधनं [१]प्रतिज्ञेयश्चार्थ इति द्वैतम्। एवं द्वैतादिष्वपीति। अथ प्रतिज्ञेयव्यतिरिक्तं साधनं नास्ति? एवमप्यनेकान्तो[२] न सिध्यति साधनाभावात् न साध्यं साधनमिति॥४१॥

न कारणावयवभावात्॥४।१।४२॥

कारणस्य साध्यावयवत्वादित्ययं सूत्रार्थः। साध्यावयव एव साधनम्। एवं च सति साध्यव्यतिरिक्तं साधनं नोक्तं भवति। न चासाधना सिद्धिरिति॥४२॥

निरवयवत्वादहेतुः॥४।१।४३॥

साध्यावयव एव कारणमित्ययमहेतुः निरवयवत्वात् प्रतिज्ञार्थस्य। सर्वमेकमित्येतस्मिन् प्रतिज्ञार्थे न किञ्चिदपवृज्यते। अनपवर्गेण सर्वं पक्षीकृतमिति सर्वस्य निरवयवस्य पक्षीकरणान्न हेतुरस्ति। न च साध्यं हेतुर्भवितुमर्हतीति। आत्मनि च क्रिया विरुध्यते। यत्तत्प्रतिपाद्यं तदेव प्रतिपादकमिति न युक्तम्। न कर्म करणं भवितुमर्हतीति। ते खल्विमे संख्यैकान्ता यदि विशेषकारितस्यार्थभेदस्य प्रत्याख्यानेन वर्तन्ते, मिथ्यावादा भवन्ति प्रत्यक्षानुमानागमविरोधित्वात्। प्रत्यक्षोऽयं गवादिघटादिभेदोऽनुमानतोऽपि गम्यते। अन्यदन्येनानुमीयते। आगमतोऽपि गम्यते। प्रतिपन्नः [३]प्रतिपादयिता अप्रतिपन्नः [४]प्रतिपाद्य इति। अथाभ्यनुज्ञानेन वर्तन्ते? तथाप्येकान्तत्वं जहतीति। अथ सामान्यकारितोऽभेदः, विशेषकारितश्च भेद इति प्रतिपद्यते? तथापि न किञ्चिद् बाध्यते। न च भेदमन्तरेण सामान्यं लब्धावकाशमिति। सामान्यं प्रतिपद्यमानेन भेदोऽभ्युपगन्तव्यः। भेदं च प्रत्याचक्षाणेन सामान्यमपि

१. प्रतिज्ञायाश्चा॰ C २. ॰न्तोऽस्य वा C ३. ॰पादयति J ४. ॰पद्यते C var.

प्रत्याख्येयम्। विशेषानाधारस्य सामान्यस्याविषयत्वात्। ते खल्विमे संख्यैकान्तास्तत्त्वज्ञानप्रविवेकाय परीक्षिता इति॥४३॥

॥संख्यैकान्तवादनिराकरणप्रकरणम्॥

[फलपरीक्षाप्रकरणम्]

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः॥४।१।४४॥

प्रेत्यभावानन्तरं फलमुद्दिष्टम्। तस्मिन् **स.....यः**। काचित् क्रिया सद्यःफला, यथा पचति दोग्धीति। तस्याः सद्यः फलमोदनपयसी क्रियानन्तरं भवत इति। काचित् कालान्तरफला, यथा कृष्यति वपतीति। तस्याः कालान्तरे फलं न क्रियानन्तरं शस्याधिगम इति। अस्ति चेयं क्रिया अग्निहोत्रं जुहुयादिति[१]। तस्याः फले सन्देहः, किमियं सद्यस्तापादिफला उत कालान्तरफला इति॥४४॥

न सद्यः कालान्तरोपभोग्यत्वात् ॥४।१।४५॥

न सद्यः कालान्तरोपभोग्यत्वात् स्वर्गः फलं श्रूयते। देशितया च क्रियया नानर्थिकया शक्यं भवितुम्। न चायं तापादिकामोऽग्निहोत्रं जुहोति। तेनावगम्यते तां [२]हवनादिलक्षणां क्रियामपेक्षमाणादात्ममनःसंयोगात् विशुद्धेनाभिसन्धिना अनुगृहीताद् आत्मनि धर्म उत्पद्यत इति। स च कालान्तरेऽप्रतिबध्यमानशक्तिर्देवानुगृहीतः[३] फलं ददाति। स च पतितेऽस्मिन् देहे भवति देहान्तरापन्नस्य। अतो न सद्य इति॥४५॥

---

१. हवनादिक्रिया...मनःसंबन्धात् शुद्ध° C २. स च J ३. देशाद्यनु° C

कालान्तरेणानिष्पत्तिर्हेतुविनाशात्॥४।१।४६॥

व्यावृत्ते हवने व्यावृत्ते च पूर्वशरीरे देहान्तरे फलं श्रूयते। तन्न विनष्टात् कारणाद् युक्तमिति॥४६॥

प्राङ्निष्पत्तेर्वृक्षफलवत् तत् स्यात् ॥४।१।४७॥

प्राङ्.....यात्। इति। न ब्रूमो विनष्टात् कारणात् कार्यमुत्पद्यते, अपि तु अग्निहोत्रहवनादिलक्षणया क्रियया यथोक्तेन विधिना धर्मो जायत इत्युक्तम्। तस्मात् फलमिति। यथा फलार्थिना वृक्षमूलसेकादिकर्म क्रियते, न च मूलसेकाद् विनष्टात् फलेन युक्तं भवितुम्। अपि तु मूलसेकादि कर्म कृतं भोक्तुः कर्मापेक्षं [१]पृथिवीधातुमनुगृह्णाति। स उपगृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्यमभिनिर्वर्तयति। तद्रसद्रव्यं [२]वृक्षमापलाशेभ्योऽनुसर्पति। तस्मात् पर्णादिफलं निर्वर्तते। एवं च सति न विनष्टात् मूलसेकात् फलनिर्वृत्तिः। न च मूलसेकादिवैयर्थ्यमिति॥४७॥

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात्॥४।१।४८॥

तदिदं प्राङ्निष्पत्तेः **ना....र्म्यात्।** प्राङ्निष्पत्तेरुत्पत्तिधर्मकं नासत्, उपादाननियमात्। असत्त्वे समाने उपादाननियमो न प्राप्नोति। सदपि न भवति। विद्यमानस्योत्पादो व्याहतेति, अस्ति चोत्पद्यते चेति व्याहतम्। न सदसत्, सदसतोर्वैधर्म्यात्। सदित्यर्थाभ्यनुज्ञा, असदिति तस्य प्रतिषेधः। [३]अभ्यनुज्ञातप्रतिषिद्धयोः सामाना-

---

१. पृथिव्यादिधातुम् C द्रः वृक्षायुर्वेदे कारणभूतं द्रव्यं धातुशब्देनोच्यते इति तथैवोक्तम्। धत्ते इति धातुः पृथिवी। marginal note J २. आफलात् सद्य उप° C ३. अभ्यनुज्ञाप्रतिषेधयो: C

धिकरण्यमनुपपन्नम्। तस्मान्न सदसदपि। नाप्युभयविपरीतं कार्यं युज्यते तस्य स्वरूपानिर्देशादिति। न हि तस्य स्वरूपं शक्यं निर्देष्टुमिति॥४८॥

उत्पादव्ययदर्शनात्॥४।१।४९॥

प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा सत्यमिति। कस्मात्?

उत्पा...त्। वस्तुनः प्रागनुपलब्धरूपस्य पश्चादुपलब्धिः। सा असदुत्पादे सति युज्यते। विनाशश्चोपलब्धस्वरूपस्य पुनरनुपलब्धिरिति। न चैतत् सर्वनित्यवादिनः संभवति। न हि सत्पक्ष उत्पादो न च विनाश इति। उत्पादविनाशौ च प्रत्याचक्षाणेन लोको हेयः। अथ लोकोऽयं प्रवर्तमानः किमर्थं प्रवर्तते? ननु चायं प्रवर्तत इदमाप्स्यामि इदं हास्यामीति? सत्यमेवं प्रवर्तते। न पुनः सत्कार्यवादिनः किञ्चिद्धेयमुपादेयं वा विद्यते। प्रतिज्ञादीनां चावयवानामुपादानं व्यर्थम्, उत्पादव्ययप्रत्याख्यानात्। न किञ्चित् जायते, न किञ्चिद् विनश्यतीति अवयवानामुपादानं [१]किमर्थम्? यदि सत्कार्यप्रतिपत्त्यर्थम्, प्रतिपत्तेर्विद्यमानत्वाद् व्यर्थमुपादानम्। न हि यद् यस्य लोके भवति, स तदर्थमुपादानमुपादत्त इति। अथाज्ञानतिरोभावमात्रार्थमुपादानमिति? एतदपि तादृगेव। न ह्यनुपजातविशेषस्याज्ञाननिवृत्तिर्युक्तेति। अथाभिव्यक्त्यर्थमुपादानमिति? केयमभिव्यक्तिर्नाम, या उपादानेन क्रियते? यदि कार्यम्, व्याहतम्। अथ कार्यधर्मः, तथाप्यनिवृत्तो व्याघातः। अथोपलब्धिकार्यविषयाभिव्यक्तिः सा क्रियत इति, न मुच्यसे व्याघातात्। अथ कारणात्मनावस्थितस्य कार्यात्मनावस्थानमभिव्यक्तिः, एवमप्यनिवृत्तो व्याघातः, कार्यात्मनावस्थानमसद्भवतीति। अथ कारणस्य संस्थानविशेषोऽभिव्यक्तिः, संस्थानविशेषोऽभूत्वा भवतीति व्याघातः। अथास्ति, [२]व्यर्थं तदर्थमुपादानम्। अथ कारणस्य स्वलक्षणपुष्टिरभिव्यक्तिः, न अपूर्वोत्पादाभावे[३] स्वलक्षणपुष्टिशब्दार्थं पश्याम इति व्यर्थ-

---

१. व्यर्थम् C २. व्यर्थमुपादानम् C ३. अपूर्वाभ्यागमाभावे C

मुपादानम्[१]। स्वलक्षणपुष्टिश्च पूर्वमभूत्वा पश्चाद्भवतीति व्याघातान्न मुच्यस इति। एवं येन येन कल्पेनाभिव्यक्तिरभिधीयते, तेन तेन सत्कार्यं बाधत इति॥४९॥

बुद्धिसिद्धं तु तदसत्॥४।१।५०॥

यत् पुनरेतत्, नासदुपादाननियमादिति? **बुद्धि...सत्।** नायं सत्त्वादुपादाननियमोऽपि तु सामर्थ्यात्। [२]इदमनेन शक्यं निर्वर्तयितुम्, नेदमनेन इत्येवं बुद्ध्या सिद्धं कार्यं कृत्वा यद् यस्योत्पत्तये समर्थं तत् तस्योपादीयते। न सर्वं सर्वस्य। न सर्वस्मात् सर्वमुत्पद्यमानं दृष्टमिति। अथोत्पत्तिनियमेन [३]कार्यकारणनियमं प्रतिपद्यते, तेनापि कार्यकारणशब्दयोरर्थोऽपि वक्तव्यः। किमुक्तं भवति कारणमिति? किमुक्तं च भवति कार्यमिति? ननु च करोतीति कारणम्, क्रियत इति कार्यम्। यद्यभिव्यक्तिः, पूर्ववत् प्रसङ्गः। अथ विद्यमानेष्वपि करोत्यर्थो दृष्ट इति मन्यसे, यथा केशान् कुरु पृष्ठं कुर्विति, न तद्विद्यमानेषु रचनाविशेषः केशानाम् अविद्यमानः क्रियते। पश्चात् पृष्ठस्यापि मलापगमोऽविद्यमान इति। न विद्यमाने कारणार्थं जात्वपि पश्याम इति तस्मादसदेतत्।

यदि ह्यसत् क्रियत इति, खरस्य विषाणं किं न क्रियत इति? क एवमाह न क्रियत इति, यत् खलु खरस्य विषाणं तत् क्रियत एव, अथ कस्मात् खरः विषाणस्य कारणं न भवतीति? एतत् न जानीमः कस्मात् न भवतीति, न पुनः खरेण विषाणं क्रियमाणं दृष्टम् इत्यतोऽवसीयते [४]न कारणं खरो विषाणस्येति। एतेन शशविषाणं प्रत्युक्तम्[५]। न च तदसत्त्वात् न क्रियतेऽपि तु कारणाभावादिति। न चासत्त्वमुत्पत्तौ हेतुः। अपि तु सतोऽनुत्पत्तेरसदुत्पद्यत इति। असत्त्वाच्च खरविषाणं नोत्पद्यत इति ब्रुवाणः स्वसिद्धान्तं बाधते। न हि भवत्पक्षे खरविषाणं

---

१. °मभिधानम् J २. नेद° बुद्धिसि° C ३. कार्यनियमेन कार्यकारणनियमं C
४. न....स्येति om C ५. व्याख्यातम् C

नास्ति, सत्त्वे चासत्त्वे च समाने यस्य कारणमस्ति, तदुत्पद्यत इति। सत्कार्यवादिनश्चैवं सर्वलोकव्यवहार उच्छिद्यत इत्युक्तम्, नापूर्वं जायते, न पूर्वं विनश्यतीति।

अथासत्कार्ये किं प्रमाणम्? न सत्त्वे न चासत्त्वेऽनुमानमस्ति धर्मिण्यविप्रतिपत्तेः क्व तर्हि विवादः? यदुभयपक्षसंप्रतिपन्नं तस्य धर्मेषु तदुभयपक्षसंप्रतिपन्नाः तन्तवस्तान् प्रति पक्षा विभज्यन्ते। **एके** तावद् ब्रुवते, तन्तुमात्रं पट इति। **अपरे** तन्तवः संस्थानविशेषेणावस्थिता इति। **अपरे** तु तन्तव एव कार्यात्मना अवतिष्ठन्त इति। **अपरेषां** धर्मान्तराविर्भावतिरोभावाविति। **अन्ये** तु [१]शक्तिविशिष्टांस्तन्तून् पट इत्याहुः। तदेवं विभक्तेषु पक्षेषु तन्तुमात्रे तावद् व्यतिरेकः साधयितव्यः। स चोपपादित इति। येऽपि संस्थानविशेषेणावस्थितान् तन्तून् पट इति वर्णयन्ति, तान् प्रति साधनम्, प्रागुपलब्धिकालात् संस्थानविशेषशून्यास्तन्तवः तत्कारणत्वात् तुर्यादिवत्। एतेन कार्यात्मनावतिष्ठन्त इति व्याख्यातम्। तथा धर्मान्तराविर्भावतिरोभावाविति। अत एव शक्तिविशेषावस्थितास्तन्तव इति ब्रुवाणः किञ्चिदपि न बाधत इति। [२]तान् प्रति न साधनमुच्यत इति। य एवार्थो बुद्धिसिद्धं तु तदसदिति स एवार्थः शक्तिविशेषावस्थितास्तन्तव इति। सर्वेषु चैतेषु पक्षेषु नापूर्वोत्पादमन्तरेण पटबुद्धिः संभवतीति व्याघातोऽनिवार्यः। विद्यमानाभिव्यक्त्यर्थास्तन्तवः तदर्थिना नियमेनोपादानात् खनित्रादिवत्। विद्यमानस्याभिव्यक्तिरसतीति अभिव्यक्तिवत् कार्येऽपि प्रसङ्गः। [३]सर्वं चोत्तरमेतत्। यत्पुनरेतदुपादाननियमादिति। उपादानं च कारणम्। न च सति कारणार्थं पश्याम इति पूर्ववत् प्रसङ्गः। यदपि खनित्रादिवदिति। न हि खनित्राद्युदकार्थमुपादीयते। किं तर्हि? आवरणविगमार्थम् । आवरणविगमश्च विभागः। स चाभूत्वा भवतीति असिद्धो दृष्टान्तः। अथ विभागं न प्रतिपद्येत? सोऽप्यप्रतिपन्नविभागो विभागप्रत्ययोत्पत्तिकारणं पर्यनुयोज्यः। अथाप्राप्तिमात्रात् विभागप्रत्ययं प्रतिपद्यते? साप्यप्राप्तिः किं प्राप्तेरभाव उत प्राप्तेरन्येति? किं चातः? यदि प्राप्तेरभावोऽप्राप्तिः, सा कुतो

---

१. °स्तन्तवः C २. तं J ३. एवं C

भवतीति वक्तव्यम्। यदि यत्प्राप्तिविरोधनिमित्तं तद् विभाग इति नाभावो विभागस्य। यच्च यत्र प्रतिषिध्यते तदन्यत्र भवतीत्युक्तम्। अप्राप्तिश्च द्वयी असंश्लेषः संश्लिष्टानां विगमश्च। तत्र यः संश्लिष्टानां विगमः स विभाग इति। तं च खनित्रादीनि कुर्वन्ति। अथ प्राप्तेरन्या अप्राप्तिः, सापि द्वयी। तत्रापि पूर्ववत् प्रसङ्गः। अथ भिन्नदेशोत्पत्तिं विभागं प्रतिपद्येत, भिन्नदेशे इमे उत्पन्ने इति विशेषणोपादानान्न भिन्नदेशोत्पत्ति- 5
र्विभाग इति उत्पन्ने उत्पन्नमिति भिन्नदेशतया भिन्नमिति विभागाद् विभक्तमिति। तान्येतानि प्रत्ययभेदनिमित्तानि[१] प्रत्ययभेदानुमेयानि। न हीमे पर्यायशब्दा भिन्नमुत्पन्नं विभक्तं चेति। भिन्नदेशोत्पत्तेश्च प्रतिषिद्धत्वान्न भिन्नदेशोत्पत्तिर्विभाग इति। क्षणिकत्वाद् विभागस्य विभक्तप्रत्ययोत्पत्तिर्न युक्तेति चेत्? न, सामान्याभिव्यक्तिसंयोगविनाशाभ्यामेव प्रत्ययोत्पत्तिकालानुभवात्। पूर्वं तावत् स्वकारणादुत्पन्नो विभागः 10
सामान्यं व्यनक्ति, सामान्याभिव्यक्त्युत्तरकालं विभागप्रत्ययं च करोति संयोगं च विनाशयति। संयोगविनाशोत्तरकालं संयोगाल्लब्धात्मकाद् विनश्यतीति। तदेवमनेकक्षणानुभवादुत्पन्नमात्रो विभागो ध्वंस इत्यसिद्धम्। तदेवं व्यवस्थितमेतदसदुत्पद्यत इति॥५०॥

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः॥४।१।५१॥

15

यच्च मूलसेकादि कर्म, यच्च पर्णादिफलं तदुभयं वृक्षाश्रयम्। कर्म त्विह फलं चामुत्रेति आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदसिद्धो दृष्टान्तः॥५१॥

प्रीतेरात्माश्रयत्वादप्रतिषेधः॥४।१।५२॥

आश्रयव्यतिरेकोऽसिद्ध इति सूत्रार्थः। यत्रैव कर्म तत्रैव कर्मफलमिति॥५२॥

---

१. भिन्नप्रत्ययनि॰ C

न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात्॥४।१।५३॥

पुत्रादिफलत्वेन निर्दिश्यते। न च पुत्राद्यात्मनि वर्तत इति॥५३॥

तत्संबन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः॥४।१।५४॥

पुत्रादिसंबन्धात् फलं प्रीतिर्भवति, तत्कारणत्वात् पुत्रादि फलशब्देनाभिधीयते। यथान्नसाधनाः प्राणाः अन्नं वै प्राणा इति। उपचारश्च [१]प्रमाणाभावात् लोकप्रयुक्तवाक्यानुविधानेन क्रियत इति॥५४॥

॥फलपरीक्षाप्रकरणम्॥

[दुःखपरीक्षाप्रकरणम्]

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः॥४।१।५५॥

फलानन्तरं दुःखमुद्दिष्टम्, [२]लक्षितं च बाधनालक्षणं दुःखमिति। तत् किमिदं सर्वलोकसाक्षिकस्य सुखस्य प्रत्याख्यानम्। आहोस्विदन्यः कल्प इति। अन्य इत्याह। कथम्? न वै सर्वलोकसाक्षिकं सुखं शक्यं प्रत्याख्यातुम्। अयं तु जन्ममरणप्रबन्धानुभवनिमित्ताद् दुःखान्निर्विण्णस्य दुःखं जिहासतो दुःखभावनोपदेशः। कथं नामायं सर्वं दुःखमिति भावयेत्? भावयंश्च विरज्येत? विरक्तो मुच्येतेति? कथं पुनरयं सर्वं दुःखमिति भावयति? सर्वे सत्त्वनिकायाः सर्वः पुनर्भवः सर्वमुत्पत्तिस्थानं दुःखसाहचर्याद् दुःखमित्युक्तमृषिभिः[३] दुःखभावनमुपदिश्यते।

---

१. प्राणाभा॰ C २. उक्तं J ३. दुःखमिति J

तत्र च हेतुरुपादीयते **विवि....त्पत्तिः**। तत्र जायत इति जन्म शरीरेन्द्रियबुद्धयो व्यपदिश्यन्ते। शरीरादीनां प्रादुर्भाव उत्पत्तिः। जन्मन उत्पत्तिर्जन्मोत्पत्तिः। त्रिविधा च बाधना हीना मध्यमोत्कृष्टा चेति। शेषं **भाष्ये**। अनेनाभिप्रायेण दुःखोद्देशो सुखप्रत्याख्यानं तु न[1] ॥५५॥

न सुखस्याप्यन्तरालनिष्पत्तेः ॥४।१।५६॥

कस्माद्? बाधनान्तराले सुखमुत्पद्यमानं प्रत्यक्षदृष्टमिति॥५६॥

बाधनानिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः ॥४।१।५७॥

इतश्च, **बाध....षेधः**। सुखस्य दुःखोद्देशेनेति प्रकरणात् यस्मादयं वेदयते इदं मे सुखसाधनमिदं मे दुःखसाधनमिति सुखसाधनमासुं दुःखसाधनं हातुं प्रयतते। सुखसाधनानां प्राप्तये चास्य यतमानस्यानेकविधस्तापोऽनुप्लवते। ततस्ता-पानुपप्लवात् सर्वं दुःखमित्युच्यते, न सुखस्याभावादिति, अयमेव चार्थो **मुनिना** श्लोकेन वर्णितः।

कामं कामयमानस्य यदा कामः समृध्यति।
अथैनमपरः कामः क्षिप्रमेव प्रबाधते॥[2]

इत्येवमादि॥५७॥

दुःखविकल्पे सुखाभिमानाच्च॥४।१।५८॥

यश्च सुखार्थं यतमानस्य दुःखविकल्पो भवति तं सुखाङ्गभावात् सुखमित्य-

---

१. न सुखं प्रत्याख्यातुम् C २. द्रः महाभारतम् xii.94.30

भिमन्यमानः पुनस्तदुपादत्ते। पुनः पुनर्जायत इति न संसारमतिवर्तते। तस्याः सुखसंज्ञायाः प्रतिपक्ष उपदेशोऽयं क्रियते[१] सर्वं दुःखमिति। यद्येवं कस्माद् दुःखं जन्मेति नोच्यते? सोऽयमेवं वक्तव्ये यदाह दुःखमेवेति तेन चास्य सुखाभावं ज्ञापयति। यदपि तद्बाधनान्तरालेषु सुखमुपजायते तदपि दुःखमेव दुःखानुषङ्गात्, न पुनरभावादिति। जन्मविनिग्रहार्थीयो वै खल्वयमेवशब्दः। जन्मनोऽनेन विनिग्रहं शास्ति। सर्वं दुःखमिति भावयन् तत्साधनानि नोपादत्ते। अनुपादानात्[२] विमुच्यत इति॥५८॥

॥दुःखपरीक्षाप्रकरणम्॥

[अपवर्गपरीक्षाप्रकरणम्]

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः॥४।१।५९॥

दुःखोद्देशानन्तरमपवर्गः। स प्रत्याख्यायते, **ऋण...भावः**। इत्यनेन सूत्रेण। ऋणानुबन्धान्नास्त्यपवर्गः। शेषं **भाष्ये**। अनुबन्धः सर्वदाकरणीयता। नायम् ऋणानुबन्धात् कदाचिन्मुच्यते जन्मप्रभृति यावत् प्रायणमिति। क्लेशानुबन्धादप्यपवर्गो नास्ति। क्लेशानुबद्ध एवायं जायते, क्लेशानुबद्धो[३] म्रियत इति। प्रवृत्त्यनुबन्धादपवर्गो नास्ति। न हि कदाचिदयं कर्म न करोतीति[४]॥५९॥

[५]प्रधानशब्दानुपपत्तेर्गुणशब्देनार्थवादो निन्दाप्रशंसोपपत्तेः॥४।१।६०॥

यत् तावदृणानुबन्धादिति, **प्रधा...पत्तेः**। इति। ऋणैरिति नायं प्रधानशब्दः

---

१. उद्देशः क्रियते J २. अनुपाददान C ३. °द्ध एवायं C ४. नास्ति-न कर्म करोति। C ५. °शब्दानुप° °नानुवादो C; नायमर्थवादो J

प्रत्यादेयदानप्रतिदेयग्रहणासंभवात्। यत्र खल्वेकः प्रत्यादेयं ददाति इतरः प्रतिदेयं गृह्णाति, तत्रायमृणशब्दः प्रधानं भवति, अन्यत्र भाक्त इति। तस्माद् गुणशब्देनायमर्थवादः[१]। यथा अग्निर्माणवक इति। तत्राग्निशब्दो दहनादिसमर्थे तेजोविशेषे वर्तते, स तत्र प्रवर्तमानः तत्सामान्यादतथाभूते माणवके प्रयुज्यते अग्निर्माणवक इति। न पुनरयमग्निशब्दो माणवकसमानाधिकरणो दहनादिसमर्थं माणवकं प्रतिपादयति, अपि तु येऽग्नेः पिङ्गलपाटवादयो[२] धर्माः तत्संबन्धिनं माणवकं प्रतिपादयति। तद्द्वारकश्च प्रयुज्यमानोऽयं शब्दः गुणोपकरणत्वाद् गौणो भवति, तथा च ऋणशब्दः। अप्रयुक्तक्रमं चेदं वाक्यम् ऋणवान् जायत इति। उपमा तु लुप्तनिर्दिष्टा[३] द्रष्टव्या, ऋणवानिव जायत इति क उपमानार्थः? अस्वातन्त्र्यम्। ऋणवान् यथा अस्वतन्त्रः, एवमयं जायमानः कर्मस्वस्वतन्त्रो वर्तत इति। जायमान इति चायं गुणशब्द एव न मुख्ये संभवति। न हि मातृतः कुमारके जायमाने लोहितपाणिपादास्येऽध्ययनादिधर्मोपपत्तिरिति। अतो गृहस्थे जायमाने इति। किं पुनर्गृहस्थस्य जायमानेन कुमारकेण सामान्यम्? क्रियासंबन्धः। अग्निहोत्रहवनादिक्रियासंबन्धसामान्याद् गृहस्थो जायत इति। यथा मातृतः कुमारको जायमानः शरीरादिभिः संबध्यते एवमग्निहोत्रहवनादिक्रियासंबन्धसामान्येन जायत इति। कस्मात्? शक्तस्यार्थिनश्च कर्मभिरधिकारात्, शक्तश्चार्थी च कर्मभिरधिक्रियते। न च मातृतः कुमारके जायमाने शक्तिः, न चार्थितेति। उभयं तु गृहस्थे जायमाने। तस्माद् गृहस्थो जायमानोऽभिधीयत इति।

अर्थित्वस्याविपरिणामे जरामर्यवादोपपत्तिः। यच्चेदं ब्राह्मणमाजरसं कर्मभिः संबन्धं शास्ति तदन्यथा संभवतीति अर्थित्वस्याविपरिणामे जरामर्यवादोपपत्तिः। [४]यथा स्कन्धविपरिणाम इति। यदार्थित्वं विपरिणतं भवति, तदानेनाग्निहोत्रं संन्यसनीयम्। आयुषस्तुरीयभागं प्रव्रज्यायुक्तमाह जरेति। यावज्जीवसंयोगे हि

---

१. नानुवाद इति। C २. पाटलत्वादयो C ३. °मात्र लुप्ता C ४. यदार्थित्वाविपरिणामः C

जरया हवा इत्यनर्थकं वाक्यम्, यस्मात् स्वयमशक्तस्य बाह्या शक्तिर्विहिता सत्यर्थित्वे [१]तेन हवनं शास्ति। यदा पुनरर्थित्वं विपरिणतं तदा संन्यासो विधीयत इति। कस्मात् पुनरेतदेवमुच्यते सत्यर्थित्वे अग्निहोत्रहवनमिति? कर्मविधौ कामसंयोगश्रुतेः। यस्मात् सर्वस्मिन् कर्मणि कामविधिः श्रूयते स्वर्गकाम इति। यथोपदिष्टार्थविज्ञानं[२] चोपदेशविषयः। यश्चोपदिष्टमर्थं विजानाति तं प्रत्युपदेशः क्रियते, न गायनो बधिरेषु प्रवर्तते न नर्तकोऽन्धेषु। न चोपदेशविज्ञानं बालकेष्वस्ति। तस्मान्न तं प्रत्युपदिश्यत इति। न भिद्यते च लौकिकात्। लौकिकोऽपि तावदपरीक्षको न जातं कुमारकमेवं ब्रूयात् अधीष्व यजस्व ब्रह्मचर्यं चरेति। कुत एवमृषिरुपपन्नानवद्यवादी ब्रूयादिति। अथापि विहितं वा अनूद्येत कामाद् वा अर्थः कल्प्येतेति। विहितानुवचनं न्याय्यम्। तत्रानुपपन्नप्रमाणकस्यार्थस्याभिधानं कामतः प्रकल्प्यः[३]। यो ह्यर्थः प्रमाणतो न संभवति तस्य यदभिधानं कामतः स प्रकल्पो भवति। यथा जायमानः कुमारकः ऋणवान् भवतीति। उपपन्नप्रमाणकस्याभिधानमनुवचनम्, यथा जायमानशब्दो गृहस्थवचन[४] इति, कथमवगम्यते जायमानो गृहस्थ इति? यज्ञसाधनत्वात्, यस्मात् यजमानो यज्ञाङ्गं भवति। साधनेषु च प्रयत्नव्यापारो दृष्टो न फले। यथा पाकसाधनेषु काष्ठादिषु न पाके न लोष्टादिष्वसाधनेषु। शेषं **भाष्ये** ॥६०॥

समारोपणादात्मन्यप्रतिषेधः ॥४।१।६१॥

कथं पुनरिदं गम्यते फलार्थिन एतद् ब्राह्मणं भवतीति अधिकाराच्च विधानं विद्यान्तरवत्[५]। **समा...षेधः**। यस्मात् निवृत्ते फलार्थित्वे समारोपणं विधीयते ॥६१॥

---

१. अन्येन C २. °र्थः विद्वांश्चो C ३. °ल्प्येत C ४. गृहस्थे J ५. अधिकाराच्च° °वत् om C

पात्रचयान्तानुपपत्तेश्च फलाभावः ॥४।१।६२॥

यस्मात् निवृत्तेऽर्थित्वे प्रव्रजितानां पात्रचयान्तानि कर्माणि न क्रियन्ते। यदि चेदं ब्राह्मणमविशेषेण प्रवर्तते तेन सर्वत्र पात्रचयान्तानि कर्माणि प्रसज्यन्त इति। शेषं **भाष्ये** ॥६२॥

सुषुप्तस्य स्वप्नादर्शने क्लेशाभाववदपवर्गः ॥४।१।६३॥

यत् पुनरेतत् क्लेशसन्ततेरविच्छेदादिति? **सु...वर्गः**। यथा सुषुप्तस्य स्वप्नादर्शिनः क्लेशानुबन्धो विच्छिद्यते सुखदुःखसाधनानुबन्धश्च तथा मुक्तस्यापीति। तच्च योगिनो मुक्तस्य रूपमुदाहरन्तीति ॥६३॥

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥४।१।६४॥

यदपि प्रवृत्त्यनुबन्धादिति। **न ....स्य**। विद्यमानापि प्रवृत्तिः क्लेशमन्तरेण प्रतिसन्धानाय न भवतीति धर्माधर्मकारणं न भवतीति यावदुक्तं स्यात्। प्रतिसन्धिस्तु पूर्वजन्मनिवृत्तौ पुनर्जन्म। तच्च तृष्णाकारितम्। एतच्चोक्तं

वीतरागजन्मादर्शनात्

इति सूत्रे। कर्मवैफल्यप्रसङ्ग इति चेत्, न। कर्मविपाकप्रतिसंवेदनस्याप्रत्याख्यानात्। न ब्रूमो विद्यमाने कर्मणि मुच्यत इति, अपि तु सर्वकर्माणि अन्ते जन्मनि विपच्यन्ते ॥६४॥

न क्लेशसन्ततेः स्वाभाविकत्वात्॥४।१।६५॥

नोपपद्यते क्लेशसन्ततेर्विच्छेदः। कुतः? क्लेशसन्ततेः स्वाभाविकत्वात्। अनादिरियं क्लेशसन्ततिः स्वभावतः प्रवृत्ता। न चासावुच्छेत्तुं शक्येति॥६५॥

प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेऽप्यनित्यत्वम्॥४।१।६६॥

अत्र **केचित्** परिहारं वर्णयन्ति, **प्रा...त्वम्।** यथा प्रागुत्पत्तेरभावो अनादिः, अथ च भावेन निरुध्यते, एवमनादिः क्लेशसन्ततिरतत्त्वज्ञस्य तत्त्वज्ञानेन निरोत्स्यत इति॥६६॥

अणुश्यामताऽनित्यत्ववद् वा॥४।१।६७॥

यथा अणौ श्यामता अनादिश्च अनित्या च, एवं क्लेशसन्ततिरपि। सतः खलु धर्मो नित्यत्वमनित्यत्वं चेति नित्यानित्यत्वे अवधारयद्भिरुक्तम्। तत्तु अभावे भाक्तमिति। का पुनरिह भक्तिः? नित्यमकारणम्, अकारणश्च प्रागभावः। अनित्यं भूत्वा न भवति। न च प्रागभावो भावे सति भवत्येतत् सामान्यम्। यत् पुनरेतत्, अनादिरणुश्यामतेति। हेत्वभावादयुक्तम्। अनुत्पत्तिधर्मकमनित्यमिति नात्र हेतुरस्ति इति॥६७॥

न, सङ्कल्पनिमित्तत्वाच्च रागादीनाम्॥४।१।६८॥

अयं च समाधिः, **न ...नाम्।** कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्चेति चार्थः। अनुभूतविषयप्रार्थना सङ्कल्प इत्युक्तम्। मिथ्यासङ्कल्पेभ्यो रञ्जनीयकोपनीय-

मोहनीयेभ्यो रागादयः प्रादुर्भवन्ति। कर्म च निकायनिर्वर्तकं सङ्कल्पापेक्षं रागादीन् जनयति। दृष्टो हि कश्चित् सत्त्वनिकायो रागबहुलो यथा पारावतादिः। कश्चित् क्रोधबहुलो यथा सर्पादिः। कश्चित् मोहबहुलो यथा अजगरादिः। यदि च कर्म रागादीन् निर्वर्तयेत् सर्वदा रागादिर्भवेदित्यनिर्मोक्षप्रसङ्गः। न, कारणवैकल्यात्। सङ्कल्पाद्यपेक्षं कर्म रागादिकारणम्। न निरपेक्षमिति। सुखादीनामपि तर्हि कर्म कारणं न प्राप्तम्? न, निरपेक्षत्वात् कर्म सुखादिषु कर्तव्येषु सङ्कल्पं नापेक्षते। अपि तु स्वकारणसन्निधानापेक्षं सुखादि करोति। यथोत्क्षेपणादिकर्म नोदनाद्यपेक्षं संस्कारं करोति, अनपेक्षं तु संयोगविभागाविति। परस्परनिमित्तत्वं च रागादीनां दृष्टम्। रक्तो मुह्यति। रक्तः कुप्यति। कुपितो मुह्यति रज्यते च। मूढः कुप्यति रज्यते चेति। यदपीदमुच्यते अनादिः क्लेशसन्ततिरिति, तन्न, अविशेषात्। यथा अनादिः क्लेशसन्ततिः, एवमाध्यात्मिका भावाः सर्वेऽनादिना प्रबन्धेन प्रवर्तन्ते। न जात्वनुत्पन्नपूर्वं किंचनोत्पद्यते। न चैवं किञ्चिदनुत्पत्तिधर्मकं व्ययधर्मकं प्रतिज्ञायते। अनुत्पन्नपूर्वं तु तत्वज्ञानं केवलमुत्पद्यते। नान्यः कश्चिदाध्यात्मिको भाव इति॥६८॥

॥अपवर्गपरीक्षाप्रकरणम्॥

॥इति औद्द्योतकरे न्यायवार्त्तिके चतुर्थाध्यायस्य प्रथमाह्निकम्॥

चतुर्थाध्याये द्वितीयाह्निकम्

[तत्त्वज्ञानोत्पत्तिप्रकरणम्]

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥४।२।१॥

तदिदं तत्त्वज्ञानमुत्पद्यमानं किं विषयमात्रे भवति आहोस्विद् विषयविशेष इति? विषयमात्रे तावदशक्यं तत्त्वज्ञानेन भवितुम्। कुतः? विषयाणामानन्त्यात्। विषयविशेषेऽपि तत्त्वज्ञानविषयत्वेन योऽवतिष्ठते स विभज्य वचनीयः। तत्र विषयान्तराणामात्मादिप्रमेयव्यतिरेकिणां निराकरणं प्रमेयविशेषविषयत्वात् सूत्रस्य। यत् तदात्मादिसूत्रं न तेन प्रमेयमात्रमभिधीयते। प्रमेयमात्राभिधाने हि आत्मादिग्रहणं व्यर्थम्। अपि तु प्रमेयविशेषः। यस्तत्त्वज्ञानविषयत्वेन व्यवतिष्ठमानः संसारव्यवच्छेदहेतुर्भवति, यश्च मोहविषयत्वात् संसारं प्रतनोति स तत्त्वतो ज्ञेय इति। तस्मिन्नयं प्रश्नः। किं नु खलु भो यावन्तो विषयाः तावत्सु तत्त्वज्ञानं प्रत्येकमुत्पद्यते, अथ क्वचिदुत्पद्यत इति? न तावत्प्रत्येकम्, आत्मादेरानन्त्यात्। किमिदमानन्त्यम्? इयत्ताप्रत्ययाविषयत्वम्। अथ क्वचिदुत्पद्यते? यत्र नोत्पद्यते तत्त्वज्ञानं तत्रानिवृत्तो मोहः। यत्र मोहः, तत्र रागद्वेषाविति रागद्वेषमोहाश्च बन्धनमित्यनिर्मोक्षप्रसङ्गः। अथ मन्यसे [1]अन्यविषयं त[त्त्वज्ञान]म् अन्यविषयं मोहं निवर्तयतीति? एवं च [2]सति अविशेषेणापवर्गः प्राणिमात्रे प्राप्नोति। न हि कश्चित् प्राणी कस्यचिदर्थस्य [3]तत्त्वमात्रं न वेत्तीति। न, मोहार्थापरिज्ञानात्। न तत्त्वज्ञानस्यानुत्पत्तिमात्रं मोहोऽपि तु मिथ्याज्ञानं मोहः। तच्च मिथ्याज्ञानं यस्मिन् विषये प्रवर्तमानं संसारबीजं भवति, स विषयस्तत्त्वतो ज्ञेय इति। किं पुनस्तन्मिथ्याज्ञानम्? अनात्मन्यात्मग्रह इति। शेषं **भाष्ये**॥

---

१. अन्यविषयं त.....म् J २. सत्यपवर्गः C ३. तत्त्वं न वेति C

दोष....वृत्तिः। शरीरादिदुःखान्तं प्रमेयं दोषनिमित्तम्। तद्विषयत्वान्मिथ्याज्ञानस्य। तद्विषये तत्त्वज्ञानमुत्पन्नं तद्विषयमहङ्कारं निवर्तयतीति समाने विषये तयोर्विरोधात्। सर्वं चैतदुक्तं द्वितीयसूत्र इति॥१॥

दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः॥४।२।२॥

कामा वियया इन्द्रियार्था रूपादय उच्यन्ते। त एते विषया मिथ्या सङ्कल्प्यमाना रागादीन् जनयन्ति। कः पुनरेषु मिथ्यासङ्कल्पः? असाधारणप्रत्ययोत्पत्तिनिमित्तत्वेन व्यवसायो ममैवैत इति। तान् साधारणतया प्रतिसंचक्षीत। नैते मम दैवचौराग्निदायादादिसाधारणा इति। एवमेतस्य प्रतिसंचक्षाणस्य यो व्यवसायस्तद्विषयो मोहः स निवर्तत इति। तन्निवृत्तावध्यात्मं शरीरादीन् प्रतिसंचक्षीत इति। किं पुनरेतैः प्रसंख्यानम्? शरीरादिषु नैते आत्मान इति व्यतिरेकदर्शनं प्रसंख्यानम्। सोऽयमध्यात्मं बहिश्च विविक्तचित्तो विहरन् मुक्त इत्युच्यते। एतच्च त आहुः

जीवन्नेव विद्वान् संहर्षायासाभ्यां विप्रमुच्यते।

इति॥२॥

तन्निमित्तं त्ववयव्यभिमानः॥४।२।३॥

अतः परं काचित् संज्ञा भावयितव्या काचिद्धेया इत्युपदिश्यते। नार्थनिराकरणं नार्थोपादानम्, किं तु यथाव्यवस्थित एव विषये किञ्चिद्भावनीयं किञ्चित् निराकरणीयमिति। **तन्नि...मानः।** तेषां दोषाणां निमित्तमवयव्यभिमानः। तत्रावयवीति संज्ञा भावनीया स्त्रीसंज्ञा हेया सपरिष्कारा पुरुषस्य। परिष्कारो बन्धनम्। स्त्रियाः पुरुषसंज्ञा सपरिष्कारेति। तत्रापि च द्वे संज्ञे निमित्तसंज्ञा अनुव्यञ्जनसंज्ञा च। निमित्तसंज्ञा दन्तौष्ठमिति। दन्तादिषु दन्तत्वादिनिबन्धना संज्ञा निमित्तसंज्ञा। एवं

च अनुव्यञ्जनसंज्ञा इत्थं दन्ता इत्थमोष्ठाविति, इत्थमित्यध्यारोपेण निमित्तस्य। सेयमध्यारोपेण भाव्यमाना संज्ञा मोहः। स च रागादिकारणमिति प्रहेयः। न पुनरवयवी निराकर्तव्यः प्रमाणतस्तथाभावादिति॥३॥

॥तत्त्वज्ञानोत्पत्तिप्रकरणम्॥

[प्रासङ्गिकमवयवावयविप्रकरणम्]

विद्याविद्याद्वैविध्यात् संशयः।।४।२।४॥

अथेदानीमर्थं[1] निराकरिष्यता अवयविन्युपपाद्यते[2], **विद्या....शयः**। सदसतोरुपलम्भाद् द्विविधा विद्या। सदसतोरनुपलम्भादविद्यापि द्विविधैव। सोऽयं चावयवी यद्युपलभ्यते, अथापि नोपलभ्यते न कथंचन संशयाद् विमुच्यत इति। अत्र तावदुक्तं न विद्याविद्याद्वैविध्यं संशयस्य कारणम्, उपलब्ध्यनुपलब्ध्योः पूर्वपदविशेषणत्वात्॥४॥

तदसंशयः पूर्वहेतुप्रसिद्धत्वात्।।४।२।५॥

तस्मिन्नवयविनि संशयो न युक्तः पूर्वोक्तानां हेतूनामप्रतिषेधात्। तत्र येऽवयविनोऽर्थान्तरभावे हेतव उद्दिष्टास्ते न शक्याः प्रतिषेद्धुमिति॥५॥

वृत्त्यनुपपत्तेरपि न संशयः[3]।।४।२।६॥

वृत्त्यनुपपत्तेरपि तर्हि संशयानुपपत्तिः, नास्त्येव ह्यवयवीति॥६॥

---

१. °मवयविनं निरा° J २. अवयव्यु° C var. ३. J पुस्तके वागीश्वरवृत्तौ च नेदं सूत्रम्।

कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥४।२।७॥

तद्विभजते, **कृ....भावः**। अवयवा वा अवयविनि वर्तेरन् अवयवी वा अवयवेषु। अवयवा अवयविनि वर्तमानाः कृत्स्नेन वा वर्तन्ते, एकदेशेन वा? तत्र तावदवयवः अवयविनि कृत्स्ने न वर्तते, अवयवावयविनोः परिमाणभेदात्। अल्पपरिमाणोऽवयवो महापरिमाणश्चावयवी अल्पपरिमाणेन च महापरिमाणस्याव्याप्तिः। एकद्रव्यश्चावयवः प्राप्नोति एकावयवविवृत्तित्वात्। न चैकद्रव्यं द्रव्यमविनश्यदाधारमस्ति। नाप्यवयव्येकदेशेन वर्तते। न ह्यस्यान्येऽवयवा एकदेशभूताः सन्तीति। तस्मिन्नपि चैकदेशेन वर्तमानोऽवयवः किमेकदेशेन वर्तते, अथ कात्स्न्र्येन[१] वर्तत इति पूर्ववत् प्रसङ्गः॥७॥

तेषु चावृत्तेरवयव्यभावः ॥४।२।८॥

अथावयवेषु अवयवी वर्तते? **तेषु ....भावः**। न तावत् प्रत्यवयवं कृत्स्नो वर्तते तयोः परिमाणभेदाद् अवयविनश्च एकद्रव्यताप्रसङ्गात्। एकावयववृत्तित्वादेकद्रव्योऽवयवी [२]प्राप्नोति, एकद्रव्यश्चावयवी[३] एकेन अवयवेनारभ्यत इति सततोत्पत्तिप्रसङ्गः। किं च एकवृत्तित्वाच्च[४] द्व्यणुकमेकस्मिन् परमाणौ वर्तत इति कारणविभागविनाशासंभवात्[५] नित्यं प्राप्नोति। उत्पत्तिमच्च नित्यं चेति न दृष्टान्तोऽस्ति। अथावयवी एकदेशेन वर्तते, तथापि अवयविन आरम्भकावयवव्यतिरिक्तावयवाः प्राप्नुवन्ति, येऽवयवेषु[६] वर्तन्त इति॥८॥

---

१. वर्तते कृत्स्नेन वेति C २, ३. प्रा॰ ्यवी om J ४. एकद्रव्यत्वात् द्व्य॰ C ५. ्शाभावात् C ६. यैरवयवेषु J

पृथक् चावयवेभ्योऽवृत्तेः[१] ॥४।२।९॥

नाप्यवयवव्यतिरेकेणान्यत्र वर्तते अग्रहणात्, नित्यत्वप्रसङ्गाच्च। अवयवव्यतिरेकेणान्यत्र वर्तमान उपलभ्येत, नित्यश्च स्याद्द्रव्यत्वादनाधारं द्रव्यं नित्यमिति॥९॥

न चावयव्यवयवाः॥४।२।१०॥

न चावयवानां धर्ममात्रमवयवी। कस्मात्? [२]धर्ममात्रस्य अवयविनो धर्मिभिरवयवैः पूर्ववत् संबन्धोऽनुपपन्नः। न चान्यत्र धर्मिभ्योऽवयवेभ्योऽवयवी धर्मः पृथगुपलभ्यते नित्यत्वप्रसङ्गादिति च समानम्। अवयवी चैकदेशेन अवयवेषु वर्तत इति अवयवसमूहमात्रमवयवी प्राप्नोति। एकस्मिंश्चावयवे एकदेशेन वर्तमानोऽवयवी एकावयवोपलम्भात् [३]एकदेशेनोपलब्धौ [४]तत्स्थानेऽवयवी गृह्येत। न त्वेकतन्तुदर्शने पटोपलब्धिर्भवति। तदेवं मुक्तसंशयमभिधीयते नास्त्यवयवीति॥१०॥

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥४।२।११॥

यत् तावदवयवा अवयविनि वर्तन्त इति, तन्न, अनभ्युपगमात्। न हि कारणं कार्ये वर्ततेऽपि तु कारणे कार्यमिति। यत् पुनरेतदवयव्यवयवेषु वर्तमान एकदेशेन वा वर्तते कात्स्न्र्येन वा वर्तत इति तत्[५]। **एक....श्नः**। कृत्स्नमिति च एकदेश इति

---

१. अवयव्यवृत्तेः C २. धर्मस्या॰ C ३. एकदेशोप॰ J ४. तत्स्थोऽव॰ J ५. तन्न C

च भेदविषयावेतौ शब्दौ न चैतावेकस्मिन्नुपपन्नौ। अनेकस्याशेषता कृत्स्नशब्दस्यार्थः। अशेषे च सति कस्यचिदभिधानमेकदेशशब्दस्य। न चैतदिहोपपद्यत इति। तस्मान्नावयविनि कृत्स्नशब्दो नाप्येकदेशशब्द इति॥११॥

अवयवान्तरभावेऽप्यवृत्तेरहेतुः॥४।२।१२॥

अवयवान्तरभावादिति। यद्यपि स्वावयवव्यतिरिक्तमवयवान्तरं प्रतिपद्येथाः, तथाप्यवयवोऽवयवे वर्तेत नावयवीत्यहेतुः। अवयवान्तराभावात् नावयवेन[1] वर्तत इति। [2]एवं चानेकत्र वर्तत इति प्रतिजानानो नानुयोक्तव्यः, उभयेन व्याघातादित्युक्तम्। यद्यवयवी नैकदेशेन वर्तते न कृत्स्नो[3] वर्तते अथ कथं वर्तत इति वृत्त्यर्थो वाच्यः[4]। वृत्तिरस्यावयवेषु आश्रयाश्रयिभावः समवायाख्यः संबन्धः। स कथं भवतीति? यस्य यतोऽन्यात्रात्मलाभानुपपत्तिः स तत्रैव वर्तत इति। न खलु कारणद्रव्येभ्योऽन्यत्र कार्यद्रव्यमात्मानं लभत इति। विपर्ययस्तु कारणद्रव्येषु। न कारणानि कार्यद्रव्येष्वात्मानं लभन्त इति। कथं नित्येष्वाश्रयाश्रयिभावः? अनित्येषु दर्शनात् सिद्धो नित्येषु। यथा अनित्यानि यत्रोपलभ्यन्ते तत्र वर्तन्ते, तथा नित्यान्यपि यत्रोपलभ्यन्ते तत्र वर्तन्त इति। एतत् समानमनित्यानां नित्यैः।

रूपाद्यन्तरानिर्देशादिति चेत्? अथ मन्यसे यद्यवयवव्यतिरिक्तोऽवयवी भवति, तस्यावयवस्य रूपादिव्यतिरेकेणावयविनो रूपान्तरं निर्देष्टव्यम्, यथा अचित्रास्तन्तवः पटं चित्रमारभन्त इति? न, उपलभ्यमानरूपाद्याधारत्वात् यदवयविनो रूपमुपलभ्यते तदस्य रूपं यथावयवस्य। कार्यकारणभावाभ्युपगमाच्चाविरुद्धः। अवयविनो रूपं निर्दिश्यतामिति ब्रुवाणेन अवयवावयविनौ तावदभ्युपगतौ। तदभ्युपगमाच्च विरुद्धः। एतावानेवायं विवाद [5]इत्यभ्युपेतहानिः। उपेत्य चित्रवादं ब्रूमः पटस्य चित्रं रूपमिति।

---

१. नैकदेशेन C २. एकं C ३. कात्स्न्र्येन C ४. वृत्त्यर्थो वाच्यः J ५. इत्यभ्युपेत्य J

अनेकत्वप्रसङ्ग इति चेत्? अथ मन्यसे चित्रं रूपमवयविनोऽभ्युपगच्छता अनेकरूपोऽवयवी प्रतिपन्नो भवति। न चैकं द्रव्यमनेकरूपम्। नाप्यनेकस्मिन् एकमिति? न, चित्रशब्दस्यैकानेकविषयत्वात्। चित्रशब्देनैकं चाभिधीयते, अनेकं च। चित्रं रूपं चित्राणि रूपाणीति। न, एकस्मिन्नदृष्टत्वात्। न हि एकं रूपं चित्रं दृष्टमिति। न, अभ्युपेतहानेः। एकं चित्रमित्यनभ्युपगच्छतानेकं चित्रमिति हेयम्, एकचित्रसमुच्चयो ह्यनेकं चित्रमिति। अथानेकमचित्रं चित्रमित्युच्यते? एवमप्यनिवृत्तो व्याघातः, अचित्रं चित्रमिति, यथा अशुक्लं शुक्लमिति। अथाचित्राणि तन्तुरूपाणि संहत्य पटे चित्रं रूपमुत्पादयन्तीति पक्ष आश्रीयते, एवं च न किञ्चिद् बाध्यते। पुटान्तरे प्रसङ्गश्चित्रप्रत्ययस्य। यस्य पटस्य एकं चित्रं पार्श्वं द्वितीयमचित्रम्, तेन यथैकस्मिन् पार्श्वे तं पटं पश्यतश्चित्रपटबुद्धिर्भवति, एवं पुटान्तरेऽपि चित्रबुद्ध्या भवितव्यम्? भवतैवेदमुक्तम्। यस्य पटस्यैकं पार्श्वं चित्रं स तु पटो न चित्रः पार्श्वस्यापटत्वात्। चित्रप्रत्ययस्तत्र कस्मान्नेति चेत्? चित्राचित्राभ्यां पार्श्वाभ्यां पट आरभ्यमाणश्चित्रः पट इति यथा [१]पार्श्वान्तरेऽपि चित्रप्रत्ययः प्रसक्तः। न प्रसक्तः, एकस्य चित्ररूपस्यानारम्भकत्वात्। एकस्मिन् पार्श्वे चित्रं रूपं तत् कथमवयविनि रूपाद्यन्तरमारभेत इति। एतावच्च शक्यं वक्तुम्। अवयवरूपाभ्यामवयविनि रूपान्तरमारभ्यते, तथोपलब्धेः। यद्ययमरूपोऽवयवी स्यात्, नोपलभ्येत। न तावदवयवरूपादवयविनो ग्रहणं युक्तम्। वायोरप्युपलब्धिप्रसङ्गात्। यद्यन्यरूपादन्यस्योपलब्धिर्भवति, वायोरप्युपलब्धिः प्राप्नोति। न चैतदस्ति। तस्मात् स्वरूपादवयव्युपलभ्यते। उभयावयवरूपदर्शनप्रतिसन्धानाच्चावयविनि रूपोपलब्धिर्भवति। न चैवं सत्यरूपोऽवयवीति। तस्मादवयविन्यभिमानः प्रतिषिध्यते सपरिष्काररूपो नावयवीति। यथा रूपादिषु मिथ्यासङ्कल्पो न रूपादय इति। अयं चार्थो **मुनिना** श्लोकेन दर्शितः—

---

१. पुटान्तरे चित्रप्रत्यय एवं चित्रप्रत्ययः पुटान्तरेऽपि प्रसक्तः? C

इन्द्रियार्था ह्यनर्थाय यदि स्युरविकल्पिताः।
सर्वोऽनर्थेन युज्येत चरन्निन्द्रियगोचरे॥

इति॥१२॥

केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः॥४।२।१३॥

सर्वाग्रहणमवयव्यसिद्धेरिति प्रत्यवस्थितोऽर्थभेदमाह, **केश....लब्धिः**। यथैकैकः केशानां तैमिरिकेण नोपलभ्यते, केशसमूहस्तूपलभ्यते, तथा एकैकशोऽणुर्नोपलभ्यते अणुसमूहस्तूपलभ्यत इति। तदिदमणुसमूहविषयं ग्रहणमिति॥१३॥

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद् विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः॥४।२।१४॥

न हीन्द्रियं प्रकृष्यमाणं स्वविषयमतिक्रामति। न हि चक्षुः प्रकृष्यमाणं रसं गृह्णाति, नापि निकृष्यमाणं स्वविषयात् प्रच्यवते। अपि तु स्वविषय एवेन्द्रियस्य प्रकर्षाप्रकर्षापेक्षाणि पटुमन्दभावेन ग्रहणानि भवन्तीति। तत्र पटुग्रहणं सामान्यविशेषतद्वतां ग्रहणमिति। मन्दं तु ग्रहणं सामान्यमात्रालोचनमिति। सोऽयं तैमिरिकः कञ्चित् चक्षुर्विषयं केशं न गृह्णाति, केशसमूहं तु गृह्णाति। उभयं हि अतैमिरिकस्य चक्षुषो विषय इति। परमाणवस्त्वतीन्द्रिया दर्शनविषयत्वं न प्रतिपद्यन्ते। संहता ऐन्द्रियका असंहता अतीन्द्रिया इति अतिमहान् व्याघातः। अनुपजातविशेषाणां दर्शनविषयत्वानुपपत्तेः। तस्माद् उत्पद्यतेऽवयवी यो दर्शनस्य विषय इति। सञ्चयमात्रं दर्शनविषय इति चेत्? अथ मन्यसे दर्शनस्य परमाणुसञ्चयो विषयः, सञ्चिताः परमाणवो दर्शनस्य विषयतामुपयान्तीति? न, सञ्चयस्य संयोगभावात्। सञ्चयोऽपि निरूप्यमाणः परमाणुसंयोगः। संयोगश्चोपलभ्यमानाश्रय

उपलभ्यते, भवति हि इदमनेन संयुक्तमिति। यश्च विषय उपलभ्यते तस्या-नुपलब्धेरावरणादि[१] कारणमुपलभ्यते। न तु परमाणव उपलब्धिलक्षणप्राप्ता:। तस्मात् न तेषामावरणादेरग्रहणकारणादग्रहणमिति॥१४॥

अवयवावयविप्रसङ्गश्चैवमा प्रलयात्॥४।२।१५॥

यश्चावयविनोऽवयवेषु वृत्तिविकल्पादभाव उक्त:, सोऽवयवस्यावयवेषु प्रसज्यमान: प्रलयाद् वा निवर्तेत, निरवयवाद् वा परमाणुतो निवर्तेत। कथमिति? यथा अवयव्यवयवेषु वर्तमान: प्रत्येकं सर्वात्मना वा एकदेशेन वा वर्तेतेत्युक्तम्, तथावयवोऽवयवेषु वर्तमानस्तदवयवोऽप्यवयवेषु इत्येवं यावत् परमाणुरिति, यावद् वा प्रलयोऽनिवृत्तिर्वेति सर्वथोपलब्धेर्विषयो नास्ति। उपलब्धिविषयं चाश्रित्यायं विवाद:। किमवयव्येकदेशेनावयवेषु वर्तते, उत सर्वात्मना वर्तत इति। सोऽयमाश्रयं व्याघ्नन्नात्मघाताय कल्पत इति॥१५॥

न प्रलयोऽणुसद्भावात्॥४।२।१६॥

न चास्ति प्रलयोऽणुसद्भावात्। अयं च खलु विभज्यमानो भेदस्तावद् वर्तते यावत् परमाणुरिति। [२]परमाणुश्च निरवयव:। विभागेऽल्पतरप्रसङ्गस्य यतो नाल्पी-यस्तत्रावस्थानात्। लोष्टस्य विभज्यमानावयवस्याल्पतरमल्पतममुत्तरमुत्तरं भवति। स चायमल्पतरप्रसङ्गो यतो निवर्तते, यतो नाल्पीयोऽस्ति तं परमाणुं प्रचक्ष्महे इति॥१६॥

---

१. लब्धौ चावरणं C २. °णुर्नाम विभागे C

परं वा त्रुटेः ॥४।२।१७॥

अथ न परमाण्वन्तो विभागः? तेन— **परं...त्रुटेः**। अवयवविभागस्य आनन्त्यात् त्रुटिरमेयः प्राप्नोति। संख्यापरिमाणगुरुत्वैः तावत्परिमाणस्त्रुटिः, इयदत्र गुरुत्वं वर्तते, इयन्तश्च परमाणवः संहतास्त्रुटिभावमापद्यन्त इति नावधारणं युक्तम्। किं कारणम्? यथैवानेकपरमाणुसंघातो हिमवान् संख्यापरिमाणगुरुत्वैरमेयः, तथा त्रुटिरपि भेदस्यानन्त्यात् प्रसज्यते। अथ प्रलयान्तो विभागः? सोऽपि न युक्तो विभागस्य विभज्यमानहानेऽनुपपत्तेः न प्रलयान्तो विभागः। स चायं विभागो विभज्यमानाधारः। विभज्यमानश्च नास्ति विभागश्चास्तीति व्याहतम्। विभज्यमानावयवं च परमाणुं प्रतिपद्यमानेन सावयवः परमाणुः प्रतिपत्तव्यः। सावयवत्वे च परमाणुशब्दस्यार्थो वाच्यः, किमुक्तं भवति परमाणुरिति? ये च परमाणोरवयवास्ते किं समानपरिमाणा उत भिन्नपरिमाणा इति? यदि समानपरिमाणाः, अवयवावयवविभावो दुरुपपादः। न हि वयं समानपरिमाणानां क्वचिदवयवावयवविभावं पश्यामः। अथ भिन्नपरिमाणाः न परमाणुः प्रतिषिध्यते। कार्यमिदं परमाणुरिति कृत्वा प्रतिषिध्यत इति ॥१७॥

॥प्रासङ्गिकमवयवावयविप्रकरणम्॥

[निरवयवत्वप्रकरणम्]

आकाशव्यतिभेदात् तदनुपपत्तिः ॥४।२।१८॥

अथेदानीमानुपलम्भिकः सर्वं नास्तीति मन्यमान आह, **आका...पत्तिः**। आकाशेन परमाणुर्व्यतिभिन्नः। व्यतिभेदादनित्यो घटवदिति ॥१८॥

आकाशासर्वगतत्वं वा॥४।२।१९॥

अथ परमाणोरन्तराकाशं नास्ति, असर्वगतं तर्हि आकाशं प्रसज्यते, अन्तः परमाणूनामसंबन्धात्। आकाशव्यतिभेदादनित्यः परमाणुरित्यभिदधानो व्यतिभेदार्थं प्रष्टव्यः। किमुक्तं भवति आकाशव्यतिभेदादिति? यदि परमाण्वाकाशसंबन्धो व्यतिभेदः, तदात्र न किञ्चिद् बाध्यते। न हि आकाशसंबन्धात् परमाणोर्नित्यत्वमनित्यत्वं वा प्रसज्यत इति। अथ संबन्धमात्रमेवानित्यताकारणं ब्रूयात्? तथाप्याकाशग्रहणं व्यर्थम्, संबन्धमात्रस्यानित्यतासाधकत्वात्। न हि कृतकत्वस्य साधनभावे देवदत्तकृतकत्वादिति युक्तं वक्तुम्। संयोगमात्रं चोत्तरसूत्रेणानूद्यते चरितार्थं संयोगोपपत्तेरिति तदेवेदं पुनरुच्यत इति। तस्मान्नायं व्यतिभेदार्थः॥१९॥

[1]अन्तर्बहिरिति कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः॥४।२।२०॥

अथ परमाण्वन्तः संबन्धो व्यतिभेदः? सोऽपि न युक्तः, अकार्यत्वात् परमाणोः, **अन्त...भावः**। अन्तर्बहिरिति कार्यस्य कारणान्तरवचनम्। अकार्यश्च परमाणुः। तस्मात् नान्तर्बहिरिति।

अथ परमाण्ववयवसंबन्ध आकाशेन व्यतिभेदः? एतदपि तादृगेव। परमाणोरकार्यत्वात् न तस्यावयवा इति। अथ परमाण्ववयवानां विभागो व्यतिभेदः? सोऽप्यकार्यत्वेनैव प्रत्युक्तः कार्यस्यावयवा विभज्यन्ते। अकार्यश्च परमाणुरिति। तस्मात् न तस्यावयवविभागः। उपेत्य परमाणोरवयवान् न तद्विभागस्याकाशं कारणम्। कर्मजो हि विभागः। तस्याकाशमपि कारणमिति न न्यायोऽस्ति। आकाशं च विभागहेतुत्वेन प्रतिपद्यमानः सर्वभावानामनवस्थानं प्रतिपद्येत। न हि सन्निहिते

---

१. अन्तर्बहिश्च C ॰र्बहिरिति द्रः न्यायालङ्कारःपृ. ६८२।

विभागहेतावाकाशे भावानामवस्थानं युक्तम्। अथ सदप्याकाशं निमित्तान्तरमपेक्षते? तद्व्यतिरेकेणाकाशस्यापि च तदुत्पत्तावस्ति सामर्थ्यमिति प्रमाणाभावः।

अथान्तःसुषिरं व्यतिभेदः? एतदपि नास्ति। सर्वतोऽव्यवहितस्य यस्य मध्येऽवयवा न सन्ति तत्सुषिरम्। न च परमाणोरवयवाः सन्ति। कुतः सुषिरं व्यतिभेदः? न चान्या गतिरस्ति। तस्मादाकाशव्यतिभेदादिति शून्यमभिधानम्।

यत् पुनरेतदाकाशमसर्वगतं प्रसज्यत अन्तः परमाणुनासंबन्धादिति? न, सर्वगतार्थापरिज्ञानात्। नायं सर्वगतत्वार्थो यन्नास्ति तेन संबन्ध इति। अपि तु यन्मूर्तिमत् तेन सर्वेण संबध्यत इत्ययं सर्वगतत्वार्थः। न च परमाणोर्मध्यमस्ति। तस्मात् न तेनासंबन्धादाकाशमसर्वगतं प्रसज्यत इति॥२०॥

[1]शब्दसंयोगविभवाच्च सर्वगतम्॥४।२।२१॥

यस्मात् सर्वमूर्तिमद्भिः संयोगा विभवन्ति आकाशे तदाश्रया भवन्तीति। शब्दाश्च स्वकारणसन्निधानादुपजायमानाः सर्व एवाकाशमाश्रयन्त इति। तस्मान्नासर्वगतमाकाशम्॥२१॥

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः॥४।२।२२॥

सर्पता क्रियावता द्रव्येणाकाशं न व्यूह्यते। सर्पतश्च क्रियावतो द्रव्यस्य क्रियाहेतुं गुणं न प्रतिबध्नाति। कस्मात्? अस्पर्शत्वात्। यत् खलु स्पर्शवद् भवति तद् व्युह्यते प्रतिबध्नाति च। न त्वेवंधर्मकमाकाशम्। तस्मादप्रतिघातीति। स भवान् सावयवे स्पर्शवति द्रव्ये दृष्टं धर्मं विपरीते नासङ्क्तुमर्हतीति[2]। उक्तं चात्र यदि परमाणुर्विभज्यते, परमाणुर्न स्यात्। किं कारणम्? विभागेऽल्पतरप्रसङ्गस्य

---

१. सर्वसंयोगशब्दवि॰ C Var. २. नाशङ्क्तुम॰ C

यतो नाल्पीयः, तत्रावस्थानमिति। विनाशश्च परमाणोर्भवन् कारणविनाशाद् वा प्रकल्पेत, कारणविभागाद् वा? उभयं च नास्ति परमाणोरकार्यत्वादित्युक्तम्। तस्मात् नाकाशव्यतिभेदादनित्यत्वमिति॥२२॥

मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः॥४।२।२३॥

सावयवाः परमाणवो [१]मूर्तिमत्त्वाद् घटादिवत्। संस्थानवत्त्वाच्च सावयवा इति। संस्थानवत् सावयवं दृष्टं घटादि। संस्थानवन्तश्च परमाणवः। तस्मात् सावयवा इति॥२३॥

संयोगोपपत्तेश्च॥४।२।२४॥

नन्विदं सूत्रं संस्थानवत्त्वादित्यनेनैव चरितार्थम्, संयोगविशेषस्य संस्थानवत्त्वेनाभिधानात्[२]। न चरितार्थम् [३]अवयवसंयोगविशेषस्य संस्थानत्वेनाभिधानात्[४]। संयोगमात्रं च संयोगशब्देनाभिधीयत इति न दोषः। तत्र मूर्तिर्नाम अव्यापिनो द्रव्यस्य षड्विधं परिमाणम्, अणु महद् दीर्घं ह्रस्वं परमह्रस्वं परमाणु चेति। संस्थानं नाम प्रचयाख्यः संयोगः। संयोगोऽप्राप्तिपूर्विका प्राप्तिरिति॥२४॥

[५]अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः॥४।२।२५॥

यत् तावत् मूर्तिमत्त्वात् सावयवा इति, तन्न, अनेकान्तात्। यः परमाणोरवयवः स मूर्तश्च निरवयवश्चेत्यनेकान्तः। अथ मूर्तिमत्त्वात् तस्याप्यवयवाः सन्ति? एवं

---

१. मूर्तिमत्त्वादिति-संस्था॰ C २. संस्थानशब्देन C ३, ४. अव.....धानात् om J ५. हेत्वोरनवस्था॰ द्रः Alaṃkāra p. 685

सति त्रुटिरमेयः प्राप्नोति, गुरुत्वसंख्यापरिमाणैरित्युक्तम्[१]। अथ तावन्मूर्तिमद्विभज्यते यावदन्त इति? अन्तो निरवयव इति वाच्यम्। अथान्तो विभागः? स न युक्तः, विभागस्य विभज्यमानैर्विनानुपपत्तेरिति। एतावच्चैतत् स्यात् परमाण्वन्तो विभागः, प्रलयान्तो वा, अनन्तो वा। यदि परमाण्वन्तोऽनेकान्तः, व्याहतं च भवति, परमाणुर्मूर्तिमांश्च न च सावयव इति। कः पुनरत्र व्याघातः? निरवयवं च मूर्तिमन्तं च परमाणुं प्रतिपद्यसे, सावयव इति च ब्रवीषि। प्रतिपत्त्या व्याहन्यते। अनन्ते प्रलयान्ते च व्याघातः। त्रुटेरमेयत्वप्रसङ्गः विभागस्य चानाधारत्वप्रसङ्ग इति। सावयवः परमाणुरिति च प्रतिज्ञापदे व्याहते। कथमिति? सावयवशब्दस्यार्थः समानजातीयारब्धं समानजातीयाश्रितम् अवयवः तदाधार इति। सावयवः परमाणुरिति ब्रुवता कार्यविशेषः परमाणुरित्युक्तं भवति। कार्यविशेषश्च परमाणुश्चेति व्याहतम्। अथैकपरमाणुपूर्वकत्वं परमाणोः प्रतिपद्यसे? तथा च न परमाणुः सावयवः, नास्यावयवाः सन्ति, किं तु कृतक एक परमाणुपूर्वकत्वात्। एतच्च न, दृष्टान्ताभावात्। एकं कारणमिति न दृष्टान्तोऽस्ति। एकेन चारभ्यमाणस्य परमाणोर्न कारणसामग्र्यमपेक्ष्यमस्तीति न प्रागभावो युक्तः। यस्य च प्रागभावो नास्ति तस्योत्पादोऽपि न युक्तः। अथैकशब्दपूर्वकत्वे सति शब्दादीनां प्रागभावादि प्रतिपद्यते? तदप्यसिद्धम्, नैकं कारणमस्ति। आश्रयाद्यपेक्षः शब्दः शब्दान्तरं करोतीति।

प्रतिपद्यापि चैकपरमाणुपूर्वकत्वं परमाणोः कः सावयवार्थः? कतरस्तत्रावयवः कतरश्चावयवीति? अथ कारणमेवावयव इति? न कार्यपरमाणुकाले कारण-परमाणुरस्तीति सावयवार्थो वक्तव्यः। मूर्तिमत्त्वात् सावयवः परमाणुरिति ब्रुवाणो विकल्पतः पुनः पर्यनुयोज्यः केयं मूर्तिः, यया मूर्त्या मूर्तिमान् परमाणुरिति? सत्यां च मूर्तौ किमर्थान्तरमनर्थान्तरं वा परमाणोर्मूर्तिरिति? यदि रूपादिविशेषो

---

१. द्रः वा. ४.२.१७

मूर्तिर्न भवत्पक्षे तया मूर्त्या मूर्तिमान् कश्चन। न च रूपादिव्यतिरिक्तं प्रमाणेन परमाणुं प्रतिपद्यसे, सर्वापकर्षप्राप्ता रूपादय एव परमाणुः। न च रूपादिभी रूपादयो रूपादिमन्तः। न चानर्थान्तरभावे मतुब्व्युत्पादनं पश्यामः। ननु दृष्टोऽनर्थान्तरभावेऽपि मतुब्योगो यथा हस्तीमती सेनेति? न दृष्ट इति ब्रूमः। यथा च सेना, अर्थान्तरं तथोक्तम्।

असति चार्थान्तरभूते परमाणावसत्यां च मूर्तौ सावयवाः परमाणवो मूर्तिमत्त्वादिति वाक्यस्यार्थो रूपादयो रूपादिमन्तो रूपादिमत्त्वादिति। एतेन घटो मूर्तिमत्त्वात् सावयव इति प्रत्युक्तम्। न च रूपादिव्यतिरिक्तं घटं प्रतिपद्यसे, न मूर्तिमत्त्वम्, अथ च मूर्तिमत्त्वात् सावयवो घट इति ब्रवीषि। व्यतिरेकाभ्युपगमे व्याघातः, अनभ्युपगमे नार्थः सिध्यतीति। दृष्टान्तस्योभयधर्मसिद्धत्वात्[1] न घटे सावयवत्वं मूतिमत्त्वार्थः।

एतेन सावयवाः परमाणवः संयोगोपपत्तेरिति व्याख्यातम्। संयोगस्याभ्युपगमे[2] व्याघातः, अनभ्युपगमे परमाणुत्वादिति हेत्वर्थः। संस्थानविशेषवत्त्वं त्वसिद्धम्। य एवार्थः सावयवत्वात् इति स एवार्थः संस्थानविशेषवत्त्वादिति। अथ संस्थानमसर्वगतद्रव्यपरिमाणं प्रतिपद्येथाः, एवं च सति मूर्तिमत्त्वेन संस्थानवत्त्वं चरितार्थमिति पृथग् न वक्तव्यम्, मूर्तिमत्त्वात् संस्थानविशेषवत्त्वाच्चेति। उक्तं चात्र विभागेऽल्पतरत्वप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानात् अण्ववयवस्य चाणुतरत्वप्रसङ्गादणुकार्यप्रतिषेध इति।

यत् पुनरेतत् संयोगोपपत्तेर्मध्ये सन्नणुः पूर्वापराभ्यां संबध्यमानः सावयवः। अयमेवार्थः कारिकयाभिधीयते—

षट्केन युगपद् योगात् परमाणोः षडंशता।
षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः॥

---

१. °धर्मासि° J २. व्यतिरेकाभ्युपगमे J

इति[१]। परमाणुर्युगपत् षड्भिः संबध्यमानः षडंशः प्राप्नोति, भिन्नदेशत्वात् संबन्धानाम्। अथ समानदेशाः सर्वे संयोगाः षण्णां परमाणूनाम्, पिण्डः परमाणुमात्रकः प्राप्नोति। यदि द्वे द्वे द्रव्ये अधिकृत्याभिधीयते, ततोऽभिन्नदेशाः। अथ परमाणूनां संबन्धिनं परमाणुमधिकृत्याभिधीयते, ततोऽनेकैः संयोगः समानदेश इति न किञ्चिद् बाध्यते।

यत् पुनरेतत् समानदेशाः परमाणव इति तन्न, अनभ्युपगमात्। देशा एव तावत् परमाणौ न सन्तीति कुतः समानदेशा भविष्यन्तीति? देशोऽवयवः स च परमाणोर्नास्ति। न च किञ्चिद् द्रव्यं समानदेशमस्तीत्यसिद्धो दृष्टान्तः। ननु च कार्यकारणे संयोगिसमानदेशे यथा [२]यत् पटेन संबध्यते, तत् तन्तुना तदंशुना इत्येवमादि[३]। एतदनभ्युपगमेन प्रत्युक्तम्। समानदेशास्तत्र संयोगा इति न कार्यकारणे, न च संयोगा अपि द्वे द्वे अधिकृत्येति। षण्णां समानदेशत्वादिति वाक्यं न द्रव्यसमानदेशतायां व्यवतिष्ठते, न संयोगसमानदेशतायामिति।

यत् पुनरेतत्

दिग्देशभेदो यस्यास्ति तस्यैकत्वं न युज्यते।

क एवमाह दिग्देशभेदोऽस्तीति? दिग्देशभेदाश्च दिशः संयोगाः परिकल्पिताः। तांश्च दिग्देशभेदान् कल्पयित्वा परमाणोर्दिग्देशभेदोऽभ्युपगम्यते। मुख्यतस्तु न दिग्देशभेदो नापि परमाणोर्भेदः। परमाणुर्दिशा संबध्यत इत्येतावन्मात्रं विद्यते। एतच्च न किञ्चिद् बाधते।

छायावृती तर्हि न प्राप्नुतः परमाणोरदेशत्वादिति। न देशवत्त्वात् छायावृती। किं तर्हि? मूर्तिमत्स्पर्शवत्त्वात् मूर्तिमत्स्पर्शविशिष्टं द्रव्यं द्रव्यान्तरमावृणोति। किमिदमावृणोतीति? स्वसंबन्धेनेतरस्य संबन्धं प्रतिषेधतीति। छाया तु तेजःपरमाणोरावरणात् मूर्तिमता परमाणुना तेजःपरमाणुराव्रियते। यत्र चास्यावरणं तत्र

---

१. विज्ञप्तिमात्रतासिद्धि-विंशतिकाकारिकायां वसुबन्धुकृतायाम्। २. घटः C
३. °शुना च तन्त्वाश्रयेणेत्यादि C

छायेति प्रविरलतेज:संबन्धीनि द्रव्यगुणकर्माणि छायेत्यभिधीयन्ते। सर्वथा व्यावृत्ततेज:संबन्धीनि तु तानि तम:संज्ञकानीति। तदेवं छायावृत्योरन्यथासिद्धत्वादहेतु:।

एतेन क्रियावत्त्वात् स्पर्शवत्त्वाद् द्रव्यान्तरारम्भकत्वात् क्रियाकारणसंस्काराश्रयत्वात् परत्वापरत्ववत्त्वादित्येवमादि प्रत्युक्तम्। कथमिति? यथा मूर्तिमत्त्वात् सावयवा इत्येतस्मिन् वाक्ये प्रतिज्ञादोषा हेतुदोषाश्च, तथा सर्वेष्वेतेषु पक्षेषु परपक्षाभ्युपगतेषु [१]विकल्प्य विरुद्धासिद्धानैकान्तिकादिदोषभेदा वक्तव्या इति। शेषं **भाष्ये**।

ये तु क्रियावत्त्वादिभि: परमाणूनामनित्यत्वं साधयन्ति तै: क्रियावत्त्वं व्यञ्जकं वा कारकं वेत्यवश्यमभ्युपगन्तव्यम्। यदि क्रियावत्त्वमनित्यत्वस्य कारकम्, यदक्रियं तन्नित्यं प्राप्नोति। अथ जन्म क्रियेत्यभिधीयते? तदा अनित्या: परमाणवो जन्मवत्त्वादिति हेत्वर्थ:। जन्मवत्त्वं चासिद्धं परमाणूनामिति। अथ क्रियावत्त्वं व्यञ्जकमुच्यते? व्यञ्जकत्वेऽप्यन्यतोऽनित्यत्वं परमाणूनां व्यपदेष्टव्यम्। न ह्ययं व्यञ्जकस्य धर्मो यद् व्यङ्ग्यं वस्तु कुर्यात्। अपि तु अन्यतो भूतं वस्तु व्यञ्जको हेतुर्व्यनक्तीति। न हि प्रदीपोऽसन्तमर्थं प्रकाशयतीति। परसिद्धोत्क्षेपणादिक्रियाभ्युपगमे च विरुद्ध:। अनभ्युपगमेऽसिद्ध:। एतेन घटादिदृष्टान्तो व्याख्यात:। क्रियावत्त्वं च क्रियासमवाय:। तदभ्युपगमे विरोध:। अनभ्युपगमेऽनित्य: परमाणु: [२]परमाणुत्वादिति हेत्वर्थ:। मतुपश्चार्थान्तरे दृष्टत्वाद् विरुद्ध:। अनर्थान्तरे दृष्टान्ताभाव:। एवं शेषाणि वाक्यानि विकल्प्य यथासंभवं दोषा वक्तव्या इति। अथ परपक्षप्रसिद्धानेतानभ्युपैति? किं प्रमाणतोऽप्रमाणतो वा? तद् यदि प्रमाणतोऽभ्युपैति कथं परपक्षप्रसिद्धा:? अथ न प्रमाणत:? कथं स्वयमनुपलब्धो धर्म: परप्रतिपादनाय दीयत इति॥२५॥

॥निरवयवत्वप्रकरणम्॥.

---

१. हेतुषु यथासम्भवं विरु॰ C २. परमाणोरिति J

[बाह्यार्थभङ्गनिराकरणप्रकरणम्]

बुद्ध्या विवेचनात् तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः[1] ॥४।२।२६॥

यदिदं भवान् बुद्धीराश्रित्य बुद्धिविषयाः सन्तीति मन्यते मिथ्याबुद्धय एताः। यदि हि तत्त्वबुद्धयः स्युः बुद्ध्या विवेचने क्रियमाणे बुद्धिविषयाणां याथात्म्यमुपलभ्येत।

बुद्ध्या...वत्। य एते बुद्धिविषया गवादयो घटादयश्च, नैते तत्त्वतः सन्ति। कस्मात्? बुद्ध्या विविच्यमानानां भेदशोऽग्रहणात्। यथायं तन्तुरयं तन्तुरिति बुद्ध्या तन्तुषूद्वेष्ट्यमानेषु[2] न पटः कश्चिदस्ति यः पटबुद्धेर्विषयः स्यात्। एवमंशुषु बुद्ध्या विविच्यमानेषु। एवं तदवयवेषु तावद् यावत् परमाणुः। परमाणवोऽपि भागशो विभज्यमानास्तावद् यावत् प्रलय इति। तदेवं सर्वस्यासत्त्वाद् गवादिबुद्धयो घटादिबुद्धयश्च मिथ्याबुद्धय इति॥२६॥

व्याहतत्वादहेतुः॥४।२।२७॥

बुद्ध्या विवेचनात् तु भावानां सर्वभावानुपपत्तिरित्युक्तम्। कस्मात्? व्याघातात्। को व्याघातः? सहासंभवः। यदि बुद्ध्या विवेचनं भावानां न सर्वभावानुपपत्तिः। अथ सर्वभावानुपपत्तिः, न बुद्ध्या विवेचनं सर्वभावानामिति।

सर्वभावानुपपत्तिरिति च ब्रुवाणः प्रमाणं पर्यनुयोज्यः। यदि प्रमाणं ब्रवीति, व्याहतं भवति। अथ न ब्रवीति, अर्थोऽस्य न सिध्यति प्रमाणाभावात्। अथा-

---

१. तदनुपलब्धिः om J २. विविच्यमानेषु C

प्रामाणिकी सिद्धिः, सर्वभावानामुपपत्तिरित्यस्य कस्मान्न सिद्धिः[१]? यश्च सर्वभावानामभावो भावेष्वितरेतरापेक्षसिद्धेरित्येतस्मिन् वादे दोष उक्तः। स इहापि द्रष्टव्य इति ॥२७॥

तदाश्रयत्वादपृथग्ग्रहणम् ॥४।२।२८॥

यत् पुनरेतत्, यदि तन्तुव्यतिरिक्तं पटादिद्रव्यं स्यात् तन्तुषु बुद्ध्या विविच्यमानेषु पृथगुपलभ्येत इति। **तदा....णम्।** कारणद्रव्याश्रितं [२]कार्यद्रव्यं न पृथगुपलभ्यत इति। विपर्यये हि पृथग्ग्रहणात्। यत्र कार्यकारणभाव आश्रयाश्रयिभावश्च नास्ति, तत्र पृथग्ग्रहणमिति ॥२८॥

प्रमाणतश्चार्थप्रतिपत्तेः ॥४।२।२९॥

यदस्ति यथा च यन्नास्ति यथा च तत्सर्वं प्रमाणत उपलब्ध्या सिध्यतीति। शेषं **भाष्ये** ॥२९॥

प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥४।२।३०॥

प्रमा...भ्याम् ॥३०॥

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥४।२।३१॥

---

१. सर्वभावोपपत्तिः कस्मान्न सिद्ध्यति? C २. कार्यं तस्मात् न C

मायागन्धर्वनगरमृगतृष्णिकावद् वा ॥४।२।३२॥

यथा स्वप्ने विषया न सन्ति, अथ च विषयाभिमानो भवति, एवं न प्रमाणानि न च प्रमेयाणि सन्ति। अथ च प्रमाणप्रमेयाभिमानः ॥३१-३२॥

हेत्वभावादसिद्धिः ॥४।२।३३॥

स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥४।२।३४॥ 5

मायागन्धर्वनगरमृगतृष्णिकावद्वेति न, प्रमाणाभावात्। स्वप्नान्तवदविद्यमानेषु विषयेषु अभिमान इत्यत्र न हेतुरुच्यत इति। स्वप्नान्ते चासन्तो विषया इति को हेतुरिति? ख्यातिरिति चेत्? अयं जाग्रदवस्थोपलब्धानां विषयाणां चित्तव्यतिरेकिणामसत्त्वे हेतुः ख्यातिः स्वप्नवदिति? न, दृष्टान्तस्य साध्यसमत्वात्। य एते स्वप्नावस्थायां विषयाः ख्यान्ति न ते चित्तव्यतिरिक्ता इत्यत्र को हेतुः? प्रतिबुद्धेनानुपलम्भात् न सन्तीति चेत्? अथ मन्यसे यस्मात् एते प्रतिबुद्धेन नोपलभ्यन्ते तस्मात् न सन्तीति? न, विशेषणोपादानात्। ये प्रतिबुद्धेनोपलभ्यन्ते ते सन्तीति प्राप्तम्। व्यर्थं वा विशेषणं प्रतिबुद्धेनानुपलम्भादिति। यदि चोपलभ्यमानं जाग्रदवस्थायां स्वप्नावस्थायां च विषयमसन्तं मन्यसे, अथ चित्तमस्तीति को हेतुरिति। विपर्यये च सामर्थ्याभावादहेतुः जाग्रतोऽनुपलब्धेरिति। यद्युपलब्धिः सत्त्वसाधनं ततोऽनुपलब्धिरसत्त्वं साधयति। विपर्यये हि हेतोः सामर्थ्यं दृष्टमिति। न चित्तव्यतिरेकिणो विषया ग्राह्यत्वात् वेदनावदिति। यथा वेदनादिग्राह्यं न च चित्तव्यतिरिक्तम्, तथा विषया अपि। वेदना सुखदुःखे, चित्तं विज्ञानमिति, सुखदुःखाभ्यां चान्यत् ज्ञानमित्यसिद्धो दृष्टान्तः। सुखदुःखे ग्राह्ये ग्रहणं विज्ञान-

मिति ग्राह्यग्रहणभावादन्यत्वम्। अथाभिन्नं विज्ञानं वेदनातस्तथापि ग्राह्यं च गृहीतिश्च एकमिति न दृष्टान्तोऽस्ति। न हि कर्म च क्रिया च एकं भवतीति। अथैकत्वं प्रमाणवृत्तमनपेक्ष्य प्रतिपद्येथाः? तथापि चत्वारः स्कन्धा इति शास्त्रव्याघातः। अथ चतुष्टं न प्रतिपद्येत दृष्टं विज्ञानमात्रमेवाभ्युपेयात्[१]? सोऽपि दृष्टं विज्ञानभेदमनुयोक्तव्यः— बाह्यस्याध्यात्मिकस्य च विज्ञानभेदहेतोरभावात् कथं विज्ञानभेद इति? स्वप्नवद्विज्ञानभेदं यदि प्रतिपद्यसे, सोऽपि दृष्टानुमितानामर्थानां भावनावशेन विज्ञानभेदं प्रतिपादयितव्यः। अथ स्वप्नपक्षेऽपि भावनाभेदाद् विज्ञानभेदं प्रतिपद्येत सोऽपि भावनाभावकवर्गयोर्भेदेन प्रत्यवस्थेयः, नाभिन्नं भाव्यं भावकं चेति। ये चैते स्वप्नादिप्रत्ययाः पुरविमानोद्यानयानादिभेदानुविधायिनः ते मिथ्याप्रत्यया इति मिथ्याप्रत्ययानां च जाग्रदवस्थाप्रत्ययसामान्याद्भावः। ममापि सर्व एव मिथ्याप्रत्यया भवन्तीति ब्रुवाणः प्रधानमनुयोक्तव्यः। न निष्प्रधानं विपर्ययप्रत्ययं पश्याम इति। चित्तव्यतिरेकिणं च विषयमप्रतिपद्यमानः साधनदूषणयोः स्वभावः पर्यनुयोक्तव्यः। यदि बाह्यस्वभावकम्, व्याघातः। अथ चित्तस्वभावकम्? न चित्तेन परः प्रतिपाद्यत इति नार्थप्रतिपत्तिः[२]। न हीतरेण स्वप्नमनाख्यातमितरो विजानाति। अथ शब्दाकारं चित्तं प्रतिपद्यते? तेनापि शब्दाकारं चित्तमित्याकारार्थो वक्तव्यः। आकारो हि नाम प्रधानवस्तुसामान्यादतस्मिंस्तदिति प्रत्ययः। न च भवत्पक्षे शब्दो विद्यत इति शब्दाकारं चित्तमिति निरभिधेयं वाक्यम्। चित्तव्यतिरिक्तं च विषयमप्रतिपद्यमानो जाग्रत्स्वप्नावस्थयोर्भेदं पर्यनुयोज्यः। जाग्रदवस्थायां विषया न सन्ति स्वप्नावस्थायां चेति, इयं स्वप्नावस्था इयं जाग्रदवस्थेति कुत एतत्? धर्माधर्मव्यवस्थानं च न प्राप्नोति, यथा स्वप्नावस्थायामगम्यागमनादधर्मोत्पत्तिर्न भवत्येवं जाग्रदवस्थायामपि न स्यात्। अथ [३]मिद्धोपघातानुपघातौ भेदकौ प्रतिपद्येत? तदपि तादृगेव? मिद्धोपघातश्चेतसो वैकृत्यहेतुरित्येतत् कथमवगम्यते? अथ

---

१. °भ्युपगम्यते? C २. इत्यर्थोऽस्य न सिध्यति C ३. निद्रोप° C

विज्ञानस्य स्पष्टतां चास्पष्टतां च भेदं प्रतिपद्येत? विषयमन्तरेण ज्ञानस्य स्पष्टता चास्पष्टता च वक्तव्या।

असत्यर्थे विज्ञानभेदो दृष्ट इति चेत्? अथ मन्यसे यथा तुल्यकर्मविपाकोत्पन्नाः प्रेताः पूयपूर्णां नदीं पश्यन्ति, न तत्र नद्यस्ति, न पूयम्। न ह्येकं वस्त्वनेकाकारं भवितुमर्हतीति। दृष्टश्च विज्ञानभेदः। केचित् तामेव जलपूर्णां नदीं पश्यन्ति। केचित् रुधिरपूर्णामित्यतोऽवसीयते [१]आध्यात्मिकनिमित्तापेक्षमसति बाह्ये निमित्ते विज्ञानमेव तथोत्पद्यत इति? न, व्याघातात्। [२]असति बाह्ये विज्ञानमेव तथोत्पद्यत इति ब्रूवाणः प्रष्टव्यो जायते कथं तथेति। यदि रुधिराकारं विज्ञानं रुधिरम्, तर्हि वक्तव्यं किं रुधिरमिति। एवं जलाकारं नद्याकारं च वक्तव्यम्। पूयपूर्णां पश्यन्तीति च वाक्यस्य पदानि प्रत्येकं विचार्यमाणानि रूपादिस्कन्धापवादे[३] निर्विषयाणि भवन्ति। देशादिनियमश्च न प्राप्नोति। एकस्मिन् देशे नदीं पूयपूर्णां पश्यन्ति न देशान्तरेषु। असत्यर्थे नियमहेतुर्वक्तव्यः। यस्य पुनर्विद्यमानं केनचिदाकारेण व्यवस्थितं तस्य शेषो मिथ्याप्रत्यय इति युक्तम्। मिथ्याप्रत्ययाश्च भवन्तो न प्रधानं बाधन्त इति पूयादिप्रत्ययानां प्रधानं वक्तव्यमिति। यथा च पूयादिप्रत्ययानामेवं मायागन्धर्वनगरमृगतृष्णिकादि सलिलानामिति।

कर्मणो वासनान्यत्र फलमन्यत्र कल्पते

इति। अस्यार्थः। यत्रैव किल कर्म, तत्रैव किल फलेन भवितव्यम्, यस्य च चित्तव्यतिरेकिणो विषयास्तस्यान्यत्र कर्मान्यत्र फलमिति व्यधिकरणे कर्मफले भवत इति? तन्न, अनभ्युपगमात्। न मया कर्मफले व्यधिकरणे अभ्युपगम्येते। आत्मनि कर्म, तत्रैव फलमित्यदोषः। मदीयात् चित्तात् अर्थान्तरं विषयाः। सामान्यविशेषवत्त्वात् सन्तानान्तरचित्तवत्। प्रमाणगम्यत्वात् कार्यत्वानित्यत्वात् धर्मपूर्वकत्वाच्चेति ॥३३-३४॥

---

१. यथाध्यात्मे निमि° C २. असति.....मेव om J ३. न्धाभावे C

मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे ॥४।२।३५॥

एवं च सति **मिथ्यो....बोधे**। स्थाणौ पुरुषाध्यवसायो[१] मिथ्योपलब्धिः। तत्त्वज्ञानेन च यो मिथ्याध्यवसायः[२] स निवर्तते[३], नार्थः स्थाणुपुरुषसामान्यलक्षणः[४]। न ह्यसौ स्थाणुर्न भवतीति यथा स्वप्नोपलब्धानां येऽध्यवसायाः[५] ते जाग्रदवस्थोपलब्ध्या निवर्त्यन्ते, नार्थो विषयसामान्यलक्षण इति। शेषं **भाष्ये** ॥३५॥

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ॥४।२।३६॥

अर्थवदप्रतिषेधः। मिथ्याबुद्धेर्निमित्तमस्ति। किं पुनस्तत्? सामान्यदर्शनं विशेषादर्शनमविद्यमानविशेषाध्यारोप इति। मिथ्याबुद्धिं च प्रतिपद्यमानेन तस्या निमित्तं वक्तव्यम्। निमित्तं च प्रतिपद्यमानेनार्थोऽभ्युपेय इति॥३६॥

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥४।२।३७॥

तत्त्वं स्थाणुरिति प्रधानं पुरुष इति तत्त्वप्रधानयोरलोपे मिथ्याबुद्धिर्भवतीति। शेषं **भाष्ये** ॥३७॥

॥बाह्यार्थभङ्गनिराकरणप्रकरणम्॥

१, २. व्यवसाय for अध्यवसाय J ३. °वर्त्यते J ४. °पुरुषलक्षणः C ५. ये व्यव° J

[तत्त्वज्ञानविवृद्धिप्रकरणम्]

समाधिविशेषाभ्यासात् ॥४।२।३८॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तम्। अथ तत्त्वज्ञानं कथमुत्पद्यत इति? **समा...सात्।** शेषं **भाष्ये**। व्यापकत्वादन्तःकरणस्य प्रत्याहारो न युक्त इति चेत्? अथ मन्यसे व्यापकमन्तःकरणं तत्कथं प्रत्याह्रियत इति? न, उक्तोत्तरत्वात्, यथा न व्यापकमन्तःकरणं तथोक्तमधस्तात्। अणुत्वात् स्वाङ्गगतीक्षणानुपपत्तिरिति चेत्? अथ मन्यसे यस्याप्यन्तःकरणमणु तस्यापि स्वाङ्गगतीक्षणे न प्राप्नुतः[१], युगपद् हस्ते चक्षुषि चासन्निधानात्? न, शरीरात्ममनःसंबन्धयौगपद्यात् प्रयत्नदर्शनयोर्युगपदुत्पत्तेः। आत्मशरीरसंबन्धश्चात्ममनःसंबन्धश्च युगपद् भवत इति। तत्रात्ममनःशरीरसंबन्धात् स्वाङ्गगतिः, आत्ममनःसंबन्धाच्चक्षुषः प्रेरणम्। तत्र स्वाङ्गगतिः प्रयत्नाद् भवतीति, दर्शनं चक्षूरश्मेरर्थस्य च सन्निधानादिति। न चात्मनः प्रदेशाः सन्तीत्यचोद्यम्। प्रदेशवति चात्मनि अन्येनात्मप्रदेशेन मनः संबध्यते, अन्येन शरीरमिति स्वाङ्गगतीक्षणादिदोषः। यस्य पुनर्निष्प्रदेश एवात्मा तस्यैष दोषो न [२]भवतीति तत्र शरीरं संबन्धिनात्ममनःसंबद्धमिति॥३८॥

नार्थविशेषप्राबल्यात् ॥४।२।३९॥

नोपपद्यते समाधिविशेषाभ्यासः, अबुभुत्समानस्यापि बुद्ध्युत्पत्तेः, यथा स्तनयित्नोः शब्दप्रभृतिषु इति॥३९॥

---

१. °ङ्गगतिवीक्षणं न प्राप्नोति C २. °तीति शरीरसंबन्धेनात्ममनःसंबन्ध इति C

क्षुदादिभिः प्रवर्तनाच्च ॥४।२।४०॥

क्षुत्पिपासाभ्यां चानिच्छतोऽपि बुद्धय उत्पद्यन्त इति न युक्तः समाधि-विशेषः॥४०॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः॥४।२।४१॥

पूर्वकृतः पूर्वशरीराभ्यस्तः समाधिविशेषः तस्य फलं धर्मः। तत्कृतः पुनः समाधिविशेष इति। समाधिविशेषाच्च बाह्यविषयाभिभवः। लौकिकस्यापि तावत् समाधिविशेषावस्थितस्य बाह्यविषयोपनिपातेन बुद्धयो नोत्पद्यन्ते। किमङ्ग पुनर्योगिन इति॥४१॥

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः॥४।२।४२॥

अर....देशः॥४२॥

अपवर्गेऽप्येवं प्रसङ्गः॥४।२।४३॥

यदि बाह्यविषयोपनिपाताद् विज्ञानानि[१] प्रादुर्भवन्ति, **अप....सङ्गः।** मुक्तस्याप्यपवर्गे बाह्यविषयविशेषोपनिपातो[२] विद्यत इति बुद्ध्युत्पादप्रसङ्गः॥४३॥

न, निष्पन्नावश्यम्भावित्वात्॥४।२।४४॥

सति शरीरे बाह्यविषयो ज्ञानोत्पत्तिकारणम्, नान्यथेति सूत्रार्थः॥४४॥

---

१. निपाते अर्थज्ञानानि C २. विषयोपनि° J

तदभावश्चापवर्गे ॥४।२।४५॥

तस्य शरीरादेरुपलब्धिकारणस्याभावोऽपवर्ग इति। तस्मात् [१]सर्वदुःखमोक्षोऽपवर्गः। यस्मात् सर्वं दुःखबीजं दुःखं चापवर्गे विच्छिद्यते, तस्मात् सर्वेण दुःखेन विमुक्तिरपवर्गः॥४५॥

तदर्थं यमनियमाभ्यामात्मसंस्कारो [२]योगाच्चाध्यात्मविध्युपायैः ॥४।२।४६॥ 5

तस्यापवर्गस्याधिगमाय यमनियमाभ्यामात्मसंस्कारः[३] ॥४६॥

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ॥४।२।४७॥

ज्ञानग्रहणं शास्त्रग्रहणमिति, य एतमुपायं बुद्ध्यन्त इति तद्विद्याः। तद्विद्यैरित्यविभक्तार्थं वचनम्॥४७॥ 10

तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात्॥४।२।४८॥

तं शिष्यगुरुसब्रह्मचारीत्येवमादि सूत्रम्। एतत् तु निगदेनैव नीतार्थम्॥४८॥

---

१. सुखदुःखमोक्षो C var २. योगाच्चा....पायैः om J ३. ०भ्याससंस्कारः C var

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥४।२।४९॥

तमभ्युपेयादिति वर्तते ॥४९॥

॥इति तत्त्वज्ञानविवृद्धिप्रकरणम्॥

[तत्त्वज्ञानपरिपालनप्रकरणम्]

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥४।२।५०॥

तत्त्वा ..... त् इति अनुत्पन्नतत्त्वज्ञानेनैतत् कर्तव्यमिति सूत्रार्थः ॥५०॥

ताभ्यां विगृह्य कथनम् ॥४।२।५१॥

विद्यानिर्वेदादिभिश्च परेणावज्ञायमानस्य **ता.....नम्**। ताभ्यां जल्पवितण्डाभ्यामिति। विगृह्येति विजिगीषया न तत्त्वबुभुत्सयेति। विद्यापरिपालनार्थं चैतत्, न लाभपूजाख्यात्यर्थमिति ॥५१॥

॥तत्त्वज्ञानपरिपालनप्रकरणम्॥

प्रवृत्तिदोषसंसिद्धिः प्रेत्यभावः प्रपञ्चतः[१]।
फलं दुःखं विमुक्तिश्च तदुपायाश्च कीर्तिताः॥

॥इति औद्द्योतकरे न्यायवार्त्तिके चतुर्थाध्यायस्य द्वितीयाह्निकम्॥

॥चतुर्थाध्यायः समाप्तः॥

---

१. प्रपञ्चितः C

पञ्चमाध्याये प्रथमाह्निकम्

[सत्प्रतिपक्षदेशनाभासप्रकरणम्]

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्य-प्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्ध्यनित्यनित्यकार्यसमाः ॥५ ।१ ।१ ॥

जातेः संक्षेपेणोक्ताया विस्तरो वक्तव्य इतीदमारभ्यते साधर्म्यादिसूत्रम्। तत्र जातिर्नाम स्थापनाहेतौ प्रयुक्ते यः प्रतिरोधासमर्थो हेतुः।

जातेः प्रयोगप्रतिषेधादसदुत्तरत्वाच्चारम्भो न युक्तः। छलजातिनिग्रहस्थानानां स्ववाक्ये परिवर्जनमिति[१] प्रतिषिद्धा जातिः। न च जातिः सदुत्तरम्। अतश्च जातेः प्रयोगो न युक्तः। न, आरम्भप्रयोजनस्योक्तोत्तरत्वात्। उक्तं जातेरारम्भप्रयोजनं स्वयं च सुकरः प्रयोग इति। साधुसाधननिराकरणार्थं च प्रयोगः। यदा च वादी परस्य साधनं साध्वीति मन्यते लाभपूजाख्यातिकामश्च भवति तदा जातीः प्रयुङ्क्ते। कदाचिदयं जात्युत्तरेणाकुलीकृतो नोत्तरं प्रतिपद्येत। उत्तराप्रतिपत्त्या च निगृह्यते। अनभिधाने तु जातेरेकान्तपराजयः परस्येत्यैकान्तिकात् पराजयाद् वरमस्तु सन्देह इति युक्तो जातेः प्रयोगः।

असाधुसाधननिराकरणार्थमित्**यन्ये**। एके तु जातेः प्रयोगं मन्यन्ते असाधुसाधननिराकरणार्थम्। एवं चाहुः असाधौ साधने प्रयुक्ते य आसां प्रयोगः, सोऽनभिज्ञतया साधनदोषस्य। तद्दोषप्रदर्शनार्थं वा प्रसङ्गव्याजेनेति। एतत्तु न युक्तं प्रयोजनाभावात्। यदि तावद् असाध्वेतत् साधनमिति प्रतिपद्यते य एवास्य दोषो बुद्धः स एव वक्तव्यो न जात्यभिधानेन प्रयोजनमस्ति। अथ न बुध्यते, किमिति जातिं प्रयुङ्क्ते?

---

१. द्रः भाष्यम् १.१.१

न ह्यनवबुध्यमानः शक्तः प्रयोक्तुम्। अथानवबुध्यमानोऽपि[१] प्रयुङ्क्ते यत्किञ्चिद् ब्रूयात् नियमो न स्यादिति।

एतेनानैकान्तिके पञ्चानां प्रयोगः प्रत्युक्तः। य आहुरनैकान्तिके साधने परेण प्रयुक्ते पञ्चजातयः प्रयोक्तव्या इति, तदप्यनेनैव प्रत्युक्तम्। कथमिति? बुद्ध्वा तदेव वक्तव्यम् अबुद्ध्वा अज्ञानमिति एतेन युक्तायुक्तपक्षयोः पूर्वापरभावः प्रत्युक्तः। अयुक्ते साधने अयुक्तमुत्तरं वक्तव्यम्, युक्ते युक्तमिति। युक्तं च नामोत्तरं यत् प्रतिज्ञादिदोषोद्भावनम्। यच्च प्रतिज्ञादिदोषोद्भावनं नासौ जातिः। उत्तरमेव तदिति। जातिलक्षणापरिज्ञानादयुक्तमेतदपीति।

समीकरणार्थं प्रयोगः समः। साधर्म्यमेव समं वैधर्म्यमेव सममिति समार्थः समीकरणार्थः प्रयोगो द्रष्टव्यः। समीक्रियतां वा परपक्षो मा वा कारि, अयं तु समीकरणार्थं प्रवर्तत इति, यथा लोके कुटुम्बार्थं घटत इति। विशेषहेत्वभावो वा समार्थः। न भवता विशेषहेतुः कश्चिदपदिश्यत इति। एनमर्थमुररीकृत्य जातिवादी प्रवर्तते। यथाभूतं भवतः साधनं तथाभूतं ममापीति। न च सर्वापदेशव्यापिरव्यापकत्वात्। न हि सर्वापदेशेषु सर्वा जातयः प्रवर्तन्ते। न हि वैधर्म्येण स्थापनायामुत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसमाः प्रयोक्तुं शक्यन्त इति।

न च वादिप्रतिवादिनोस्तुल्यता समार्थः, जातेरसदुत्तरत्वात्। नियमेन जातिवाद्यसद्वादी भवति। वादिनां तु सदसद्वादित्वे अनियम इति॥१॥

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥५।१।२॥

प्रतिषेधाविति। साधर्म्येणोपसंहारे तद्विपरीतसाधर्म्येण प्रत्यवस्थानं वैधर्म्येणोपसंहारे [२]तद्विपरीतेन साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः। यथा अनित्यः शब्द

---

१. अथाबुध्य° J २. तत्साध° J

उत्पत्तिधर्मकत्वात्। उत्पत्तिधर्मकं कुम्भाद्यनित्यं दृष्टम्। यद्यनित्यघटसाधर्म्यादनित्यः, नित्येनाप्याकाशेन साधर्म्यममूर्तत्वमस्तीति नित्यः प्राप्त इति। एतस्मिन्नेव हेतावाकाशवैधर्म्यादित्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः, नित्यसाधर्म्यमप्याकाशेनामूर्तत्वमस्ति। अतो नित्यः प्राप्तः। अथ मन्यसे सत्यस्मिन् साधर्म्ये न नित्यः, न तर्हि वक्तव्यमनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याच्चानित्य इति। सेयं जातिर्विशेषहेत्वभावं दर्शयति। विशेषहेत्वभावाच्चानैकान्तिकदेशनाभासा इति। एवं वैधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं साधर्म्येण चोक्ते हेतौ तद्विपरीतवैधर्म्येण[१] प्रत्यवस्थानं वैधर्म्यसमः। यथा, तस्मिन्नेव हेतौ आकाशवैधर्म्यादनित्य इत्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः, अनित्येनापि घटेनास्य वैधर्म्यममूर्तत्वम्। अतो नित्यः प्राप्तः। तस्मिन्नेव हेतौ घटसाधर्म्यादिति कृते यद्यनित्यघटसाधर्म्यादनित्यः, वैधर्म्यमप्यस्यानेनास्त्यमूर्तत्वम्, अतो नित्यः प्राप्तः। अथ मन्यसे सत्येतस्मिन् वैधर्म्ये न नित्यः, न तर्ह्ययमेकान्तोऽनित्यघटसाधर्म्यात् नित्याकाशवैधर्म्याच्चानित्य इति। सोऽयं विशेषहेत्वभाव इति ॥२॥

गोत्वाद् गोसिद्धिवत् तत्सिद्धिः ॥५।१।३॥

अनयोरुत्तरम्, **गोत्वाद् गो....द्धिः**। गवाश्वसाधर्म्ये सत्त्वादौ समाने, वैधर्म्ये चैकशफत्वादौ, साधर्म्यात्, सत्त्वाद् गौरश्वो न भवति। न च वैधर्म्यादेकशफत्वादेर्गौर्गौर्भवति। किं कारणम्? एकस्यानन्वयादेकस्य चाव्यावृत्तेः। यदन्वयव्यतिरेकि साधर्म्यं तस्माद् धर्मव्यवस्था। गोत्वं च तथा। तस्माद् गोत्वादेव गौः सिध्यति। तथेहाप्यमूर्तत्वमुभयव्यतिरेकि उभयान्वयि च। तस्मात् नित्यत्वमनित्यत्वं च न शक्यं प्रतिपत्तुम्। अपि त्वन्वयव्यतिरेकसम्पन्नादुत्पत्तिधर्मकत्वादनित्य इति। अतो यद् ब्रवीषि विशेषहेत्वभावादिति, अयं [२]विशेषहेतुरिति॥३॥

॥सत्प्रतिपक्षदेशनाभासप्रकरणम्॥

---

१. तद्वैध° J २. विशेष इति J

[साध्यदृष्टान्तधर्मविकल्पप्रभवोत्कर्षसमादि-जातिषट्कप्रकरणम्]

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्ष-वर्ण्यावर्ण्यविकल्पसाध्यसमाः ॥५ ।१ ।४ ॥

अविद्यमानधर्माध्यारोप उत्कर्षः। विद्यमानधर्मापचयोऽपकर्षः[१]। वर्ण्यः साध्यः। अवर्ण्यः असाध्यः। विकल्पो विशेषः। एतेषां धर्माणामुद्भावनार्थाः प्रयोगा उत्कर्षसमाद्या जातय इति। साध्यसाधनधर्मयोस्तुल्यतया प्रत्यवस्थानं साध्यसमेत्युच्यते। यथा तस्मिन्नेव हेतौ घटसाधर्म्यादिति कृते[२] यदि यथा घटस्तथा शब्दः, तदा घटो रूपादिमान् शब्दोऽप्येवं प्रसक्त इत्युत्कर्षसमः। शब्दो वा अरूप इति घटोऽप्येवं प्रसक्त इत्यपकर्षसमः। घटोऽनित्य इत्यवर्ण्यः शब्दोऽप्येवम्, शब्दो वा वर्ण्य इति घटोऽप्येवमिति वर्ण्यावर्ण्यसमौ। सत्येतस्मिन् उत्पत्तिधर्मकत्वे विभागजः शब्दो न विभागजो घटः विभागजाविभागजविकल्पवच्च नित्यानित्य-विकल्प इति विकल्पसमः। घटो वा अनित्य इत्यत्र को हेतुः? अयमपि साध्यवत् प्रज्ञापयितव्य इति साध्यवत् प्रत्यवस्थानात् साध्यसमः ॥४॥

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥५ ।१ ।५ ॥

न, हेत्वर्थापरिज्ञानादिति सूत्रार्थः। न ब्रूमो यावन्तो घटधर्मास्ते सर्व एव शब्दे संभवन्तीति, अपि तु यो यस्य साधको धर्म उपपद्यते स तत्साधनं तत्रोपसंह्रियते। तथा च शब्देन। उत्पत्तिधर्मकत्वं शब्दे धर्म उपसंह्रियते। एवं च यथोक्तमसंबद्धम्। यथा गौस्तथा गवय इत्युक्ते न गोधर्माः सर्व एव गवये, न गवयधर्माः सर्व एव

---

१. °धर्मापनयोऽप° J २. °दित्युक्ते C

गवि प्राप्नुवन्ति। अपि तु यदितरस्येतरेण संबध्यते तावन्मात्रमेवोपसंह्रियते। अशेषधर्मोपसंहारे तु यथा तथेत्येवं न स्यात्। स एवासाविति स्यात्। तथेहापीत्ययमदोषः। यत् पुनरेतद्, विभागजाविभागजविकल्पवन्नित्यानित्यविकल्प इति। यथोत्पत्तिधर्मकत्वमन्वयव्यतिरेकि, नैवं विभागजत्वम्। न हि किञ्चिद् विभागाज्जायमानं यथोक्तविशेषणं नित्यमनित्यं वा दृष्टमित्येतदप्यनुत्तरम्॥५॥

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः॥५।१।६॥

दृष्टान्तः साध्य इति ब्रुवता भवता न दृष्टान्तलक्षणं व्यज्ञायि। दृष्टान्तो हि नामाविहतयोर्दर्शनयोर्विषयः। तथा च साध्यत्वमनुपपन्नम्। अथ दर्शनं विहन्यते, नासौ दृष्टान्तो लक्षणाभावादिति।

यत्तु अत्रोक्तं जातीनां पौनरुक्त्यं प्रसज्यत इति, न पौनरुक्त्यम्, अर्थभेदात्। यथा चोत्कर्षसमादीनां भिन्नोऽर्थः, तथोक्तम्। प्रयोगभेददर्शनाच्च। प्रयोगश्च भिन्न उत्कर्षसमादीनामिति। आनन्त्यमिति चेत्? अथ मन्यसे यदि प्रयोगभेदाद् भेदो न चतुर्विंशतिर्जातय इति प्राप्तम्। न, अनवधारणात्। नैवेदमवधार्यते चतुर्विंशतिर्जातय इति, अपि तूदाहरणानां भेदः। कथमवगम्यते? तथा हि प्रकरणसमैका चतुर्धा भिन्नेति। अथ सामान्यतोऽभिन्ना जातय इत्यभेदं ब्रूयात्, तस्याप्यभ्युपगतं चतुर्दशत्वं निवर्तते। अथ कुतश्चिद् भेदाद् भेदः, अदेश्यं तर्हि एतत् उत्कर्षसमाद्या न विकल्पसमातो भिद्यन्त इति। यथा केनचिद् भेदेन चतुर्दशत्वम्, तथा केनचिद् भेदेन चतुर्विंशतित्वम्। अविशेषसमा चेयं जातिः। उत्कर्षसमादीनामेकत्वं किञ्चित्साधर्म्यादिति। अस्याश्च जातेरुक्तमुत्तरम्॥६॥

॥साध्यदृष्टान्तधर्मविकल्पप्रभवोत्कर्षसमादिजातिषट्कप्रकरणम्॥

[प्राप्त्यप्राप्तियुगनद्धवाहिविकल्पोपक्रमजातिद्वयप्रकरणम्]

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याविशिष्टत्वादप्राप्त्यासाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥५ ।१ ।७ ॥

तस्मिन्नेव हेतौ घटादिसाधर्म्यादिति कृते यदि तावदयं हेतुः साध्यं संप्राप्नोति प्राप्त्या अविशिष्टः। कोऽविशेषार्थः? उभयोर्विद्यमानता। नाविद्यमानः संप्राप्यत इति हेतोः साधनार्थो हीयते। अथ न प्राप्यते, अप्राप्तेरहेतुभिरविशिष्टत्वादहेतुर्भवति। न ह्यग्निरप्राप्तो दहति। प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः। अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमः। अनयोर्भेदेनोपदेशो विवक्षातः। भेदविवक्षायां प्राप्त्यप्राप्तिसमाविति। अभेदविवक्षायां त्वेकमेवोत्तरम्, यथा वृक्षा वनमिति।

जातिलक्षणाभावात् नैवेयं जातिरिति चेत्? अथ मन्यसे यज्जातेर्लक्षणं तदस्या नास्ति। साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमिति हि तत्। न च लक्षणेनासंबद्धा जातिरिति शक्यं वक्तुम्। न हि गोलक्षणहीनोऽश्वो गौरिति। न, सूत्रार्थापरिज्ञानात् साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिरित्यस्य सूत्रस्यार्थो भवता न व्यज्ञायीत्यनुत्तरमेतत्। एतेन त्रैकाल्यसमाद्याः प्रत्युक्ताः, सूत्रार्थापरिज्ञानात् ॥७॥

घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेधः ॥५ ।१ ।८ ॥

[1]मृत्पिण्डप्राप्तानां दण्डादीनां नाविशेषो न च साध्यसाधनभावनिवृत्तिः। न हि मृत्पिण्डप्राप्तो दण्डः [2]साधनं न भवति। नापीतरत् साध्यत्वं जहाति। अथ मन्यसे घटस्तत्र साध्यः, तस्य चाविद्यमानस्य किं साधनेन इति? नाविद्यमानस्य साधनम्, अपि तु मृत्पिण्डो घटीक्रियत इति। किमिदं घटीक्रियत इति? मृदवयवाः

---

१. मृत्प्राप्तानां J २. साधनत्वं जहाति C

पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यन्ते, व्यूहान्तराच्च घटोत्पत्तिरिति। पीडने चाभिचारादप्राप्यापि च[1] साधकत्वं दृष्टम्। कोऽप्राप्त्यर्थः? परस्परोपश्लेषणमन्तरेण साधकत्वम्। अन्यथा तूद्देशेनासौ प्राप्त एव नियमात्। इयं च जातिः सर्वहेत्वपवादद्वारिका, यदि ज्ञापकहेतुरपदिश्यते तथापि, अथापि[2] कारकस्तथापीति। सा चेयं कार्यकारणत्वापवादद्वारेण प्रवर्तमाना व्याहता भवति। को व्याघातः? उत्तरस्य अनुत्थानम्। कथमिति? यदीदमुत्तरं प्राप्यार्थं कारणत्वापवादद्वारेण साधयेदप्राप्य वेति, तस्यापि प्रतिषेध्यं प्राप्य वा अप्राप्य वेति समानो दोषः॥८॥

॥इति प्राप्त्यप्राप्तियुगनद्धवाहिविकल्पोपक्रमजातिद्वयप्रकरणम्॥

[प्रसङ्गप्रतिदृष्टान्तसमजातिद्वयप्रकरणम्]

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ॥५।१।९॥

यथा अस्मिन्नेव हेतौ घटादिसाधर्म्येण कृते इत्थं घट एव तावदनित्य इत्यत्र को हेतुरिति प्रसङ्गसमः। प्रतिदृष्टान्तसमस्य तु यदेव भाष्य उदाहरणं तदेव द्रष्टव्यमिति। वाय्वाकाशसंयोगस्याकारणत्वादयुक्तमिति चेत्? अथ मन्यसे न वाय्वाकाशसंयोगः क्रियाकारणं त्रिष्वपि कालेष्वसंभवात्? न वाय्वाकाशसंयोगेनाकाशे क्रिया कृता, न करोति, न करिष्यतीति। यच्च त्रिष्वपि कालेष्वकारणं तदकारकम्, यथा घटो घटान्तरस्य। न, तत्समानधर्मोपपत्तेः। न ब्रूमो वाय्वाकाशसंयोग [3]एवैकः क्रियाकारणमपि तु तथाभूतो धर्मोऽन्यत्र दृष्टो यथा वायुवनस्पतिसंयोग इति। यस्त्वसौ तथाभूतः क्रियां न करोति, तन्नाकारणत्वाद्, अपि तु

---

१. अप्राप्त्यापि C २. यदि C ३. एव कारण° C

प्रतिबन्धात्। केनास्य प्रतिबन्धः? महत्परिमाणेन। यथा मन्दवातवेगेन नुन्नानां लोष्टादीनामिति।

यदि च क्रियां दृष्ट्वा क्रियाकरणमिति मन्यसे, सर्वं कारकं क्रियानुमेयं भवतः प्राप्तम्। ततश्चोपादानं कारणस्य न प्राप्नोति, किमिदं करिष्यत्याहो न करिष्यतीति। यस्य पुनः साधर्म्यादुपादानम्, तस्य युक्तम्। यदि च तत्सदृशं न कारणमिति मन्यसे? अनैकान्तिको हेतुर्न प्राप्नोति। न हि यच्छब्देऽमूर्तत्वं तदाकाशादाविति। अनुमानं चान्यत्र दृष्टस्यान्यत्र सादृश्यादेव प्रवर्तते। न हि ये धूमधर्मा एकस्मिन् धूमे, त एव धूमान्तरेष्वपीति॥९॥

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत् तद्विनिवृत्तिः॥५।१।१०॥

इदं तावदयं प्रष्टव्यः। के प्रदीपमुपाददते, किमर्थं चेति? दिदृक्षमाणाः, दृश्यदर्शनार्थमिति। अथ प्रदीपोपलब्ध्यर्थं कस्मान्न प्रदीपोपादानं कुर्वते? अन्तरेण प्रदीपं दृश्यते प्रदीपान्तरमिति? अथ दृष्टान्तः किमर्थमुपादीयते? अज्ञातस्य प्रज्ञापनार्थम्, अथ दृष्टान्तेऽपि दृष्टान्तः किमर्थं देश्यते[१]? यदि प्रज्ञापनार्थं नाप्रज्ञातो दृष्टान्त इति। यत् पुनराकाशदृष्टान्तवदिति॥१०॥

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः॥५।१।११॥

अभ्युपगमात्। प्रतिदृष्टान्तस्य च हेतुभावं प्रतिपद्यमानेन दृष्टान्तस्यापि हेतुभावोऽभ्युपगन्तव्यः। हेतुभावश्च साधकत्वम्। स च कथमहेतुर्न स्यात्? यद्यप्रतिषिद्धः साधकः स्यात्, अप्रतिषिद्धश्चायम्। साधकप्रयोगानुपपत्तेश्च। यदि तावदेवं प्रयुङ्क्ते, यथायं त्वदीयो दृष्टान्तः, तथा मदीय इति। अभ्युपगमान्न

१. कस्माच्चोद्यते J

प्रतिदृष्टान्तः[१]। अथैवं प्रयुङ्क्ते यथा मदीयो न दृष्टान्तः तथा त्वदीय इति, तथापि व्याघातान्न [२]प्रतिदृष्टान्त इति॥११॥

॥प्रसङ्गप्रतिदृष्टान्तसमजातिद्वयप्रकरणम्॥

[अनुत्पत्तिसमप्रकरणम्]

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः॥५।१।१२॥

यथा अनित्यः शब्द उत्पत्तिधर्मकत्वात् घटवदिति कृते यदि ब्रूयात्[३], प्रागुत्पत्तेरुत्पत्तिधर्मकत्वं नास्ति। तदभावादनुत्पत्तिधर्मकः। अनुत्पत्तिधर्मकत्वाच्च नित्य इत्यनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः॥१२॥

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः॥५।१।१३॥

यथैव प्रागुत्पत्तेरुत्पत्तिधर्मकत्वं नास्ति, तथा शब्दोऽपीति। उत्पन्नः सन् शब्द इति भवति। उत्पन्नः सन्नुत्पत्तिधर्मक इति भवति। तथा अनित्य इति। उत्पन्नस्य च [४]उपत्तिधर्मकत्वमस्तीति न कारणप्रतिषेधः। अनुत्पन्नस्य चातथाभावात् । न चायमनुत्पन्नः शब्द इति वा उत्पत्तिधर्मक इति वा नित्य इति वा अनित्य इति वा व्यपदेष्टुं शक्यत इति। ज्ञापकश्चायं हेतुर्न कारकः। ज्ञापके च कारकवत् प्रत्यवस्थानमसंबद्धम्। न कारकज्ञापकयोर्भेदोऽस्ति कारकत्वादिति चेत्? न, कारकज्ञापकयोः क्रियाज्ञप्तिहेतुत्वात्। योऽयं ज्ञापकः सोऽपि किञ्चित् कुर्वन् ज्ञापक इत्युच्यते कारकोऽपीति। नैष दोषः, कारकस्य क्रियाहेतुत्वात् , ज्ञप्तिहेतुत्वाच्च ज्ञापकस्येति। तत्रैको वस्तु निष्पादयति। एकस्तु विद्यमाने वस्तुनि ज्ञप्तिं करोति।

---

१. ०त्र दृष्टान्तः J २. ०त्र दृष्टान्तः J ३. कुम्भवदित्युक्ते ब्रूयात् J ४. उत्पन्ने C

प्राक् चोत्पत्तेरुत्पत्तिधर्मकत्वस्याभावादनुत्पत्तिधर्मकः शब्द इति ब्रुवाणः शब्दमभ्युपैति। नासतोऽनुत्पत्तिधर्मकत्वं धर्म इति। ततश्च विशेषणमनर्थकम्, प्रागुत्पत्तेरिति।

अपरे तु प्रागुत्पत्तेः कारणाभावादित्युक्ते अर्थापत्तिसमैवेयमिति, प्रागुत्पत्तेः प्रयत्ननान्तरीयकत्वस्याभावादर्थादप्रयत्ननान्तरीयकोऽप्रयत्ननान्तरीयकत्वाच्च नित्य इति कृते उत्तरं ब्रुवते, नायं नियमोऽप्रयत्ननान्तरीयकं नित्यमिति। त्रयी हि तस्य गतिः, किञ्चिन्नित्यमाकाशादि। किञ्चिदनित्यं विद्युदादि। किञ्चिदसदेवाकाशकुसुमादि।

एतत्तु न युक्तमुत्पश्यामः। कथमिति? यत्तदसद् अप्रयत्ननान्तरीयकमिति न युक्तं प्रयत्नानन्तरीयकत्वस्य जन्मविशेषणत्वात् यस्य न प्रयत्नानन्तरीयकं जन्म तदप्रयत्नानन्तरीयकम्। न चाभावो विद्यते, अतो न तस्य जन्म। यच्चासत् किं तस्य विशेष्यमस्ति? एतेन नित्यं प्रत्युक्तम्, न हि नित्यमप्रयत्नानन्तरीयकमिति शक्यं वक्तुम्। जातिलक्षणाभावान्नेयं जातिरिति चेत्, न। अनुत्पन्नैरहेतुभिः सामान्यात्। योऽनुत्पन्नः, स न हेतुः। तद् यथा अनुत्पन्नास्तन्तवो न पटस्य कारणम्॥१३॥

॥अनुत्पत्तिसमप्रकरणम्॥

[संशयसमप्रकरणम्]

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः॥५।१।१४॥

उदाहरणं **भाष्ये**। संशयसमा साधर्म्यसमातो न भिद्यत इति चेत्? अथ मन्यसे, यथा साधर्म्यसमोदाहरणं साधर्म्यात् प्रवर्तते तथा संशयसमापीति।

अतोऽभेदान्न जात्यन्तरमिति? न, उभयैकसाधर्म्यभेदात्। उभयसाधर्म्यात् संशयसमा, एकसाधर्म्यात् साधर्म्यसमेत्ययं विशेषः॥१४॥

साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशयेऽत्यन्तसंशयो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥५।१।१५॥

साधर्म्यात् सामान्यदर्शनात् संशयः। वैधर्म्याद् विशेषदर्शनान्न संशयः। उभयथा वा संशये सामान्यविशेषदर्शने सति संशयेऽत्यन्तसंशयप्रसङ्गः। नित्यं सामान्यं संशयं करोतीत्येतन्न प्रतिपद्यामहे। सति सामान्ये विशेषदर्शनाद् व्यावृत्तेरिति॥१५॥

॥संशयसमप्रकरणम्॥

[प्रकरणसमप्रकरणम्]

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः॥५।१।१६॥

उदाहरणं **भाष्ये**। संशयसमासाधर्म्यसमाभ्यां प्रकरणसमा न भिद्यते। कथमिति? तत्रापि साधर्म्यमिहापि साधर्म्यमिति? न, उभयपक्षसाधर्म्यात् तदद्वैदोपपत्तेः[१]। उभावत्र वादिप्रतिवादिनौ पक्षपरिग्रहेण नित्यानित्यत्वे साधयतः। न त्वेवं साधर्म्यसंशयसमयोरिति॥१६॥

---

१. °र्म्याद् भेदसिद्धेः C

प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ॥५।१।१७॥

विरुद्धाव्यभिचार्येष उक्तोत्तर इति। प्रकरणोत्थानं च न प्रतिपक्षादिति ब्रूमः। किं तु तत्त्वस्यादर्शनात्। तदुक्तं प्रकरणसमे हेत्वाभास इति॥१७॥

॥प्रकरणसमप्रकरणम्॥

[अहेतुसमप्रकरणम्]

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः॥५।१।१८॥

अहेतुसामान्यात् प्रत्यवस्थानमहेतुसम इति॥१८॥

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः॥५।१।१९॥

विरोधः सूत्रार्थः। नोत्पद्यमानमहेतुत उपपद्यते। नापि ज्ञाप्यमानमहेतुतो ज्ञाप्यत इति॥१९॥

प्रतिषेधानुपपत्तेश्च प्रतिषेध्यव्याप्रतिषेधः॥५।१।२०॥

विरोध उत्तरदोषः। त्रिष्वपि कालेषु यो न साधयति स न हेतुरिति प्रतिषेधेऽपि समानो दोषः। उक्तोत्तरत्वाच्च। **प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः**[१] इत्यत्रोक्तोत्तरमेतत्॥२०॥

॥अहेतुसमप्रकरणम्॥

---

१. न्या. सू. २.१.८

[अर्थापत्तिसमप्रकरणम्]

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥५।१।२१॥

उदाहरणं **भाष्ये** ॥२१॥

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वाद् अनैकान्तिकत्वाच्चार्थापत्तेः ॥५।१।२२॥

अनुपपाद्य सामर्थ्यमर्थादापद्यत इति ब्रुवाणः पक्षं हापयति। किं कारणम्? सामर्थ्यस्यानुक्तत्वादिति। एवं च पक्षहानेरुपपत्तिः। अनैकान्तिकत्वाच्चार्थापत्तेः। पूर्वसूत्रव्याघातः। यदुक्तम्, नानैकान्तिकत्वम्, **अनर्थापत्तावर्थापत्त्यभिमानात्**[१] इति तद् व्याहन्यते। नास्ति व्याघातः। सन्निधिविशिष्टाया अनैकान्तिकत्वेनाभ्युपगमात्। येयं सूत्रेणोपात्ता, सानैकान्तिकी, नार्थापत्तिमात्रम्। यथानुमानं व्यभिचारि यत् तदप्रमाणं नेतरदिति। तथेहापि ॥२२॥

॥अर्थापत्तिसमप्रकरणम्॥

[अविशेषसमप्रकरणम्]

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥५।१।२३॥

उदाहरणं **भाष्ये**। साधर्म्यसमातो न भिद्यतेऽविशेषसमः। कस्मात्? साधर्म्य-

१. न्या. सू. २.२.४

मात्रात् प्रवृत्तेरविशेषादिति चेत्? न, एकसमस्तभेदाद् भेदः। एकसाधर्म्यात् साधर्म्यसमा। समस्तसाधर्म्यादविशेषसमेति ॥२३॥

क्वचित् तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः ॥५।१।२४॥

क्वचित् साधर्म्यमुपलभ्यते[१] क्वचिन्नेति सूत्रार्थः। अभ्युपगमाच्च विरोधः। सर्वभावानामनित्यत्वं प्रसञ्जयता अभ्यनुज्ञातं शब्दस्याप्यनित्यत्वम्। व्यर्थं वा सर्वभावग्रहणमिति। उक्तं च विशेषोऽन्वयव्यतिरेकसम्पन्नो हेतुर्नोत्तर इति॥२८॥

॥अविशेषसमप्रकरणम्॥

[उपपत्तिसमप्रकरणम्]

उभयकारणोपपत्तेरुपपत्तिसमः ॥५।१।२५॥

उदाहरणं **भाष्ये**। उपपत्तिसमः प्रकरणसमात् न भिद्यत इति, तत्रापि नित्यानित्यकारणोपपत्तिरिहापि इति। न, नित्यानित्यकारणस्यैकत्रोपपत्तेः। नित्यकारणं चानित्यकारणं चैकत्रोपपद्यत इत्युपपत्तिसमार्थः। नित्यानित्यपक्षाभ्यां तु प्रत्यवस्थानं प्रकरणसम इति भेदः ॥२५॥

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥५।१।२६॥

उप...धः इति। विरोधः सूत्रार्थः। नित्यत्वकारणमप्यस्योपपद्यत इति ब्रुवता

---

१. °मुपपद्यते J

अभ्यनुज्ञातम् अनित्यत्वकारणमिति। तथा च विरोधादुत्तरपक्षोत्थानमयुक्तम् ॥२६॥

॥उपपत्तिसमप्रकरणम्॥

[उपलब्धिसमप्रकरणम्]

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः ॥५।१।२७॥

उदाहरणं **भाष्ये**। सर्वसाध्यारोपेणाव्यापकत्वं साधनस्येत्युपलब्धिसमार्थः। सर्वमनित्यं सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वेनाध्यारोप्याव्यापकत्वं हेतोः। न ह्ययं हेतुः सर्वस्मिन्ननित्ये द्व्यणुकादौ विद्यत इति। श्रूयमाणप्रतिज्ञार्थाव्यापकत्वं वा हेतोः। यथा अनित्यः शब्दः शब्दान्तरोत्पादकत्वादिति। न शब्दान्तरोत्पादकत्वेन सर्वः शब्दो व्याप्यते। न ह्यन्तः शब्दः शब्दान्तरं करोति ॥२७॥

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥५।१।२८॥

अनित्यः शब्द इति ब्रुवता न साध्यान्तराणां कारणान्तरं प्रतिषिध्यते। न साध्यस्य कारणान्तरमिति।

अपरे तु परिहारं ब्रुवते, यदेव प्रयत्नानन्तरीयकं तदेव तस्मादनित्यमिति। एतत्तु न, अविवादात्। यः प्रयत्नानन्तरीयकत्वं प्रतिपद्यते न तं प्रति किञ्चित् साध्यते। यदा तु प्रयत्नानन्तरीयकत्वं वस्तुविशेषणं तदान्यो हेतुर्वक्तव्यः। जातिलक्षणाभावात् नेयं जातिः? न, अहेतुसामान्याज्जातिः ॥२८॥

॥उपलब्धिसमप्रकरणम्॥

[अनुपलब्धिसमप्रकरणम्]

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥५।१।२९॥

उदाहरणं **भाष्ये**। न, उक्तोत्तरत्वात्। द्वितीयाध्याय[1] उक्तोत्तरमेतत् ॥२९॥

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥५।१।३०॥

अनु.....हेतुः ॥३०॥

ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम् ॥५।१।३१॥

आवरणाद्यसंभवे सत्त्वाभ्युपगमे च सत्यनुपलब्धेरिति प्रयोगः। एवं च सति न हेत्वन्तरं नानैकान्तिकं विपक्षावृत्तित्वात्। आवरणाद्यसंभवे सत्त्वाभ्युपगमे[2] विपर्ययस्याव्यभिचारात् नार्थापत्तिसमः॥३१॥

॥अनुपलब्धिसमप्रकरणम्॥

[अनित्यसमप्रकरणम्]

साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥५।१।३२॥

सर्वमनित्यं प्राप्नोतीत्युदाहरणं **भाष्ये**। अविशेषसमातोऽनित्यसमा न भिद्यते,

---

१. द्रः न्या. सू. २.२.१९ २. सत्त्वोपलब्धौ J

तत्रापि सर्वाविशेष इहापीति? भिद्यते, तत्र सर्वाविशेष इह सर्वानित्यत्व-मिति ॥३२॥

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्यात् ॥५।१।३३॥

साध....र्म्यात् ॥३३॥ 5

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथाभावान्नाविशेषः ॥५।१।३४॥

प्रतिषेध्येन पक्षेण प्रतिषेधस्य प्रतिज्ञादियोगः सामान्यम्। तद् यदि प्रतिषेध्यस्यानित्यस्यासिद्धिर्घटादिसाधर्म्यात्, ननु प्रतिषेधस्याप्यसिद्धिः, प्रतिषेध्येन प्रतिज्ञादियोगसामान्यादिति। न चेयं साधर्म्यमात्रात् स्थापना। अपि तु दृष्टान्ते 10 विशिष्टमन्वयव्यतिरेकिणं धर्ममुपलभ्य तत्सामर्थ्यात्। न च प्रतिपक्षस्यैवंभूतो धर्म उपपद्यते। तस्मात् प्रतिषेधो नोपपद्यत इति। उक्तं चात्र

क्वचित् तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः[१]।

इति। यच्चाविशेषसम उत्तरं तदिहापि द्रष्टव्यम्। नासाधनादिति चेत्? अथ मन्यसे न मया सर्वस्यानित्यत्वप्रसङ्गेन सर्वस्यानित्यत्वं साध्यते। अपि त्वेवं ब्रूवाणस्य 15 सर्वस्यानित्यत्वं प्राप्नोतीति प्रसङ्गः क्रियते? न, विशेषहेतूपपत्तेः। न मया साध्य-साधर्म्यमात्रेण स्थापनोच्यते[२] इत्यतो न सर्वानित्यत्वप्रसङ्गः। सर्वानित्यत्वसाधक-प्रमाणासंभवाच्च[३]। न सर्वानित्यत्वप्रसाधकं प्रमाणं संभवतीति[४]। अथ सर्वमनित्यं

---

१. द्रः न्या.सू. ५.१.२४ २. साधनमु॰ C ३. साधने प्रमाणाभावाच्च C ४. ॰णम-स्तीति C

सत्त्वादिति साधयेत्? तस्यापि नान्वयो न व्यतिरेकः ॥३४॥

॥अनित्यसमप्रकरणम्॥

[नित्यसमप्रकरणम्]

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ॥५।१।३५॥

अनित्यः शब्द इत्येतस्यां प्रतिज्ञायां प्रतिज्ञादिदोषोद्भावनद्वारिका जातिः। अनित्यः शब्द इत्यभिदधान एव भवान् शब्दस्य नित्यत्वं प्रतिजानीते। कथमिति? यत् तदनित्यत्वं तत् किं शब्दे नित्यमस्ति उत कदाचिद् भवतीति? यदि नित्यं धर्मस्य नित्यत्वाद् धर्मिणोऽपि नित्यत्वम्। अथानित्यमनित्यत्वस्याभावान्नित्यः शब्द इति ॥३५॥

प्रतिषेध्ये नित्यमनित्यभावादनित्येऽनित्यत्वोपपत्तेः प्रतिषेधाभावः ॥५।१।३६॥

प्रतिषेध्ये नित्यम् अनित्यत्वमिति ब्रुवता अभ्यनुज्ञातमनित्यत्वं भवति। अभ्यनुज्ञानाच्चानर्थकः[1] प्रतिषेध इति। अथ नाभ्यनुज्ञायते? नित्यमनित्यभावान्नित्यः शब्द इति हेतुर्नोपपद्यते। हेत्वनुपपत्तेरनर्थकः प्रतिषेध इति। परिप्रश्नानुपपत्तिश्च। पृथग्धर्मत्वेनानित्यत्वस्यानभ्युपगमात्। अपि चानात्यन्तिकसत्तायोगोऽनित्यत्वमित्युक्ते न युक्तः प्रश्नः, किमयमत्यन्तं भवति उत नात्यन्तमिति। आत्यन्तिकानात्यन्तिकाभावयोगश्चैकस्य न युक्तः। अनित्यता नित्येति ब्रुवता एकस्यात्यन्तिकसत्तायोगोऽनात्यन्तिकसत्तायोगश्चाभ्यनुज्ञायते। स चायं विरोधान्न युक्त इति।

१. °च्चासमर्थः C

प्रतिषेध्यदोषोद्भावनाद् युक्त इति चेत्? अथ मन्यसे न मयैकस्य नित्यत्वमनित्यत्वं वाभ्युपगम्यते। अपि त्वनित्यः शब्द इति ब्रुवाणस्य भवतः स एव[१] दोष इति? न, विकल्पानुपपत्तेः, नायं पक्षदोषो न साधनदोषः। पक्षदोषस्तावदयं न भवति, पक्षस्य तादवस्थ्यात्। न साधनस्य, प्रतिज्ञादिदोषाणां चानुद्भावनात्। विरोधस्य चोक्तोत्तरत्वात्॥३६॥

॥नित्यसमप्रकरणम्॥

[कार्यसमप्रकरणम्]

प्रयत्नकार्यानेकत्वात् कार्यसमः ॥५।१।३७॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्युक्ते जातिः कार्यसमा प्रयुज्यते। प्रयत्नकार्यमनेकधा दृष्टमिति। किञ्चित् प्रयत्नानन्तरं व्यज्यते, किञ्चित् प्रयत्नानन्तरमुत्पद्यते। प्रयत्नानन्तरमुपलब्धेर्हेतुत्वाध्यारोपेणानैकान्तिकत्वदेशनात् कार्यसमः। कार्यः शब्दः प्रयत्नानन्तरमुपलब्धेरिति [२]हेत्वर्थमनैकान्तिकं चोदयति। प्रयत्नानन्तरमुपलभमानं कार्यमकार्यं च दृष्टमिति। अथ प्रयत्नानन्तरं जन्म हेत्वर्थः, तथाप्यसिद्धदेशनेति॥३७॥

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥५।१।३८॥

यत् खलु प्रयत्नेन व्यज्यते तत्रानुपलब्धिकारणमुपपद्यते[३]। न तु शब्दस्यानुपलब्धिकारणं किञ्चिदस्ति। तस्मान्न व्यज्यत इति। संशयसमाऽतो न भिद्यत इति चेत्? उभयसाधर्म्यात् संशयसमः। अयं तु न तथा। तस्माद् भिद्यत इति। साधर्म्य-

१. भवत एव J २. हेतुमनै° C ३. °मुपलभ्यते J

समातो न भिद्यत इति चेत्? न, हेत्वध्यारोपणात्। साधर्म्यसमा न हेत्वध्यारोपेण प्रवर्तते। इयं त्वन्यथाभिहिते हेतौ अन्यथाकारं प्रवर्तते ॥३८॥

॥कार्यसमप्रकरणम्॥

[षट्पक्षीरूपकथाभासप्रकरणम्]

प्रतिषेधेऽपि समानो दोषः ॥५।१।३९॥

एवं तावत् जातयो व्यवस्थिताः। अथेदानीं षट्पक्षीमुपन्यसिष्यन्निदमाह, **प्रति....दोषः**। प्रथमपक्षवादी जातिवादिनं प्रति प्रत्युत्तरं ब्रवीति। यद्यनैकान्तिकत्वादहेतुः, प्रतिषेधोऽप्यनैकान्तिकः स्यात्, कस्यचिदप्रतिषेधात् कस्यचित् प्रतिषेधादिति। विशेषहेत्वभावो वा अविशेषः। शेषं **भाष्ये** ॥३९॥

सर्वत्रैवम्॥५।१।४०॥

सर्वासु जातिष्वेषा प्रयुक्तिरिति सूत्रार्थः ॥४०॥

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद् दोषः ॥५।१।४१॥

तृतीयः पक्षो विप्रतिषेधः। एतस्मिन् विप्रतिषेधे समानमनैकान्तिकत्वं दोष इति चतुर्थः पक्षः ॥४१॥

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ॥५ ।१ ।४२ ॥

प्रतिषेधं द्वितीयपक्षं सदोषमभ्युपेत्य [१]तृतीयपक्षेऽपि प्रतिषेधतुल्यदोषतामासञ्जयन् विप्रतिषेधेऽपि समानो दोष इति ब्रुवन् मतमनुजानाति। सेयं मतानुज्ञा भवतीति पञ्चमः पक्षः ॥४२ ॥

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोषः ॥५ ।१ ।४३ ॥

स्वपक्षसमुत्थानं दोषमभ्युपेत्य परपक्षेऽपि प्रसञ्जयन् स्वपक्षदोषमनुजानातीति तुल्या मतानुज्ञा। शेषं **भाष्ये**। अत्र खलु स्थापनाहेतुवादिनः प्रथमतृतीयपञ्चमपक्षाः। प्रतिषेधहेतुवादिनो द्वितीयचतुर्थषष्ठपक्षाः। तेषां साध्वसाधुतायां मीमांस्यमानायां चतुर्थषष्ठयोरविशेषात् न पुनरुक्तदोषप्रसङ्गः। समानः तृतीयपञ्चमयोः पुनरुक्तदोषः। तत्र पञ्चमषष्ठयोः पुनरुक्तदोषः। तृतीयचतुर्थयोर्मतानुज्ञादोषः। प्रथमद्वितीययोर्विशेषहेत्वभाव इति षट्पक्ष्यामुभयोरसिद्धिः, अयुक्तवादित्वात्। यदा त्वनुपलब्धिकारणाभावे सति प्रयत्नानन्तरमुपलब्धेरिति विशेषहेतुरुच्यते, तदा न षट्पक्षी प्रवर्तते। एतास्तु जातयो न तत्त्वविवेकमुपकुर्वन्तीति भेदमात्रमासामुक्तम् ॥४३ ॥

॥षट्पक्षीरूपकथाभासप्रकरणम् ॥

॥इति औद्द्योतकरे न्यायवार्त्तिके पञ्चमाध्यायस्य प्रथमाह्निकम् ॥

---

१. तृतीयपक्षविप्र॰ J

पञ्चमाध्याये द्वितीयाह्निकम्

[प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चक-विशेषलक्षणप्रकरणम्]

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥५।२।१॥

विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वमिति संक्षेपेणोक्तम्। तदिदानीं विभजनीयम्। निग्रहस्थानानि च पराजयवस्तूनि अपराधाधिकरणानि। सामान्यतो द्वे निग्रहस्थाने। कर्तृकर्मकरणानां कस्य निग्रहः? तत्रैके वर्णयन्ति पक्षस्येति। एवं चाहुः, दूषणानि न्यूनतावयवोत्तरदोषाक्षेपभावोद्भावनानि। एभिर्ह्यसौ परपक्षो दूष्यत इति। एतत्तु न सम्यक्, कर्मणस्तादवस्थ्यात्। न हि दूषणाभिधानेन कर्मणोऽन्यथात्वं भवति। यथाभूत एवार्थो दूष्यमाणस्तथाभूत एवादूष्यमाणोऽपि[1]। न, करणस्य विषयान्तरेऽसामर्थ्यात्। साधनमपि प्रतिज्ञादिकं न दूष्यते विषयान्तरेऽसामर्थ्यात्। न हि किञ्चित् साधनं यद्विषयान्तरे समर्थं स्यात् सर्वं साधनं स्वविषये समर्थमिति। तस्मादसमर्थयोः कर्मकरणयोरुपादानात् कर्तुर्निग्रह इति। यत् कर्म क्रियार्थमुपादीयमानमभीष्टक्रियां न निर्वर्त्तयति, तदिदमसमर्थम्। यथा सिकता घटादिकरणे इति। यच्च करणं क्रियार्थमुपादीयमानं क्रियां न निर्वर्तयति, तदसमर्थम्। यथा तुर्यादि घटे। स्वविषये तूभयं समर्थम्। तदन्यविषयस्य च कर्मणोऽन्यविषयस्य

१. °माण इति J

च करणस्यान्यथोपादानात्[१] कर्तुरज्ञानम्। अज्ञानं पुनरप्रतिपत्तिविप्रतिपत्तिर्वेति कर्ता निगृह्यते। न कर्मकरणे, पारतन्त्र्यात्। तस्मात् स्वतन्त्रस्य कर्तुर्निग्रह इति। विप्रतिपत्त्यप्रतिपत्त्योश्च पुरुषधर्मत्वात् पुरुषस्येति। विप्रतिपत्त्यप्रतिपत्ती च पुरुषस्य वचनद्वारेण गम्येते। तस्मात् प्रतिज्ञादिदोषा इति भक्तिः। कानिचिन्निग्रहस्थानान्यज्ञानादीनि पुरुषधर्मा एव।

द्वैविध्यानुपपत्तिरनेकाभिधानादिति चेत्? अनेकं निग्रहस्थानं प्रतिज्ञाहान्यादिसूत्रे पठ्यते। तस्माद् द्वे निग्रहस्थाने इत्ययुक्तम्। न, सामान्यभेदविस्तरस्य विवक्षातः प्रवृत्तेः। सामान्यमधिकृत्य द्वे निग्रहस्थाने, भेदविवक्षायां तु द्वाविंशतिधा भेदः। उदाहरणमात्रत्वाच्च भेदस्यानन्त्यमिति।

प्रायेण प्रतिज्ञाद्यवयवाश्रयाणीति **भाष्यम्।** वक्तृविषयकत्वात् प्रतिज्ञाद्यवयवाश्रयत्वमनुपपन्नमिति चेत्? अथ मन्यसे विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थाने इत्यभिधाने प्रतिज्ञाद्याश्रयत्वे[२] कः प्रसङ्ग इति? न, क्रियावचनदोषद्वारेण कर्तृवक्तृणामज्ञत्वोपपत्तेः। क्रियाद्वारेण कर्ता दूष्यते वचनद्वारेण वक्तेति न प्रतिज्ञाद्याश्रयत्वमनुपपन्नम्। न चाधाराधेयभाव आश्रयाश्रयिभावो विवक्षितः[३]। किं तु प्रतिज्ञादिमुखेनोद्भावनमिति।

तत्त्ववादिनमतत्त्ववादिनं चाभिसंप्लवन्त इति **भाष्यम्।** तत्त्ववादिनो निग्रहस्थानानुपपत्तिः प्रतिपादकत्वात्। तत्त्वं ब्रवीतीति प्रतिपादयतीति, प्रतिपादयंश्च निगृह्यत इति न युक्तम्? न, परापदिष्टदूषणदोषानवबोधद्वारेण तदुपपत्तेः। तत्त्ववादी प्रथमपक्षे द्वितीयपक्षवादिना यो दूषणाभास उक्तस्तस्य तत्त्वानवबोधान्निगृह्यते तत्त्वमभिदधानोऽपीति। तत्र वस्तु निर्णीतम्। निर्णीतेऽपि च वस्तुनि दूषणाभासस्याप्रतिपत्त्या निगृह्यत इति। तत्रोदाहरणभेदप्रदर्शनार्थं प्रतिज्ञाहान्यादिसूत्रम्[४] ॥१॥

---

१. °थोपपादनात् C var २. °स्थानमित्यभिधाने प्रतिज्ञाद्यवयवाश्रितत्वे C ३. °श्रितभावोऽभिप्रेतः J ४. C adds the whole sutra here.

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥५।२।२॥

लक्षणं तु **प्रति....हानिः**। प्रतिदृष्टान्तस्य यो धर्मस्तं यदा [१]स्वपक्षे दृष्टान्तेऽभ्यनुजानाति तदा निगृहीतो वेदितव्यः। यथा अनित्यः शब्द ऐन्द्रियकत्वात् घटवदिति कृते[२] सामान्यमैन्द्रियकं दृष्टं नित्यम्। कस्मान्न तथा शब्द इति द्वितीयः। यदि सामान्यमैन्द्रियकं नित्यं दृष्टमिति, घटोऽप्येवमस्त्विति तृतीयः। अनेन [३]किल हेतुदोषेण प्रतिदृष्टान्तधर्म स्वदृष्टान्तेऽभ्यनुज्ञातो भवति। अभ्यनुज्ञानाच्च दृष्टान्तं जहाति। दृष्टान्तं च जहन्निगमनान्तमेव पक्षं जहातीति प्रतिज्ञाहानिरित्युच्यते।

एतत् तु न बुद्ध्यामहे कथमत्र प्रतिज्ञा हीयत इति। हेतोरनैकान्तिकत्वं सामान्यदृष्टान्तेन परेण चोद्यते। एतस्यानैकान्तिकदोषोद्धारमनुक्त्वा स्वदृष्टान्ते नित्यतां प्रतिपद्यते। नित्यताप्रतिपत्तेश्चासिद्धता दृष्टान्तदोषो भवति। सोऽयं दृष्टान्तदोषेण [४]हेतुदोषेण वा निग्रहो न प्रतिज्ञाहानिः। दृष्टान्तं च जहत् प्रतिज्ञामपि जहातीत्युपचारेण निग्रहस्थानम्। न च प्रधानासंभवे उपचारो लभ्यत इति प्रतिज्ञाहानेर्मुख्यो विषयो वक्तव्यः।

कथं तर्हीदं सूत्रं

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः।

इति? दृष्टश्चासावन्ते च व्यवस्थित इति दृष्टान्तः। स्वश्चासौ दृष्टान्तश्चेति स्वदृष्टान्तः। स्वदृष्टान्तशब्देन पक्ष एवाभिधीयते। प्रतिदृष्टान्तशब्देन च प्रतिपक्षः। प्रतिपक्षश्चासौ दृष्टान्तश्चेति। एतदुक्तं भवति [५]प्रतिपक्षस्य यो धर्मस्तं स्वपक्ष [६]अभ्यनुजानातीति। यथा अनित्यः शब्द ऐन्द्रियकत्वादिति। द्वितीयपक्षवादिनि सामान्येन प्रत्यवस्थिते इदमाह— यदि सामान्यमैन्द्रियकं नित्यं दृष्टमिति शब्दोऽप्येवं भवत्विति। एषा प्रतिज्ञाहानिः। प्रागनेन प्रतिज्ञातम् अनित्यः शब्द इति। सामान्येन

---

१. स्वदृष्टान्ते J २. °दित्येकः। C ३. किल प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽभ्यनुजानाति C
४. साधनदोषेण C ५. परपक्षस्य C ६. एवानु° C

अनैकान्तिकत्वेन प्रत्यवस्थित इदमाह नित्य इति, प्राक् प्रमाणावधारितार्थपरित्यागाद्विप्रतिपत्तितो निग्रहस्थानमिति। प्रसङ्गविधानादिति चेत्? अथ मन्यसे नासौ पश्चादपि शब्दस्य नित्यतां प्रतिपद्यते किं तु प्रसङ्गं करोति। यदि सामान्यमैन्द्रियकं नित्यं दृष्टं शब्दोऽप्येवं भवत्विति प्रसङ्गं विधत्ते। तच्च न, अत एव तत्प्राप्तेः। यत एवासौ हेतुदोषोद्धारे कर्तव्ये प्रसञ्जयत्यत एव निगृह्यत इति।

हेतुदोषेण चरितार्थत्वान्न प्रतिज्ञाहानिर्निग्रहस्थानमित्**यन्ये**। अन्ये तु वर्णयन्ति नैवेदं निग्रहस्थानं युक्तं हेतुदोषेण चरितार्थत्वात्। यस्मादैन्द्रियकत्वादित्यस्य हेतोरनैकान्तिकत्वं दोषः। तेनैवायं निगृहीत इति। न, अनैकान्तिकत्वदोषपरिहारद्वारेण विप्रतिपत्तितस्तदुपपत्तेः। तस्यैवानैकान्तिकत्वस्य परिहारं कुर्वाणोऽयं निगृह्यत इत्यतोऽनैकान्तिकत्वं न निग्रहस्थानम् ॥२॥

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥५।२।३॥

उदाहरणं पूर्ववत्। सर्वगतासर्वगतविकल्पेन प्रतिज्ञान्तरं करोति। असर्वगतोऽनित्यः शब्द इति।

तत्रानित्यः शब्द इति पूर्वा प्रतिज्ञा सामान्येनैन्द्रियकेण प्रतिहता। असर्वगतोऽनित्यः शब्द इति प्रतिज्ञान्तरम्। तत् कथं निग्रहस्थानम्, साधनसामर्थ्यापरिज्ञानात्। अपरिज्ञाय साधनसामर्थ्यम्, [१]अनित्यः शब्द इति प्रतिज्ञा। न च प्रतिज्ञा प्रतिज्ञान्तरं[२] साधयति, साधनसामर्थ्यापरिज्ञानात्। तदेतत् प्रतिज्ञान्तरम्। तदिदमप्रतिपत्तितो विप्रतिपत्तितो वा निग्रहस्थानमिति॥३॥

---

१. कुर्वतोऽसर्वगतोऽनित्यः C २. प्रतिज्ञां J

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥५।२।४॥

यत्र प्रतिज्ञा हेतुना विरुध्यते हेतुश्च प्रतिज्ञया, स प्रतिज्ञाविरोधो नाम निग्रहस्थानम्। यथा गुणव्यतिरिक्तं द्रव्यं भेदेनाग्रहणादिति। एतेनैव प्रतिज्ञाविरोधोऽप्युक्तः। यत्र प्रतिज्ञा स्ववचनेन विरुध्यते। यथा श्रमणा गर्भिणीति। हेतुविरोधोऽपि, यत्र प्रतिज्ञा हेतुना विरुध्यते। यथा सर्वं पृथक् समूहे भावशब्दप्रयोगादिति। एतेन प्रतिज्ञया दृष्टान्तविरोधोऽपि वक्तव्यः। हेतोश्च दृष्टान्तादिभिर्विरोधः। प्रमाणविरोधश्च प्रतिज्ञाहेत्वोर्वक्तव्यः। परपक्षसिद्धेन गोत्वादिनानैकान्तिकत्वदेशनाद् विरुद्धः। यः परपक्षसिद्धेन गोत्वादिना व्यभिचारयति, तद् विरुद्धमुत्तरं वेदितव्यम्। स्वपक्षानपेक्षं च यथा यं स्वपक्षानपेक्षं हेतुं प्रयुङ्क्ते अनित्यः शब्द ऐन्द्रियकत्वादिति, स स्वसिद्धस्य गोत्वादेर्नित्यत्वविरोधाद् विरुद्धः। उभयपक्षसंप्रतिपन्नस्त्वनैकान्तिकः। यदुभयपक्षसंप्रतिपन्नं वस्तु, तथात्वेन तेनानैकान्तिकदेशनेति। दृष्टान्ताभासास्तु कस्मात् निग्रहस्थानेषु नोक्ताः? हेत्वाभासपूर्वकत्वाद् दृष्टान्ताभासानां तदभिधानेनैवोक्ता वेदितव्या इति॥४॥

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः॥५।२।५॥

यः प्रतिज्ञातमर्थं प्रतिषेधे कृते परित्यजति स प्रतिज्ञासन्न्यासो वेदितव्यः। उदाहरणं पूर्ववत्। सामान्येनानैकान्तिकत्वे [१]हेतौ कृते ब्रूयात् कश्चैवमाहानित्यः शब्द इति? एतत्साधनस्य सामर्थ्यापरिज्ञानात्[२] विप्रतिपत्तितो निग्रहस्थानमिति॥५॥

---

१. हेतोः C २. परिच्छेदात् C

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥५।२।६॥

उदाहरणं **भाष्ये**। साधनान्तरोपादाने पूर्वस्यासामर्थ्यख्यापनात् निग्रहस्थानम्। सामर्थ्ये वा पूर्वस्य हेत्वन्तरं व्यर्थमिति॥६॥

॥प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम्॥

[प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्य-निग्रहस्थानचतुष्कप्रकरणम्]

प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम्॥५।२।७॥

उदाहरणं **भाष्ये**। अभ्युपगतार्थासङ्गतत्वान्निग्रहस्थानम्। यदभ्युपगतं तत्संबद्ध-मन्यदसंबद्धमुच्यत इति॥७॥

वर्णक्रमनिर्देशवन्निरर्थकम्॥५।२।८॥

उदाहरणं **भाष्ये**। साधनानुपादानादज्ञानम्। एवं ब्रुवन्न साधनं साध्यं जानीत इति न साध्यं न साधनं चोपादत्त इति निगृह्यते॥८॥

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥५।२।९॥

उदाहरणं **भाष्ये**। असामर्थ्यख्यापनान्निग्रहस्थानम्। असामर्थ्यं चाज्ञानमिति॥९॥

पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकम्॥५।२।१०॥

यथा दशदाडिमादिवाक्यम्। निरर्थकापार्थकयोरभेद इति चेत्? अथ मन्यसे निरर्थकादपार्थकं न भिद्यते। तत्राप्यर्थो न गम्यत इहापीति? भिद्यत इति ब्रूमः। कथम्? तत्र हि वर्णमात्रमिह तु पदान्यसंबद्धानि। तत् कथं निग्रहस्थानम्? वाक्याद् ऋते न विशेषावगतिरिति साधनसामर्थ्यापरिज्ञानात् निग्रहस्थानम्॥१०॥

॥इति प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कप्रकरणम्॥

[स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणम्]

अवयवविपर्यासवचनमप्राप्तकालम्॥५।२।११॥

अवयवानां विपर्ययेणाभिधानं निग्रहस्थानम्। नैवमपि सिद्धेरित्**येके**। एके तु ब्रुवते नैतन्निग्रहस्थानमेवमपि सिद्धेरिति। समयानभ्युपगमाच्च। न च वयमेवं समयं प्रतीच्छाम इति। प्रयोगाच्च। प्रयुक्तश्चावयवव्यत्ययः सर्वशास्त्रेष्विति कस्यायं समय इति। यत्तावन्नैवमपि सिद्धेरिति, प्रयोगापेतशब्दवदेतत् स्यात्। यथा गौरित्यस्य पदस्यार्थे गावीति[1] प्रयुज्यमानं पदं ककुदादिमन्तमर्थं प्रतिपादयतीति। न च शब्दान्वाख्यानं व्यर्थम्। अनेन शब्देन गोशब्दमेवासौ प्रतिपद्यते, गोशब्दात् ककुदादिमन्तमर्थम्। तथा प्रतिज्ञाद्यवयवविपर्यासेनानुपूर्वी प्रतिपद्यते, आनुपूर्व्या चार्थमिति। एतत् कथमिति? पूर्वं तावत् कर्मोपादीयते ततः करणम्। मृत्पिण्डाद्युदाहरणम् अनेकधा लोक इति। यत्पुनरेतत् समयानभ्युपगमादिति? नायं समयोऽपि त्वर्थस्यानुपूर्वी। सोऽयमर्थस्यानुपूर्वीमन्वाचक्षाणो नाभ्याख्येय इति। यत् पुनरेतत् प्रयोगादिति? न, निग्रहस्थानविषयापरिज्ञानात्। शास्त्रे वाक्या-

---

१. गौर्गीति J

न्यर्थसंग्रहार्थमुपादीयन्ते। संगृहीतं त्वर्थं वाक्येन प्रतिपादयिता प्रयोगकाले प्रतिज्ञादिकयानुपूर्व्या प्रतिपादयतीति॥११॥

हीनमन्यतमेनाप्यवयवेन न्यूनम्॥५।२।१२॥

यस्मिन् वाक्ये प्रतिज्ञादीनामन्यतमोऽवयवो न भवति तद्वाक्यं न्यूनं वेदितव्यम्। तत् कथं निग्रहस्थानम्? न साधनाभावे साध्यसिद्धिरिति।

एके तु प्रतिज्ञान्यूनं वाक्यं नास्तीत्याचक्षते। एतत्तु न युक्तम्। प्रतिज्ञामन्तरेण प्रयोगो विकल्पतः पर्यनुयोज्यः। यः प्रतिज्ञान्यूनं वाक्यं ब्रूते किमयं निगृह्यत अथ नेति? यदि निगृह्यते? कतमत् निग्रहस्थानमिति? न हि हेत्वाभासादयोऽत्र सन्तीति। न च हेत्वादिदोषाः सन्तीति, निग्रहं चाभ्युपैति। तस्मात् प्रतिज्ञान्यूनमेवेति। अथ न निग्रहः? न्यूनं वाक्यमर्थं साधयतीति साधनाभावे सिद्धिरभ्युपगता भवति। यत्तु ब्रवीषि सिद्धान्तपरिग्रह एव प्रतिज्ञा, एतदपि न बुद्ध्यामहे। कर्मण उपादानं प्रतिज्ञा। सामान्यविशेषवतोऽवधारितस्य वस्तुनः परिग्रहः सिद्धान्त इति॥१२॥

हेतूदाहरणाधिकमधिकम्॥५।२।१३॥

यस्मिन् वाक्ये हेतू द्वौ दृष्टान्तौ द्वौ तद्वाक्यमधिकं निग्रहस्थानमाधिक्यात्। तच्च न दार्ढ्यादित्येके। एके तु ब्रुवते नेदं निग्रहस्थानं दार्ढ्यात् दार्ढ्यं हि ज्ञाप्यस्य भूयोभिर्ज्ञापकैर्दृष्टं यथा धूमालोकाभ्यामग्नेरिति। न, दार्ढ्यानभिधानात्। भूयोभिर्ज्ञापकैर्दार्ढ्यं भवतीति न दार्ढ्यार्थोऽभिधीयते, किं ब्रवीषि दार्ढ्यादिति? सुतरां प्रतिपत्तिर्दार्ढ्यमिति? तदपि तादृगेव, किमुक्तं भवति सुतरामिति? अथ ब्रवीषि द्वे अपि ज्ञापके? सत्यं द्वे अपि ज्ञापके। एकेनैवाभिधानात् व्यर्थमभिधानं

द्वितीयस्य[१]। प्रकाशिते प्रदीपान्तरोपादानवदिति। अनवस्था वा, प्रकाशितेऽपि साधनान्तरोपादानादिति ॥१३॥

॥स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणम्॥

[पुनरुक्तनिग्रहस्थानप्रकरणम्]

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्॥५।२।१४॥

शब्दपुनरुक्तम् अनित्यः शब्दोऽनित्यः शब्द इति। अर्थपुनरुक्तमनित्यः शब्दो निरोधधर्मको ध्वान इति। अनुवादे त्वपुनरुक्तमर्थविशेषोपपत्तेः।

नाबाधनादित्**येके**। एके तु ब्रुवते, नेदं निग्रहस्थानमबाधनात्। न हि परीक्षाविधेः पुनर्ब्रुवता किञ्चिद् बाध्यते। परप्रतिपादनार्थं च वाक्यप्रयोगः। पुनरभिधानेन सुतरामर्थं प्रतिपद्यत इति न निग्रहस्थानं प्रतिपादकत्वात्। सत्यं प्रतिपादयति। प्रतिपादितार्थप्रतिपादकत्वाद् वैयर्थ्यं स्यात्। वैयर्थ्यान्निग्रहस्थानं साधनविषयापरिज्ञानात्। न चायं शिष्यो न गुरुः तस्मात् नायं पुनः प्रतिपाद्यत इति ॥१४॥

अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ॥५।२।१५॥

अर्था ..... पुनर्वचनं पुनरुक्तम्। पूर्ववन्निग्रहस्थानमिति ॥१५॥

॥पुनरुक्तनिग्रहस्थानप्रकरणम्॥

---

१. °स्यापि J

[उत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम्]

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम्॥५।२।१६॥

शेषं **भाष्ये**। न, उत्तरेणावस्थानात् नेदं निग्रहस्थानमिति **केचित्**। उत्तरेणावस्थानात्। उत्तरेण गुणदोषवता मूढत्वामूढत्वं गम्यत इति किं पुनरुच्चरितेनास्ति? अस्ति हि उत्तरे कश्चित् समर्थो दृश्यते न प्रत्युच्चारणे। नासौ तावता निग्रहस्थानमर्हति। यश्चारभ्य स्वपक्षं न निर्वाहयेत् तस्य स्यात् खलीकारमात्रमिति। नोत्तरविषयापरिज्ञानात्। यद्ययं न प्रत्युच्चारयति, निर्विषयमुत्तरं प्रसज्यते। अथोत्तरं ब्रवीति? कथं नोच्चारयति? तदिदं व्याहतमुच्यते, नोच्चारयति, उत्तरं च ब्रवीतीति। अप्रतिज्ञानाच्च। नेदं प्रतिज्ञायते पूर्वमुच्चारयितव्यम्, पश्चादुत्तरमभिधेयम्। अपि तु यथाकथञ्चिदुत्तरं वक्तव्यम्। उत्तरं चाश्रयाभावे न युक्तमिति युक्तमप्रत्युच्चारणं निग्रहस्थानमिति॥१६॥

अविज्ञातं चाज्ञानम्॥५।२।१७॥

स्फुटं **भाष्ये**। अप्रतिपत्तितो निग्रहस्थानम्॥१७॥

उत्तरस्याप्रतिपत्तिरप्रतिभा॥५।२।१८॥

श्लोकादिपाठादिभिरवज्ञां दर्शयन्नोत्तरं प्रतिपद्यत इति। तदप्रतिभा नाम निग्रहस्थानम्, मूढत्वादिति॥१८॥

कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥५।२।१९॥

यत्र कर्तव्यं कार्यं व्यासज्य कथां विच्छिनत्ति, स विक्षेपो विज्ञेयः। यथा रसालया मया भुक्तम्, प्रतिश्यायकणो मे कण्ठं क्षिणोतीत्येवमादि। तत् कथं निग्रहस्थानम्? अज्ञाननिगूहनार्थं तु प्रत्युक्तमज्ञानमेव परिहारेणाविष्करोति॥१९॥

॥उत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम्॥

[दोषनिरूप्यमतानुज्ञादिनिग्रहस्थानत्रिकप्रकरणम्]

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥५।२।२०॥

यः परेण चोदितं दोषमनुद्धृत्य भवतोऽप्ययं समानो दोष इति ब्रवीति सा मतानुज्ञा परमतं स्वमतेऽनुजानाति। उदाहरणं भवांश्चौरः पुरुषत्वादिति, स तं प्रति ब्रूयात् भवानपीति। सोऽभ्युपगम्य दोषं परपक्षेऽभ्यनुजानातीति निगृहीतो वेदितव्यः। अनभ्युपगच्छता न पुरुषत्वं चौर्यहेतुरिति वक्तव्यम्। किं तु परस्वेनानतिसृष्टेन संबन्धः। एतदुत्तरापरिज्ञानात् निगृह्यत इति।

प्रसङ्गविधानात् न निग्रहस्थानमित्**यन्ये**। अपरे तु ब्रुवते नैतत् निग्रहस्थानं प्रसङ्गविधानात्। नैवासौ पश्चादपि तं दोषं प्रतिपद्यते। अपि तु प्रसङ्गं करोति। यदि पुरुषत्वाच्चौरो भवति, भवानपि पुरुषः, तस्मात् चौर इति। एतत् तु नात एव। यत एवायमुत्तरे वक्तव्ये प्रसङ्गं करोति, अत एवोत्तरापरिज्ञानान्निगृह्यत इति॥२०॥

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम्॥५।२।२१॥

यो निग्रहस्थानप्राप्तं न निगृह्णाति स निगृहीतो वेदितव्यः, निग्रहस्थानप्राप्तस्यापरिज्ञानात्। नान्यवचनादित्**यन्ये**। अन्ये ब्रुवते नेदं निग्रहस्थानम् अन्यस्योत्तरस्याभिधानात्। यस्मादसौ निग्रहस्थानप्राप्तं न निगृह्णाति ब्रुवन्नन्यदुत्तरमभिधत्त इति। तच्च नात एव। यत एवासौ निग्रहस्थाने वक्तव्ये अन्यदभिधत्तेऽत एव निगृह्यते, जानानो ह्यसौ किमर्थमन्यद् ब्रवीति॥२१॥ 5

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः॥५।२।२२॥

अनिग्रहस्थान एवाभिधत्ते निगृहीतोऽसीति। एतन्निग्रहस्थानापरिज्ञानात् निग्रहस्थानमिति॥२२॥ 10

॥दोषनिरूप्यमतानुज्ञादिनिग्रहस्थानत्रिकप्रकरणम्॥

[कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम्]

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः॥५।२।२३॥

अस्योदाहरणं स्फुटं **भाष्ये**। प्रतिज्ञातार्थव्यतिरेकेणाभ्युपेतार्थपरित्यागात् निगृह्यत इति॥२३॥ 15

हेत्वाभासाश्च यथोक्ताः ॥५।२।२४॥

यथैव विभक्ता लक्षणेन, तथैव तेषां निग्रहस्थानभाव इति।

त इमे प्रमाणादय उद्दिष्टाः प्रथमसूत्रे, लक्षिताः प्रथमेऽध्याये, परीक्षिताः शेषेष्विति त्रिविधा[१] तन्त्रस्य[२] परिसमाप्तिरुक्ता वेदितव्येति ॥२४॥

॥कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम्॥

जातीनां सप्रपञ्चानां निग्रहस्थानलक्षणम्।
शास्त्रस्य चोपसंहारः पञ्चमे परिकीर्तितः॥
यदक्षपादप्रतिमो[३] भाष्यं वात्स्यायनो जगौ
अकारि महतस्तस्य भारद्वाजेन वार्त्तिकम्॥

॥इति न्यायवार्त्तिके पञ्चमाध्यायस्य द्वितीयाह्निकम्॥
॥पञ्चमाध्यायः समाप्तः॥

॥श्रीपरमर्षिभारद्वाजपाशुपताचार्यश्रीमदुद्द्योतकरकृतं
न्यायवार्त्तिकं समाप्तम्॥

---

१. शेषेण त्रिधा J २. तत्त्वस्य C ३. प्रतिभो C

विशिष्टनामसूची

अक्षपाद १, ५३०
अध्यात्मविद्या ११, २०
अन्ये (दिग्नागाचार्याः) ४६, १२२
अन्ये (बौद्धाः) ८३, ९५, ११८
अन्ये (सांख्याः) २७०
अन्ये ११३, १२७(२), १२८, १४६, २६८, २६९, ३६६, ४४३, ४६०, ५२१, ५२८, ५२९
अपर एकान्त ४४५, ४४८, ४५१
अपरे (दिग्नागाचार्याः) १३, ३१, ३९, ५१, १०२
अपरे (नैयायिकैकदेशिनः) ३४, १३३(२), ३९९, ४०१
अपरे (बौद्धाः) १२४, २२१
अपरे (वसुबन्धवः) ३८, ५०, १४२
अपरे (वैशेषिकाः) ३५६
अपरे (सांख्याः) ३५२
अपरे (स्वभाववादिनः) ४४१
अपरे २७, ४२, ४५, ९२, १०१, १२७, १४६, १४८, १५५, १६४, १९३, २०१, २१५, २२६, २६८(२), २७९, ३२५, ३३९, ३९३, ४२१, ४३२, ४३७, ४४२, ४४८, ४६०(३), ५०६, ५११

आन्वीक्षिकी ११, २०
आयुर्वेद २५७, २५८

इतर ४२

उपनिषत् ११

एके (जैनाः) १०२
एके (दिग्नागाचार्याः) ११३
एके (बौद्धाः) ३१
एके (नैयायिकैकदेशिनः) ३४, ४१
एके (वेदान्तिनः) ८१
एके (मीमांसकाः) २२१
एके १०, १४, ४२, ४५, ७६, ७७, २२३, २३७, २६३, २६८(२), २७८, २८२, ३१९, ३९३, ४३७, ४३८, ४६०, ५२४, ५२५(२), ५२६
एकेषाम् १२५

औलूक्य १५९

कस्यचित् (सांख्यस्य) २३६
कस्यचित् ४०२
काश्यपीय (दर्शन) ३९०
काश्यपीय (लक्षण) ९४
केचित् (दिग्नागाचार्याः) १०१
केचित् (नैयायिकैकदेशिनः) ८७
केचित् (बौद्धाः) १०७, ३०७
केचित् (सिद्धान्त्येकदेशिनः) २२३
केचित् १२, २१, २७(२), ८०, ८९, १०३, १३३, १३६, १४६, १६२, २२४, २५८, २६१, २८२(२), ३०३, ३६६, ४३३(३), ४६८
कैश्चित् (वसुबन्धुभिः) १०७
क्षणिकवादिन् ३८३

ग्रन्थकार (गौतम) १४९

चित्रवाद ४७५

जातिवादिन् ४९८, ५१६

तक्षशिला २११
तथागत ३९, ३३३
ताथागतदर्शन ३२१
त्रयी ११, २०

दण्डनीति ११, २०

नारिकेलद्वीपवासिन् २५९
नास्तिक १४, ४१५
नैयायिक १००, १०९, १११, १४९
नैरात्म्यवादिन् ६१
न्यायविद्या २०

पर (बौद्ध) ६९, ३२७
परेण (? प्राचीनसांख्याचार्येण) २११
पाण्ड्य २११
पारमर्ष सूत्र (वैशेषिक सूत्र) २११
प्रधानकारणिकाः ४३३
प्रावादुक ४३०

ब्राह्मण (शास्त्र) २५५

भदन्त (दिग्नाग) ३९, ५४
भदन्त (बौद्ध) ३२१
भदन्त (वसुबन्धु) १०१
भाष्य (न्यायभाष्य) १४, १८, २२, passim
भाष्यकार (वात्स्यायन) १४९

मथुरा २११
मनु २५५, २६०
मुनि (व्यास) ४६३
मुनि ४७६

ये (बौद्धाः) ८३
ये (सांख्याः) ७५
ये ९४, १६६, १९५, २६०, २७०, ३९०, ४३४, ४४०
योग (दर्शन) १४, १००

वात्स्यायन ५३०
वादविधान १४७
वादविधानटीका ११०
वादविधि १११
वार्ता ११, २०
वृत्ति ११९, १२१, १४९
वृद्धाः २६२
वैशेषिक १००, १०८, ११३

शास्त्र (अभिधर्मकोश) ४५०
शास्त्र (अष्टाध्यायी) १९०
शास्त्र (बौद्धशास्त्र) ३९१
शास्त्र (वैशेषिकशास्त्र) ४९, २१२, २७३
श्रुघ्न १०४

सत्कार्यवाद ४२०, ४२१
सत्कार्यवादिन् ४५८, ४५९
सनक २१
सर्वनित्यतावादिन्, सर्वनित्यवादिन् ३५३, ४५८
सर्वानित्यत्ववादिन् ४३
सर्वामिसमयसूत्र ३२१
संख्यैकान्तवाद ४५४
सांख्य (दर्शन) १४, १००
सांख्याः ३७६
सूत्र (न्यायसूत्र) ३, १४, १७, passim
सूत्र (बौद्धसूत्र) ३९, १४४, १४९, १५०, ३२२
सूत्र (वैशेषिकसूत्र) २२०, ३०४, ३२५, ३५६
सूत्रकार (गौतम) ११, ५९, १०८, १४१, २८३
सूत्रकार (कणाद) २२०, २२५
सौत्रान्तिक १२१

अवतरणसूची

अग्निर्हिमस्य भेषजम्		२५५
अग्निहोत्रं जुहुयात्		२५१, २५४
अज्ञो जन्तुरनीशोऽयम्	[महाभारतम् ३.३०.२८]	४४१
अद्रव्यत्वात् परमाणा	[द्रः वै. सू. (च) ४.१.७]	२२०
अनित्यं प्रत्यक्षम्	[बौद्धागमे]	३९
अनुदिते होतव्यम्		२५३
अनुमानं तर्कः		१३३
अनुमानं युक्त्यपेक्षं तर्कः		१३४
अनुमेयेऽथ तत्तुल्ये	[प्रमाणसमुच्चये]	५१
अनेकद्रव्येण द्रव्येण	[द्रः वै. सू. (च) ४.१.९]	१५३, ३५६
अनेन रसगन्धस्पर्शेषु	[द्रः वै. सू. (च) ४.१.१०]	१५३
अन्नं वै प्राणिनः प्राणाः		७८
अन्नं वै प्राणा		४६२
अव्ययाल्लोपः	[पा. सू. २.४.८२]	२९८
अश्वोऽयं विषाणित्वात्	[द्रः वै. सू. (च) ३.१.१२]	११३, ११९
अहङ्कारालम्बनोत्पत्ति		३२३
आत्मा शरीरं करणं	[उद्योतकरस्य]	४२२
इन्द्रियार्था ह्यनर्थाय	[व्यासस्य ?]	४७७
इषावयुगपत् संयोग	[वै. सू. (च) ५.१.१६]	१३२
उदाहरणसाधर्म्याच्च	[द्रः प्रमाणसमुच्चयः]	११३
उदिते होतव्यम्		२५३
उपनयनिगमने तु	[बौद्धस्य]	१२९
एकद्रव्यमगुणं संयोग	[वै. सू. (च) १.१.१६]	२११
कर्तुरीप्सिततमं कर्म	[पा. सू. १.१.४९]	१०६
कर्मणो वासनान्यत्र	[विज्ञप्तिमात्रतासिद्धिः, विंशतिका ७]	४९१
कामं कामयमानस्य	[महाभारतम् (गीताप्रेस) १३.९३.४३]	४६३
कामेऽष्टद्रव्यकोऽणुः	[द्रः अभिधर्मकोशः २/२२]	७१
कामेऽष्टद्रव्यकोऽणुरशब्दः	[द्रः अभिधर्मकोशः २/२२]	४५०

कारके	[पा. सू. १.४.२३]	१९०
कारणतो विकारात्	[वै. सू. (च) २.२.३४]	१०८
कारणमहत्त्वबहुत्व	[द्र: वै. सू. (च) ७.१.१६]	३५५
कारणाभावात् कार्याभाव:	[वै. सू. (च) १.२.१]	२९२
कार्योत्पत्तिर्विना तेन	[सांख्यस्य]	२११
क्षणिका: संस्कारा:	[बौद्धागमे]	३९
गुरुत्वं निरपेक्षम्	[द्र: वै. सू. (च) ५.१.७]	२१२
गौर्विषाणित्वात्	[द्र: वै. सू. (च) ३.१.१२]	११८
ग्रामकामो यजेत		२५८
ग्राह्यधर्मस्तदंशेन	[दिग्नागस्य]	१२४
चार्थे द्वन्द्व:	[पा. सू. २.२.२९]	५८, ७५
जातीनां सप्रपञ्चानां	[उद्योतकरस्य]	५३०
जीवन्नेव विद्वान्		४७१
जीवन्नेव हि विद्वान्		२२
ततोऽर्थाद् विज्ञानम्	[वसुबन्धो:]	३८
तत्त्वं भावेन	[वै. सू. (च) २.१.२८]	४९
तत्र य: सन् सजातीये	[प्रमाणसमुच्चये]	१२२
तथायुक्तं चानीप्सितम्	[पा. सू. १.४.५०]	१८९
तथा सिद्धो दृष्टान्त:		१२८
तन्त्रप्रतिज्ञासंसार:	[उद्योतकरस्य]	१७३
तयो: संबन्धनिदर्शनम्	[बौद्धस्य]	१२८
तस्य भावस्त्वतलौ	[पा. सू. ५.१.११९]	२६९
तादृगविनाभावि	[बौद्धस्य]	५१, १२४
ते साधनदूषणै:	[बौद्धस्य]	१४४, १५०
दिग्देशभेदो यस्यास्ति	[विज्ञप्तिमात्रतासिद्धि:, विंशतिका १४]	४८५
दूषणमात्रं वितण्डा		१५५
द्रव्यगुणकर्मनिष्पत्ति	[द्र: वै. सू. (च) ५.२.२१]	३२५
द्वादश मासा: संवत्सर:		२५४
न तच्चक्षुषि नो रूपे	[बौद्धस्य]	३४१
न तद्वतोऽस्वतन्त्रत्वात्	[द्र: तद्वतो नास्वतन्त्रत्वात्, प्रमाणसमुच्चये]	३१०
नाकामयमान:		४२४

नान्तरीयकार्थदर्शनम्	[वसुबन्धोः]	५०
नामजात्यादियोजना	[प्रमाणसमुच्चये]	३९
निरपेक्षं गुरुत्वं कर्मकारणम्	[द्रः वै. सू. (च) ५.१.७]	२७३
निर्णयोऽनुमानम्		१३६
नोदनाभिघातात् संयुक्त	[वै. सू. (च) ५.२.१]	२२५
पक्षधर्मत्वसंबन्ध		१३०
पक्षो यः साधायितुमिष्टः	[वसुबन्धोः]	१०७, ११०
पञ्च भिक्षवः संज्ञाभेदमात्रम्	[बौद्धशास्त्रम्]	३९१
परपक्षवचनं प्रतिज्ञा	[बौद्धस्य]	१४५
परार्थाश्चक्षुरादयः	[सांख्यानाम्]	३२६
पृथिवीं ते		३५०
प्रत्यक्षमिन्द्रियार्थ		४०
प्रत्यक्षं कल्पनापोढम्	[प्रमाणसमुच्चये]	३९
प्रवृत्तिदोषसंसिद्धिः	[उद्योतकरस्य]	४९६
भारं च वो भिक्षवो	[बौद्धागमे]	३२२
भूतसंसर्गोऽविप्रतिषिद्धः	[द्रः वै. सू. (च) ४.२.३]	३४९
भूमिरावपनं महत्		२५४
मणिः प्रभाया आश्रयः		१८८
यदक्षपादप्रतिमो भाष्यम्	[उद्योतकरस्य]	५३०
यदक्षपादः प्रवरो	[उद्योतकरस्य]	१
यदा स देवो जागर्ति	[मनुसंहिता १.५२]	४४१
यन्निरपेक्षं संयोगविभाग	[द्रः वै. सू. (च) १.१.१९]	६७
यस्माद् विषाणी तस्मादश्वः	[द्रः वै. सू. (च) ३.१.१२]	२९०
यावदात्मनि धर्माधर्मौ	[वैदिकाचार्यस्य]	२४
रामरावणयोर्युद्धं	[रामायण (गीताप्रेस) ६.१०७.५२ क ख]	२४४
रूपं नाहम्	[बौद्धागमे]	३२३
रूपं भदन्त नाहम्	[बौद्धागमे]	३२१
रूपसंस्काराभावात्	[वै. सू. (च) ४.१.८]	२२०
रूपस्पर्शवद्भि तेजः	[द्रः वै. सू. (च) २.१.३]	३५५
रूपादिस्कन्धेष्वहङ्कार		३२४
रूपोपलब्धिसंवर्तकेन		३१

वर्षातपाभ्यां किं व्योम्नः		३३४
विचारणायामिष्टोऽर्थः	[वसुबन्धोः]	१०१, १०९
विनयादिभ्यष्ठक्	[पा. सू. ५.४.३४]	२७१
विरुद्धार्थानिराकृतः	[वसुबन्धोः ?]	११०
शुचि नरशिरः कपालं	[तान्त्रिकाणाम्]	१३
शुश्रूषाश्रवण	[सांख्यस्य]	१३२
श्रोत्रादिवृत्तिः	[वार्षगण्यतन्त्रे]	४०
षट्केन युगपद् योगात्	[विज्ञप्तिमात्रतासिद्धिः, विंशतिका १२]	४८४
सत्त्वरजस्तमसां	[सांख्यस्य]	२३६
सत्संप्रयोगे पुरुष	[जै. सू. १.१.५]	४०
सन्धिविग्रहाभ्यां	[नीतिशास्त्रे]	११५
समयाध्युषिते होतव्यम्		२५३
समवस्थानं संयोगः		२३५
संबन्धादेकस्मात्	[वार्षगण्यतन्त्रे]	५३
संयोगस्त्वप्रतिषिद्धो	[द्रः वै. सू. (च) ४.२.३]	३७२
संयोगाभावे गुरुत्वात्	[वै. सू. (च) ५.१.७]	२७३
संशयस्य प्रमाणानां	[उद्योतकरस्य]	३१८
साधकतमं करणम्	[पा. सू. १.४.४२]	१०६
साधयितुमिष्टः पक्षः	[वसुबन्धोः]	१४३
साध्यत्वेनेप्सितः पक्षः	[वसुबन्धोः ?]	११०
साध्याभिधानं प्रतिज्ञा	[वादविधौ]	१११
साध्येनानुगमो हेतोः	[बौद्धस्य]	१२८
सामान्यप्रत्यक्षात्	[वै. सू. (च) २.२.१९]	९४
सामान्यविशेषेषु सामान्य	[वै. सू. (च) ८.५]	३०४
सूर्यं ते चक्षुर्गच्छतु		३५०
सूर्यं ते चक्षुः स्पृणोमि		३५०
स्वपरपक्षयोः	[वसुबन्धोः]	११४, १४२, १४५, १४८
स्वयं साध्यत्वेनेप्सित	[बौद्धस्य]	११०
हेतुर्विपक्षाद् विशेषः	[बौद्धस्य]	११५, ११८, १२१